पाणिनीय-लिङ्गानुशासन-कोषः



शिष्यान् स्वान् शब्द-लिङ्ग,-मुपदिशन् पाणिनिर्महामुनिरयम्।
केन नहि वन्दनीयो, वारं वारं शमिच्छताऽत्र?।।

-: रचयिता :-

महामहिम-राष्ट्रपति-सम्मानिताचार्य-

...म.-पण्डित-श्रीनवलकिशोरकाङ्कर-ज्येष्ठात्मजः

...नारायणशास्त्री काङ्करः विद्यालङ्कारः डी.लिट्.

महामहिम-राष्ट्रपति-सम्मानितः

101

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by S3 Foundation USA

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by S3 Foundation USA

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by S3 Foundation USA

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by S3 Foundation USA

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by S3 Foundation USA

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by S3 Foundation USA

श्री:

श्रीमन्मान्या: प्रणौमि
समादरकारू पाद-पद्मयो भवत: ।
कोषेऽस्मिन्नल्पमोघ-
शुभाशिषं स्वां दत्त्वानुगृहीतम् ॥

कोषं परावर्त्तयितु
पुनर्मुद्रित-स्व-शुभाशिषा युतम्
लप्स्यते भवानेतं
सम्प्रहितमितो मया भवते ॥

सदैव विनत:

[illegible]

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by S3 Foundation USA

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by S3 Foundation USA

आत्म-कथ्यम्

संस्कृतं नाम दैवी वाग् अन्वाख्याता महर्षिभिः। स्वभाषा-सत्त्वाद् देवतानां संस्कृतस्य व्यवहारे शब्दानां लिङ्ग-विषयकं स्खलनं भवेद् न वा, परन्तु मनुष्याः यदा तेषां संस्कृत-भाषां व्यवहरन्ति, तदा शब्दानां लिङ्ग-विषयकं स्खलनं सामान्य-जनानां सम्बन्धे तु किं कथनीयं ? विश्वविद्यालयस्य सर्वोच्चोपाधिं प्राप्तवतां महा-महताम् आचार्याणां विद्यावारिधि-वाचस्पति-M.A.-Ph.D.-D.Litt.-पदवीधराणां द्राक्तराणाम् अपि सञ्जायते एव।

कारुणिकाः वैयाकरणाः कोशकाराः च शब्दानां लिङ्गस्य निदर्शने स्व-स्व-विवेकेन समये समये बहु किञ्चित् प्रशंसनीयं कार्यं कृतवन्तः। तेन संस्कृत-व्यवहर्त्तृभ्यः सुविधा अपि मिलिता। परन्तु सा पर्याप्ता नैव कथयितुं शक्यते। विना व्याकरण-ज्ञानं लिङ्ग-विषयकं ज्ञानम् अपूर्णम् एव तिष्ठति। इदम् एव तु विदित्वा महाभाष्यकारेण कथनीयम् अभूत्-'लिङ्गमशिष्यं लोकाश्रयत्वाल्लिङ्गस्य' इति।

वैयाकरणाः कोशकाराः च तु लोक-प्रचलित-शब्दानां लिङ्गस्य एंव परिगणनं कुर्वन्ति, स्व-स्व-रीत्या च तद् बोधयन्ति। अग्रे चलित्वा ते एव वैयाकरणाः कोशकाराः च तेषां शब्द-लिङ्गानां नियामकाः प्रमाणकाः च सञ्जायन्ते। पुनः तद्-विपरीतम् आचरण-कर्त्तारः प्रमादि-कोटौ गण्यन्ते।

लोक-व्यवहारे कश्चित् शब्दः केवलं पुँल्लिङ्गे, केवलं स्त्रीलिङ्गे, केवलं नपुंसकलिङ्गे च एव अस्ति, तर्हि कश्चित् शब्दः पुँल्लिङ्गे नंपुसकलिङ्गे च अपि। एवम् एव कश्चित् शब्दः पुँल्लिङ्गे स्त्रीलिङ्गे च अपि व्यवहृतः भवति। कस्यचित् शब्दस्य स्त्रीलिङ्गे पुँल्लिङ्गे नपुंसकलिङ्गे उभयथा व्यवहारः जायते। केचित् शब्दाः ईदृशाः अपि सन्ति ये त्रिषु लिङ्गेषु व्यवह्रियन्ते। एषां सर्वेषां कारणं कोशैः सुस्पष्ट-रूपे ज्ञातं न भूत्वा व्याकरणस्य सम्यग् अध्ययनेन एव भवति- इदम् अस्ति त्रिकाल-सत्यम्।

अस्यां दिशायां वैयाकरण-शिरोमणि-पाणिनि-मुनि-महानुभावस्य समस्तं जगत् ऋणि वर्त्तते। अनेन यद् व्याकरणं विरचितं- तद् महाद्भुत-वैज्ञानिक-शैल्यां निबद्धत्वाद् आधुनिक-धुरन्धर-वैज्ञानिकान् अपि नतमस्तकान् चरीकर्त्ति।

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by S3 Foundation USA

साम्प्रतिक-परीक्षाणां पाठ्यक्रमे तद् इदं पाणिनीयं व्याकरणम् अवश्यम् एक-स्वतन्त्र-विषयस्य रूपे सन्निविष्टं विद्यते, परन्तु अत्रत्यं महत्त्व-पूर्णं लिङ्गानुशासनं प्रकरणं नैव पाठ्यते। अस्मात् कारणात् एव संस्कृते आचार्य-विद्यावारिधि-वाचस्पति-M.A.-Ph.D.-D.Litt.-प्रभृति-परीक्षाः समुत्तीर्णानाम् अपि संस्कृतस्य व्यवहारे लिङ्ग-विषयकं स्खलनं सञ्जायते एव।

एतां न्यूनतां दूरीकर्त्तुम् एव पाणिनीय-लिङ्गानुशासने निर्दिष्टान् समस्तान् शब्दान् वर्णमाला-क्रमेण सङ्कलय्य तेषां व्याख्या अस्मिन् पाणिनीय-लिङ्गानुशासन-कोषे अनेन प्रकारेण प्रस्तुता कृता अस्ति येन जिज्ञासुः तत्कालं वाञ्छित-शब्दस्य लिङ्गं सहेतुकं जानीयात्।

सह एव इह इदम् अपि दर्शयितुं प्रयतितं यत् सः शब्दः वेदेषु, ब्राह्मणेषु, उपनिषत्सु, स्मृतिषु, कोशेषु, निघण्टौ, निरुक्ते, रामायणे, पुराणेषु, महाकाव्येषु आदिषु कुत्र कुत्र प्रयुक्तः अस्ति।

परिशिष्टस्य रूपे १८९ मूलपाणिनीय-लिङ्गानुशासन-सूत्राणि प्रदाय तेषां व्याख्या अपि प्रस्तुता कृता। अन्ते पाणिनीय-लिङ्गानुशासनेन सम्बद्धाः सर्वे अपि शब्दाः अकारादि-क्रमेण सूत्रसंख्या-सहिताः दर्शिताः सन्ति, येन तेषां शब्दानां लिङ्गस्य ज्ञानं तत्कालं सञ्जायेत। इमे शब्दाः संख्यायां ८५२ सन्ति। उपसंहारे सन्दर्भ-ग्रन्थानां सूची अपि प्रदत्ता विद्यते।

विश्वसिमि, एतत्सर्व-सामग्रीभिः सज्जितः अयं कोषः संस्कृत-व्यवहार-कर्त्तृभ्यः अवश्यम् एव अतीव उपकारकः सेत्स्यति इति। किं बहुना ?

अज्ञानाद् दृष्टि-दोषाद् वा, सञ्जातास्त्रुटयोऽत्र याः।
क्षम्यास्ताः कृपया प्राज्ञैः, सूच्या अस्मै जनाय च।।

विद्वद्-विधेयः

विद्या-वैभव-भवनम्
29, केसर-विहारः
जगत्पुरा, जयपुरम्-302 017 (राज.)
मोबाईल : 9799204628

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by S3 Foundation USA

।। श्रीगणेशाय नमः।।

पाणिनीय-लिङ्गानुशासन-कोषः

ऊनत्रिंशे केसर,-विहारे विद्या-वैभव-भवनेऽत्र।
जगत्पुराख्य-जयपुरे, वासी नारायणकाङ्करः।। १।।
श्रीगणेशं शारदां, पाणिनिं गुरून् पितरौ नत्वाऽऽहम्।
प्रस्तौमि सुख-बोधाय, लिङ्गानुशासन-कोषमिमम्।। २।।

अक्षताः पुं०। इत्यत्र 'दाराक्षत-लाजासूनां बहुत्वं च' (लि० सू० १०६) इति पुँल्लिङ्गता बहुवचनत्वं च। क्षणनं क्षतम्। क्षणु हिंसायां (त० उ०) 'नपुंसके भावे क्तः' इति क्त-प्रत्ययः। ककारानुबन्धलोपः। 'अनुदात्तोपदेश-वनति-तनोत्यादीनामनुनासिक-लोपो झलि क्ङिति' (पा० अ० ६। ४। ३७) इति धातोः णकारस्य लोपः। न क्षतं येषां ते अक्षताः। 'लाजाः पुंभूम्नि चाक्षताः' इत्यमरः। 'अक्षतं न द्वयोः पण्डे लाजेपु, त्रिष्वहिंसिते। यवेऽपि क्वचित्' इति मेदिनी।

अक्षम्- नपुं० पुं०। इत्यत्र 'अक्षमिन्द्रिये' (लि० सू० १७०) इति इन्द्रियार्थे नपुंसक-लिङ्गता। अश्नुते व्याप्नोति इति अक्षम्। अशू व्याप्तौ सङ्घाते च (स्वा० आ०) 'अशेर्देवने' (उ० ३। ६५) इति स-प्रत्ययः। 'व्रश्च-भ्रस्ज०' (पा० अ० ८। २। ३६) इति षत्वादि-कार्यम्। अथवा अक्षति व्याप्नोति इति अक्षम्। अक्षू व्याप्तौ (भ्वा० प०) 'नन्दि-ग्रहि०' (पा० अ० ३। १। १३४) इति अच्। चकारानुबन्ध-लोपः। इन्द्रिय-भिन्नार्थे तु एष शब्दः पुँल्लिङ्गे। तथा हि- 'नाऽक्षस्तुषः कर्षफलो भूतावासः कलिद्रुमः', 'सौवर्चलेऽक्ष-रुचके', 'अथाक्षमिन्द्रिये। ना द्युताङ्गे कर्षे चक्रे व्यवहारे कलिद्रुमे' इत्यमरः। अक्षो रथस्यावयवे व्यवहारे विभीतके। पाशके शकटे कर्षे ज्ञाने चात्मनि रावणौ। अक्षं सौवर्चले तुत्थे हृषीके' इति हैमः। 'अक्षः कर्षे तुषे चक्रे शकट-व्यवहारयोः। आत्मज्ञे पाशके चाक्षं तुत्थे सौवर्चलेन्द्रिये' इति विश्वः। 'अथो ज्ञानात्म-शकट-व्यवहारेषु पाशके। रुद्राक्षेन्द्राक्षयोः सर्पे विभीतक-तरावपि। चक्रे कर्षे पुमान् क्लीबं तुत्थ-सौवर्चलेन्द्रिये' इति मेदिनी।

अक्षि नपुं०। इत्यत्र मुख-नयन-लोह-वन-मांस-रुधिर-कार्मुक-विवर-जल-हल-धनान्नाभिधानानि (लि० सू० १३७) इति तथा 'श्राद्ध-कुलिश-दैव-पीठ-कुण्डाङ्काङ्ग-दधि-सक्थ्यक्ष्यास्पदाकाश-कण्व-बीजानि' (लि० सू० १६६) इति

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by S3 Foundation USA

नपुंसकलिङ्गता। अश्नुते व्याप्नोति विषयान् येन तद् इति अक्षि। अशू व्याप्तौ सङ्घाते च (स्वा० आ०) 'अशेर्नित्' (उ० ३। १५६) इति क्सिन्-प्रत्ययः। क्कार-नकारानुबन्ध-लोपः। 'व्रश्च-भ्रस्ज०' (पा० अ० ८। २। ३६) इति धातोः शस्य षत्वम्। 'ष-ढोः कः सि' (पा० अ० ८। २। ४१) इति षस्य कत्वम्। 'आदेश-प्रत्यययोः' (पा० अ० ८। ३। ५९) इति प्रत्यय-सस्य षत्वम्। पुनः क-षयोः संयोगेन अक्षि सम्पद्यते। **अथवा** अक्षति व्याप्नोति इति अक्षि। अक्षू व्याप्तौ (भ्वा० प०) 'सर्वधातुभ्य इन्' (उ० ४। ११९) इति इन्-प्रत्ययः। नकारानुबन्धलोपः। 'लोचनं नयनं नेत्रमीक्षणं चक्षुरक्षिणी' इत्यमरः।

अग्निः पुं०। इत्यत्र 'वह्नि-वृष्ण्यग्नयः पुंसि' (लि० सू० ७) इति पुँल्लिङ्गता। अङ्गति गच्छति प्राप्नोति जानाति वा इति अग्निः। अगि गतौ (भ्वा० प०) 'अङ्गेर्नलोपश्च' (उ० ४। ५१) इति नि-प्रत्ययः, धातोः इदित्त्वात् 'इदितो नुम् धातोः' (पा० अ० ७। १। ५८) इति लब्ध-नुमागमस्य नकारस्य लोपश्च। 'अग्निर्वैश्वानरो वह्निः' इत्यमरः। 'अग्निर्वैश्वानरेऽपि स्याच्चित्रकाख्यौषधौ पुमान्' इति मेदिनी। 'अग्निर्वै योनिर्यज्ञस्य' (शत० ब्रा० १। ४। ३। ११) 'अग्निर्हि देवानां पशुः' (ऐत० ब्रा० १। १५)। 'वीर्यं वा अग्निः' (तै० ब्रा० १। ७। २। २)। 'अग्निर्वैश्वानरः' (तां० ब्रा० १३। ११। २३)। 'अग्निः ऋषिः' (मैत्रा० सं० १। ६। १)।

अग्रम् नपुं०। इत्यत्र 'द्वाराग्र-स्फार-तक्र-वक्र-वप्र-क्षिप्र-क्षुद्र-नार-तीर-दूर-कृच्छ्र-रन्ध्राश्र-श्वभ्र-भीर-गभीर-क्रूर-विचित्र-केयूर-केदारोदराजस्र-शरीर-कन्दर-मन्दार-पञ्जराजर-जठराजिर-वैर-चामर-पुष्कर-गह्वर-कुहर-कुटीर-कुलीर-चत्वर-काश्मीर-नीराम्बर-शिशिर-तन्त्र-यन्त्र-क्षत्र-क्षेत्र-मित्र-कलत्र-चित्र-मूत्र-सूत्र-वक्त्र-नेत्र-गोत्राङ्गुलित्र-भलत्र-शस्त्र-शास्त्र-वस्त्र-पत्र-पात्रच्छत्राणि नपुंसके' (लि० सू० ९०) इति नपुंसकलिङ्गता। अङ्गति गच्छति इति अग्रम् प्रधानम् उपरिभागः वा। अगि गतौ (भ्वा० प०) 'ऋज्रेन्द्राग्र-वज्र०' (उ० २। २९) इति रन्-प्रत्ययः, धातोः इदित्त्वात् 'इदितो नुम् धातोः' (पा० अ० ७। १। ५८) इति लब्धनुमागम-नकारस्य लोपश्च। **अथवा** अगति इति अग्रम्। अग कुटिलायां गतौ (भ्वा० प०) 'ऋज्रेन्द्राग्र०' (उ० २। २९) इति रन्-प्रत्ययः। नकारानुबन्धलोपः। 'अग्रं पुरस्तादुपरि परिमाणे पलस्य च। आलम्बने समूहे च प्रान्ते स्यात् पुं-नपुंसकम्। अधिके च प्रधाने च प्रथमे चाभिधेयवत्' इति मेदिनी। 'पराध्यार्ग्र-प्राग्रहर०' तथा 'पुरोऽधिकमुपर्यग्राणि' इत्यमरः।

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by S3 Foundation USA

अङ्कः नपुं०, पुं०। इत्यत्र **'श्राद्ध-कुलिश-दैव-पीठ-कुण्डाङ्काङ्ग-दधि-सक्थ्यक्ष्यास्पदाकाश-कण्व-बीजानि' (लि० सू० १६६) इति नपुंसकलिङ्गता।** अञ्चति गच्छति येन तद् अङ्कम्। अञ्चु गति-पूजनयोः (भ्वा० प०) 'अञ्च्याञ्जि-युजि-भृजिभ्यः कुश्च' (उ० ४। २१७) इति असुन्-प्रत्ययः, धातोः चकारस्य ककारश्चान्तादेशः। असुन् प्रत्यये उकार-नकारानुबन्धलोपः। असुन् प्रत्ययान्तः अङ्कशब्दः नपुंसकलिङ्गे। किन्तु अङ्क्यते लक्ष्यते अनेन इति अङ्कः। अकि लक्षणे (भ्वा० आ०) 'हलश्च' (पा० अ० ३। ३। १२१) इति घञ्-प्रत्ययः। घकार-ञकारानुबन्धलोपः। अयं घञ्-प्रत्ययान्तः अङ्क-शब्दः 'घञबन्तः' (लि० सू० ३६) इति पुँल्लिङ्गे भवति। 'कलङ्काङ्कौ लाञ्छनं च चिह्नं लक्ष्म च लक्षणम्' तथा 'उत्सङ्ग-चिह्नयोरङ्कः' इत्यमरः। 'अङ्को भूषा-रूपक-लक्ष्मसु। चित्राजौ नाटकाद्यंशे स्थाने क्रोडेऽन्तिकागसोः' इति हैमः। 'अङ्को रूपक-भेदाङ्गचिह्ने रेखाजिभूषणे। रूपकाशान्तिकोत्सङ्गस्थानेऽकं पापदुः खयोः' इति मेदिनी।

अङ्कुरः पुं०। इत्यत्र **'रोपधः' (लि० सू० ८९) इति पुँल्लिङ्गता।** अङ्क्यते लक्ष्यते बहिर् आगतः विलोक्यते यः सः अङ्कुरः। अकि लक्षणे (भ्वा० आ०) 'मन्दि-वाशि-मथि-चति-चङ्क्यङ्किभ्य उरच्' (उ० १। ३८) इति उरच्-प्रत्ययः। चकारानुबन्ध-लोपः। 'इदितो नुम् धातोः' (पा० अ० ७। १। ५८) इति नुमागमः। उकार-मकारानु-बन्धलोपः 'नश्चापदान्तस्य झलि' (पा० अ० ८। ३। २४) इति नकारस्य अनुस्वारः। 'अनुस्वारस्य ययि परसवर्णः' (पा० अ० ८। ४। ५८) इति अनुस्वारस्य परसवर्णः ङकारः। 'अङ्कुरोऽङ्कूर एव च' इति विश्वप्रकाशः। 'अङ्कुरो रुधिरे लोम्नि पानीयेऽभिनवोद्भिदि' इति मेदिनी। 'अङ्कुरश्चाङ्कूरः प्रोक्तः' इति हलायुधः। 'अङ्कुरोऽभिनवोद्भिदि' इत्यमरः।

अङ्कुशः पुं०, नपुं०। इत्यत्र **'दण्ड-मण्ड-खण्ड-शव-सैन्धव-पार्श्वाकाश-कुश-काशाङ्कुश-कुलिशाः' (लि० सू० १८१) इति पुँल्लिङ्गता नपुंसकलिङ्गता च।** अङ्क्यते लक्ष्यते येन दिशा सः, **अथवा** अङ्कते लक्षयति विलोकते गन्तव्यदिशां येन सः अङ्कुशः। अकि लक्षणे (भ्वा० आ०) 'सानसि-वर्णसि-पर्णसि-तण्डुलाङ्कुश-चषालेल्वल-पल्वल-धिष्ण्य-शल्याः' (उ० ४। १०८) इति उशच्-प्रत्ययः। 'अङ्कुशोऽस्त्री सृणिः स्त्रियाम्' इत्यमरः।

अङ्गम् नपुं०। इत्यत्र **'श्राद्ध-कुलिश-देव-जीव-कुण्डाङ्काङ्ग-दधि-सक्थ्यक्ष्यास्पदाकाश-कण्व-बीजानि' (लि० सू० १६६) इति नपुंसकलिङ्गता।** अमति गच्छति प्राप्नोति कर्माणि विषयांश्च येन **अथवा** अमति गच्छति नश्यति वा यत् तद्, **यद्वा** आमयति रुग्णं भवति यत् तद् इति अङ्गम्। अम गत्यादिषु (भ्वा० प०)

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by S3 Foundation USA

यद्वा अम रोगे (चु० उ०) 'उणादयो बहुलम्' (पा० अ० ३।३।१) इति बहुलवचनाद् 'गन् गम्यद्योः' (उ० १।१२३) इति गन्-प्रत्ययः। नकारानुबन्धलोपः। 'नश्चापदान्तस्य झलि' (पा० अ० ८।३।२४) इति धातोः मकारस्य अनुस्वारः। 'अनुस्वारस्य ययि परसवर्णः' (पा० अ० ८।४।५८) इति अनुस्वारस्य परसवर्णः ङकारः। **अथवा** अङ्गति इति अङ्गम्। अगि गतौ (भ्वा० प०) 'इदितो नुम् धातोः' (पा० अ० ७।१।५८) इति नुमागमः। उकार-मकारानुबन्धलोपः। नकारस्य पूर्ववत् अनुस्वारः, अनुस्वारस्य च पर-सवर्णः ङकारः। ततः 'नन्दि-ग्रहि०' (पा० अ० ३।१।१३४) इति अच्-प्रत्ययः। चकारानुबन्धलोपः। 'अङ्गं प्रतीकोऽवयवोऽपघनः' इत्यमरः। 'अङ्गं गात्रान्तिकोपाय-प्रतीकेष्वप्रधानके। अङ्गो देश-विशेषः स्यादङ्ग सम्बोधनेऽव्ययम्' इति विश्वः। 'अङ्गं गात्रे प्रतीकोपाययोः पुं भूम्नि नीवृति। क्लीबैकत्वे त्वप्रधाने त्रिष्वङ्गवति चान्तिके' इति मेदिनी।

अङ्गुलिः स्त्री०। इत्यत्र **'दर्वि-विदि-वेदि-खनि-शान्यश्रि-वेशि-कृष्योषधि-कट्यङ्गुलयः' (लि० सू० २४) इति स्त्रीत्वम्।** अङ्गति गच्छति चेष्टते अनया इति अङ्गुलिः। अगि गतौ (भ्वा० प०) इति धातोः इदित्त्वात् 'इदितो नुम् धातोः' (पा० अ० ७।१।५८) इति नुमागमः। उकार-मकारानुबन्ध-लोपः। 'नश्चापदान्तस्य झलि' (पा० अ० ८।३।२४) इति नकारस्य अनुस्वारः। 'अनुस्वारस्य ययि परसवर्णः' (पा० अ० ८।४।५८) इति अनुस्वारस्य परसवर्णः ङकारः। 'ऋतन्यञ्जिवन्यञ्ज्यर्पि०' (उ० ४।२) इति उलि-प्रत्ययः। **अथवा** अङ्गं पाणिपादावयवं लाति इति अङ्गुलिः। बाहुलकात् डि-प्रत्ययो वा। डकारानुबन्धलोपः। डित्त्वात् धातोः आकारस्य 'टेः' (पा० अ० ६।४।१४३) इति लोपः। 'अङ्गुलिः करशाखायां कर्णिकायां गजस्य च' इति हैमः। 'कृदिकारादक्तिनः' (ग० सू० ५० पा० अ० ४।१।४५) इति ङीषि तु अङ्गुली इति दीर्घेकारान्तः अपि साधुः। 'बाहु-मूल-लघ्वङ्गुलीनां वा लो रः' (वा० ८।२।१८) इति लकारस्य विकल्पेन रत्वात् अङ्गुरिः इत्यपि भवति। पुँल्लिङ्गे अङ्गुलः। 'अङ्गुलो वा यवमानम्' इति वाचस्पतिः। 'अङ्गुलस्तु यवो मतः' इति अमरदत्तः। अत्र बाहुलकाद् उल-प्रत्ययः।

अङ्गुलित्रम् नपुं०। **इत्यत्र 'द्वाराग्रस्फार-तक्र-वक्र०' (लि० सू० ९०) इति नपुंसकलिङ्गता।** अङ्गुलि-शब्दः पूर्वं व्याख्यातः। अङ्गुलिं त्रायते रक्षति इति अङ्गुलित्रम्। त्रैङ् पालने (भ्वा० आ०) 'आदेच उपदेशेऽशिति' (पा० अ० ६।१।४५) इति धातोः ऐकारस्य आकारः। 'आतोऽनुपसर्गे कः' (पा० अ० ३।२।३) इति क-प्रत्ययः। ककारानुबन्धलोपः। 'आतो लोप इटि च' (पा० अ० ६।४।६४) इति धातोः आकारस्य लोपः।

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by S3 Foundation USA

अच्छावाकीयम् नपुं०। इत्यत्र '**यद्-य-ढग्-यगञ-ण्वुञ्छाश्च**' (**लि० सू० १२३ क**) इति **नपुंसकलिङ्गता**। 'होत्राभ्यश्छः' (पा० अ० ५।१।६) इति अच्छावाक-शब्दात् छ-प्रत्ययः भवति। पुनः छस्य 'आयनेयीनीयियः०' (पा० अ० ७।१।२) इति इयादेशः। 'यस्येति च' (पा० अ० ६।४।१४८) इति ककारस्थस्य अकारस्य लोपेन अच्छावाकीय-शब्दः निष्पद्यते।

अजरम् नपुं०। इत्यत्र '**द्वाराग्र-स्फार-तक्र-वक्र-वप्र-क्षिप्र-क्षुद्र-नार-तीर-दूर-कृच्छ्र-रन्ध्राश्र०**' (**लि० सू० ९०**) इति **नपुंसकलिङ्गता**। जीर्णं भवति इति जरम्। जॄ वयोहानौ (क्र्या० प०, चु० उ०) नन्दि-ग्रहि० (पा० अ० ३।१।१३४) इति अच्-प्रत्ययः। चकारानुबन्धलोपः। 'सार्वधातुकार्धधातुकयोः' (पा० अ० ७।३।८४) इति धातोः ॠकारस्य 'उरण् रपरः' (पा० अ० १।१।५१) इति सहकारेण अर्-गुणः। न जरम् अजरम्। 'नञ्' (पा० अ० २।२।६) इति नकारस्य जरशब्देन समासः। 'न लोपो नञः' (पा० अ० ३।३।७३) इति केवलं नकारस्य लोपः। 'तस्मान्नुडचि' (पा० अ० ६।३।७४) इति नुडागमः। उकार-टकारानुबन्धलोपः। 'अजरमजरणधर्माणम्' (नि० ४।४।२७)। 'ता मे जराय्वजरं मरायु' (ऋ० सं० ८।६।२)। 'एतज्जरायुजं शरीरं शरदमजीर्णम्' (नि० १३।१।५)।

अजस्रम् नपुं०। इत्यत्र '**द्वाराग्र-स्फार-तक्र-वक्र०**' (**लि० सू० ९०**) इति **नपुंसक-लिङ्गता**। न जस्यति इति अजस्रम्। जसु मोक्षणे (दि० प०) 'नमि-कम्पि-स्म्यजसकम-हिंसदीपो रः' (पा० अ० ३।२।१६७) इति र-प्रत्ययः। 'जसिर्नञ्पूर्वः क्रिया-सातत्ये वर्त्तते। अजस्रं सन्ततमित्यर्थः' इति सिद्धान्तकौमुद्याम्। 'शश्वदभीक्ष्णं नित्यं सदा सतत-मजस्रमिति सातत्ये' इति अव्यय-प्रकरणे आपिशलिः। 'नित्यानवरताजस्रमपि' इत्यमरः। 'अग्निरजस्रः' (शत० ब्रा० ६।७।४।३)

अजिनम् नपुं०। इत्यत्र '**जघनाजिन-तुहिन-कानन०**' (**लि० सू० ७५**) **इति नपुंसकलिङ्गता**। अजति गच्छति यत्र अज्यते गम्यते वा यत्र इति अजिनम्। अज गति-क्षेपणयोः (भ्वा० प०) 'अजेरज च' (उ० २।४९) इति इनच्-प्रत्ययः धातोः अजादेशश्च। अज धातोः अजादेशः 'अजेर्व्यघञपोः' (पा० अ० २।४।५६) इति अज-धातोः वीभाव-बाधनार्थम्। 'अजिनं चर्म कृत्तिः स्त्री' इत्यमरः।

अजिरम् नपुं०। इत्यत्र '**द्वाराग्र-स्फार-तक्र-वक्र०**' (**लि० सू० ९०**) **इति नपुंसक-लिङ्गता**। अजन्ति गच्छन्ति क्षिपन्ति वा कच्चरादिकं यत्र इति अजिरम्। अज गति-क्षेपणयोः (भ्वा० प०) 'अजिर-शिशिर०' (उ० १।५३) इति किरच्-प्रत्ययः। धातोः 'अजेर्व्यघञपोः' (पा० अ० २।४।५६) इति वी-भावाभावश्च। ककार-चकारानुबन्ध-

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by S3 Foundation USA

लोपः **अथवा** न जीर्यति इति अजिरम्। इह 'अजिर-शिशिर०' (उ० १। ५३) इति जृष् वयोहानौ (दि० प०) धातोः ऋृवर्णलोपः किरच्-प्रत्ययश्च। 'दशपादी-वृत्तौ तु नञ्पूर्वस्य ज़ीर्यतेऋृवर्णलोपो निपात्यते इत्युक्तं तदपि ग्राह्यम्, आशु द्रुतमजिरं प्रत्नमीड्यम् इत्यादौ न जीर्यत्यजिर इत्यस्यानुगुणत्वात्' इति सिद्धान्तकौमुद्याम् उणादौ तत्त्वबोधिनीकारः। 'अजिरं विषये कायेऽपि' इत्यमरः। 'अजिरं प्राङ्गणे वाते विषये दर्दुरेऽनिले' इति मेदिनी। 'अङ्गनं चत्वराजिरे' इत्यमरः। 'अजिरम् इति क्षिप्रनाम' (निघं० २। १५) 'एष वै मृत्युर्यद् वायुरजिर एव नाम' (जै० १। २६)

अञ्जलिः पुं०। **इत्यत्र 'सारथ्यतिथि-कुक्षि-बस्ति-पाण्यञ्जलयः' (लि० सू० ११७) इति पुँल्लिङ्गता।** अनक्ति व्यञ्जयति अथवा अज्यते अनेन इति अञ्जलिः। अञ्जू व्यक्ति-म्रक्षण-कान्ति-गतिषु (रु० प०) 'ऋ-तन्यञ्जि-वनञ्ज्यर्पि०' (उ० ४। २) इति अलिच्-प्रत्ययः। चकारानुबन्ध-लोपः। 'अञ्जलिस्तु पुमान् हस्तसम्पुटे कुडवेऽपि च' इति मेदिनी। 'तौ युतावञ्जलिः पुमान्' इत्यमरः।

अटविः स्त्री०। **इत्यत्र 'अटवी-स्त्रियाम्' (लि० सू० १४०) इति स्त्रीत्वम्।** अटनम् अटः। वाति गच्छति वायुवत् इति विः। अटः अटनं वीनां पक्षिणां यत्र इति अटविः। **अथवा** अटन्ति वयः पक्षिणः यत्र इति अटविः 'वातेर्डिच्च' (उ० ४। १३५) इति इण्-प्रत्ययः, सः च डित्। डित्त्वात् धातोः आकारस्य 'टेः' (पा० अ० ६। ४। १४३) इति लोपः। 'अटव्यरण्यं विपिनं गहनं काननं वनम्' इत्यमरः।

अटवी स्त्री०। अटविः पूर्वं व्याख्यातः। 'कृदिकारादक्तिनः' (ग० पा० पा० अ० ४। १। ४५) इति ङीष् प्रत्ययः। ङकार-षकारानुबन्धलोपः। 'यस्येति च' (पा० अ० ६। ४। १४८) इति वि इत्यस्य इकारस्य लोपः।

अतिथिः पुं०। **इत्यत्र 'सारथ्यतिथि-कुक्षि-बस्ति-पाण्यञ्जलयः' (लि० सू० ११७) इति पुँल्लिङ्गता।** अतति सततं गच्छति भ्रमति इति अतिथिः **अथवा** नास्ति तिथिः आगमनस्य गमनस्य वा नियता यस्य इति अतिथिः। अत सातत्य-गमने (भ्वा० प०) 'ऋ-तन्यञ्जि-वन्यञ्ज्यर्पि०' (उ० ४। २) इति इथिन्-प्रत्ययः। नकारानुबन्धलोपः। 'स्युरावेशिक आगन्तुरतिथिर्ना गृहागते' इत्यमरः। 'अतिथिः कुशपुत्रे स्यात् पुमानागन्तुकेऽपि च' इति विश्व-मेदिन्यौ। 'प्राघुणिकस्त्वतिथिर्द्वयो' इति त्रिकाण्ड-शेषः। 'अतिथिरभ्यतितो गृहान् भवति। अभ्येति तिथिषु परकुलानीति वा' (नि० ४। ५)। 'अतिथय आगताय सर्पिष्वदातिथ्यं क्रियते०' (तै० सं० ५। २। २। ४) 'पूर्वं हि अतिथिमाशयन्ति' (काठकसंहिता १२)

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by S3 Foundation USA

अतिथी स्त्री०। इत्यत्र 'ईकारान्तश्च' (लि० सू० १०) इति स्त्रीलिङ्गता। अतिथिः पूर्वं व्याख्यातः। ततः स्त्रियां 'कृदिकारादक्तिनः' (ग० पा०, पा० अ० ४। १। ४५) इति ङीष्-प्रत्ययः। ङकार-षकारानुबन्धलोपः। 'यस्येति च' (पा० अ० ६। ४। १४८). इति थि इत्यस्य इकारस्य लोपः।

अधिस्त्रि नपुं०। इत्यत्र 'अव्ययीभावः' (लि० सू० १२३ ख) इति नपुंसकलिङ्गता। स्त्रियाम् इति अधिस्त्रि। स्त्री ङि अधि इति अलौकिकविग्रहे 'अव्ययं विभक्ति०' (पा० अ० २। १। ६) इति समासः। 'प्रथमानिर्दिष्टं समास उपसर्जनम्' (पा० अ० १। २। ४३) इति अधि इत्यस्य उपसर्जनसंज्ञा। 'उपसर्जनं पूर्वम्' (पा० अ० २। २। ३०) इति उपसर्जनसंज्ञकस्य अधि इत्यस्य पूर्वनिपातः। अधिस्त्री ङि अस्यां स्थितौ 'सुपो धातु-प्रातिपदिकयोः' (पा० अ० २। ४। ७१) इति ङिलुक्। 'कृत्तद्धित-समासाश्च' (पा० अ० १। २। ४६) इति अधिस्त्री-शब्दस्य प्रातिपदिक संज्ञा। ततः प्रथमाविभक्तौ एकवचने 'स्वौजसमौट्०' (पा० अ० ४। १। २) इति सु-प्रत्ययः। 'अव्ययादाप्सुपः' (पा० अ० २। ४। ८२) इति सु-प्रत्ययस्य लुक्। 'अव्ययीभावश्च' (पा० अ० २। ४। १८) इति अथवा अव्ययीभावः (लि० सू० १२३) इति अधिस्त्री शब्दस्य नपुंसकत्वम्। 'ह्रस्वो नपुंसके प्रातिपदिकस्य' (पा० अ० १। २। ४७) इति स्त्रीशब्दस्य ईकारस्य इकारः ह्रस्वः। ततः अधिस्त्रि निष्पद्यते।

अध्यात्मम् नपुं०। इत्यत्र 'रुक्म-सिध्म-युग्मेध्म-गुल्माध्यात्म-कुङ्कुमानि नपुंसके' (लि० सू० ८४) इति अथवा 'अव्ययीभावः' (लि० सू० १२३) **नपुंसकलिङ्गता**। आत्मनि इति अध्यात्मम्। आत्मन् ङि इति अलौकिकविग्रहे 'अव्ययं विभक्ति०' (पा० अ० २। १। ६) इति समासः। 'प्रथमानिर्दिष्टं समास उपसर्जनम्' (पा० अ० १। २। ४३) इति अधि इत्यस्य उपसर्जन-संज्ञा। 'उपसर्जनं पूर्वम्' (पा० अ० २। २। ३०) इति उपसर्जनसंज्ञकस्य अधि इत्यस्य पूर्वनिपातः। अधि आत्मन् ङि अस्यां स्थितौ 'इको यणचि' (पा० अ० ६। १। ७७) इति इकारस्य यकारः। 'सुपोधातु-प्रातिपदिकयोः' (पा० अ० २। ४। ७१) इति ङि-लुक्। 'अनश्च' (पा० अ० ५। ४। १०८) इति टच्-प्रत्ययः। टकार-चकारानुबन्धलोपः। 'नस्तद्धिते' (पा० अ० ६। ४। १४४) इति अन् इत्यस्य लोपः। ततः अध्यात्म इति निष्पद्यते।

अध्वरः पुं०। इत्यत्र 'क्रतु-पुरुष-कपोल-गुल्फ-मेघाभिधानानि' (लि० सू० ४९) **इति क्रत्वभिधानस्य अध्वरस्य पुँल्लिङ्गता**। ध्वरति कुटिलः भवति इति ध्वरः। ध्वृ हूर्च्छने हूर्च्छनं कुटिलीभवनम् (भ्वा० प०) 'नन्दि-ग्रहि-पचादिभ्यो०' (पा० अ० ३।

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by S3 Foundation USA

१। १३४) इति अच्-प्रत्ययः। चकारानुबन्धलोपः। 'सार्वधातुकार्धधातुकयोः' (पा० अ० ७। ३। ८४) इति धातोः ऋकारस्य 'उरण् रपरः' (पा० अ० १। १। ५१) इति सहकारेण अर्-गुणः। एवं ध्वर्-शब्दः निष्पद्यते। न ध्वरः इति अध्वरः। 'नञ्' (पा० अ० २। २। ६) इति नकारस्य ध्वर-शब्देन समासः। 'नलोपो नञः' (पा० अ० ३। ३। ७३) इति केवलं नकारस्य लोपः। **अथवा** अध्वानं राति ददाति इति अध्वरः। अध्वन् पूर्वकात् रा दाने (अ० प०) 'आतोऽनुपसर्गे कः' (पा० अ० ३। २। ३) इति क-प्रत्ययः। ककारानुबन्धलोपः। 'नलोपः प्रातिपदिकान्तस्य' (पा० अ० ८। २। ७) इति नकारस्य लोपः। 'आतो लोप इटि च' (पा० अ० ६। ४। ६४) इति धातोः आकारस्य लोपः। एवम् अध्वर-शब्दः निष्पद्यते। 'यज्ञः सवोऽध्वरो यागः' इत्यमरः। 'अध्वरः सावधाने स्याद् वसुभेदे क्रतौ पुमान्' इति मेदिनी। 'अध्वरो वै यज्ञः' (शत० ब्रा० १। २।४।५, ४।१।३८।३९, ५।३।४।१०, ३।५।३।१७)। 'प्राणोऽध्वरः' (शत० ब्रा० ७। ३। १। ५) 'रसोऽध्वरः' (शत० ब्रा० ७। ३। १। ६) 'देवान् ह वै यज्ञेन यजमानान् सपत्ना असुरा दुर्धूषाञ्चक्रुः। ते दुधूर्षन्त एव न शेकुर्धूषितुं ते पराबभूवुस्तस्माद् यज्ञोऽध्वरो नाम' (शत० ब्रा० १। ४। १। ४०) 'ध्वरति यज्ञकर्मा' (नि० २। १९)। 'अध्वरे यज्ञे' (नि० ६। १३)। 'अध्वरेषु यज्ञेषु' (नि० १०। १९)। 'अध्वरं यज्ञम्' (नि० ८। ६)। 'अध्वरमिति अन्तरिक्षनाम' (निघं० १। ३)। 'यज्ञो वा अध्वरः' (काठ० सं० ३१। ११)। 'तेऽसुरा अपक्रामन्तोऽब्रुवन्न वा इमे ध्वर्तवा अभवन्निति तदध्वरस्याध्वरत्वम्' (कपिष्ठल-कठसंहिता ३६। ४)। 'अध्वर इति यज्ञनाम, ध्वरति हिंसाकर्म, तत्प्रतिषेधः' (नि० १।७)।

अनीकम्, अनीकः नपुं०, पुं०। **इत्यत्र 'कण्टकानीक-सरक-मोदक०' (लि० सू० ६३) इति नपुंसकलिङ्गता पुँल्लिङ्गता च।** अनिति जीवति अनेन **अथवा** अनिति जीवयति सर्वान् प्राणिनः यत् तद् यः वा सः इति अनीकम् अनीकः वा। अन प्राणने (अ० प०) 'अनि-हृषीभ्यां किच्च' (उ० ४। १८) इति ईकन्-प्रत्ययः सः च कित्। कित्त्वात् अनीकम् इत्यत्र 'पुगन्त-लघूपधस्य च' (पा० अ० ७। ३।८६) इति गुणः न। **अथवा** नयति इति नीकम्, नीकः वा। न नीकम् इति अनीकम्, न नीकः इति अनीकः। णीञ् प्राणे (श्वा० प०) 'अजि-यु-धू-नीभ्यो दीर्घश्च' (उ० ३। ४७) इति कन्- प्रत्ययः। नकारानुबन्धलोपः। 'वरूथिनी बलं सैन्यं चक्रं चानीकमस्त्रियाम्' तथा 'अस्त्रियां समरानीक-रणाः कलह-विग्रहौ' इत्यमरः। 'अनीकोऽस्त्री रणे सैन्ये' इति मेदिनी। पुँल्लिङ्गानीकशब्दार्थः सूर्य-परमेश्वरादिः अपि बोध्यः यतः सः हि सकलान् अपि प्राणिनः अनिति जीवयति।

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by S3 Foundation USA

अनृतम् नपुं०। इत्यत्र **'नवनीतावतानानृतामृत-निमित्त०' (लि० सू० १६५) इति नपुंसकलिङ्गता।** न ऋतम् इति अनृतम्। न-शब्दस्य ऋतशब्देन सह 'नञ्' (पा० अ० २।२।६) इति समासः। 'नलोपो नञः' (पा० अ० ३।३।७३) इति केवलं नकारस्य लोपः। 'तस्यान्नुडचि' (पा० अ० ६।३।७४) इति नुडागमः। उकार-टकारानुबन्धलोपः। 'वितथं त्वनृतं वचः' तथा 'अनृतं कृषिः' इत्यमरः। 'अनृतं कृषाव-सत्ये च' इति रुद्रः। 'अमेध्यो वै पुरुषः यदनृतं वदति तेन पूतिरन्तः' (शत० ब्रा० १।१।१।१)। 'सत्यमेव देवा अनृतं मनुष्याः' (शत० ब्रा० १।१।१।४)। 'अनृतं स्त्री शूद्रः श्वा कृष्णः शकुनिस्तानि न प्रेक्षेत' (शत० ब्रा० १४।१।१।३१) 'ओमिति सत्यं, नेत्यनृतम्' (ऐत० आ० २।३।६)। 'सुवति ह वा अनृतं वदतो यज्ञोऽथो ह पूयति' (जै० उ० १। २५६)। 'आमन्त्रणे नानृतं वदेत्' (काठ० ८।७)। 'अनृतादात्मानं जुगुप्सेत' (तै० आ० १०।९।१)। 'अनृतं (वा एतत्) यदातपति वर्षति' (तै० १।७।५।३)। 'अश्रद्धामनृतेऽधाच्छ्रद्धां सत्ये प्रजापतिः' (मै० सं० ३।११।६)। 'अनृतेनैव भ्रातृव्यानभिभूय वाचः सत्यमवरुन्धे' (तै० १।८।३।४)

अन्तरीपम् नपुं०। इत्यत्र **'पापरूपोडुप-तल्प-शिल्प-पुष्प-समीपान्तरीपाणि नपुंसके' (लि० सू० ७८) इति नपुंसकलिङ्गता।** अन्तर्गताः आपः यत्र तद् अन्तरीपम्। 'द्व्यन्तरुपसर्गेभ्योप ईत्' (पा० अ० ६।३।९७) इति अप् शब्दस्य अकारस्य ईत्त्वम्। 'ऋक्पूरब्धूः पथामानक्षे' (पा० अ० ५।४।७४) इति अ-प्रत्ययः। 'द्वीपोऽस्त्रियामन्तरीपं यदन्तर्वारिणस्तटम्' इत्यमरः। अत्र अस्त्रियाम् अस्य शब्दस्य काकाक्षिवद् द्वाभ्याम् अपि सम्बद्धत्वात् अन्तरीप-शब्दस्य पुँल्लिङ्गता अपि सिध्यति।

अन्तः पुं०, नपुं०। इत्यत्र **'हन्त-कुन्तान्त-व्रात-वात-दूत०' (लि० सू० १११) इति पुँल्लिङ्गता। तथा 'कबन्धौषधायुधान्ताः' (लि० सू० १८०) इति पुँल्लिङ्गता नपुंसकलिङ्गता च।** अमति गच्छति इति अन्तः। अम गत्यादिपु (भ्वा० प०) 'हसि-मृ-ग्रिण्वामि-दमि-लू-पू-धूर्विभ्यस्तन्' (उ० ३।८६) इति तन्-प्रत्ययः। नकारानुबन्ध-लोपः। धातोः मकारस्य 'नश्चापदान्तस्य झलि' (पा० अ० ८।३।२४) इति अनुस्वारः। 'अनुस्वारस्य ययि परसवर्णः' (पा० अ० ८।४।५८) इति अनुस्वारस्य परसवर्णः नकारः। **अथवा** अन्तति बध्नाति इति अन्तः। अति बन्धने (भ्वा० प०) धातोः इदित्त्वात् 'इदितो नुम् धातोः' (पा० अ० ७।१।५८) इति नुमागमः। उकार-मकारानुबन्धलोपः। नकारस्य पूर्ववत् अनुस्वारः, अनुस्वारस्य परसवर्णः नकारः। 'नन्दिग्रहि०' (पा० अ० ३।१।१३४) इति अच्-प्रत्ययः। चकारानुबन्धलोपः। **अथवा** अन्तनम् अन्तः 'भावे' (पा० अ० ३।३।१८) इति घञ्-प्रत्ययः। ककार-

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by S3 Foundation USA

ञकारानुबन्धलोपः। घञन्तस्य अन्त-शब्दस्य 'घञबन्तः' (लि० सू० ३६) इत्यनेन अपि पुँल्लिङ्गता। 'अन्तो नाशो द्वयोर्मृत्युर्मरणं निधनोऽस्त्रियाम्' तथा 'अन्तो जघन्यं चरममन्त्य-पाश्चात्त्य-पश्चिमम्' इत्यमरः। 'अन्तः स्वरूपे नाशे ना न स्त्री शेषेऽन्तिके त्रिषु' इति मेदिनी। 'अन्तः स्वरूपे निकटे प्रान्ते निश्चय-नाशयोः। अवयवेऽपि' इति हैमः। 'अन्तो वै क्षयः' (ऐत० ब्रा० १।५।३)।

अन्धकारम्, अन्धकारः नपुं० पुं०। इत्यत्र **'चक्र-वज्रान्धकार-सारावारापार०' (लि० सू० ९२) इति नपुंसकलिङ्गता पुँल्लिङ्गता च**। अन्ध दृष्ट्युपघाते (चु० उ०) अन्धनम् अन्धः। 'भावे' (पा० अ० ३।३।१८) इति घञ्-प्रत्ययः घकार-ञकारानुबन्ध-लोपः। अन्धं करोति इति अन्धकारः। अन्ध पूर्वात् डुकृञ् करणे (त० उ०) धातोः 'कर्मण्यण्' (पा० अ० ३।२।१) इति अण्-प्रत्ययः। णकारानुबन्धलोपः। प्रत्ययस्य णित्त्वात् तस्मिन् परे 'अचो ञ्णिति' (पा० अ० ७।२।११५) इति धातोः ऋकारस्य 'उरण् रपरः' (पा० अ० १।१।५१) इति सहकारेण आर् वृद्धिः। घञन्तत्वात् अस्य शब्दस्य 'घञबन्तः' (लि० सू० ३६) इत्यनेन अपि पुँल्लिङ्गता। 'अन्धकारोऽस्त्रियां ध्वान्तं तमिस्रं तिमिरं तमः' इत्यमरः।

अन्नम् नपुं०। इत्यत्र **'मुख-नयन-लोह-वन-मांस०' (लि० सू० १३७) इति नपुंसकलिङ्गता**। अनति जीवति येन **अथवा** अन्यते जीव्यते येन **अथवा** अनति जीवयति यत् तद् अन्नम्। अन प्राणने (अ० प०) 'कृ-वृ-जृ-सि-द्रु०' (उ० ३।१०) इति न-प्रत्ययः स च नित्। नित्त्वं स्वरार्थम्। **यद्वा** अद्यते स्म इति अन्नम्। अद् भक्षणे (अ० प०) 'निष्ठा' (पा० अ० ३।२।१०२) इति क्त-प्रत्ययः। ककारानुबन्धलोपः। 'र-दाभ्यां निष्ठातो नः पूर्वस्य च दः' (पा० अ० ८।२।४२) इति क्त-प्रत्ययस्य तकारस्य धातोः दकारस्य च नकारादेशः। 'भिस्सा स्त्री भक्तमन्धोऽन्नमोदनोऽस्त्री सदीदिविः' तथा 'अभ्यवहृतान्न-जग्ध-ग्रस्त-ग्लस्ताशितं भुक्ते' इत्यमरः। 'अन्नं भुक्तेऽशिते' इति हैमः। 'अन्नं भक्ते च भुक्ते स्यात्' इति मेदिनी। 'अन्नम् उदकनाम' (निघं० १।१२)। 'अर्को वै देवानामन्नम्' (शत० ब्रा० १२।८।१।२) एवं (तै० ब्रा० १।१।८।५)। 'अन्नमर्कः' (शत० ब्रा० ९।१।१।४)। 'त्रेधा विहितं ह्यन्नम्' (शत० ब्रा० ८।५।३।३)। 'सर्वं वै तदन्नं यद् दधिमधु घृतम्' (शत० ब्रा० ९।२।१।११)। 'एतदुपरममन्नं यद् दधि मधु घृतम्' (शत० ब्रा० ९।२।१।१२)। 'अन्नं वा आयतनम्' (शत० ब्रा० ६।२।१।१४)। 'अन्न-जीवनं हीदं सर्वम्' (शत० ब्रा० ७।५।१।२०)। 'अन्नमेव ग्रहः। अन्नेन हीदं सर्वं गृहीतम्' (शत० ब्रा० ४।६।५।४)। 'तस्मात्प्राणोऽगृहीतो

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by S3 Foundation USA

यो ह्येवान्नमत्ति स प्राणिति' (शत० ब्रा० ७।५।१।१६)। 'तस्मात्प्राणेनान्नं गृहीतं यो ह्येव प्राणिति सोऽन्नमत्ति' (शत० ब्रा० ७।५।१।१७)। 'अन्नं हि प्राणः' (शत० ब्रा० ३।८।४।८, ४।३।४।२५)। 'अन्नमु श्रीः' (शत० ब्रा० ८।६।२।१)। 'ताः प्रजाः अन्नादेव सम्भवन्ति तस्मादन्नमेव प्रजाः' (शत० ब्रा० २।५।१।६)। 'अन्नमशीतिः' (शत० ब्रा० ८।५।२।१७)। 'अन्नं वै प्रजापतिः' (शत० ब्रा० ५।१।३।७)। 'अन्नं वाऽ अयं प्रजापतिः' (शत० ब्रा० ७।१।२।४)। 'अन्नं वा अपां पाथः' (शत० ब्रा० ७।५।२।६०) 'यत्तदन्नमेष स विष्णुर्देवता' (शत० ब्रा० ७।५।१।२१)। 'अन्नं वै व्यन्ने हीमानि सर्वाणि भूतानि विष्टानि' (शत० ब्रा० १४।८।१३।३)। 'अन्नं वाजः' (शत० ब्रा० ५।१।१।१६, ८।१।१।९)। 'अन्नं वै वाजाः' (शत० ब्रा० १।४।१।९)। 'अन्नं वै वाजः' (शत० ब्रा० ५।१।४।३, ६।२।२।४) एवं (तै० ब्रा० १।३।६।२, १।३।८।५)। 'अन्नं नमः' (शत० ब्रा० ६।३।१।१७)। 'अन्नं हि स्वाहाकारः' (शत० ब्रा० ६।६।३।१७)। 'अन्नं वै स्वाहाकारः' (शत० ब्रा० ९।१।१।१३)। 'अन्नं श्रुष्टिः' (शत० ब्रा० ७।२।२।५)। 'अन्नं रश्मिः' (शत० ब्रा० ८।५।३।३)। 'अन्नं प्रेतिः' (शत० ब्रा० ८।५।३।३)। 'अन्नं वैं पितुः' (शत० ब्रा० १।९।२।२०, ७।२।१।१५) एवम् (ऐत० ब्रा० १।१३)। 'अन्नं वै रूपम्' (शत० ब्रा० ९।२।१।१२)। 'अन्नं वै वयश्छन्दः' (शत० ब्रा० ८।५।२।६)। 'अन्नं वै गिरश्छन्दः' (शत० ब्रा० ८।२।२।५)। 'अन्नं वै प्रच्छच्छन्दः' (शत० ब्रा० ८।५।२।४)। 'अन्नं केतः' (शत० ब्रा० ६।३।१।१९)। 'अन्नं पुरीपम्' (शत० ब्रा० ८।१।४।५, ८।७।३।२) 'अन्नं वै पुरीपम्' (शत० ब्रा० ८।५।४।४, ८।६।१।२१, १४।३।१।२३)। 'अन्नं हि व्रतम्' (शत० ब्रा० ६।६।४।५)। 'अन्नं हि गौः' (शत० ब्रा० ४।३।४।५) एवं (जै० उ० ३।३।१३)। 'अन्नं पशवः' (शत० ब्रा० ६।२।१।१५, ७।५।२।४२)। 'अन्नं विशः' (शत० ब्रा० २।१।३।८)। 'अन्नं वा आपः' (शत० ब्रा० २।१।१।३, १६।२।१।१४) एवं (तै० ब्रा०३।८।२।१)। 'अन्नं वै गार्हपत्यः' (शत० ब्रा० ८।६।३।५)। 'अन्नं वा ऊर्गुदुम्बरः' (शत० ब्रा० ३।२।१।३३)। 'वरुणोऽन्नपतिः' (शत० ब्रा० १२।७।२।२०)। 'अन्नं वै देवा अर्क इति वदन्ति' (तां० ब्रा० १५।३।२३)। 'अन्नं वा अर्कः' (तां० ब्रा० ५।१।९, १४।११।९, १५।३।३४) एवं (गो० उ० ४।२)। 'अन्नं वै वाजः' (तां० ब्रा० १३।९, १३।२१, १५।११, १२।१८, ६।८)। 'त्रिवृद्ध्यन्नम्' (शत० ब्रा० ३।२।१।१२, ३।७।१।२०)। 'त्रिवृद्धाऽन्नं कृषि-र्वृष्टिर्बीजम्' (शत० ब्रा० ८।६।२।२)। 'पाङ्क्तं ह्यन्नम्' (तां० ब्रा० ५।२।७)। 'विरूपं = नानारूपम् अन्नम्' (तां० ब्रा० १४।९।८)। 'सप्त वा अन्नानि' (तै० ब्रा० १।३।८।

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by S3 Foundation USA

१)। 'शान्तिर्वा अन्नम्' (ऐत० ब्रा० ५। २७। ७। ३)। 'अन्नं वै सर्वेषां भूतानामात्मा' (गोप० उ० १। ३)। 'वैश्वदेवं वा अन्नम्' (तै० ब्रा० १। ६। १। १०)। 'अन्नं प्राणमन्नमपानमाहुः, अन्नं मृत्युं तमु जीवातुमाहुः, अन्नं ब्राह्मणो जरसं वदन्ति, अन्नमाहुः प्रजननं प्रजानाम्' (तै० ब्रा० २।८।३।३)। 'अन्नं प्राणः' (तै० ब्रा० ३। २। ३। ४)। 'अन्नं पशवः' (ऐत० ब्रा० ५। १९)। 'रेतो वा अन्नम्' (गोप० पू० ३। २३)। 'अन्नं वै ब्रह्मणः पुरोधाः' (तां० ब्रा० १२।८।६, १३।९।२७, १४।९।३८)। 'अन्नं वै चन्द्रमाः' (तै० ब्रा० ३। २। ३। ४)। 'अन्नं वै पूषा' (कौषी० ब्रा० १२।८) एवं (तैति० ब्रा० १। ७।३।६, ३।८।३२।२)। 'अन्नं वै वाजपेयः' (तैति० ब्रा० १।३।२।४)। 'अन्नं वै नृम्णम्' (कौषी० ब्रा० २७। ४)। 'भद्रो देवस्य कवयोऽन्नमाहुः' (गोप० पू० १। ३२)। 'अन्नं वै भद्रम्' (तै० ब्रा० १। ३। ३। ६)। 'अन्नं वै देवाः पृश्नीति वदन्ति' (तां० ब्रा० १२।१०।२४)। 'अन्नं वै सुरूपम्' (कौषी० ब्रा० १६। ३)। 'अथ यत्कृष्णं तदपां रूपमन्नस्य मनसो यजुषः' (जै० उ० १।२।५।९)। 'अन्नं वै कम्' (ऐत० ब्रा० ६।२१) एवं (गोप० उ० ६।३)। 'तदन्नं वै विश्वम्प्राणो मित्रम्' (जै० उ० ३।३।६)। 'अन्नं व्रतम्' (तां० ब्रा० २३। २७। २)। 'अन्नं सोमः' (कौसी० ब्रा० ९। ६) एवं (तां० ब्रा० ६। ६। १)। 'अन्नं सुरा' (तै० ब्रा० १। ३। ३। ५)। 'अन्नं वै श्रीर्विराट्' (गो० पू० ५।४) एवं (गोष० उ० १। १९)। 'अन्नं विराट् तस्माद् यस्यैवेह भूयिष्ठमन्नं भवति स एव भूयिष्ठं लोके विराजति तद् विराजो विराट्त्वम्' (ऐत० ब्रा० १। ५)। 'पाङ्क्तं = पञ्चविधं ह्यन्नम् अश्यं खाद्यं चूष्यं लेह्यं पेयमिति सायणः' (तां० ब्रा० ५। २। ७)। 'अन्नं वा इडा' (ऐत० ब्रा० ८। २६)। 'अन्नं वृष्टिः' (गोप० पू० ४।४।५)। 'अन्नं वै सप्तदश' (तां० ब्रा० २। ७। ७)। 'अन्नं सावित्री' (गोप० पू० १। ३३)। 'साम देवानामन्नम्' (तां० ब्रा० ६।४।१३)। 'अन्नं वै मरुतः' (तै० ब्रा० ३।७।३।५)। 'एतं हि साक्षादन्नं यदूषाः' (तै० ब्रा० १। ३।७।६)। 'अन्नं सम्मार्जनानि' (तै० ब्रा० ३। ३। १।५)। 'अन्नं ब्रह्मेति व्यजानात्' (तै० आ० ९। २) एवं (तै० उप० ३। २)। 'अन्नं वै पूषा' (तै० सं० २।१।६।१)। 'अन्नं वै पावकम्' (तै० सं० ५।४।४।४)। 'अन्नं वा आदित्याः' (तै० सं० ५। ३। ४। ३)। 'अन्नं कस्मात् ? आनतं भूतेभ्यः अत्तेर्वा' (निरु० ३।९)।

अन्वयम् नपुं० पुं०। इत्यत्र **'गोमय-कषाय-मलयान्वयाव्ययानि नपुंसके च' (लि० सू० ८८) इति नपुंसकलिङ्गता पुँल्लिङ्गता च।** अन्वीयते इति अन्वयः। अनु + इण् गतौ (अ० प०) 'एरच्' (पा० अ० ३। ३। ६) इति अच्-प्रत्ययः, चकारानुबन्धलोपः। 'सार्वधातुकार्धधातुकयोः' (पा० अ० ७। ३। ८४) इति धातोः

CC-0.Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by S3 Foundation USA

इकारस्य ए-गुणः। 'एचोऽयवायावः' (पा० अ० ६। १। ७८) इति एकारस्य अय्-आदेशः। 'इको यणचि' (पा० अ० ६। १। ७७) इति अनु इत्यस्य उकारस्य व्-यणादेशः। 'सन्ततिगोत्रजननकुलान्यभिजनान्वयौ' इत्यमरः।

अपत्यम् नपुं०। **इत्यत्र 'धान्याज्य-सस्य-रूप्य-पण्य०' (लि० सू० १६८) इति नपुंसकलिङ्गता।** न पतन्ति पितरः येन तद् अपत्यम्। पत्लृ गतौ (भ्वा० प०) 'उणादयो बहुलम्' (पा० अ० ३। ३। १) इति उणादीनां बाहुलकत्वात् 'मा-छा-ससिभ्यो यः' (उ० ४। ११०) इति य-प्रत्ययः। **अथवा** 'अघ्न्यादयश्च' (उ० ४। ११०) इति यक्-प्रत्ययः। ककारानुबन्धलोपः। 'अपत्यं तोकं तयोः समे' इत्यमरः। 'अपत्यं कस्मात् ? अपततं भवति, नानेन पतति च' (निरु० ३। १। १) ।

अपथम् नपुं०। **इत्यत्र 'अपथ-पुण्याहे नपुंसके' (लि० सू० १३१) इति नपुंसकलिङ्गता। अथवा 'अपथं नपुंसकम्' (पा० अ० २। ४। ३०) अथवा 'पथः संख्याव्ययादेः' (वा० पा० अ० २। ४। १७) इति नपुंसकलिङ्गता।** किन्तु तत्पुरुषसमासे एव, बहुव्रीहिसमासे नैव यथा अपथः देशः। न पन्थाः इति अपथम्। 'नञ्' (पा० अ० २। २। ६) इति न-शब्दस्य पथिन् इति शब्देन समासः। 'नलोपो नञः' (पा० अ० ३। ३। ७३) इति केवलं नकारस्य लोपः। 'पथो विभाषा' (पा० अ० ५। ४। ७२) इति व्यवस्थया 'ऋक्पूरब्धूः पथामानक्षे' (पा० अ० ५। ४। ७४) इति अ-प्रत्ययः। 'नस्तद्धिते' (पा० अ० ६। ४। १४४) इति इन् इत्यस्य लोपः। 'अपन्थास्त्वपथं तुल्ये' इत्यमरः। **अथवा** पथति गच्छति येन सः पथः। पथे गतौ (भ्वा० प०) 'नन्दिग्रहि०' (पा० अ० ३। १। १३४) इति अच्-प्रत्ययः। चकारानुबन्धलोपः। न पथः इति अपथम्। शेषं पूर्ववत् उन्नेयम्। 'वाटः पथश्च माथश्च' इति त्रिकाण्डशेषः।

अपाङ्गः पुं०। **इत्यत्र 'नाड्यपजनोपपदानि व्रणाङ्गपदानि' (लि० सू० १०७) इति पुँल्लिङ्गता।** अपाङ्गति इति अपाङ्गः। अप पूर्वकात् 'अगि गतौ' (भ्वा० प०) धातोः 'नन्दि-ग्रहिपचादिभ्यो०' (पा० अ० ३। १। १३४) इति अच्-प्रत्ययः। चकारानुबन्धलोपः। धातोः इदित्त्वात् 'इदितो नुम् धातोः' (पा० अ० ७। १। ५८) इति नुमागमः। उकार-मकारानुबन्धलोपः 'नश्चापदान्तस्य झलि' (पा० अ० ८। ३। २४) इति नकारस्य अनुस्वारः। 'अनुस्वारस्य ययि पर-सवर्णः' (पा० अ० ८। ४। ५८) इति अनुस्वारस्य परसवर्णः ङकारः। 'अकः सवर्णे दीर्घः' (पा० अ० ६। १। १०१) इति अप इत्यस्य अकारस्य अङ्ग इत्यस्य अकारस्य च आ-दीर्घः। अथवा अपगतः अङ्गात् अपकृष्टः

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by S3 Foundation USA

अङ्गात्, अपकृष्टानि अङ्गानि अस्माद्वा इति अपाङ्गः 'निरादयः क्रान्ताद्यर्थे पञ्चम्याः' (वा० पा० अ० २।२।१८) इति अप इत्यस्य अङ्ग शब्देन समासः 'अकः सवर्णे दीर्घः' (पा० अ० ६।१।१०१) इति अप इत्यस्य अकारस्य अङ्ग इत्यस्य अकारस्य च आ-दीर्घः। 'अपाङ्गौ नेत्रयोरन्तौ' तथा 'अपाङ्गस्तिलकेऽपि च' इत्यमरः। 'अपाङ्गस्त्वङ्गहीने स्यान्नेत्रान्ते तिलकेऽपि च' इति मेदिनी। 'अपाङ्गो नयनस्यान्ते स्याच्चित्रकप्रधानयोः' इति अजयः।

अप्सरसः, अप्सराः स्त्री०। इत्यत्र **'अप्सराः स्त्रियाम्' (लि० सू० १५३) इति स्त्रीलिङ्गता।** अपसरन्ति विरुद्धं गच्छन्ति इति अप्सरसः विद्युतः। **अथवा** अद्भ्यः सरन्ति इति अप्सरसः। **अथवा** अप्सु जलेषु प्राणेषु अन्तरिक्षेषु सरन्ति इति अप्सरसः। सर्वत्र अप + सृ गतौ (भ्वा० प०) 'सर्तेरपूर्वादसिः' (उ० ४। २३८) इति असि-प्रत्ययः। अप इत्यस्य-पकार-परवर्त्तिनः अकारस्य लोपः। असि-प्रत्यये इकारानुबन्ध-लोपः। **अथवा** न प्सान्ति भक्षयन्ति रक्षां कुर्वन्ति इति अप्सरसः। न + प्सा भक्षणे (अ० प०) असि-प्रत्ययः, प्रत्ययस्य रुडागमः धातोः ह्रस्वत्वं च। प्रत्यये इकारानुबन्ध-लोपः, आगमे उकार-टकारानुबन्धलोपः। प्रायेण अप्सरस् अयं शब्दः बहुवचनान्तः। एकवचने तु अप्सराः इत्येव। 'स्त्रियां बहुष्वप्सरसः स्यादेकत्वेऽप्सरा अपि' इति शब्दार्णवः। 'स्त्रियां बहुष्वप्सरसः स्वर्वेश्या उर्वशीमुखाः' इत्यमरः। 'अप्सरा अप्सारिणी अपि वाप्स इति रूपनामाप्सातेरप्सानीयं भवत्यादर्शनीयं व्यापनीयं वा स्पष्टं दर्शनाय इति वा तदस्यै दत्तमिति वा' (निरु० ५।१३)।

अब्धिः पुं०। इत्यत्र **'देवासुरात्म-स्वर्ग-गिरि-समुद्र०' (लि० सू० ४३) इति पुँल्लिङ्गता।** आपः जलानि धीयन्ते धार्यन्ते रक्ष्यन्ते स्थाप्यन्ते यत्र सः अब्धिः। अप् + डुधाञ् धारणपोषणयोः (जु० प०) 'कर्मण्यधिकरणे च' (पा० अ० ३।३।९२) इति कि-प्रत्ययः। ककारानुबन्धलोपः। 'आतो लोप इटि च' (पा० अ० ६।४।६४) इति धातोः आकारस्य लोपः। 'झलां जशोऽन्ते' (पा० अ० ८।२।३९) इति पकारस्य बकारः। 'समुद्रोऽब्धिरकूपारः' इत्यमरः।

अभिधानम्, अभिधानः नपुं०, पुं०। **इत्यत्र 'मान-यानाभिधान-नलिन०' (लि० सू० ७६) इति नपुंसकलिङ्गता पुँल्लिङ्गता च।** अभिधीयते वस्तु अनेन इति अभिधानम्। अभि + धा (अ० उ०) 'कृत्य-ल्युटो बहुलम्' (पा० अ० ३।३।११३) इति ल्युट्-प्रत्ययः। लकार-टकारानुबन्धलोपः 'यु-वोरनाकौ' (पा० अ० ७।१।१) इति युस्थाने अनादेशः। आकारस्य अकारस्य च 'अकः सवर्णे दीर्घः' (पा० अ० ६।१।१०) इति आ-दीर्घः। 'आख्याह्वे अभिधानं च नामधेयं च नाम च' इत्यमरः।

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by S3 Foundation USA

अभ्रम् नपुं०। इत्यत्र 'अभ्रं नपुंसकम्' (लि० सू० ५०) इति नपुंसकलिङ्गता। अभ्रन्ति गच्छन्ति आपः यस्मात् स्थैर्यं गच्छन्ति आपः यस्मिन् वा इति अभ्रम्। अभ्र गतौ (भ्वा० प०) 'नन्दिग्रहि०' (पा० अ० ३।१।१३४) इति अच्-प्रत्ययः। चकानुबन्ध-लोपः। **अथवा** न बिभर्ति किञ्चित् स्वस्मिन् यत् तद् अभ्रम्। अ + भृञ् भरणे (जु० प०) 'क-प्रकरणे मूलविभुजादिभ्यः उपसंख्यानम्' (वा० पा० अ० ३।२।५) इति क-प्रत्ययः। ककारानुबन्धलोपः। कित्त्वात् तस्मिन् परे 'सार्वधातुकार्धधातुकयोः' (पा० अ० ७।३।८४) इति धातोः ऋकारस्य 'उरण् रपरः' (पा० अ० १।१।५१) इति सहकारेण अर्-गुणः न। 'इको यणचि' (पा० अ० ६।१।७७) इति धातोः ऋकारस्य र्-यणादेशः। **अथवा** न भ्रश्यन्ति अधः पतन्ति आपः यस्मात् इति अभ्रम्। अ + भ्रंशु अधः पतने (दि० प०) 'अन्येष्वपि दृश्यते' (वा० पा० अ० ३।२।१०१) इति ड-प्रत्ययः। डकारानुबन्धलोपः डित्त्वात् 'टेः' (पा० अ० ६।४।१४३) इति धातोः अंश् इत्यस्य लोपः। 'अभ्रं मेघो वारिवाहः' एवं 'द्यो-दिवौ द्वे स्त्रियामभ्रम्०' इत्यमरः। 'अभ्रं मेघे च गगने धातुभेदे च काञ्चने' इत्यपि एकः कोषः।

अमित्रः पुं०। इत्यत्र 'भृत्रामित्र-छात्र-पुत्र-मन्त्र-वृत्र-मेढ्रोष्ट्राः' (लि० १५६) इति पुँल्लिङ्गता। अमति गच्छति द्वेष्टि इति अमित्रः शत्रुः। अम गत्यादिषु (भ्वा० प०) 'अमेर्द्विषति चित्' (उ० ४।१७५) इति इत्र-प्रत्ययः। **अथवा** न विद्यन्ते मित्राणि यस्य सः अमित्रः। मिनोति मान्यं करोति प्रक्षिपति वा विपदः इति मित्रम्। डुमिञ् प्रक्षेपणे (स्वा० उ०) 'अमि-चमि-शासिभ्यः क्त्रः' (उ० ४।१६५) इति क्त्र-प्रत्ययः, स च चित् भवति। ततः नञ्समासः नञ्बहुव्रीहिर्वा। 'द्विड्-विपक्षाहितामित्र-दस्यु-शात्रव-शत्रवः' इत्यमरः। मित्रं न इति विग्रहे तु अमित्रम् इति नपुंसकमेव।

अमृतम् नपुं०। इत्यत्र 'नवनीतावतानानृतामृत०' (लि० सू० १६५) इति नपुंसकलिङ्गता। म्रियते येन तद् मृतम्। मृङ् प्राणपरित्यागे (तु० आ०) 'तनि-मृङ्भ्यां किच्च' (उ० ३।८८) इति तन्-प्रत्ययः, स च कित्। कित्त्वात् 'सार्वधातुकार्धधातुकयोः' (पा० अ० ७।३।८४) इति धातोः ऋकारस्य 'उरण् रपरः' (पा० अ० १।१।५१) इति सहकारेण प्राप्तः अर्-गुणः 'क्ङिति च' (पा० अ० १।१।५) इति निषेधात् न भवति। तनि नकारानुबन्धलोपः। **अथवा** म्रियते स्म इति मृतम्। मृङ् प्राणपरित्यागे (तु० आ०) 'गत्यर्थाकर्मक-श्लिष-शीङ्-स्थास-वस-जन-रुह-जीर्यतिभ्यश्च' (पा० अ० ३।४।७२) इति क्त-प्रत्ययः। ककारानुबन्धलोपः। प्रत्ययस्य कित्त्वात् पूर्ववत् धातोः ऋकारस्य प्राप्तः अर्-गुणः निषिध्यते। 'परासु-प्राप्तपञ्चत्व-परेत-प्रेत-संस्थिताः। मृत-प्रमीतौ त्रिष्वेते' इत्यमरः। 'द्वे याचितायाचितयोर्यथासंख्यमृतामृते' इति चामरः। 'मृतं

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by S3 Foundation USA

मृत्यौ याचिते च' इति हैमः। 'मृतं तु याचिते मृत्यौ क्लीबं मृत्युमति त्रिषु' इति मेदिनी। न म्रियन्ते अनेन तद् अमृतम्, न मृतं मरणं यत्र वा तद् अमृतम्। न-शब्दस्य मृत-शब्देन सह 'नञ्' (पा० अ० २।२।६) इति समासः 'नलोपो नञः' (पा० अ० ३।३।७३) इति केवलं नकारस्य लोपः। 'पीयूषममृतं सुधा', 'मुक्तिः कैवल्य-निर्वाण-श्रेयो-निःश्रेयसामृतम्', 'पयः कीलालममृतम्', 'अमृतं विघसो यज्ञशेषभोजनशेषयोः', 'अप्सु च घृतामृते' इति चामरः। 'अमृतं यज्ञशेषे स्यात् पीयूषे सलिले घृते। अयाचिते च मोक्षे च ना धन्वन्तरि-देवयोः' इति मेदिनी। 'अमृतं वा आपः' (शत० ब्रा० १।९।३।७, ४।४।३।१५)। 'अमृतं वै हिरण्यम्' (शत० ब्रा० ९।४।४।५, तै० ब्रा० १।३।७७)। 'अमृतं हिरण्यम्' (शत० ब्रा० १०।४।१।६, तां० ब्रा० ९।९।४)। 'तद् यत्तदमृतं सोमः सः' (शत० ब्रा० ९।५।१।८)। 'अमृतमु वै प्राणाः' (शत० ब्रा० ९।१।२।३२, ९।३।३।१३) 'प्राणोऽमृतम्' (शत० ब्रा० १०।२।६।१८)। 'सदमृतम्' (शत० ब्रा० १४।४।१।३१)। 'अमृतं वै रुक्' (शत० ब्रा० ७।४।२।२१)। 'अमृतमेव सप्तमी चितिः' (शत० ब्रा० ८।७।४।१८)। 'अमृतत्वं वै रुक्' (शत० ब्रा० ९।४।२।१४)। 'अमृतान्मृत्युः (निवर्तते)' (शत० ब्रा० १०।२।६।१९)। 'य एव शतं वर्षाणि यो वा भूयांसि जीवति स हैवेतदमृतमाप्नोति' (शत० ब्रा० १०।२।६।८)। 'एतद्वै मनुष्यस्यामृतत्वं यत्सर्वमायुरेति' (शत० ब्रा० ९।५।१।१०) 'अमृतं हि प्राणः' (शत० ब्रा० १०।१।४।२)। 'प्राणो वा अमृतम्' (शत० ब्रा० १४।४।४।३)। 'अमृतं ह्येतदमृतेन क्रीणाति यत्सोमं हिरण्येन' (शत० ब्रा० ३।३।३।६)। 'अमृतं हिरण्यममृतमेष (आदित्यः)' (शत० ब्रा० ६।७।१।२)। 'आदित्योऽमृतम्' (शत० ब्रा० १०।२।६।१६)। 'अग्निरमृतम्' (शत० ब्रा० १०।२।६।१७)। 'अमृतमेभ्य उदगायत्। सहस्रं परिवत्सरान्' (तै० ब्रा० ३।१२।९।३)। 'अमृतं हिरण्यम्' (तै० ब्रा० १।७।६।३, १।७।८।१)। 'यद् भेषजं तदमृतं यदमृतं तद्ब्रह्म' (गोप० पू० ३।४)। 'अमृता ह्यापः' (तै० ब्रा० १।७।६।३)। 'अमृतमापः' (गोप० ब्रा० उ० १।३)। 'अमृतत्वं वा आपः' (कौषी० ब्रा० १२।१)। 'अमृतं वै प्राणाः' (कौषी० ब्रा० ११।४, १४।२)। 'अमृतं वै प्राणाः' (गोप० ब्रा० उ० १।१३)। 'एतद्वाव मनुष्यस्यामृतत्वं यत्सर्वमायुरेति' (तां० ब्रा० १३।१२।२, २३।१२।३)। 'किं नु तेऽस्मासु (देवेषु) इति अमृतमिति' (जै० उ० ३।२६।८)। 'अमृतमिव स्वर्गो लोकः' (तै० ब्रा० १।३।७।५)। 'अमृतं वा ऋक्' (कौषी० ब्रा० ७।१०)। 'अथ यद् ब्रह्म तदमृतम्' (जै० उ० १।२५।१०)। 'अमृताः देवाः' (शत० ब्रा० २।१।३।४)। 'अमृतं हिरण्य-नाम' (निघं० १।२)। 'अमृतम् उदकनाम' (१।१२)। 'अमृतो अमरधर्माणो' (निरु० २।

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by S3 Foundation USA

२०)। 'अमृतस्य उदकनाम' (निरु० १२। ८)। 'अमृतेषु देवेषु' (नि० ८। १९)। 'प्रजापतिर्वाऽमृतः' (शत० ब्रा० ६। ३। १। १७)।

अम्बरम् नपुं०। इत्यत्र **'द्वाराग्र-स्फार-तक्र-वक्र-वप्र०' (लि० सू० ९०) इति नपुंसकलिङ्गता।** अम्बते अम्ब्यते वा इति अम्बरम्। अबि शब्दे (भ्वा० अ०) 'ऋच्छेररः' (उ० ३। ४११) इति बाहुलकात् अर-प्रत्ययः। धातोः इदित्त्वात् 'इदितो नुम् धातोः' (पा० अ० ७। १। ५८) इति नुमागमः। उकार-मकारानुबन्धलोपः। 'नश्चापदान्तस्य झलि' (पा० अ० ८। ३। २४) इति नकारस्य अनुस्वारः। अनुस्वारस्य पुनः 'अनुस्वारस्य ययि परसवर्णः' (पा० अ० ८। ४। ५८) इति मकारः परसवर्णः। **अथवा** अम्बः = शब्दः, तम् अम्बं शब्दं राति इति अम्बरम्। अम्ब + रा दाने (अ० प०) 'आतोऽनुपसर्गे कः' (पा० अ० ३। २। ३) इति क-प्रत्ययः। ककारानुबन्धलोपः। 'आतो लोप इटि च' (पा० अ० ६। ४। ६४) इति धातोः आकारस्य लोपः। 'व्योम पुष्करमम्बरम्' तथा 'अम्बरं व्योम्नि वाससि' इति चामरः। 'अम्बरं वाससि व्योम्नि कार्पासे च सुगन्धके' इति विश्वः। 'अम्बरं न द्वयोर्व्योम्नि सुगन्ध्यन्तर-वस्त्रयोः' इति मेदिनी।

अम्बरीषम् नपुं०। **इत्यत्र 'शिरीषर्जीषाम्बरीष-पीयूष०' (लि० ९४) इति नपुंसकलिङ्गता।** अम्बते शब्दयति अम्ब्यते शब्द्यते अत्र वा इति अम्बरीषम्। अबि शब्दे (भ्वा० अ०) 'अम्बरीषः' (उ० ४। ३०) इति ईषन्-प्रत्ययः, तस्य अरुडागमश्च। प्रत्यये नकारानुबन्ध-लोपः, आगमे उकार-टकारानुबन्धलोपः। धातोः इदित्त्वात् 'इदितो नुम् धातोः' (पा० अ० ७। १। ५८) इति नुम्-आगमः। उकार-मकारानुबन्धलोपः। नकारस्य 'नश्चापदान्तस्य झलि' (पा० अ० ८। ३। २४) इति अनुस्वारः। अनुस्वारस्य 'अनुस्वारस्य ययि परसवर्णः' (पा० अ० ८।४।५८) इति परसवर्णः मकारः। 'अम्बरीषो रणे राष्ट्रे, क्लीबं पुंसि नृपान्तरे। नरकस्य प्रभेदे च किशोरे भास्करेऽपि च। आम्रातकेऽनुपाते च' इति मेदिनी। 'क्लीबेऽम्बरीषं भ्राष्ट्रः' इत्यमरः।

अम्बुदः, अम्बुदम् पुं०, नपुं०। **इत्यत्र 'गृह-मेह-देह०' (लि० सू० १८२) इति पुँल्लिङ्गता नपुंसकलिङ्गता च।** अमन्ति गच्छन्ति चेष्टन्ते प्राणिनः येन तद् अम्बु। **अथवा** आमयन्ति रुग्णाः भवन्ति जनाः येन तद् अम्बु। अम गत्यादिषु (भ्वा० प०), अम रोगे (चु० प०) 'अर्जि-दृशि-कम्यमि-पंसि-बाधा-मृजि-पशि-तुग्-धुग्-दीर्घ-हकाराश्च' (उ० १। २७) इति कु-प्रत्ययः, तथा सूत्रेऽत्र चकार-ग्रहणात् बहुल-वचनाद् वा धातोः बुगागमश्च। प्रत्यये ककारानुबन्धलोपः। आगमे उकार-मकारानुबन्धलोपः। **अथवा** अम्बते शब्दयति इति अम्बु। अबि शब्दे (भ्वा० आ०) 'मृगय्वादयश्च' (उ०

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by S3 Foundation USA

१। ३७) इति बाहुलकात् कु-प्रत्ययः। प्रत्यये ककारानुबन्धलोपः। धातोः इदित्त्वात् 'इदितो नुम् धातोः' (पा० अ० ७। १। ५८) इति नुम्-आगमः। उकार-मकारानुबन्ध-लोपः। नकारस्य 'नश्चापदान्तस्य झलि' (पा० अ० ८। ३। २४) इति अनुस्वारः। अनुस्वारस्य 'अनुस्वारस्य ययि परसवर्णः' (पा० अ० ८। ४। ५८) इति परसवर्णः मकारः। 'नीर-क्षीराम्बु-शंवरम्' इत्यमरः। अम्बु ददाति इति अम्बुदः अम्बुदं वा। अम्बु + दा दाने (जु० उ०) 'आतोऽनुपसर्गे कः' (पा० अ० ३। २। ३) इति क-प्रत्ययः। ककारानुबन्धलोपः। 'आतो लोप इटि च' (पा० अ० ६। ४। ६४) इति धातोः आकारस्य लोपः। 'अम्बुदो मेघो भवति, अरण-शीलमम्बु, तद्दोऽम्बुदोऽम्बुमद्भवतीति-वाऽम्बुमद्भवतीति वा' (निरु० ३। २। १०)।

अयुतः, अयुतम् पुं० नपुं०। इत्यत्र **'शतायुत-प्रयुताः पुंसि च' (लि० सू० १४५) इति पुँल्लिङ्गता नपुंसकलिङ्गता च।** यु मिश्रणामिश्रणयोः (अ० प०) 'निष्ठा' (पा० अ० ३। २। १०२) इति क्त-प्रत्ययः। तकारानुबन्धलोपः। न युतः युतं वा इति अयुतः अयुतं वा। न शब्दस्य युत-शब्देन 'नञ्' (पा० अ० २। २। ६) समासः। 'नलोपो नञः' (प० अ० ३। ३। ७३) इति केवलं नकारस्य लोपः। 'अयुतं नियुतं प्रयुतं तत्तदभ्यस्तम्' (निरु० ३। २। १०)। सहस्रं दशकृत्वोऽभ्यस्तमयुतम् इत्यर्थः। 'अयुतं दक्षिणा इति वा' (निरु० १०। १२)।

अरणिः पुं०, स्त्री०। **इत्यत्र 'अशनि-भरण्यरणयः पुंसि च' (लि० सू० ५) इति पुँल्लिङ्गता स्त्रीलिङ्गता च।** ऋच्छति प्राप्नोति यया साऽथवा स इति अरणिः। ऋ गतौ प्रापणे च (भ्वा० प०) 'अर्त्ति-सृ-धृ-धम्यम्यश्यवि-तृभ्योऽनिः' (उ० २। १०४) इति अनि-प्रत्ययः। 'सार्वधातुकार्धधातुकयोः' (पा० अ० ७। ३। ८४) इति 'उरण् रपरः' (पा० अ० १। १। ५१) इति सहकारेण धातोः ऋकारस्य अर्-गुणः। 'अट्-कुप्वाङ्-नुम्-व्यवायेऽपि' (पा० अ० ८। ४। २) इति नकारस्य णकारः। 'निर्मन्थ्यदारुणि त्वरणिर्द्वयोः' इत्यमरः 'अरणिर्वह्निमन्थे ना द्वयोर्निर्मथ्यदारुणि' इति मेदिनी। 'अग्निः समरणाज्जायते इति वा' (निरु० ५। १०)। 'देवस्थो वा अरणी' (कौषी० ब्रा० २। ६)। 'अरो वै विष्णुस्तस्य वा एषा पत्नी यदरणी' (काठक-संहिता २१। २। ३)।

अरण्यः, अरण्यम् पुं०, नपुं०। **इत्यत्र 'वक्त्र-नेत्रारण्य-गाण्डीवानि पुंसि च' (लि० सू० १३९) इति पुँल्लिङ्गता नपुंसकलिङ्गता च।** ऋच्छन्ति गच्छन्ति यत्र अथवा अर्यते गम्यते यत्र इति अरण्यः अरण्यं वा। ऋ गतौ प्रापणे च (भ्वा० प०) 'अर्तेर्निच्च' (उ० ३। १०२) इति अन्य-प्रत्ययः। प्रत्ययः नित्, नित्त्व स्वरार्थम्। सार्वधातु-

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by S3 Foundation USA

कार्धधातुकयोः' (पा० अ० ७ । ३ । ८४) इति 'उरण् रपरः' (पा० अ० १ । १ । ५१) इति सहकारेण धातोः ऋकारस्य अर्-गुणादेशः। 'अट्-कुप्वाङ्-नुम्-व्यावायेऽपि' (पा० अ० ८ । ४ । २) इति नस्य णत्वम्। 'अटव्यरण्यं विपिनं गहनं काननं वनम्' इत्यमरः। 'अरण्यमपार्णं ग्रामादरमणं भवतीति वा' (निरु० ९ । २९)। 'वाग्वाऽरण्येऽनूच्यः' (पुरोडाशः) (शत० ब्रा० ९ । ३ । २ । ४)।

अर्घः पुं० । इत्यत्र 'अर्घ-पथि-मथ्यृभुक्षि-स्तम्ब-नितम्ब-पूगाः' (लि० सू० ११५) इति अथवा 'घञबन्तः' (लि० सू० ३६) इति पुँल्लिङ्गता। अर्ह्यते पूज्यते येन सः अर्घः। अर्ह पूजायां (भ्वा० प०) 'हलश्च' (पा० अ० ३ । ३ । १२१) इति घञ्-प्रत्ययः। घकार-ञकारानुबन्धलोपः। 'न्यङ्क्वादीनां च' (पा० अ० ७ । ३ । ५३) इति धातोः हकारस्य घकारः। 'मूल्ये पूजा विधावर्घः' इत्यमरः।

अर्चिः स्त्री०, नपुं० । इत्यत्र 'अर्चिः स्त्रियां च' (लि० सू० १३५) इति स्त्रीलिङ्गता नपुंसकलिङ्गता च। अर्चति अर्च्यते वा येन इति अर्चिः। अर्च पूजायाम् (भ्वा० प०) 'अर्चि-शुचि-हु-सृपि-छादि-छर्दिभ्य इसिः' (उ० २ । ११०) इति इसि-प्रत्ययः। इकारानुबन्धलोपः। 'नुम्-विसर्जनीय-शर्-व्यवायेऽपि' (पा० अ० ८ । ३ । ५८) इति प्रत्ययस्य सस्य षत्वम्। एवम् अर्चिष् इति निष्पद्यते। अथवा 'सर्वधातुभ्य इन्' (उ० ४ । ११९) इति इन्-प्रत्ययः। नकारानुबन्धलोपः। इन्-प्रत्ययान्तः अर्चि-शब्दः इकारान्तः पुँल्लिङ्गः अपि। 'अर्चिर्हेतिः शिखा स्त्रियाम्' तथा 'ज्वाला-भासोर्नपुंस्यर्चिः' इति चामरः। 'अथार्चिर्मयूख-शिखयोर्न न' इति मेदिनी। 'अर्चिर्मयूख-शिखयोः' इति हैमः विश्वः च। 'अर्चिरिति ज्वलतो नामधेयम्' (निघं० १ । १७)।

अर्थः पुं० । इत्यत्र 'थोपधः' (लि० सू० ७०) इति तथा 'सीरार्थौदनाः पुंसि' (लि० सू० १३८) इति पुँल्लिङ्गता। ऋच्छति इयर्त्ति वा गच्छति, नश्यति अर्यते प्राप्यते वा यः सः अर्थः। ऋ गति-प्रापणयोः (भ्वा० प०) तथा ऋ गतौ (जु० प०) 'उषि-कुषि-गर्त्तिभ्यस्थन्' (उ० २ । ३) इति थन्-प्रत्ययः। नकारानुबन्धलोपः। 'सार्वधातुकार्धधातुकयोः' (पा० अ० ७ । ३ । ८४) इति 'उरण् रपरः' (पा० अ० १ । १ । ५१) इति सहकारेण ऋ-धातोः अर्-गुणः। अथवा अर्थ्यते उपयाच्यते इति अर्थः। अर्थ उपयाच्ञायाम् (चु० आ०) 'अकर्त्तरि च कारके संज्ञायाम्' (पा० अ० ३ । १ । १९) इति घञ्-प्रत्ययः। घकार-ञकारानुबन्धलोपः। घञ्-प्रत्ययान्ते अर्थ-शब्दे तु पुँल्लिङ्गता 'घञबन्तः' (लि० सू० ३६) इत्यनेन बोध्या। 'अर्थ-रै-विभवा अपि' तथा 'अर्थोऽभिधेय-रै-वस्तु-प्रयोजन-निवृत्तिषु' इत्यमरः। 'अर्थो विषयार्थनयोर्धनकारण-

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by S3 Foundation USA

वस्तुषु। अभिधेये च शब्दानां निवृत्तौ च प्रयोजने' इति मेदिनी। 'अर्थः अर्त्तेः अरणस्थो वा' (निरु १। १८)।

अर्धर्चः, अर्धर्चम् पुं०, नपुं०। इत्यत्र **'व्रज-कुञ्ज-कुथ०' (लि० सू० १७९) इति पुँल्लिङ्गता नपुंसकलिङ्गता च**। अथवा 'अर्धर्चाः पुँसि च' (पा० अ० २। ४। ३१) इति ऋचः अर्धम् अर्धर्चम् इति विग्रहे अर्ध-शब्दस्य 'अर्धं नपुंसकम्' (पा० अ० २। २। २) इति ऋच् इत्यनेन समासः। 'आद् गुणः' (पा० अ० ६। १। ८७) इति 'उरण् रपरः' (पा० अ० १। १। ५१) इति सहकारेण अकारस्य ऋकारस्य च अर्-गुणः। 'ऋक्पूरब्धूः पथामानक्षे' (पा० अ० ५। ४। ७४) इति अ-प्रत्ययः। 'पुंनपुंसकयोः शेषोऽर्धर्च-पिण्याक-कण्टकाः' इत्यमरः। 'प्रतिष्ठा वै अर्धचः' (गोप० उ० ५। १०)।

अर्भः, अर्भम् पुं०, नं०। **इत्यत्र 'व्रज-कुञ्ज-कुथ०' (लि० सू० १७९) इति पुँल्लिङ्गता नपुंसकलिङ्गता च**। ऋच्छति इयर्त्ति गच्छति प्राप्नोति इति अर्भः शिशुर्वा 'ऋ गति-प्रापणयोः' (भ्वा० प०) तथा ऋ गतौ (जु० प०) 'अर्ति-गृभ्यां भन्' (उ० ३। १५२) इति भन्-प्रत्ययः। नकारानुबन्धलोपः। 'सार्वधातुकार्धधातुकयोः' (पा० अ० ७। ३। ८४) इति 'उरण् रपरः' (पा० अ० १। १। ५१) इति सहकारेण ऋ-धातोः अर्-गुणः। 'पोतः पाकोऽर्भको डिम्भः पृथुकः शावकः शिशुः इत्यमरः।' 'अर्भकः कथितो बाले' इति मेदिनी। 'अर्भको ह्रस्वनाम' (निघं० ३। २)। 'अर्भके अवृद्धे' (निरु० ४। १५)। 'अर्भकमित्यल्पस्य। अर्भकमवहृतं भवति' (निरु० ३। २०)।

अवतानम् नपुं०। **इत्यत्र 'घञबन्तः' (लि० सू० ३६) इति पुँल्लिङ्गतां प्रबाध्य 'नवनीतावतानानृतामृत-निमित्त०' (लि० सू० १६५) इति नपुंसकलिङ्गता।** अवतननम् अवतन्यते वा इति अवतानम्। अव + तनु विस्तारे (त० उ०) 'भावे' (पा० अ० ३। ३। १८) इति अथवा 'अकर्त्तरि च कारके संज्ञायाम्' (पा० अ० ३। ३। १९) इति घञ्-प्रत्ययः। घकार-ञकारानुबन्धलोपः। 'अत उपधायाः' (पा० अ० ७। २। ११६) इति धातोः उपधायाः अकारस्य आ-वृद्धयादेशः। **अथवा** अवतनोति इति अवतानम् 'तनोतेरुपसंख्यानम्' (पा० अ० ३। १। १४०) इति कर्त्तरि ण-प्रत्ययः। णकारानुबन्धलोपः। पूर्ववत् अकारस्य आ-वृद्धयादेशः। **अथवा** अवतन्यते अनेन इति अवतानम् 'हलश्च' (पा० अ० ३। ३। १२१) इति करणे घञ्-प्रत्ययः।

अवनिः स्त्री०। **इत्यत्र 'मिन्यन्तः' (लि० सू० ६) इति स्त्रीलिङ्गता**। अवति अव्यते वा रक्षति आदि रक्ष्यते आदि वा इति अवनिः। अव रक्षण-गति-कान्ति-प्रीति-तृप्यवगम-प्रवेश-श्रवण-सामर्थ्य-याचन-क्रियेच्छा-दीप्त्यवाप्त्यालिङ्गन-हिंसा-दान-भाग-वृद्धिषु

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by S3 Foundation USA

(भ्वा० प०) 'अर्ति-सृ-धृ-धम्यम्यशवि-तृभ्योऽनिः' (उ० २। १०४) इति अनि-प्रत्ययः। 'क्ष्मावनिर्मेदिनी मही' इत्यमरः। 'अवनिः पृथिनीनाम' (निघं० १। १)। 'अवनयः अङ्गुलिनाम' (निघं० २। ५)। 'अवनयो नदीनाम' (निघं० १। १३) 'अवनयोऽङ्गुलयो भवन्ति अवन्ति कर्माणि' (निरु० ३। ८)।

अवारम् नपुं०, पुं०। इत्यत्र **'चक्र-वज्रान्धकार-सारावार-पार०' (लि० सू० ९२) इति नपुंसकलिङ्गता तथा 'घञबन्तः' (लि० सू० ३६) इति पुँल्लिङ्गता च**। अवअर्यते गम्यते इति अवारम् अर्वाक् तीरम् इत्यर्थः। अव + ऋ गतौ (भ्वा० प०) 'अकर्त्तरि च कारके संज्ञायाम्' (पा० अ० ३। ३। १९) इति घञ्-प्रत्ययः। घकार-ञकारानुबन्ध-लोपः। 'अचो ञ्णिति' (पा० अ० ७। २। ११५) इति धातोः ऋकारस्य 'उरण् रपरः' (पा० अ० १। १। ५१) सहकारेण आर्-वृद्धिः। अथवा न वार् अस्ति अत्र इति अवारम्। अ + वार् शब्दात् 'अर्श आदिभ्योऽच्' (पा० सू० ५। २। १२७) इति अच्-प्रत्ययः। चकारानुबन्धलोपः। 'अवारमवरमवनाय भवति' (निरु० २। ७। २४)।

अव्ययम्, अव्ययः नपुं०, पुं०। इत्यत्र **'गोमय-कषाय-मलयान्वयाव्ययानि नपुंसके च' (लि० सू० ८८) इति नपुंसकलिङ्गता पुँल्लिङ्गता च**। व्येति इति व्ययम् व्ययः वा। वि + इण् गतौ (अ० प०) 'एरच्' (पा० सू० ३। ३। ५६) इति अच्-प्रत्ययः। चकारानुबन्धलोपः। 'सार्वधातुकार्धधातुकयोः' (पा० सू० ७। ३। ८४) इति धातोः इकारस्य ए-गुणः। 'एचोऽयवायावः' (पा० सू० ६। १। ७८) इति एकारस्य अय्-आदेशः। 'इको यणचि' (पा० सू० ६। १। ७७) इति वि इत्यस्य इकारस्य य्-यणादेशः। एवं व्ययशब्दः निष्पद्यते। ततः न व्ययः इति अव्ययम् अव्ययः वा। न शब्दस्य व्यय-शब्देन 'नञ्' (पा० अ० २। २। ६) इति समासः। 'नलोपो नञः' (पा० अ० ३। ३। ७३) इति केवलं नकारस्य लोपः। **अथवा** व्ययति व्ययते गच्छति इति व्ययः। व्यय गतौ (भ्वा० उ०) 'नन्दि-ग्रहि-पचादिभ्यो०' (पा० अ० ३। १। १३४) इति अच्-प्रत्ययः। चकारानुबन्धलोपः। **अथवा** व्ययति व्ययते वा अस्मिन् इति व्ययः। 'घञर्थे क-विधानम्' (वा० पा० अ० ३। ३। ५८) इति क-प्रत्ययः। ककारानुबन्धलोपः। न व्ययः इति अव्ययः। पूर्ववत् न-शब्दस्य व्यय-शब्देन समासः। 'सङ्गमं शत-मानार्म-शम्बलाव्ययताण्डवम्' इत्यमरः। 'अव्ययोऽस्त्री शब्दभेदे ना विष्णौ निर्व्यये त्रिषु' इति मैदिनी।

अशनिः पुं०, स्त्री०। **इत्यत्र 'अशनि-भरण्यरणयः पुँसि च' (लि० सू ५) इति पुँल्लिङ्गता स्त्रीलिङ्गता च**। 'शष्कुलि-राजि-कुट्यशनि-वर्त्ति-भ्रुकुटि-त्रुटि-वलि-पङ्क्यः' (लि० सू० २६) इत्यनेन अपि च स्त्रीलिङ्गता। येन अश्नुते यः अश्नुते

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by S3 Foundation USA

व्याप्नोति वा इति अशनिः। **अथवा** अश्यते भुज्यते राज्यम् इन्द्रेण अनेन इति अशनिः वज्रम्। अश भोजने (क्र्या० प०) एवम् अशू व्याप्तौ संघाते च (स्वा० आ०) 'अर्त्ति-सृ-धृ-धम्यम्यश्यवि-तृभ्योऽनिः' (उ० २। १०४) इति अनि-प्रत्ययः। 'दम्भोलिरशनिर्द्वयोः' इत्यमरः। 'अशनिः स्त्री-पुंसयोः स्याच्चञ्चलायां रवावपि' इति मेदिनी।

अशीतिः स्त्री०। **इत्यत्र 'विंशत्यादिरानवतेः' (लि० सू १३) इति स्त्रीलिङ्गता।** 'अष्टौ दशतः परिमाणमस्य संघस्य अशीतिः, ति-प्रत्ययः, प्रकृतेः अशी इत्यादेशः' (सिद्धान्तकौमुद्यां बालमनोरमाकारः) 'अष्टानां दशतामशी' इति (सिद्धान्तकौमुद्यां तत्त्वबोधिनीकारः) 'पङ्क्ति-विंशति-त्रिंशच्चत्वारिंशत्पञ्चाशत्षष्टि-सप्तत्यशीतिनवतिशतम्' (पा० अ० ५। १। ५९) एते रूढिशब्दा निपात्यन्ते (सिद्धान्तकौमुद्यां भट्टोजिदीक्षितः) 'अन्नमशीतिः' (शत० ब्रा० ८।५।२।१७) 'अन्नमशीतयः' (शत० ब्रा० ९। १।१।२१)।

अश्रम् नपुं०। **इत्यत्र 'द्वाराग्र-स्फार-तक्र-वक्र-वप्र०' (लि० सू ९०) इति नपुंसकलिङ्गता।** अश्नाति भक्षति अश्नुते व्याप्नोति वा इति अश्रम्। अश भोजने (क्र्यादि० प०) एवम् अशू व्याप्तौ संघाते च (स्वा० आ०) 'उणादयो बहुलम्' (पा० अ० ३। ३। १) इति उणादीनां बाहुलकत्वात् 'स्फायि-तञ्चि-वञ्चि-शकि-क्षिपि-क्षुदि०' (उ० २। १३) इति रक्-प्रत्ययः। ककारानुबन्धलोपः।

अश्रिः, अश्री स्त्री०। **इत्यत्र 'दर्वि-विदि-वेदि-खनि-शान्यश्रि०' (लि० सू० २३) इति स्त्रीलिङ्गता।** आश्रीयते प्रहारार्थं स्थित्यर्थं वा इति अश्रिः कोणः वा। आ + श्रिञ् सेवायाम् (भ्वा० पर०) 'आङि श्रि-हनिभ्यां ह्रस्वश्च' (उ० ४। १३९) इति इण्-प्रत्ययः, स च डित्। डित्त्वात् 'टेः' (पा० अ० ६। ४। १४३) इति धातोः इकारस्य टेर्लोपः आङ् उपसर्गस्य अकारः ह्रस्वः च। 'सर्वतोऽक्तिन्नर्थादित्येके' (वा० पा० अ० ४। १। ४५) इति विकल्पेन ङीष्-प्रत्यये तु अश्री इत्यपि निष्पद्यते। तथात्वे ङकार-षकारानुबन्धलोपः। 'यस्येति च' (पा० अ० ६। ४। १४८) इति अश्रि-शब्दस्य इकारस्य लोपः। 'कोणस्तु स्त्रियः पाल्यश्रिकोटयः' इत्यमरः। 'अश्रिः कोणैकदेशयोः' इति धरणिः।

अश्रु नपुं०। **इत्यत्र 'श्मश्रु-जानु-वसु-स्वाद्वश्रु-जतु-त्रपु-तालूनि नपुंसके' (लि० सू० ५४) इति नपुंसकलिङ्गता।** अश्नाति भक्षयति रोदन-कर्तुः दुःखम् अथवा अश्नुते व्याप्नोति नेत्रयोः **अथवा** संहन्ति सहृदयं जनम् इति अश्रु। अश भोजने (क्र्या० प०), अशू व्याप्तौ संघाते च (स्वा० आ०) 'अश्र्वादयश्च' (उ० ५। २९) इति रुन्-प्रत्ययः, नञ्-पूर्वात् श्रयतेर्डुन् च। नकारानुबन्धलोपः। '...अश्नोतेर्डुन् रुट् चेति

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by S3 Foundation USA

तदयुक्तम्, डित्त्वाट्टिलोपे सति धातोरश्रवणप्रसङ्गात्। न च टिलोपाभावो निपात्यत इति वाच्यम्। तथा सति डित्त्वोत्प्रेक्षणस्य निष्फलत्वापत्तेः' इति (सिद्धान्तकौमुद्याम् उणादौ तत्त्व-बोधिनीकारः)। **अथवा** अश्नुते व्याप्नोति नेत्रयोः अथवा संहन्ति सहृदयं जनम् इति अश्रु। 'अशू व्याप्तौ संघाते च' (स्वा० आ०) 'जत्वादयश्च' (उ० ४। १०३) इति रु-प्रत्ययः। 'अस्रु नेत्राम्बु रोदनं चास्रमश्रु च' इत्यमरः।

अष्टापदः, अष्टापदम् पुं०, नपुं०। इत्यत्र **'गृह-मेह-देह-पट्ट-पटहाष्टापदाम्बुद-ककुदाश्च' (लि० सू० १८२) इति पुँल्लिङ्गता नपुंसकलिङ्गता च।** अष्टौ धातवः पदानि स्थानानि यस्य सः अष्टापदः। अष्टन् इत्यस्य पदशब्देन 'अनेकमन्य-पदार्थे' (पा० अ० २। २। २४) इति समासः। 'नलोपः प्रातिपदिकान्तस्य' (पा० अ० ८। २। ७) इति अष्टन् इत्यस्य नकारस्य लोपः। 'अष्टनः संज्ञायाम्' (पा० अ० ६। ३। १२५) इति टकारपरवर्त्तिनः अकारस्य आ-दीर्घः। 'रुक्मं कार्तस्वरं जाम्बूनदमष्टापदोऽस्त्रियाम्' एवम् 'अष्टापदं शारिफलम्' इति चामरः। 'अष्टापदोऽस्त्री कनके शारीणां फलकेऽपि च' इति मेदिनी।

असवः पुं०। इत्यत्र **'दाराक्षत-लाजासूनां बहुत्वं च' (लि० सू० १०६) इति पुँल्लिङ्गता बहुवचनत्वं च।** असति दीपयति अस्यते प्रक्षिप्यते यः अनेन वा इति असुः। अस गति-दीप्त्यादानेषु (भ्वा० प०) असु क्षेपणे (दि० प०) 'शृ-स्वृ-स्निहि-त्रप्यसि-वसि-हनि-क्लिदि-बन्धि-मनिभ्यश्च' (उ० १। १०) इति उ-प्रत्ययः। एवम् असु-शब्दः निष्पद्यते। तस्य बहुवचने असवः इति भवति। 'पुंसि भूम्यसवः' इत्यमरः।

असुरः पुं०। इत्यत्र **'देवासुरात्म-स्वर्ग-गिरि-समुद्र०' (लि० सू० ४३) इति पुँल्लिङ्गता।** असु-शब्दः पूर्वं व्याख्यातः। असून् प्राणान् राति ददाति इति असुरः। असु + रा दाने (अ० प०) 'आतोऽनुपसर्गे कः' (पा० अ० ३। २। ३) इति क-प्रत्ययः। ककारानुबन्धलोपः। 'आतो लोप इटि च' (पा० अ० ६। ४। ६४) इति धातोः आकारस्य लोपः। **अथवा** असुभिः असुपु वा रमते इति असुरः। असु + रमु क्रीडायाम् (भ्वा० अ०) 'अन्येभ्योऽपि दृश्यते' (पा० अ० ३। २। १०१) इति ड-प्रत्ययः। डकारानुबन्ध-लोपः। डित्त्वात् 'टेः' (पा० अ० ६। ४। १४३) इति धातोः अम् इत्यस्य टेर्लोपः। **यद्वा** अस्यति क्षिपति देवान् इति असुरः दैत्यः। **अथवा** अस्यति प्रक्षिपति शुभगुणान् इति असुरः दुर्जनः। असु क्षेपणे (दि० प०) 'असेरुरन्' (उ० १। ४३) इति उरन्-प्रत्ययः। नकारानुबन्धलोपः। नित्त्वम् आद्युदात्त्वार्थम्। एवम् असुर-शब्दः निष्पद्यते। अस्य बहुवचने असुराः इति भवति। 'असुरा दैत्य-दैतेय-दनुजेन्द्रारि-दानवाः' इत्यमरः। 'असुरः सूर्य-

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by S3 Foundation USA

दैत्ययोः' इति हैमः। 'मनो वा असुरं तद्ध्यसुषु रमते' (जै० उ० ३।३५।३)। स्त्रियाम् 'अजाद्यतष्टाप्' (पा० अ० ४।१।४) इति टाप्-प्रत्ययः। टकार-पकारानुबन्धलोपः। 'अकः सवर्णे दीर्घः' (पा० अ० ६।१।१०१) इति अकाराकारयोः दीर्घः। तदा 'असुरा' इति रूपम्। 'असुरा रजनी-राश्योः' इति हैमः।

अहः नपुं०। इत्यत्र **'दिनाहनी नपुंसके' (लि० सू० १०२) इति नपुंसकता।** न जहाति परित्यजति कर्मकरणं यस्मिन् काले सः कालः अहः। नञुपपदात् ओहाक् त्यागे (जु० प०) 'नञि जहातेः' (उ० १।१५८) इति कनिन्-प्रत्ययः। ककारेकार-नकारानुबन्धलोपः। 'आतो लोप इटि च' (पा० अ० ६।४।६४) इति धातोः आकारस्य लोपः। 'रोः सुपि' (पा० अ० ८।२।६९) इति नस्य रः। 'खरवसानयोर्विसर्जनीयः' (पा० अ० ८।३।१८) इति रेफस्य विसर्गः। **अथवा** अह्नोति व्याप्नोति सर्वम् इति अहः। **अथवा** अहति नाशयति अन्धकारम् इति अहः। अह व्याप्तौ (स्वा० प०), अह हिंसागत्योः (काशकृत्स्नधातुः भ्वा० प०) 'सर्वधातुभ्योऽसुन्' (उ० ४।१९०) इति असुन्-प्रत्ययः। उकार-नकारानुबन्धलोपः। 'ससजुषो रुः' (पा० अ० ८।२।६६) इति सस्य रुत्वम्। उकारानुबन्धलोपः। 'खरवसानयोर्विसर्जनीयः' (पा० अ० ८।३।१५) इति रेफस्य विसर्गः। **अथवा** 'नन्दिग्रहिपचादिभ्यो०' (पा० अ० ३।१।१३४) इति अच्-प्रत्ययः। चकारानुबन्धलोपः। एवम् अपि अह इति अकारान्तः निष्पद्यते। 'घस्रो दिनाहनी वा तु क्लीबे दिवसवासरौ' इत्यमरः।

अस्मद् त्रिषु लिङ्गेषु समानः। इत्यत्र **'अव्ययं कति-युष्मदस्मदः' (लि० सू० १८४) इति पुँल्लिङ्गता स्त्रीलिङ्गता नपुंसकलिङ्गता च।** अस्यति प्रक्षिपति इतरम् इति अस्मद्। **अथवा** असति गच्छति दीप्यते आददाति वा इति अस्मद्। असु क्षेपणे (दि० प०), अस गति दीप्त्यादानेषु (भ्वा० उ०) 'युष्यसिभ्यां मदिक्' (उ० १।१३९) इति मदिक्-प्रत्ययः। इकार-ककारानुबन्ध-लोपः।

अहोरात्रे नपुं० वेदे, लौकिक-संस्कृते तु पुं०। इत्यत्र **'अभाषायां हेमन्तशिशिरावहोरात्रे' (लि० सू० १२५) इति वेदे नपुंसकलिङ्गता।** अहश्च रात्रिश्च इति लौकिकविग्रहे 'चार्थे द्वन्द्वः' (२।२।२९) इति अहन् इत्यस्य रात्रि इत्यनेन द्वन्द्व-समासः। 'अहः सर्वैकदेश-संख्यात-पुण्याच्च रात्रेः' (पा० अ० ५।४।८७) इति अच्-प्रत्ययः। चकारानुबन्धलोपः। 'यस्येति' (पा० अ० ६।४।१४८) इति रात्रि-शब्दस्य इकारस्य लोपः। 'अहन्' (पा० अ० ८।२।६८) इति नकारस्य रुत्वम्। उकारानुबन्धलोपः। 'हशि च' (पा० अ० ६।१।११४) इति रस्य उत्वम्। 'आद्गुणः'

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by S3 Foundation USA

(पा० अ० ६।१।८७) इति अकारस्य उकारस्य च ओ-गुणः। 'परवल्लिङ्गं द्वन्द्वतत्पुरुषयोः' (पा० अ० २।४।२६) इति प्राप्तां स्त्रीलिङ्गतां विनिवार्य 'अभाषायां हेमन्तशिशिरावहोरात्रे' (लि० सू० १२५) इत्यनेन अथवा 'हेमन्तशिशिरावहोरात्रे च छन्दसि' (पा० अ० २।४।२८) इत्यनेन वेदे नपुंसकलिङ्गता भवति। भाषायां लौकिकसंस्कृते तु 'रात्राह्नाहाः पुंसि' (पा० अ० २।४।२९) इति पुँल्लिङ्गता एव जायते 'ते तु त्रिंशदहोरात्रः' इत्यमरः। 'अहोरात्रे वा अश्वस्य मेध्यस्य लोमनी' (तै० ब्रा० ३।९।२३।१)। अहोरात्राणीष्टकाः (संवत्सरस्य) (तै० ब्रा० ३।११।१०।४)। 'एते ह वै संवत्सरस्य चक्रे यदहोरात्रे' (ऐ० ब्रा० ५।३०)। 'अहोरात्रे वै नृवाहसा' (तै० ब्रा० ३।९।४।३)। 'अहोरात्रे वा उषासानक्ता' (ऐ० ब्रा० २।४)। 'अहोरात्रे वै गो आयुषी' (कौषी० ब्रा० २६।२)। 'अहोरात्रे स (प्रजापतिः) एतमतिरात्रमपश्यत्तमहरत्तेनाहोरात्रे प्राजनयत्' (ता० ब्रा० ४।१।१४)। 'अहोरात्रे नक्तोषासा' (शत० ब्रा० ६।७।२।३)। 'अहोरात्रे तद्वाऽहोरात्रेऽएव विष्णुक्रमा भवन्ति' (शत० ब्रा० ६।७।४।१०)। 'अहोरात्रे वात्सप्रम् (सूक्तम्)' (शत० ब्रा० ६।७।४।१०)। 'अहोरात्रे वै रौहिणौ (पुरोडाशौ)' (शत० ब्रा० १।४।४।२)। 'अहोरात्रे वै पिशङ्गिले' (शत० ब्रा० १३।२।६।१७)। 'अहोरात्राणि वै वरुत्रयोऽहोरात्रैर्हीदं सर्वं वृत्तम्' (शत० ब्रा० ६।५।४।६)। 'अहोरात्राणां वा एतद्रूपं यद्धानाः' (शत० ब्रा० १३।२।१।४)। 'अहोरात्राणि हिङ्कारः' (षड्विंश ब्रा० ३।१)। 'अहोरात्रे परिवेष्ट्री' (शत० ब्रा० ११।२।७।५)। 'तमस्मा अक्षितिमहोरात्रे पुनर्दत्तः' (जै० उ० ३।२२।८)। 'मृत्योर्ह वा एतौ व्राजबाहू यदहोरात्रे' (कौषी० ब्रा० २।९)। 'यौ द्वौ स्तोमावहोरात्रे एव ते' (जै० उ० ब्रा० १।२१।५)। 'अहोरात्रौ वै मित्रावरुणौ' (तां० ब्रा० २५।१०।१०)।

अंशः पुं०। इत्यत्र 'वंशांश-पुरोडाशाः' (लि० सू० ११३) इति पुँल्लिङ्गता। अंश्यते इति अंशः। अंश विभाजने (चु० प०) 'अकर्त्तरि च कारके संज्ञायाम्' (पा० अ० ३।३।१९) इति कर्मणि घञ्-प्रत्यः। घकार-ञकारानुबन्धलोपः। 'अंश-भागौ तु कण्टके' इत्यमरः। 'अंशो विभाजने प्रोक्त एक-देशेऽपि वस्तुनः' इति हैमः।

अंशुकम् नपुं०। इत्यत्र 'चिबुक-शालूक-प्रातिपदिकांशुकोल्मुकानि' (लि० सू० ६२) इति नपुंसकलिङ्गता। 'अंशुः सूत्रादिसूक्ष्मांशे किरणे चण्डदीधितौ' इति हैमः। 'अंशुर्लेशे रवौ रश्मौ' इति विश्वः। अंशयति इति अंशुः। अंश विभाजने (चु० प०) 'मृगय्वादयश्च' (उ० १।३७) इति कु-प्रत्ययः। ककारानुबन्धलोपः। अंशुभिः काशते दीव्यति इति अंशुकम्। अंशु + काशृ दीप्तौ (भ्वा० आ०) 'अन्येष्वपि दृश्यते' (पा० अ० ३।२।१०१) इति ड-प्रत्ययः। डकारानुबन्धलोपः। डित्वात् टेः (पा० अ० ६।

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by S3 Foundation USA

४। १४३) इति धातोः आश् इत्यस्य टेर्लोपः। **अथवा** अंशून् कायति इति अंशुकम्। अंशु + कै शब्द (भ्वा० प०) 'आदेच उपदेशेऽशिति' (पा० अ० ६। १। ४५) इति धातोः ऐकारस्य आकारादेशः। 'आतोऽनुपसर्गे कः' (पा० अ० ३। २। ३) इति क-प्रत्ययः। ककारानुबन्धलोपः। 'आतोलोप इटि च' (पा० अ० ६। ४। ६४) इति धातोः आकारस्य लोपः। 'वस्त्रमाच्छादनं वासश्चैलं वसनमंशुकम्' इत्यमरः। 'अंशुकं शूक्ष्णवस्त्रे स्याद् वस्त्रमात्रोत्तरीययोः' इति मेदिनी।

अंसम्, अंसः नपुं०, पुं०। इत्यत्र **'चमसांस-रस-निर्यासोपवास०' (लि० सू० ९८) इति नपुंसकलिङ्गता पुँल्लिङ्गता च।** अमति गच्छति प्राप्नोति येन सः अथवा अम्यते गम्यते प्राप्यते येन सः इति अंसः। अम गत्यादिपु (भ्वा० प०) 'अमेः सन्' (उ० ५। २१) इति सन्-प्रत्ययः। नकारानुबन्धलोपः। 'नश्चापदान्तस्य झलि' (पा० अ० ८। ३। २४) इति मकारस्य अनुस्वारः। **अथवा** अस्यते समाहन्यते भारादिना इति अंसः। अंस समाघाते (चु० उ०) 'अकर्त्तरि च कारके संज्ञायाम्' (पा० अ० ३। ३। १९) इति घञ्-प्रत्ययः। घकार-ञकारानुबन्धलोपः। अस्य घञ्प्रत्ययान्तस्य अंसशब्दस्य 'घञब्न्तः' (लि० सू० ३६) इति पुँल्लिङ्गता। 'स्कन्धो भुजशिरोंऽसोऽस्त्री' इत्यमरः। 'अंसः स्कन्धे विभागे स्यात्' इति हैमः।

आकाशम्, आकाशः नपुं०, पुं०। इत्यत्र **'श्राद्ध-कुलिश-दैव-पीठ-कुण्डाङ्काङ्ग-दधि०' (लि० सू० १६६) इति नपुंसकलिङ्गता तथा 'दण्ड-मण्ड-खण्ड-शैव-सैन्धव-पार्श्वाकाश०' (लि० सू० १८१) इति पुँल्लिङ्गता नपुंसकलिङ्गता च।** आ = समन्तात् काशन्ते दीव्यन्ति सूर्य-चन्द्र तारकादि नक्षत्राणि यत्र सः आकाशः। आ - काशृ दीप्तौ (भ्वा० प०) 'हलश्च' (पा० अ० ३। ३। १२१) इति घञ्-प्रत्ययः। घकार-ञकारानुबन्धलोपः। 'वियद् विष्णुपदं वा तु पुंस्याकाश-विहायसी' इत्यमरः।

आजिः स्त्री०। इत्यत्र **'आजिः स्त्रियामेव' (लि० सू० १६१) इति स्त्रीलिङ्गता।** अज्यते गम्यते वीरैः क्षिप्यते वा शस्त्रादिकं यत्र इति आजिः। संग्रामः इति तदर्थः। अज गति-क्षेपणयोः (भ्वा० प०) 'अज्यतिभ्यां च' (उ० ४। १३२) इति इण्-प्रत्ययः। णकारानुबन्धलोपः। णित्त्वात् 'अत उपधायाः' (पा० अ० ७। २। ११६) इति धातोः उपधायाः अकारस्य आ-वृद्धिः। बाहुलकात् 'अजेर्व्यघञपोः' (पा० अ० २। ४। ५६) इति अज धातोः वी-भावः न। 'समुदायः स्त्रियः संयत्-समित्याजि-समिद्-युधः' तथा 'समे क्ष्मांशे रणेऽप्याजिः' इत्यमरः। 'अथाजिः स्त्री समभूमौ च संग्रामे' इति मेदिनी। 'आजिरिति संग्रामनाम' (निरु० २।१७)।

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by S3 Foundation USA

आज्यम् नपुं०। इत्यत्र 'धान्याज्य-सस्य-रूप्य-पण्य०' (लि० सू० १६८) इति नपुंसकलिङ्गता। आज्यते अनेन इति आज्यम्। आ + अञ्जू व्यक्ति-म्रक्षण-कान्ति-गतिपु (रु० प०) 'आङ्पूर्वादञ्जेः संज्ञायामुपसंख्यानम्' (वा० पा० अ० ३।१।१०९) इति क्यप्-प्रत्ययः। ककारपकारानुबन्धलोपः। कित्त्वात् 'अनुदात्तोपदेशं' (पा० अ० ६।४।३७) इति धातोः नकारस्य लोपः। आकारस्य अकारस्य च 'अकः सवर्णे दीर्घः' (पा० अ० ६।१।१०१) इति आ-दीर्घः। 'घृतमाज्यं हविः सर्पिः' इत्यमरः। 'आज्यं महिप्यभ्यनक्ति। तेजो वा आज्यम्' (तैत्ति० ब्रा० ३।९।४।६)। 'तेज आज्यम्' (तैत्ति० ब्रा० १।६।३।४) 'अग्नेर्वा एतद् रूपं यदाज्यम्' (तैत्ति० ब्रा० ३।८।१४।२)। 'एपा हि विश्वेपां देवानां तनूः यदाज्यम्' (तैत्ति० ब्रा० ३।३।४।६)। 'पशव आज्यम्' (तैत्ति० ब्रा० १।६।३।४)। 'यज्ञो वा आज्यम्' (तैत्ति० ब्रा०३।३।४।१)। 'यजमानो वा आज्यम्' (तैत्ति० ब्रा० ३।३।४।४)। 'वज्रो वा आज्यम्' (तैत्ति० ब्रा० ३।८।१५।१) 'काम आज्यम्' (तैत्ति० ब्रा० ३।१।४।१५)। 'प्राणो वा आज्यम्' (तैत्ति० ब्रा० ३।८।१५।२३)। 'छन्दांसि वा आज्यम्' (तैत्ति० ब्रा० ३।१।५।३)। 'आज्यं तेज आज्यम्' (तैत्ति० ब्रा० ३।३।४।३)। 'एतद्रेतः यदाज्यम्' (तैत्ति० ब्रा० १।१।९।४)। 'मेधो वा आज्यम्' (तैत्ति० ब्रा० ३।९।१२।१)। 'तेजो वा आज्यम्' (तां० ब्रा० १२।१०।१८)। 'देवलोको वा आज्यम्' (कौपी० ब्रा० १६।५)। 'आज्यं वै देवानां सुरभिः' (ऐत० ब्रा० १।३)। 'वज्रो वा आज्यम्' (कौपी० ब्रा० १३।७)। 'आज्यानि (शास्त्राणि, स्तोत्राणि) आज्यंन वै देवाः सर्वान् कामान् जयन्त्सर्वममृतत्वम्' (कौपी० ब्रा० १४।१)। 'आजिमायन्यदाजिमायंस्तदाज्यानामाज्यत्वम्' (तां० ब्रा० ७।२।१)। 'आत्मा वै यजमानस्याज्यम्' (कौपी० ब्रा० १४।४)। 'वागेवाज्यम्' (कौपी० ब्रा० २।१)। 'तद्वा इदं पङ्विधमाज्यं तूष्णीं जपस्तूष्णीं शंसः पुरोरूपसूक्तमुक्थवीर्यं याज्येति' (कौपी० ब्रा० १४।१)। 'सर्वाणि स्वराण्याज्यानि (स्तोत्राणि)' (तां० ब्रा० ७।२।५)। 'एतद्वै मधु दैव्यं यदाज्यम्' (ऐत० ब्रा० २।२)। 'एतद्वै देवानां प्रियतमं धाम यदाज्यम्' (शत० ब्रा० १।३।२।१७, १३।३।६।२)। 'एतद्वै जुष्टं देवानां यदाज्यम्' (शत० ब्रा० १।७।२।१०)। 'एतद्वै संवत्सरस्य स्वं पयः यदाज्यम्' (शत० ब्रा० १।५।३।५)। 'रस आज्यम्' (शत० ब्रा० ३।७।१।१३)। 'आज्यं ह वाऽअनयोर्द्यावा-पृथिव्योः प्रत्यक्षं रसः' (शत० ब्रा० २।४।३।१०)। 'वज्रो ह्याज्यम्' (शत० ब्रा० १।३।२।१७)। 'वज्रो वा आज्यं वज्रेणैवैतद्रक्षांसि नाष्ट्रा अपहन्ति' (शत० ब्रा० ७।४।१।३४)। 'वज्रो वा आज्यम्' (शत० ब्रा० १।५।३।४)। 'सत्यमाज्यम्' (शत० ब्रा० ११।३।१।१)। 'रेतो वा आज्यम्' (शत० ब्रा० १।९।२।७)। 'अयातयाम ह्याज्यम्'

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by S3 Foundation USA

(शत० ब्रा० १।५।३।२५)। 'तेजोऽसि शुक्रमस्यमृतमसि (आज्य !)' (शत० ब्रा० १।३।१।२८)। 'आज्यम् अथैषाज्याहुति-र्यद्धविर्यज्ञो यत्पशुः' (शत० ब्रा० १।७।२।१०)। '(विलीनं सर्पिः) तदाहुः। किन्देवत्यान्याज्यानीति प्राजापत्यानीति ह ब्रूयादनिरुक्तो वै प्रजापतिरनिरुक्तान्याज्यानि' (शत० ब्रा० १।६।१।२०)।

आढकम्, आढकः नपुं०, पुं०। इत्यत्र **'द्रोणाढकौ नपुंसके च' (लि० सू० १०४) इति नपुंसकलिङ्गता पुँल्लिङ्गता च।** आ समन्तात् ढौकते गच्छति इति आढकम्। आ + ढौकृ गतौ (भ्वा० प०) 'नन्दिग्रहिपचादिभ्यो०' (पा० अ० ३।१।१३४) इति अच्-प्रत्ययः। चकारानुबन्धलोपः। 'पृषोदरादीनि यथोपदिष्टम्' (पा० अ० ६।३।१०९) इति धातोः औकारस्य अकारः। 'अस्त्रियामाढकद्रोणौ' इत्यमरः। 'आढकी च तुवर्यां स्त्री परिमाणान्तरे त्रिषु' इति मेदिनी।

आत्मा पुं०। इत्यत्र **'देवासुरात्म-स्वर्ग-गिरि-समुद्र०' (लि० सू० ४३) इति पुँल्लिङ्गता।** अतति सततं गच्छति जानाति प्राप्नोति कर्मफलानि व्याप्नोति वा सर्वत्र इति आत्मा। अत सातत्यगमने (भ्वा० प०) 'सातिभ्यां मनिन्-मनिणौ' (उ० ४। १५३) इति मनिण्-प्रत्ययः। इकार-णकारानुबन्धलोपः। णित्त्वात् 'अत उपधायाः' (पा० अ० ७।२।११६) इति धातोः उपधायाः अकारस्य आ-वृद्धिः। 'आत्माऽततेर्वा आप्तेर्वा अपि वा आप्त इव स्याद् व्याप्तीभूतः' (निरु० ३। १५) 'क्षेत्रज्ञ आत्मा पुरुषः' तथा 'आत्मा यत्नो धृतिर्बुद्धिः स्वभावे ब्रह्म वर्ष्म च' इत्यमरः। 'आत्मा कलेवरे यत्ने स्वभावे परमात्मनि। चित्ते धृतौ च बुद्धौ च पर-व्यावर्त्तनेऽपि च' इति धरणिः। 'आत्मा स्वभावेऽपि प्रयत्न-मनसोरपि। धृतावपि मनीषायां शरीर-ब्रह्मणोरपि' इति मेदिनी। 'आत्मा चित्ते धृतौ यत्ने धिषणायां कलेवरे। परमात्मनि जीवेऽर्के हुताशन-समीरयोः। स्वभावे' इति हैमः।

आधिः पुं०। इत्यत्र **'क्यन्तो घुः' (लि० सू० ४१) इति पुँल्लिङ्गता।** आधीयते दुःखमनेन इति आधिः। आ + डुधाञ् धारण-पोषणयो (जु० उ०) धातोः डु इत्यस्य 'आदिर्ञिटुडवः' (पा० अ० १।३।५) इति इत्संज्ञा, ञ् इत्यस्य च 'हलन्त्यम्' (पा० अ० १।३।३) इति इत्संज्ञा। 'तस्य लोपः' (पा० अ० १।३।९) इति डु इत्यस्य ञ् इत्यस्य च लोपः। 'दाधा घ्वदाप्' (पा० अ० १।१।२०) इति धा इत्यस्य घुसंज्ञा। 'उपसर्गे घोः किः' (पा० अ० ३।३।९२) इति कि-प्रत्ययः। ककारानुबन्धलोपः। 'आतो लोप इटि च' (पा० अ० ६।४।६४) इति धातोः आकारस्य लोपः। 'पुँस्याधिर्मानसी व्यथा' इत्यमरः। 'आधिर्मनोर्तौ व्यसनेऽधिष्ठाने बन्धकाशयोः' इति मेदिनी। 'बन्धको

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by S3 Foundation USA

यदधर्मेणोत्तमर्णस्य भूम्याद्यायत्तं क्रियते' तत्र यथा 'न भोक्तव्यो बलादाधिः'। आशायां यथा 'धनादिना धावति जीवलोकः' इति अनेकार्थकैरवाकरकौमुदी।

आधिपत्यम् नपुं०। इत्यत्र **'यद्-य-ढग्-यग्-अञ्-अण्-वुञ्-छाश्च भावकर्मणि' (लि० सू० १२३ क) इति यक्-प्रत्ययान्तत्वात् नपुंसकलिङ्गता**। अधिपतेः भावः कर्म वा इति आधिपत्यम्। अधिपति-शब्दात् 'पत्यन्त-पुरोहितादिभ्यो यक्' (पा० अ० ५।१।१२८) इति यक्-प्रत्ययः। ककारानुबन्धलोपः। कित्त्वात् 'किति च' (पा० अ० ७।२।११८) इति आद्यचः अधिशब्दस्य अकारस्य आ-वृद्धिः। 'यस्येति च' (पा० अ० ६।४।१४८) इति पति-शब्दस्य इकारस्य लोपः।

आपः स्त्री०। इत्यत्र **'अप्-सुमनस्समासिकता-वर्षाणां बहुत्वं च' (लि० सू० २९) इति स्त्रीलिङ्गता बहुवचनत्वं च**। आप्नुवन्ति शरीरम् इति आपः जलानि। आप्लृ व्याप्तौ (स्वा० प०) 'आप्नोतेर्ह्रस्वश्च' (उ० २।५९) इति क्विप्-प्रत्ययः धातोः आकारस्य ह्रस्वश्च। अप्-शब्दस्य प्रथमाबहुवचने जसि 'अप्-तृन्-तृच्०' (पा० अ० ६।१।११) इति उपधायाः अकारस्य आ-दीर्घे सति आपस् इति स्थितौ सस्य 'ससजुषो रुः' (पा० अ० ८।२।६६) इति रुत्वम्। उकारानुबन्धलोपः 'खरवसानयोर्विसर्जनीयः' (पा० अ० ८।३।१५) इति रेफस्य विसर्गे सति आपः इति निष्पद्यते।

आपद् स्त्री०। इत्यत्र **'प्रतिपदापद्विपत्सम्पच्छरत्०' (लि० सू० २७) इति स्त्रीलिङ्गता**। आपदनम् आपद्, आपद्यते अनया वा इति आपद्। आ + पद् गतौ (दि० आ०) 'सम्पदादिभ्यः क्विप्' (वा० पा० अ० ३।३।९४) इति क्विप्-प्रत्ययः। तस्य सर्वापहारी लोपः। 'विपत्तौ विपदापदौ' इत्यमरः।

आमलकम् नपुं०। इत्यत्र **'आमलकशब्दस्य फलजातिवाचित्वात् फलजातिः' (लि० सू० १६२) इति नपुंसकलिङ्गता**। आमलक्याः फलम् आमलकम्। आमलकी-शब्दात् 'नित्यं वृद्धशरादिभ्यः' (पा० अ० ४।३।१४४) इति मयट्-प्रत्ययः। 'फले लुक्' (पा० अ० ४।३।१६३) इति मयट्-प्रत्ययस्य लुक्। एवम् आमलक इति भवति। आ समन्तात् मलते धारयति इति आमलकः आमलकं वा। आ + मल धारणे (भ्वा० आ०) 'क्वुन् शिल्पिसंज्ञयोरपूर्वस्यापि' (उ० २।३३) इति वाहुलकात् क्वुन्-प्रत्ययः। ककारनकारानुबन्धलोपः। अथवा 'ण्वुल्-तृचौ' (पा० अ० ३।१।१३३) इति ण्वुल्-प्रत्ययः। णकार-लकारानुबन्धलोपः। 'युवोरनाकौ' (पा० अ० ७।१।१) इति वु-स्थाने अकादेशः। एवमपि आमलक इति भवति। ततः स्त्रियां 'षिद्-गौरादिभ्यश्च' (पा० अ० ४।१।४१) इति अथवा 'जातेरस्त्रीविषयादयोपधात्'

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by S3 Foundation USA

(पा० अ० ४।१।५३) इति ङीप्-प्रत्ययः। ङकार-पकारानुबन्धलोपः। 'यस्येति च' (पा० अ० ६।४।१४८) इति ककार-पर-वर्त्तिनः अकारस्य लोपः। एवम् आमलकी इति निष्पद्यते। ततः आमलक्याः फलम् आमलकम् इति तु पूर्वं व्याख्यातम् एव। 'तिष्यफला त्वामलकी त्रिपु अमृता वयस्था च' इत्यमरः।

आम्रम् नपुं०। इत्यत्र **'फलजातिः' (लि० सू० १६२) इति आम्र-शब्दस्य फलवाचकत्वात् नपुंसकलिङ्गता।** वृक्षवाची तु आम्रशब्दः पुँल्लिङ्ग एव। अम्यते गम्यते सेव्यते यत् तद् आम्रम्। अम गतौ (भ्वा० प०) 'अमि- तम्योर्दीर्घश्च' (उ० २। १६) इति रक्-प्रत्ययः, धातोः आदेः अकारस्य आ-दीर्घश्च। 'आम्रश्चूतोरसालोऽस्त्री' इत्यमरः।

आयुधः, आयुधम् पुं०, नपुं०। इत्यत्र **'कबन्धौषधायुधान्ताः' (लि० सू० १८०) इति पुँल्लिङ्गता नपुंसकलिङ्गता च।** आयुध्यन्ते अनेन इति आयुधः आयुधं वा। आ + युध सम्प्रहारे (दि० अ०) 'घञर्थे क-विधानं स्था-स्नापा-हनि-युध्यर्थ्यम्' (वा० पा० अ० ३।३।५८) इति क-प्रत्ययः। ककारानुबन्धलोपः। **अथवा** आयुध्यते इति आयुधः प्रहारकर्त्ता। आ + युध सम्प्रहारे 'इगुपधज्ञाप्रीकिरः कः' (पा० अ० ३।१।१३५) इति कर्त्तरि क-प्रत्ययः। ककारानुबन्धलोपः। 'आयुधं तु प्रहरणं शस्त्रमस्त्रम्' इत्यमरः। 'आयुधमायोधनात्' (निरु० १०।६)। 'आयुधा = आयुधानि' (निरु० १०।३०)। 'आयुधानि उदकनाम' (निघं० १।१२)।

आलानम्, आलानः नपुं०, पुं०। इत्यत्र **'मान-यानाभिधान०' (लि० सू० ७६) इति नपुंसकलिङ्गता पुँल्लिङ्गता च।** आलीयते अत्र इति आलानम् आलानः वा गजबन्धनस्तम्भः आ + लीङ् श्लेषणे (दि० आ०) 'करणाधिकरणयोश्च' (पा० अ० ३। ३।११७) इति करणे ल्युट्-प्रत्ययः। लकार-टकारानुबन्धलोपः। 'विभाषा लीयतेः' (पा० अ० ६।१।५१) इति धातोः ईकारस्य आकारः। 'युवोरनाकौ' (पा० अ० ७।१। १) इति यु-स्थाने अनादेशः। 'अकः सवर्णे दीर्घः' (पा० अ० ६।१।१०१) इति आकारस्य अकारस्य च आ-दीर्घः। 'आलानं बन्धस्तम्भे' इत्यमरः।

आश्रमम्, आश्रमः नपुं०, पुं०। इत्यत्र **'संग्राम-दाडिम-कुसुमाश्रम-क्षेम-क्षौम-होमोद्दामानि नपुंसके च' (लि० सू० ८५) इति नपुंसकलिङ्गता पुँल्लिङ्गता च।** आश्राम्यन्ति अत्र अनेन वा इति आश्रमम् आश्रमः वा। आ + श्रमु तपसि खेदे च (दि० प०) 'अकर्त्तरि च कारके संज्ञायाम्' (पा० अ० ३।३।१९) इति घञ्-प्रत्ययः।
CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by S3 Foundation USA
घकार-ञकारानुबन्धलोपः। ञित्वात् 'अत उपधायाः' (पा० अ० ७।२।११६) इति

धातोः उपधायाः अकारस्य प्राप्तः आ वृद्ध्यादेशः 'नोदात्तोपदेशस्य मान्तस्यानाचमेः' (पा० अ० ७। ३। ३४) इति निषेधात् न भवति। **अथवा** आ समन्तात् श्रमः तपः खेदः वा यत्र सः आश्रमः। आश्रमणम् आश्रमः। श्रमु तपसि खेदे च (भ्वा० प०) 'भावे' (पा० अ० ३। ३। १८) इति घञ्-प्रत्ययः। घकार-ञकारानुबन्धलोपः। पूर्ववत् धातोः उपधायाः प्राप्तस्य वृद्ध्यादेशस्य निषेधः। 'ब्रह्मचारी गृही वानप्रस्थो भिक्षुश्चतुष्टये। आश्रमोऽस्त्री' इत्यमरः। 'आश्रमो ब्रह्मचर्यादौ वानप्रस्थे मठेऽस्त्रियाम्' इति मेदिनी।

आशीः स्त्री०। इत्यत्र **'आशीर्धूः पूर्गीर्द्वारः' (लि० सू० २८) इति स्त्रीलिङ्गता।** आशासनम् आशीः। आ + शासु इच्छायाम् (अ० आ०), आ + शासु अनुशिष्टौ (अ० प०) 'सम्पदादिभ्यः क्विप्' (वा० पा० अ० ३। २। ९४) इति क्विप्-प्रत्ययः। तस्य सर्वापहारी लोपः। 'शास इदङ्हलोः' (पा० अ० ६। ४। ३४) इति धातोः उपधायाः आकारस्य इकारादेशः। 'शासि-वसि-घसीनां च' (पा० अ० ८। ३। ६०) इति धातोः सस्य षत्वम्। एवम् आशिष् इति सम्पद्यते। अस्य प्रथमैकवचने आशीः। आशिषः अध्येषणाकर्म (निघं० ३। २)। 'आशीराशास्तेः' (नि० ६। ८)।

आसनम्, आसनः नपुं०, पुं०। इत्यत्र **'मान-यानाभिधान-नलिन-पुलिनोद्यान-शयनासन-स्थान-चन्दनालान-समान-भवन-वसन-सम्भावन-विभावन-विमानानि नपुंसके च' (लि० सू० ७६) इति नपुंसकलिङ्गता पुँल्लिङ्गता च।** आस्यते अस्मिन् इति आसनम्। आस उपवेशने (अ० आ०) 'करणाधिकरणयोश्च' (पा० अ० ३। ३। ११७) इति अधिकरणे ल्युट्-प्रत्ययः। लकार-टकारानुबन्धलोपः 'युवोरनाकौ' (पा० अ० ७। १। १) इति यु-स्थाने अनादेशः। 'पीठमासनम्', 'सन्धिर्ना विग्रहो यानमासनं द्वैधमाश्रयः' तथा 'आसनं स्कन्धदेशः स्यात्' इत्यमरः। 'आसनं द्विरद-स्कन्धे पीठे यात्रानिवर्त्तने' इति मेदिनी।

आस्पदम् नपुं०। **इत्यत्र 'श्राद्ध-कुलिश-दैव-पीठ-कुण्डाङ्काङ्ग०' (लि० सू० १६६) इति नपुंसकलिङ्गता।** आपद्यते अस्मिन् इति आस्पदम्। आ + पद् गतौ 'खनो घ च' (पा० अ० ३। ३। १२५) इति घ-प्रत्ययः। घकारानुबन्धलोपः। ततः आ + पद इति स्थितौ इत्यत्र 'आस्पदं प्रतिष्ठायाम्' (पा० सू० ६। १। १४६) इति सुडागमः। उकार-टकारानुबन्धलोपः। 'प्रतिष्ठा कृत्यमास्पदम्' इत्यमरः। 'आस्पदं पदकृत्ययोः' इति मेदिनी।

आस्यम् नपुं०। **इत्यत्र 'श्राद्ध-कुलिश-दैव-पीठ०' (लि० सू० १६६) इति नपुंसकलिङ्गता।** आस्यन्दते प्रस्रवति अम्लादि-वस्तुना इति आस्यम्। **अथवा** अन्नादिना आस्यन्दते द्रवीक्रियते इति आस्यम्। उभयत्र अपि आ + स्यन्दू प्रस्रवणे (भ्वा० आ०)

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by S3 Foundation USA

'अन्येष्वपि दृश्यते' (पा० अ० ३। २। १०१) इति ड-प्रत्ययः। डकारानुबन्धलोपः। 'टेः' (पा० अ० ६। ४। १४३) इति धातोः अन्द् इत्यस्य टेर्लोपः। **अथवा** अस्यन्ते प्रक्षिप्यन्ते वर्णाः येन तद् आस्यम्। असु क्षेपणे (दि० प०) 'कृत्य-ल्युटो बहुलम्' (पा० अ० ३। ३। ११३) इति ण्यत्-प्रत्ययः। णकार-तकारानुबन्धलोपः। णित्त्वात् धातोः उपधायाः अकारस्य 'अत उपधायाः' (पा० सू० ७। २। ११६) इति आ-वृद्धिः। 'वक्त्रास्ये वदनं तुण्डमाननं लपनं मुखम्' इत्यमरः। 'मुखं मुखान्तरालं च द्वयमास्य-मितीरितम्' इति शाश्वतः। 'आस्यं मुखे च तन्मध्ये तद्भवे च स्त्रियां स्थितौ' इति मेदिनी। 'ओष्ठात्प्रभृति प्राक् काकलादास्यम्' (पा० अ० १। १। ९ इति महाभाष्ये २। ११)। 'आस्यमस्यते आस्यन्दत एतदन्नमिति वा' (निरु० १। ९)।

आहवः पुं०। इत्यत्र **'आहव-संग्रामौ पुंसि' (लि० सू० १६०) इति पुंल्लिङ्गता।** आहूयन्ते अस्मिन् इति आहवः। आ + ह्वेञ् स्पर्धायाम् (भ्वा० उ०) 'आङि युद्धे' (पा० अ० ३। ३। ७३) इति अप्-प्रत्ययः धातोः वकारस्य उकारः सम्प्रसारणं च। 'सम्प्रसारणाच' (पा० अ० ६। १। १०८) इति धातोः एकारस्य पूर्वरूपैकादेशः, 'सार्वधातु-कार्धधातुकयोः' (पा० अ० ७। ३। ८४) इति उकारस्य ओ-गुणः, 'एचोऽयवायावः' (पा० अ० ६। १। ७८) इति ओकारस्य अव्-आदेशः। 'अभ्यामर्द-समाघात-संग्रामाभ्या-गमाहवाः' इत्यमरः। 'आहवः संगरे यज्ञे' इति हैमः।

इक्षुः पुं०। इत्यत्र **'उकारान्तः' (लि० सू० ५१) इति पुँल्लिङ्गता।** यम् इच्छन्ति यः इष्यते अभिलष्यते वा इति इक्षुः। इषु इच्छायां (तु० प०) 'इषेः क्सुः' (उ० ३। १५७) इति क्सु-प्रत्ययः। ककारानुबन्धलोपः। 'षढोः कः सि' (पा० अ० ८। २। ४१) इति षकारस्य ककारः। 'आदेश-प्रत्यययोः' (पा० अ० ८। ३। ५९) इति सस्य षत्वम्। क्-ष्-संयोगे क्षः। 'रसाल इक्षुः' इत्यमरः।

इध्मम् नपुं०। इत्यत्र **'रुक्म-सिध्म-युग्मेध्म-गुल्माध्यात्म-कुङ्कुमानि नपुंसके' (लि० सू० ८४) इति नपुंसकलिङ्गता।** यत् इन्धे दीप्यते वा तद् इध्मम्। अथवा येन दीप्यते वा तद् इध्मम्। ञिइन्धी दीप्तौ (रु० आ०) 'इषी-युधीन्धि-दसि-श्या-धू-सूभ्यो मक्' (उ० १। १४५) इति मक्-प्रत्ययः, ककारानुबन्धलोपः। 'अनिदितां हल उपधायाः क्ङिति' (पा० अ० ६। ४। २४) इति धातु-नकारलोपः। 'इन्धनं त्वेध इध्ममेधः समित् स्त्रियाम्' इत्यमरः। 'वनस्पतयः इध्माः' (तै० ब्रा० २। १। ५। २) तथा (ऐत० ब्रा० ५। २८)। 'इन्धे वा एतदध्वर्युः। इध्मेनाग्निं तस्मादिध्मो नाम' (शत० ब्रा० १। ३। ५। १)। 'इध्मः पदनाम' (निघं० ५। २)।

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by S3 Foundation USA

इध्मप्रवश्चनः त्रिलि०। **इत्यत्र 'करणाधिकरणयोर्ल्युट् च' (लि० सू०) इति पुँल्लिङ्गता, स्त्रीलिङ्गता नपुंसकलिङ्गता च।** इध्म-शब्दः पूर्वं व्याख्यातः। प्रवृश्च्यते अनेन अस्मिन् अर्थे 'करणाधिकरणयोश्च' (पा० सू० ३।३।११७) इति करणे ल्युट्-प्रत्ययः। लकार-टकारानुबन्धलोपः। 'युवोरनाकौ' (पा० अ० ७।१।१) इति यु-स्थाने अनादेशः। इध्मस्य प्रव्रश्चनः इति इध्म-प्रवश्चनः कुठारः। इध्म-शब्दस्य प्रव्रश्चन-शब्देन षष्ठीतत्पुरुष-समासः।

इनः पुं०। **इत्यत्र 'नोपधः' (लि० सू० ७४) इति पुँल्लिङ्गता।** एति ईयते वा इति इनः। इण् गतौ (अ० प०) 'इण्-सिञ्-जि-दीङुष्यविभ्यो नक्' (उ० ३।२) इति नक्-प्रत्ययः। ककारानुबन्धलोपः। कित्त्वात् 'सार्वधातुकार्धधातुकयोः' (पा० अ० ७।३।८४) इति धातोः इकारस्य प्राप्तः गुणः 'क्ङिति च' (पा० अ० १।१।५) इति निषिध्यते। 'इनो भगो धामनिधिः' तथा 'इनः सूर्ये प्रभौ' इत्यमरः। 'इन्द्रः पत्यौ नृपार्कयोः' इति मेदिनी। 'इनः सूर्यो नृपे पत्यौ' इति सिद्धान्तकौमुदी। 'इनः ईश्वरनाम' (निघं० २।२२)।

इनसभम् नपुं०। **इत्यत्र 'राजाऽमनुष्यपूर्वा सभा' (लि० सू० १२८) इति अथवा 'सभा राजाऽमनुष्यपूर्वा' (पा० अ० २।४।२३) इति नपुंसकलिङ्गता।** इन-शब्दः पूर्वं व्याख्यातः। सह भान्ति ये अत्र वा इति सभा। सह + भा दीप्तौ (अ० प०) 'सुपि स्थः' (पा० अ० ३।२।४) इति क-प्रत्ययः अथवा 'अन्येष्वपि दृश्यते' (वा० पा० अ० ३।२।१०१) इति ड-प्रत्ययः। क-प्रत्यये ककारानुबन्धलोपः। ड-प्रत्यये डकारानुबन्धलोपः। यत्र क-प्रत्ययः तत्र 'आतो लोप इटि च' (पा० अ० ६।४।६४) इति धातोः आकारस्य लोपः। यत्र ड-प्रत्ययः तत्र 'टेः' (पा० अ० ६।४।१४३) इति धातोः आकारस्य टेर्लोपः। स्त्रियाम् 'अजाद्यतष्टाप्' (पा० अ० ४।१।४) इति टाप्-प्रत्ययः। टकार-पकारानुबन्धलोपः। 'अकः सवर्णे दीर्घः' (पा० अ० ६।१।१०१) इति अकारस्य आकारस्य च दीर्घः 'वोपसर्जनस्य' (पा० अ० ६।३।८२) इति सह-शब्दस्य सादेशः। एवं सभा-शब्दः निष्पद्यते। **अथवा** समानाः भान्ति अस्याम् इति सभा। भा दीप्तौ (अ० प०) 'क्विप् च' (पा० अ० ३।२।७) इति क्विप्-प्रत्ययः। तस्य सर्वापहारी लोपः। **अथवा** 'समानस्य छन्दस्यमूर्धप्रभृत्युदर्केषु' (पा० अ० ६।३।८४) इत्यत्र समानस्य इति योगविभागात् 'सभा राजाऽमनुष्यपूर्वा' (पा० अ० २।४।२३) इत्यत्र सभा इति निर्देशाद् वा समान-शब्दस्य सः आदेशः। एवम् अपि सभा निष्पद्यते। 'समस्या परिषद् गोष्ठी सभा-समिति-संसदः', 'सभा संसदि सभ्ये च', 'वासः कुटी द्वयोः शाला सभा' इत्यमरः। 'सभा द्यूत-समूहयोः' इति हैमः। 'सभा सामाजिके

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by S3 Foundation USA

गोष्ठ्यां द्यूत-मन्दिरयोरपि' इति मेदिनी। 'स्त्रियां सामाजिके गोष्ठ्यां द्यूत-मन्दिरयोः सभा' इति रभसः। इनस्य ईश्वरस्य सभा इति इनसभम्। इन-शब्दस्य सभा-शब्देन 'षष्ठी' (पा० अ० २।२।८) इति समासः। 'सभा राजाऽमनुष्यपूर्वा' (पा० अ० २।४।२३) इत्यनेन अथवा 'राजाऽमनुष्यपूर्वा सभा' (लि० सू० १२८) इति इनसभा-शब्दस्य नपुंसकलिङ्गत्वात् 'ह्रस्वो नपुंसके प्रातिपदिकस्य' (पा० अ० १।२।४७) इति सभा-शब्दस्य आकारस्य अकारः ह्रस्वः।

इन्द्रियम् नपुं०। इत्यत्र **'किसलय-हृदयेन्द्रियोत्तराणि नपुंसके' (लि० सू० ८७) इति नपुंसकलिङ्गता।** इन्दति परमैश्वर्य-सम्पन्नः भवति इति इन्द्रः। इदि परमैश्वर्ये (भ्वा० प०) 'ऋज्रेन्द्राग्रवज्र०' (उ० २।२९) इति रन्-प्रत्ययः। नकारानुबन्धलोपः। 'इन्द्रो मरुत्वान् मघवा' इत्यमरः। 'इन्द्रः शचीपतावन्तरात्मन्यादित्ययोगयोः' इति विश्वः। 'इन्द्रः पदनाम' (निघं० ५।४)। 'यन्मनः स इन्द्रः' (गोप० उ० ४।११)। 'रुक्म एवेन्द्रः' (शत० ब्रा० १०।४।१।६)। 'वाग्वा इन्द्रः' (कौषी० ब्रा० २।७)। 'वीर्यं वा इन्द्रः' (गोप० उ० ६।७)। 'अर्जुनो ह वै नामेन्द्रः' (शत० ब्रा० २।१।२।११)। 'इन्द्रः खलु वै श्रेष्ठो देवतानामुपदेशनात्' (तैत्ति० ब्रा० २।३।१।३)। 'इन्द्र इरां दृणातीति वेरां-ददातीति यज्वनाम्' (निरु० १०।८)। इन्द्रेण दृष्टं ज्ञातं सृष्टं दत्तं वा इति इन्द्रियम्। इन्द्र-शब्दात् 'इन्द्रियमिन्द्रलिङ्गमिन्द्रदृष्टमिन्द्रसृष्टमिन्द्रजुष्टमिन्द्रदत्तमिति वा।' (पा० अ० ५।२।९३) इति घच्-प्रत्ययः। चकारानुबन्धलोपः। 'आयनेयीनीयियः फढखछघां प्रत्ययादीनाम्' (पा० अ० ७।३।२) इति घस्य स्थाने इयादेशः। 'यस्येति च' (पा० अ० ६।४।१४८) इति इन्द्रिय-शब्दे यकार-परवर्त्तिनः अकारस्य लोपः। 'हृषीकं विषयीन्द्रियम्' एवं 'शुक्रं तेजोरेतसी च बीजवीर्येन्द्रियाणि च' इत्यमरः। 'इन्द्रियं तु चक्षुरादिषु रेतसि' इति हैमः। 'इन्द्रियमिति धननाम' (निघं० २।१०)। 'प्राणा इन्द्रियाणि' (तां० ब्रा० २।१४।२)। 'जायमानो ह वै ब्राह्मणः सप्तेन्द्रियाण्यभिजायते ब्रह्मवर्चसञ्च यशश्च स्वप्नं च क्रोधं च श्लाघां च रूपं च पुण्यमेव गन्धं सप्तमम्' (गोप० पू० २।२)।

इषुः स्त्री० पुं०। **इत्यत्र 'इषु-बाहू स्त्रियां च' (लि० सू० ४६) इति स्त्रीलिङ्गता पुँल्लिङ्गता च।** ईषति उञ्छति, ईषते गच्छति, इष्यति गच्छति शत्रुं प्रति, हिनस्ति आददाति प्राणान् वा इति इषुः वीरः बाणा वा। **अथवा** इष्यते ईष्यते गम्यते हिंस्यते अनेन इति इषुः = बाणः। ईष उञ्छे (भ्वा० प०) ईष गति-हिंसादानेषु (भ्वा० आ०), इष गतौ (दि० प०) 'ईषेः किच्च' (उ० १।१३) इति उ-प्रत्ययः, स च कित्, धातोः आदेः

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by S3 Foundation USA

ईकारस्य इकारादेशश्च। कित्त्वात् 'पुगन्तलघूपधस्य च' (पा० अ० ७। ३। ८६) इति धातोः उपधायाः इकारस्य प्राप्तः ए-गुणः 'क्ङिति च' (पा० अ० १। १। ५) इति निषिध्यते। 'कलम्ब-मार्गण-शराः पत्री रोप इषुर्द्वयोः' इत्यमरः।

इषुधिः स्त्री०, पुं०। इत्यत्र **'इषुधिः स्त्री च' (लि० सू० ४२) इति स्त्रीलिङ्गता पुँल्लिङ्गता च।** इषवः बाणाः धीयन्ते स्थाप्यन्ते यत्र सा स वा इषुधिः। इषु + डुधाञ् धारण-पोषणयोः (जु० उ०) 'कर्मण्यधिकरणे च' (पा० अ० ३। ३। ९३) इति कि-प्रत्ययः। ककारानुबन्धलोपः। 'आतो लोप इटि च' (पा० अ० ६। ४। ६४) इति धातोः आकारस्य लोपः। 'तूणोपासङ्गतूणीरनिषङ्गा इषुधिर्द्वयोः' इत्यमरः। 'इषुधिरिषूणां निधानम्' (निरु० ९। १३)। 'इषुधिः पदनाम' (निघं० ५। ३)।

उक्थम् नपुं०। इत्यत्र **'काष्ठ-पृष्ठ-सिक्थोक्थानि नपुंसके' (लि० सू० ७१) इति नपुंसकलिङ्गता।** उच्यते परिभाष्यते यत् तद् इति उक्थम्, सामविशेषो वा। वच परिभाषणे (अ० प०) 'पा-तृ-तुदि-वचि-रिचि-सिचिभ्यस्थक्' (उ० २। ७) इति थक्-प्रत्ययः। ककारानुबन्धलोपः। कित्त्वात् 'वचि-स्वपि-यजादीनां किति' (पा० अ० ६। १। १५) इति धातोः वकारास्य उ-सम्प्रसारणम्। 'सम्प्रसारणाच्च' (पा० अ० ६। १। १०८) इति अकारस्य पूर्वरूपैकादेशः। 'चोः कुः' (पा० अ० ८। २। ३०) इति चकारस्य ककारः।

उडुपम् नपुं०। इत्यत्र **'पाप-रूपोडुप-तल्प-शिल्प-पुष्प-शष्प-समीपान्तरीपाणि नपुंसके' (लि० सू ७८) इति नपुंसकलिङ्गता।** उडुनः जलात् पाति रक्षति इति उडुपम्। उडु + पा रक्षणे (अ० प०) 'सुपि स्थः' (३। २। ४) इत्यत्र 'सुपि' इत्यस्य योगविभागेन क-प्रत्ययः। ककारानुबन्धलोपः। 'आतो लोप इटि च' (पा० अ० ६। ४। ६४) इति धातोः आकारस्य लोपः। 'उडुपं तु प्लवः कोलः' इत्यमरः। 'उडुपश्चन्द्रभेलयोः' इति धरणिः।

उत्तरीयम् नपुं०। इत्यत्र **'किसलय-हृदयेन्द्रियोत्तराणि नपुंसके' (लि० सू० ८७) इति नपुंसकलिङ्गता।** उत्तरस्मिन् शरीरभागे भवम् इति उत्तरीयम्। उत्तरशब्दात् 'गहादिभ्यच्छः' (पा० ४। २। १३८) इति छ-प्रत्ययः। 'आयनेयीनीयियः०' (पा० अ० ७। १। २) इति छस्य स्थाने ईयादेशः। 'यस्येति च' (पा० अ० ६। ४। १४८) इति रेफोत्तरवर्त्तिनः अकारस्य लोपः। 'द्वौ प्रावारोत्तरासङ्गौ समौ बृहतिका तथा। संव्यानमुत्तरीयं च' इत्यमरः।

उत्पलः, उत्पलम् पुं०, नपुं०। इत्यत्र **'पद्म-कमलोत्पलानि पुंसि च' (लि० सू० १५९) इति पुँल्लिङ्गता नपुंसकलिङ्गता च।** उत्पलति गच्छति विकसति इति उत्पलः

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by S3 Foundation USA

उत्पलं वा। उद् + पल गतौ (भ्वा० प०) 'नन्दि-ग्रहि-पचादिभ्यो०' (पा० अ० ३।१। १३४) इति अच्-प्रत्ययः। चकारानुबन्धलोपः। 'खरि च' (पा० अ० ८।४।५५) इति उद् इत्यस्य दकारस्य तकारः। 'स्यादुत्पलं कुवलयम्' तथा 'व्याधिः कुष्ठं पारिभाव्यं व्याप्यं पाकलमुत्पलम्' इत्यमरः। 'इन्दीवरे मांसशून्ये उत्पलं कुष्ठ-भूरुहे' इति रमसः। 'उत्पला तुषपर्पट्यां क्लीबं कुष्ठ-प्रसूनयोः' इति मेदिनी।

उदधिः पुं०। इत्यत्र **'क्यन्तो घुः' (लि० सू० ४१) इति पुँल्लिङ्गता।** उदकानि जलानि धीयन्ते स्थाप्यन्ते यस्मिन् सः उदधिः समुद्रः अन्तरिक्षं घटः वा। उदक + डुधाञ् धारण-पोषणयोः (जु० उ०) 'कर्मण्यधिकरणे च' (पा० अ० ३।३।९३) इति कि-प्रत्ययः। ककारानुबन्धलोपः। 'आतो लोप इटि च' (पा० अ० ६।४।६४) इति धातोः आकारस्य लोपः। 'उदकस्योदः संज्ञायाम्' (पा० अ० ६।३।५७) इति समुद्रार्थे 'पेष-वास-वाहन-धिषु च' (पा० अ० ६।३।५८) घटार्थे उदक-शब्दस्य उदादेशः। 'उदन्वानुदधिः सिन्धुः' इत्यमरः। 'उदकम् उदकनाम' (निघं० १। १२)। 'उनत्ति क्लेदयति इति उदकम् उन्दी क्लेदने' (रु० प०) 'उदकञ्च' (उ० २। ३९) इति क्वुन्-प्रत्ययः। ककार-नकारानुबन्धलोपः। कित्त्वात् 'अनिदितां हल०' (पा० अ० ६। ४। २४) इति धातोः नकारलोपः 'युवारनाकौ' (पा० अ० ७। ७। १) इति वु-स्थाने अकादेशेन उदकम् भवति। **अथवा** उदकति कुटिलं गच्छति इति उदकम्। उद् + अक कुटिलायां गतौ (भ्वा० प०) 'नन्दि-ग्रहि०' (पा० अ० ३।१।१३४) इति अच्-प्रत्ययः। चकारानुबन्धलोपः। 'उदकं कस्मादुनत्तीति सतः' (निरु० २। २४)। 'कबन्धमुदकं पाथः' इत्यमरः।

उदरम् नपुं०। इत्यत्र **'द्वाराग्र-स्फार-तक्र-वक्र-वप्र०' (लि० सू० ९०) इति नपुंसकलिङ्गता।** उद्दृणाति येन अन्नम् इति उदरम्। उद् + दॄ विदारणे (क्र्या० प०) 'उदि दृणातेरलचौ पूर्वपदान्त्यलोपश्च' (उ० ५। १९) इति अच्-प्रत्ययः अल्-प्रत्ययः वा तथा दकारस्य लोपश्च। अच्-प्रत्यये चकारस्य अल्-प्रत्यये च लकारस्य लोपः। 'सार्वधातुकार्धधातुकयोः' (पा० अ० ७। ३। ८४) इति धातोः ॠकारस्य 'उरण् रपरः' (पा० अ० १।१।५१) इति सहकारेण अर्-गुणः। **अथवा** उद् ऋच्छति उद्इयर्त्ति वा येन तद् उदरम्। उद् + ऋ गति-प्रापणयोः (भ्वा० प०), ऋ गतौ (जु० प०) 'नन्दि-ग्रहि-पचादिभ्यो०' (पा० अ० ३।१।१३४) इति अच्-प्रत्ययः। चकारानुबन्धलोपः। पूर्ववत् धातोः ऋकारस्य अर्-गुणः। 'पिचण्डकुक्षी जठरोदरं तुन्दम्' इत्यमरः। 'उदरं तुन्दरणयोः' इति हैमः। 'उदरम् उखा' (शत० ब्रा० ७। ५। १। १८)। 'प्रजापतेर्वा एतदुदरं यत्सदः' (तां० ब्रा० ६। ४। ११)। 'उदरमेवास्य (यज्ञस्य) सदः' (शत० ब्रा०

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by S3 Foundation USA

३।५।३।५)।'उदरं मध्यमा चितिः' (शत० ब्रा० ८।७।२।१८)।'उदरं वै सदः' (कौषी० ब्रा० ११।८)।

उदश्वित् नपुं०।इत्यत्र'वियज्जगत्-सकृत्-शकन्-पृषच्-छकृद्-यकृद्-उदश्वितः' (**लि० सू० १६४**) **इति नपुंसकलिङ्गता।** उदकेन श्वयति वर्धते इति उदश्वित्। उदक + टुओश्वि गति-वृद्ध्योः (भ्वा० प०) 'क्विब् वचि-प्रच्छि-श्री-स्रु-द्रु-प्रु-ज्वां दीर्घोऽसम्प्रसारणं च' (उ० २।५८) इति बाहुलकात् **अथवा** 'क्विप् च' (पा० अ० ३। २।७६) इति क्विप्-प्रत्ययः। क्विपः सर्वापहारी लोपः। 'ह्रस्वस्य पिति कृति तुक्' (पा० अ० ६।१।७१) इति तुगागमः। उकार-ककारानुबन्धलोपः। 'उदकस्योदः संज्ञायाम्' (पा० अ० ६।३।५७) तथा 'उदश्वितोऽन्यतरस्याम्' (पा० अ० ४।२।१९) इति च निर्देशात् 'वचि-स्वपि-यजादीनां किति' (पा० अ० ६।१।१५) इति धातोः वकारस्य प्राप्तम् उकार-सम्प्रसारणम् अपि न। उदक-शब्दस्य स्थाने 'उदकस्योदः संज्ञायाम्' (पा० अ० ६।३।५७) इति उदादेशः।'तक्रं ह्युदश्विन्मथितं पादाम्ब्वर्धाम्बु निर्जलम्' इत्यमरः।

उद्दामम्, उद्दामः नपुं०, पुं०। इत्यत्र 'संग्राम-दाडिम-कुसुमाश्रम-क्षेम-क्षौम-होमोद्दामानि नपुंसके च' (**लि० सू० ८५**) **इति नपुंसकलिङ्गता पुँल्लिङ्गता च।** उद्दमनम् उद्दामम् उद्दामः वा। उद् + दमु उपशमे (दि० प०) 'भावे' (पा० अ० ३।३। १८) इति घञ्-प्रत्ययः। घकार-ञकारानुबन्धलोपः।'अत उपधायाः' (पा० अ० ७। २।११६) इति धातोः उपधायाः अकारस्य आ-वृद्ध्यादेशः।

उद्यमः, उद्यमम् पुं०, नपुं०। इत्यत्र 'शृङ्गार्थ-निदाघोद्यम-शल्य-दृढाः' (**लि० सू० १७८**) **इति पुँल्लिङ्गता नपुंसकलिङ्गता च।** उद्यमनम् उद्यमः उद्यमं वा। उद् + यम उपरमे (भ्वा० प०) 'यमः समुपनिविषु च' (पा० अ० ३।३।६३) इति चात् अनुपसर्गपूर्वे अपि अप्-प्रत्ययः। पकारानुबन्धलोपः। अथवा 'भावे' (पा० अ० ३।३। १८) इति घञ्-प्रत्ययः। घकार-ञकारानुबन्धलोपः।'अत उपधायाः' (पा० अ० ७। २।११६) इति धातोः उपधायाः अकारस्य प्राप्तः आ-वृद्धिः संज्ञापूर्वकत्वात् न भवति। 'गुरणमुद्यमे' इत्यमरः।

उद्यानम्, उद्यानः नपुं०, पुं०। इत्यत्र 'मान-यानाभिधान-नलिन-पुलिनोद्यान०' (**लि० सू० ७६**) **इति नपुंसकलिङ्गता पुँल्लिङ्गता च।** उद्यान्ति येन यत्र वा तद् उद्यानं, स उद्यानो वा। उद् + या प्रापणे (अ० प०) 'करणाधिकरणयोश्च' (पा० अ० ३।३।११७) इति ल्युट्-प्रत्ययः। लकार-टकारानुबन्धलोपः। 'युवोरनाकौ' (पा०

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by S3 Foundation USA

अ० ७।१।१) इति यु-स्थाने अनादेशः। 'पुमानाक्रीड उद्यानं राज्ञः साधारणं वनम्' एवं 'स्यादुद्यानं निःसरणे वनभेदे प्रयोजने' इत्यमरः। 'उद्यानं वनभेदे स्यान्निःसृतौ च प्रयोजने' इति धरणिः।

उपलः पुं०। इत्यत्र **'तूलोपल-ताल-कुसूल-तरल-कम्बल-देवल-वृषलाः पुंसि' (लि० सू० १४२) इति पुँल्लिङ्गता।** उपलाति इति उपलः। उप + ला दाने (अ० प०) 'आतश्चोपसर्गे कः' (पा० अ० ३।१।१३६) इति क-प्रत्ययः। ककारानुबन्धलोपः। **अथवा** पलति गच्छति इति पलः। पल गतौ (भ्वा० प०) 'नन्दि-ग्रहि-पचादिभ्यो०' (पा० अ० ३।१।१३४) इति अच्-प्रत्ययः। चकारानुबन्धलोपः। उः शिवः तस्य पलः ज्ञापकः इति उपलः। 'पाषाण-प्रस्तर-ग्रावोपलाश्मानः शिला दृषत्' इत्यमरः। 'उपलो ग्राव-रत्नयोः। उपला तु शर्करायाम्' इति हैमः। 'उपल इति मेघनाम' (निघं० १।१०, २८।८)। 'आ उपर उपल इत्येताभ्यां साधारणानि पर्वतनामानि। उपर उपलो मेघो भवति। उपरमन्तेऽस्मिन्नभ्राणि। उपरता आप इति वा' (निरु० २।२२)।

उपवासम्, उपवासः नपुं०, पुं०। इत्यत्र **'चमसांस-रस-निर्यासोपवास-कार्पास-वास-मास-कास-कांस-मांसानि नपुंसके च' (लि० सू० ९८) इति नपुंसकलिङ्गता पुँल्लिङ्गता च।** उपवसनम् उपवासम् उपवासः वा। उप + वस निवासे (भ्वा० प०) 'भावे' (पा० अ० ३।३।१८) इति घञ्-प्रत्ययः। घकार-ञकारानुबन्ध-लोपः। 'अत उपधायाः' (पा० अ० ७।२।११६) इति धातोः उपधायाः अकारस्य आ-वृद्धिः। 'औपवस्तं तूपवासः' इत्यमरः।

उपानत्, उपानद् स्त्री०। इत्यत्र **'भास्-स्रुक्-स्रग्-दिगुष्णिगुपानहः' (लि० सू० २०) इति स्त्रीलिङ्गता।** उपनह्यति उपनह्यते बध्नाति पादं या सा उपनत् पादत्राणम्। उप + णह बन्धने (दि० उ०) 'क्विप् च' (पा० अ० ३।२।७६) इत्यनेन अथवा 'सम्पदादिभ्यः क्विप्' (वा० पा० अ० ३।३।९४) इति क्विप् प्रत्ययः। क्विपः सर्वापहारी लोपः। ततः प्रथमैकवचने सु-प्रत्ययः। उकारानुबन्धलोपः। 'नहो धः' (पा० अ० ८।२।३४) इति धातोः हकारस्य धकारः। 'नहि-वृति-वृषि-व्यधि-रुचि-सहि-तनिषु क्वौ' (पा० अ० ६।३।११६) इति उप इत्यस्य पकारोतरवर्त्तिनः अकारस्य आ-दीर्घः। 'हल्-ङ्याब्भ्यो दीर्घात् सु-तिस्यपृक्तं हल्' (पा० अ० ६।१।६८) इति सुप्रत्ययस्य सकारस्य लोपः। 'झलां जशोऽन्ते' (पा० अ० ८।२।३९) इति धकारस्य दकारः। 'वाऽवसाने' (पा० अ० ८।४।५६) इति दकारस्य विकल्पेन तकारः। 'पादूरुपानत् स्त्री' इत्यमरः।

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by S3 Foundation USA

उल्मुकम् नपुं०। इत्यत्र **'चिबुक-शालूक-प्रातिपदिकांशुकोल्मुकानि नपुंसके' (लि० सू० ६२) इति नपुंसकलिङ्गता।** ओषति दहति इति उल्मुकम्, ज्वलदङ्गारो वा। उष दाहे (भ्वा० प०) 'उल्मुक-दर्वि-होमिनः' (उ० ३। ८४) इति मुक-प्रत्ययः धातोः षस्य च लः। 'उल्मुकं जलदङ्गारम्' इति हारावली। 'अलातमुल्मुकम्' इत्यमरः।

उशीरम्, उशीरः नपुं०, पुं०। इत्यत्र **'चक्र-वज्रान्धकार-सारावारपार-क्षीर-तोमर-शृङ्गार-भृङ्गार-मन्दारोशीर-तिमिर-शिशिराणि नपुंसके च' (लि० सू० ९२) इति नपुंसकलिङ्गता पुँल्लिङ्गता च।** उश्यते काम्यते यत् तद् उशीरं स उशीरो वा वीरणमूलं 'खसखस' इति भाषायां प्रसिध्यति। वश कान्तौ (अ० प०) 'वशेः किच्च' (उ० ४। ३२) इति ईरन्-प्रत्ययः स च कित्। नकारानुबन्धलोपः। कित्त्वात् 'ग्रहि-ज्या-वयि-व्यधि-वष्टि-विचति-वृश्चति-पृच्छति-भृज्जतीनां ङिति च' (पा० अ० ६। १। १६) इति धातोः वकारस्य उकारः सम्प्रसारणम्। 'सम्प्रसारणाच्च' (पा० अ० ६। १। १०८) इति अकारस्य पूर्वरूपम्। 'स्याद् वीरणं वीरतरं मूलेऽस्योशीरमस्त्रियाम्। अभयं बलदं सेव्यममृणालं जलाशयम्' इत्यमरः।

उषा स्त्री०। इत्यत्र **'प्रतिपदापद्-विपत्सम्पच्छरत्संसत्-परिषदुषः-संवित्क्षुत्पुन्मुत्समिधः' (लि० सू० २७) इति स्त्रीलिङ्गता।** ओषति दहति अन्धकारम् इति उषा प्रभातकालः। उष दाहे (भ्वा० प०) 'इगुपधज्ञाप्रीकिरः कः' (पा० अ० ३। १। १३५) इति क-प्रत्ययः। ककारानुबन्धलोपः। कित्त्वात् 'पुगन्तलघूपधस्य च' (पा० अ० ७। ३। ८६) इति धातोः उपधायाः उकारस्य प्राप्तः ओ-गुणः 'क्ङिति च' (पा० अ० १। १। ५) इत्यनेन निषिध्यते। ततः स्त्रियाम् 'अजाद्यतष्टाप्' (पा० अ० ४। १। ४) इति टाप्-प्रत्ययः। टकार-पकारानुबन्धलोपः। 'अकः सवर्णे दीर्घः' (पा० अ० ६। १। १०१) इति अकारस्य आकारस्य च आ-दीर्घः। **अथवा** उष दाहे धातुतः 'सर्वधातुभ्योऽसुन्' (उ० ४। १९०) इति असुन्-प्रत्ययः। एवं निष्पन्नस्य 'उषस्' इति शब्दस्य प्रथमैक-वचने उषाः इति विसर्गान्तः अपि भवति। **अथवा** वसन्ति अत्र इति उषाः। वस निवासे (भ्वा० प०) 'सर्वधातुभ्योऽसुन्' (उ० ४। १९०) इति असुन्-प्रत्ययः स च बाहुलकात् कित्। असुन्-प्रत्यये उकार-नकारानुबन्धलोपः। कित्त्वात् 'वचि-स्वपि-यजादीनां किति' (पा० अ० ६। १। १५) इति धातोः वकारस्य उ-सम्प्रसारणम्। 'सम्प्रसारणाच्च' (पा० अ० ६। १। १०८) इति अकारस्य पूर्वरूपम्। 'शासि-वसि-घसीनां च' (पा० अ० ८। ३। ६०) इति धातोः सस्य षत्वम्। एवं निष्पन्नस्य अपि 'उषस्' इति शब्दस्य प्रथमैक-वचने उषाः इत्येव रूपं भवति। 'उषा वष्टेः कान्तिकर्मणः उच्छतेरितरा माध्यमिका' (निरु० १२। ५)। 'भूतानां पतिर्गृहपतिरासीदुषा पत्नी' (शत० ब्रा० ६। १। ३। ७)

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by S3 Foundation USA

'उषाः पदनाम' (निघं० ५।५ एवं ५।६)। 'उषस् गच्छतीति सत्या रात्रेः परः कालः' (निरु० २।१८)। 'रात्रिर्वा उषाः' (तै० ब्रा० ३।८।१६।४)। 'योषाः सा एका' (ऐत० ब्रा० ३।४८)। 'उषा रात्रेरवसाने' इत्यमरः। 'उषा स्याद् रजनीशेषे उषः इत्यपि दृश्यते' इति रभसः। 'उषाः प्रातरधिष्ठात्री देवता' (सिद्धान्त-कौमुद्यां भट्टोजिदीक्षितः)।

उष्ट्रः पुं०। इत्यत्र **'भृत्रामित्र-छात्र-पुत्र-मन्त्र-वृत्र-मेढ्रोष्ट्राः पुंसि' (लि० सू० १५६) इति पुँल्लिङ्गता।** ओषति दहति मरौ स्वात्मानं तापेन अथवा उष्यते दह्यते वा यः सः उष्ट्रः चतुष्पाद-विशेषः। उष दाहे (भ्वा० प०) 'उषि-खनिभ्यां कित्' (उ० ४।१६३) इति ष्ट्रन्-प्रत्ययः स च कित्। पकार-नकारानुबन्धलोपः। 'ष्टुना ष्टुः' (पा० अ० ८।४।४१) इति तकारस्य टकारः। कित्त्वात् धातोः उपधायाः उकारस्य 'पुगन्तलघूपधस्य च' (पा० अ० ७।३।८६) इति प्राप्तः ओ-गुणः 'क्ङिति च' (पा० अ० १।१।५) इति निषेधात् न भवति। 'उष्ट्रे क्रमेलक-मय-महाङ्गाः' इत्यमरः।

उष्णम् नपुं०। इत्यत्र **'ऋण-लवण-पर्ण-तोरणोष्णानि नपुंसके' (लि० सू० ६८) इति नपुंसकलिङ्गता।** व्यवहारे अस्य वाच्यलिङ्गता। ओषति दहति इति उष्णम्। उष दाहे (भ्वा० प०) 'इण्-सिञ्-जि-दीङ्-उष्यविभ्यो नक्' (उ० ३।२) इति नक्-प्रत्ययः। ककारानुबन्धलोपः। कित्त्वाद् धातोः उपधायाः उकारस्य 'पुगन्त-लघूपधस्य च' (पा० अ० ७।३।८६) इति प्राप्तः ओ-गुणः 'क्ङिति च' (पा० अ० १।१।५) इति निषिध्यते। 'र-षाभ्यां नो णः समान-पदे' (पा० अ० ८।४।१) इति नस्य णः। 'निदाघ उष्णोपगम उष्ण ऊष्मागमस्तपः' तथा 'दक्षे तु चतुर-पेशल-पटवः सूत्थान उष्णश्च' इत्यमरः। 'उष्णो ग्रीष्मे पुमान् दक्षाशीतयोरन्यलिङ्गकः' इति मेदिनी।

उष्णिक् स्त्री०। इत्यत्र **'भास्-स्रुक्-स्रग्-दिगुष्णिगुपानहः' (लि० सू० २०) इति स्त्रीलिङ्गता।** उत्स्निह्यन्ति कामयन्ते इच्छन्ति यत् तद् छन्दः उष्णिक्। उद्-ष्णिह प्रीतौ कान्तौ (दि० प०) 'ऋत्विग्-दधृक्-स्रग्-दिगुष्णिगञ्चु-युजि-क्रुञ्चां च' (पा० अ० ३।२।५९) इति क्विन्-प्रत्ययः निपातनात् उद् इत्यस्य दकारस्य लोपश्च। क्विन्-प्रत्ययस्य सर्वापहारी लोपः। 'धात्वादेः षः सः' (पा० अ० ६।१।६४) इति धातोः षस्य सः। ततः षत्वप्रयुक्ते णत्वे अपि निवृत्ते उद् + स्निह् इति अवशिष्यते। 'वा द्रुह-मुह-ष्णुह-ष्णिहाम्' (पा० अ० ८।२।३३) इति धातोः हस्य घः आदेशः। 'झलां जशोऽन्ते' (पा० अ० ८।२।३९) इति घस्य गः। 'वाऽवसाने' (पा० अ० ८।४।५६) इति गस्य कः। 'उष्णिग् उत्स्नाता भवति। स्निह्यतेर्वा स्यात् कान्तिकर्मणः' (निरु० ७।१२)। 'चक्षुरुष्णिक्' (शत० ब्रा० १०।३।१।१)। 'दोषा उष्णिह' (शत० ब्रा० ८।६।२।१२)। 'औष्णिहो वै पुरुषः' (ऐत० ब्रा० ४।३)। 'आयुर्वा उष्णिक्' (ऐत० ब्रा० १।

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by S3 Foundation USA

५)। 'पशवो वा उष्णिक्' (तां० ब्रा० ८।१०।४)। 'यस्य सप्त वा उष्णिहम्' (कौषी० ब्रा० ९।२)। 'अजाविकमेवोष्णिक्' (कौषी० ब्रा० ११।२)। 'अष्टाविंशत्यक्षरोष्णिक्' (कौषी० ब्रा० २६।१)।

ऊर्णम्, ऊर्णा नपुं०, स्त्री०। **इत्यत्र 'स्थूणोर्णे नपुंसके च' (लि० सू० २१) इति नपुंसकलिङ्गता स्त्रीलिङ्गता च।** ऊर्णोति ऊर्णुते वा इति ऊर्णम् ऊर्णा वा। ऊर्णुञ् आच्छादने (अ० उ०) 'अन्येष्वपि दृश्यते' (पा० अ० ३।२।१०१) इति ड-प्रत्ययः। डकारानुबन्धलोपः। डित्त्वात् 'टेः' (पा० अ० ६।४।१४३) इति धातोः टेः उकारस्य लोपः। ततः स्त्रियाम् 'अजाद्यतष्टाप्' (पा० अ० ४।१।४) इति टाप्-प्रत्ययः। टकार-पकारानुबन्धलोपः। 'अकः सवर्णे दीर्घः' (पा० अ० ६।१।१०१) इति अकारस्य आकारस्य च दीर्घः। **अथवा** ऊर्णूयते आच्छाद्यते यया इति ऊर्णा। ऊर्णुञ् आच्छादने (अ० उ०) 'ऊर्णोतेर्डः' (उ० ५।४७) इति ड-प्रत्ययः। डकारानुबन्धलोपः। डित्त्वात् 'टेः' (पा० अ० ६।४।१४३) इति धातोः उकारस्य टेर्लोपः। स्त्रियां पूर्ववत् टाप्-प्रत्ययः सवर्णदीर्घश्च। 'ऊर्णा मेषादि-लोम्नि स्यादावर्त्ते चान्तरा भ्रुवौ' इत्यमरः। 'ऊर्णा पुनर्वृणोतेरूर्णोतेर्वा' (निरु० ५।२१)।

ऊर्मिः पुं०, स्त्री०। **इत्यत्र 'श्रोणि-योन्यूर्मयः पुंसि च' (लि० सू० ८) इति पुँल्लिङ्गता स्त्रीलिङ्गता च।** ऋच्छति गच्छति इति ऊर्मिः। ऋ गतौ (भ्वा० प०) 'अर्त्तेरुच्च' (उ० ४।४५) इति मि-प्रत्ययः धातोः ऋकारस्य 'उरण् रपरः' (पा० अ० १।१।५१) इति सहकारेण उर्-आदेशः। 'हलि च' (पा० अ० ८।२।७७) इति उकारस्य ऊ-दीर्घः। 'अर्त्तेरुच्च' (उ० ४।४५) सूत्रे ह्रस्वस्य उकारस्य स्थाने दीर्घस्य ऊकारस्य पाठात् तु 'हलि च' (पा० अ० ८।२।७७) इति दीर्घ-विधानम् आवश्यकं न। 'भङ्गस्तरङ्ग ऊर्मिर्वा' इत्यमरः। 'ऊर्मिः पीडानवोत्कण्ठाभङ्ग-प्राकाश्यवीचिषु। वस्त्रसं-कोचलेखायाम्' इति हैमः। 'ऊर्मिः स्त्रीपुंसयोर्वीच्यां प्रकाशे वेग-भङ्ग्योः। वस्त्रसंकोच-रेखायां वेदना-पीडयोरपि' इति मेदिनी। 'ऊर्मिरूर्णोतेः' (निरु० ५।२३) एतदनुसारेण ऊर्णुञ् आच्छादने (अ० उ०) 'ऊर्णोतेर्णुलोपश्च' (उ० १।३०) इति बाहुलकात् मि-प्रत्ययः धातोः णु इत्यस्य लोपश्च। एवम् अपि ऊर्मिः निष्पद्यते। इयं हि तीरादिकम् आच्छादयतीति सर्वविदितम्।

ऋजीषम् नपुं०। **इत्यत्र 'शिरीषर्जीषाम्बरीष-पीयूष-पुरीष-किल्विष-कल्माषाणि नपुंसके' (लि० सू० ९४) इति नपुंसकलिङ्गता।** अर्जति सिक्तः भवति रसः यस्मात् तत् ऋजीषम्। अर्ज अर्जने (भ्वा० प०) 'अर्जेर्ऋज च' (उ० ४।२९) इति

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by S3 Foundation USA

ईषन्-प्रत्ययः। स च कित् तथा धातोः ऋजादेशश्च। नकारानुबन्धलोपः। कित्त्वात् 'पुगन्तल-घूपधस्य च' (पा० अ० ७। ३। ८६) इति ऋकारस्य 'उरण् रपरः' (पा० अ० १। १। ५१) इति सहकारेण प्राप्तः अर्-गुणः 'क्ङिति च' (पा० अ० १। १। ५) इत्यनेन निषिध्यते। 'ऋजीषं पिष्टपचनम्' इत्यमरः। 'उद्धृतरसः सोमलतायाः शेषोऽपि ऋजीषम्' एतच्च 'ऋजिषिणं वृषणं सश्चत श्रिये' 'असत्यो यातु मद्यवाँ ऋजीषी' इत्यादिमन्त्रे भाष्ये स्पष्टम् (इति सिद्धान्तकौमुद्यां तत्त्वबोधिनीकारः)।

ऋणम् नपुं०। इत्यत्र **'ऋण-लवण-पर्ण-तोरण-रणोष्णानि नपुंसके' (लि० सू० ६८). इति नपुंसकलिङ्गता।** अर्यते स्म इति ऋणम्। ऋ गतौ (भ्वा० प०) 'निष्ठा' (पा० अ० ३। २। १०२) इति क्त-प्रत्ययः। ककारानुबन्धलोपः। 'ऋणमाधर्मण्ये' (पा० अ० ८। २। ६०) इति तकारस्य नकारः। 'ऋवर्णान्नस्य णत्वं वाच्यम्' (वा० पा० अ० ८। ४। १) इति नस्य णत्वम्। **अथवा** ऋणोति अर्णोति वा इति ऋणम्। ऋणु गतौ (त० प०) 'नन्दि-ग्रहि-पचादिभ्यो०' (पा० अ० ३। १। १३४) इति अच्-प्रत्ययः। चकारानुबन्धलोपः। 'ऋणं पर्युदञ्चनम्' इत्यमरः। 'ऋणं देये जले दुर्गे' इति हैमः। 'ऋणमृणोतेरपार्णं भवति' (निरु० ९। १०)।

ऋत्विक् पुं०। **इत्यत्र 'मरुद्-गरुत्-तरद्-ऋत्विजः' (लि० सू० १०८) इति पुँल्लिङ्गता।** ऋतौ यजति इति ऋत्विक्। ऋतु + यज देवपूजा-संगतिकरण-दानेषु (भ्वा० उ०) 'ऋत्विग्-दधृक्-स्रग्-दिगुष्णिगञ्चु-युजि-क्रुञ्चां च' (पा० अ० ३। २। ५९) इति क्विन्-प्रत्ययः। तस्य सर्वापहारी लोपः। 'वचि-स्वपि-यजादीनां किति' (पा० अ० ६। १। १५) इति धातोः यकारस्य इकारः सम्प्रसारणम्। 'सम्प्रसारणाच्च' (पा० अ० ६। १। १०८) इति अकारस्य पूर्वरूपम्। 'इको यणचि' (पा० अ० ६। १। ७७) इति ऋतुशब्दस्य उकारस्य वकारः यण्। एवम् ऋत्विज् सम्पद्यते। तस्य प्रथमैकवचने ऋत्विक् भवति। तत्र सुप्रत्ययः। उकारानुबन्धलोपः। 'चोः कुः' (पा० अ० ८। २। ३०) इति जस्य कः। 'हल्-ङ्याब्भ्यो दीर्घात् सु-तिस्यपृक्तं हल्' (पा० अ० ६। १। ६८) इति सस्य लोपः। 'वाऽवसाने' (पा० अ० ८। ४। ५६) इति जस्य-विकल्पेन कः। एवम् ऋत्विक् निष्पद्यते। 'ऋत्विक् ईरणः ऋग्यष्टा भवतीति शाकपूणिः। ऋतुयाजी भवतीति वा' (निरु० ३। १९)। 'ऋत्विजो हैव देवयजनम्' (शत० ब्रा० ३। १। १। ५) 'एते एव सरघो मधुकृतो यद् ऋत्विजः' (शत० ब्रा० ३। ४। ३१। १४)। 'आत्मा वै यज्ञस्य यजमानोऽङ्गान्यृत्विजः' (शत० ब्रा० ९। ५। २। १६)। 'ऋतवः ऋत्विजः' (शत० ब्रा० ११। २। ७। २)।

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by S3 Foundation USA

ऋभुक्षा पुं०। **इत्यत्र 'अर्घ-पथि-मथ्यृभुक्षि-स्तम्ब-नितम्ब-पूगाः' (लि० सू० ११५) इति पुँल्लिङ्गता।** ऋभवः क्षियन्ति निवसन्ति गच्छन्ति वा यत्र सः ऋभुक्षाः। ऋभु + क्षि निवास-गत्योः (तु० प०) 'अन्येष्वपि दृश्यते' (पा० अ० ३।२।१०१) इति ड-प्रत्ययः। डकारानुबन्धलोपः। डित्त्वात् 'टेः' (पा० अ० ६।४।१४३) इति धातोः इकारस्य टेर्लोपः। एवम् ऋभुक्ष सम्पद्यते। 'ऋभुक्षः सूर्य-वज्रयोः' इति विश्वः। ऋभुक्षः अस्य अस्ति इति ऋभुक्षाः। ऋभुक्ष-शब्दात् 'अत इनि-ठनौ' (पा० अ० ५।२।११५) इति इनि-प्रत्ययः। नकारपरवर्त्तिनः इकारस्य लोपः। 'यस्येति च' (पा० अ० ६।४।१४८) इति क्षकार-परवर्त्तिनः अकारस्य लोपः। इत्थम् ऋभुक्षिन् भवति। ततः प्रथमैकवचने सु-प्रत्ययः। उकारानुबन्धलोपः। 'पथि-मथ्यृभुक्षामात्' (पा० अ० ७।१।८५) इति नकारस्य आकारः। 'इतोऽत्सर्वनामस्थाने' (पा० अ० ७।१।८६) इति इकारस्य अकारः। 'अकः सवर्णे दीर्घः' (पा० अ० ६।१।१०१) इति अकारस्य आकारस्य च आ-दीर्घः। सकारस्य 'ससजुषो रुः' (पा० अ० ८।२।६६) इति रुः आदेशः। उकारानुबन्धलोपः। 'खरवसानयोर्विसर्जनीयः' (पा० अ० ८।३।१५) इति रस्य विसर्गः। एवम् ऋभुक्षाः निष्पद्यते। 'आखण्डलः सहस्राक्ष ऋभुक्षाः' इत्यमरः। 'ऋभुक्षाः महन्नाम' (निघं० ३।३)। 'ऋभुक्षाः मेधाविनाम' (निघं० ३।१५)। उरुक्षयणः ऋभूणां राजेति वा (निरु० ९।३)।

ऋषिः पुं०। **इत्यत्र 'ऋषि-राशि-दृति-ग्रन्थि-क्रिमि-ध्वनि-बलि-कौलि-मौलि-रवि-कवि-कपि-मुनयः' (लि० १०९) इति पुँल्लिङ्गता।** ऋषति गच्छति प्राप्नोति जानाति वा इति ऋषिः मन्त्रद्रष्टा वा। ऋषी गतौ (तु० प०) 'इगुपधात् कित्' (उ० ४।१२१) इति इन्-प्रत्ययः, स च कित्। नकारानुबन्धलोपः। कित्त्वात् 'पुगन्त-लघूपधस्य च' (पा० अ० ७।३।८६) इति धातोः उपधायाः ऋकारस्य 'उरण् रपरः' (पा० अ० १।१।५१) इति सहकारेण प्राप्तः अर्-गुणः 'क्ङिति च' (पा० अ० १।१।५) इति निषेधात् न भवति। यद्यपि अत्र 'सर्वधातुभ्य इन्' (उ० ४।११९) इत्यनेन अपि इन् सम्भवति तथापि तस्य कित्त्वाभावात् गुण-निषेधः न भवेत्, अतः 'इगुपधात् कित्' (उ० ४।१२१) इत्यनेन इन्-प्रत्ययं विधाय तस्य कित्त्वं क्रियते, तेन गुण-निषेधः भवति। 'ऋषयः सत्यवचसः' इत्यमरः। 'ऋषिर्वेदे वसिष्ठादौ दीधितौ च पुमानयम्' इति मेदिनी। 'प्राणा ऋषयः' (शत० ब्रा० ७।२।१।५)। 'ऋषयः पदनाम' (निघं० ५।६)। 'एते वै विप्रा यद् ऋषयः' (शत० ब्रा० १।४।२।७)। 'यो वै ज्ञातोऽनूचानः स ऋषिरार्षेयः' (शत० ब्रा० ४।३।४।१९)। 'ये यत्पुरा स्यात् सर्वस्मादिदम् इच्छन्तः श्रमेण तपसारिषंस्तस्माद् ऋषयः' (शत० ब्रा० ८।१।१।१)। 'साक्षात्कृतधर्माण

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by S3 Foundation USA

ऋषयो बभूवुः' (निरु० १।२०)। 'ऋषिर्दर्शनात् स्तोमान् ददर्शेत्यौपमन्यवः। तद् यदेनांस्तपस्यमानान् स्वयम्भ्वभ्यानर्षत ऋषयोऽभवंस्तद् ऋषीणाम् ऋषित्वम् इति विज्ञायते' (निरु० २।११)।

ऐरावतः, ऐरावतम् पुं०, नपुं०। **इत्यत्र 'घृत-भूत-मुस्त-क्ष्वेलितैरावत-पुस्तक-बुस्त-लोहिताः' (लि० सू० १७७) इति पुँल्लिङ्गता नपुंसकलिङ्गता च।** इराः आपः सन्ति अस्मिन् इति इरावान् मेघः समुद्रो वा। इरा-शब्दात् 'तदस्यास्त्यस्मिन्निति मतुप्' (पा० अ० ५। २। ९४) इति मतुप्-प्रत्ययः। उकार-पकारानुबन्धलोपः। 'मादुपधायाश्च मतोर्वोऽयवादिभ्यः' (पा० अ० ८।२।९) इति मकारस्य वकारः। एवम् इरावत् सम्पद्यते। ततः इरावति समुद्रे भवः इति ऐरावतः। इरावत् अस्मात् 'तत्र भवः' (पा० अ० ४।३।५३) इति अण्-प्रत्ययः। णकारानुबन्धलोपः। 'तद्धितेष्वचामादेः' (पा० अ० ७।२।११७) इति इकारस्य ऐ-वृद्ध्यादेशः। इत्थम् ऐरावत् इति निष्पद्यते। अथवा इराः आपः, तद्वती इरावती मेघः समुद्रो वा, तदिवायम् इति ऐरावतः। इरावती शब्दात् 'तस्येदम्' (पा० अ० ४।३।१२०) इति अण्-प्रत्ययः। णकारानुबन्धलोपः। 'यस्येति च' (पा० अ० ६।४।१४८) इति तकारपरवर्त्तिनः ईकारस्य लोपः। पूर्ववत् इरावत् इत्यस्य इकारस्य ऐ-वृद्धिः। 'ऐरावतोऽभ्रमातङ्गैरावणाभ्रमुवल्लभाः', 'ऐरावतः पुण्डरीको वामनः कुमुदोऽञ्जनः। पुष्पदन्तः सार्वभौमः सुप्रतीकश्च दिग्गजाः' तथा 'ऐरावतो नागरङ्गः' इत्यमरः। 'ऐरावतोऽभ्र-मातङ्गे नारङ्गे लकुचद्रुमे। नागभेदे च पुंसि स्याद् विद्युत्तद्भेदयोः स्त्रियाम्। नपुंसकं महेन्द्रस्य ऋजुदीर्घशरासने' इति मेदिनी।

ओदनः पुं०। **इत्यत्र 'सीरार्थौदनाः पुंसि' (लि० सू० १३८) इति पुँल्लिङ्गता।** उनत्ति आर्द्रीभवति इति ओदनः भक्तं वा। उन्दी क्लेदने (रु० प०) 'उन्देर्नलोपश्च' (उ० २।७७) इति युच्-प्रत्ययः, धातोः नकारस्य लोपश्च। चकारानुबन्धलोपः। 'पुगन्तलघूपधस्य च' (पा० अ० ७। ३। ८६) इति धातोः उपधायाः उकारस्य ओ-गुणः। 'युवोरनाकौ' (पा० अ० ७।१।१) इति यु-स्थाने अनादेशः। **अथवा** ऊर्दते अनेन इति ओदनः। 'ऊर्द क्रीडायाम्' (भ्वा० आ०) 'करणाधिकरणयोश्च' (पा० अ० ३। ३। ११७) इति ल्युट्-प्रत्ययः। लकार-टकारानुबन्धलोपः। 'युवोरनाकौ' (पा० अ० ७। १।१) इति यु-स्थाने अनादेशः। शेषकार्ये ऊकारस्य ओ इत्यादेशेन सह रेफस्य लोपः 'पृषोदरादीनि यथोपदिष्टम्' (पा० अ० ६।३।१०९) इत्यनेन विधेयः। 'ओदनोऽस्त्री सदीदिविः' इत्यमरः। 'ओदनं न स्त्रियां भक्ते बलायामोदिनी स्त्रियाम्' इति मेदिनी।

ओषधिः स्त्री०। **इत्यत्र 'दर्वि-विदि-वेदि-खनि-शान्यश्रि-वेशि-कृष्योषधि-कट्यङ्गुलयः' (लि० सू० २४) इति स्त्रीलिङ्गता।** ओषः प्लोषः दीप्तिः वा धीयते

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by S3 Foundation USA

अत्र इति ओषधिः। ओष + डुधाञ् धारण-पोषणयोः (जु० उ०) 'कर्मण्यधिकरणे च' (पा० अ० ३। ३। ९३) इति कि-प्रत्ययः। ककारानुबन्धलोपः। 'आतो लोप इटि च' (पा० अ० ६।४।६४) इति धातोः आकारस्य लोपः। 'ओषधिः फलपाकान्ता' इत्यमरः। 'कृदिकारादक्तिनः' (वा० पा० अ० ४। १। ४५) इति ङीष्-प्रत्ययेन तु दीर्घेकारान्तः ओषधी अपि भवति। ओषधय ओषद्धयन्तीति वौषत्येना धयन्तीति वा दोषं धयन्तीति वा (निरु० ९। २७) 'ओषधिः सोमः। सुनोतेर्यदेनमभिषुण्वन्ति' (निरु० ११। ३)। 'ओषधयः पदनाम' (निघं० ५। ३)। 'प्रजापतिः ताम् आहुतिं व्यौक्षत् ओषं धयेति, ततः ओषधयः समभवंस्तस्मादोषध्यो नाम' (शत० ब्रा० २। २।४।५)। 'आपोह वाऽओषधीनां रसः' (शत० ब्रा० ३। ६। १। ७)। 'अपामोषधयः (रसः) ओषधीनां पुष्पाणि (रसः) पुष्पाणां फलानि (रसः)' (शत० ब्रा० १४।९।४।१)। 'ओषधयो वै पशुपतिस्तस्माद् यदा पशव ओषधीर्लभन्तेऽत्र पतीयन्ति' (शत० ब्रा० ६। १। ३। १२)। 'ओषधयो वै मुदः, ओषधिभिर्हीदं सर्वं मोदते' (शत० ब्रा० ९। ४। १। ७)। 'सौम्या ओषधयः' (शत० ब्रा० १२। १। १। २)। 'ओषधिलोको वै पितरः' (शत० ब्रा० १३। ८। १। २०)। 'जगत्य ओषधयः' (शत० ब्रा० १। २। २। १)। 'ओषधयो वै देवानां पत्न्यः' (शत० ब्रा० ६। ५। ४। ४)। 'द्वय्यो वा ओषधयः पुष्पेभ्योऽन्यः फलं गृह्णन्ति। मूलेभ्यो अन्याः' (तै० ब्रा० ३। ८। १७। ४)। 'अग्नेर्वा एषा तनूर्यदोषधयः' (तैत्ति० ब्रा० ३। २। ५। ७)। 'ओषधयो बर्हिः' (तैत्ति० ब्रा० २। १। ५। १)। 'ओषधयः खलु वै वाजः' (तैत्ति० ब्रा० १। ३। ७। १)। 'ओषधयो मधुमतीः' (तैत्ति० ब्रा० ३। २। ८। २)। '(प्रजापतिः) विष्णोरध्योषधीरसृजत' (तैत्ति० ब्रा० २। १। २। ४)। 'उभय्यो (ओषधयः) ऽस्मै स्वदिताः पच्यन्तेऽकृष्टपच्याश्च कृष्टपच्याश्च' (तां० ब्रा० ६। ९। ९)। 'रसो वा एष ओषधिवनस्पतिषु यन्मधु' (ऐत० ब्रा० ८। २०)। 'औषधो वै सोमो राजा' (ऐत० ब्रा० ३। ४०)। 'सैवान्यं वा एतदोषधीनां यद्यवाः' (ऐत० ब्रा० ८। १६)। 'वाग्दैवत्यं साम, वाचो मनो देवता, मनसः पशवः पशूनामोषधयः, ओषधीनामापः। तदेतद्भ्यो जातं सामाप्सु प्रतिष्ठितमिति' (जै० उ० १। ५९। १४)। 'सोमो वै राजा ओषधीनाम्' (कौषी० ब्रा० ४। १२)। 'सोम ओषधीनामधिराजः' (गो० उ० १। १७४)। 'यदुग्रो देवा ओषधयो वनस्पतयस्तेन' (कौषी० ब्रा० ६। ५)। 'एष ह वै सर्वासामोषधीनां रसो यत्पयः' (कौषी० ब्रा० २। १)। 'ओषधयते बर्हिः' (शत० ब्रा० १। ३। ३। ९)।

औचित्यम् नपुं०। इत्यत्र **'त्व-ष्यञौ तद्धितौ' (लि० सू० १२१)** इति **नपुंसक-लिङ्गता**। उचितस्य भावः कर्म वा इति औचित्यम्। उचित-शब्दात् 'गुणवचनब्राह्मणादिभ्यः कर्मणि च' (पा० अ० ५। १। १२४) इति ष्यञ्-प्रत्ययः। षकार-ञकारानुबन्ध-

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by S3 Foundation USA

लोपः। 'तद्धितेष्वचामादेः' (पा० अ० ७। २। ११७) इति उकारस्य औ-वृद्धिः। 'यस्येति च' (पा० अ० ६। ४। १४८) इति तकार-परवर्त्तिनः अकारस्य लोपः।

औचिती स्त्री०। इत्यत्र **'ईकारान्तश्च' (लि० सू० १०) इति स्त्रीलिङ्गता।** औचित्य-शब्दः पूर्वं व्याख्यातः। ततः स्त्रियां 'षिद्गौरादिभ्यश्च' (पा० अ० ४। १। ४१) इति ङीष्-प्रत्ययः। ङकार-षकारानुबन्धलोपः 'यस्येति च' (पा० अ० ६। ४। १४८) इति यकारपरवर्त्तिनः अकारस्य लोपः 'हलस्तद्धितस्य' (पा० अ० ६। ४। १५०) इति यकारलोपः। 'स्त्रीनपुंसकयोर्भावक्रिययोः ष्यञ् क्वचिच्च वुञ्। औचित्यमौचिती मैत्री मैत्र्यं वुञ् प्रागुदाहृतः।।' इत्यमरः।

औपगवः, औपगवी पुं०, स्त्री०। इत्यत्र **'अपत्यार्थतद्धिते' (लि० सू० १७५) इति पुँल्लिङ्गता स्त्रीलिङ्गता च।** उपगोः अपत्यं पुमान् औपगवः। उपगुशब्दात् 'तस्यापत्यम्' (पा० अ० ४। १। ९२) इति अण्-प्रत्ययः। णकारानुबन्धलोपः। 'तद्धितेष्वचामादेः' (पा० अ० ७। २। ११७) इति आदेः उकारस्य औ-वृद्धिः। 'ओर्गुणः' (पा० अ० ६। ४। १४६) इति गकार-परवर्त्तिनः उकारस्य ओ-गुणः 'एचोऽयवायावः' (पा० अ० ६। १। ७८) इति ओकारस्य अवादेशः। एवम् औपगव इति निष्पद्यते। ततः स्त्रियाम् 'टिड्ढाणञ्०' (पा० अ० ४। १। १५) इति ङीप्-प्रत्ययः। ङकार-पकारानु-बन्धलोपः। 'यस्येति च' (पा० अ० ६। ४। १४८) इति वकारपरवर्त्तिनः अकारस्य लोपः। एवम् औपगवी निष्पद्यते।

औषधः, औषधम् पुं०, नपुं०। इत्यत्र **'कबन्धौषधायुधान्ताः' (लि० सू० १८०) इति पुँल्लिङ्गता नपुंसकलिङ्गता च।** ओषधि-शब्दः पूर्वं व्याख्यातः। ओषधेः इदम् औषधम्। ओषधिशब्दात् 'ओषधेरजातौ' (पा० अ० ५। ४। ३७) इति अण्-प्रत्ययः। णकारानुबन्धलोपः। 'तद्धितेष्वचामादेः' (पा० अ० ७। २। ११७) इति ओकारस्य औ-वृद्धिः। 'यस्येति च' (पा० अ० ६। ४। १४८) इति धकार-परवर्त्तिनः इकारस्य लोपः। 'अजातौ सर्वमौषधम्' तथा 'भेषजौषधभैषज्यान्यगदो जायुरित्यपि' इत्यमरः।

औष्ट्रम् नपुं०। इत्यत्र **'यद्यढग्यगञणवुञ्छाश्च भावकर्मणि' (लि० सू० १२३ (क)) इति नपुंसकलिङ्गता।** ओषति दहति मरौ स्वात्मानं तापेन अथवा उष्यते दह्यते तापेन मरौ यः सः उष्ट्रः चतुष्पद-विशेषः। उष दाहे 'उषि-खनिभ्यां कित्' (उ० ४। १६३) इति ष्ट्रन्-प्रत्ययः, स च कित्। षकार-नकारानुबन्धलोपः। 'ष्टुना ष्टुः' (पा० अ० ८। ४। ४१) इति तकारस्य टकारः। कित्त्वात् धातोः उपधायाः उकारस्य 'पुगन्तल-घूपधस्य च' (पा० अ० ७। ३। ८६) इति प्राप्तः ओ-गुणः 'क्ङिति च' (पा० अ० १। १। ५) इत्यनेन निषिध्यते। 'उष्ट्रे क्रमेलक-मय-महाङ्गाः' इत्यमरः। उष्ट्रस्य भावः

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by S3 Foundation USA

कर्म वा औष्ट्रम्। उष्ट्र-शब्दात् 'प्राणभृज्जाति-वयोवचनोद्-गात्रादिभ्योऽञ्' (पा० अ० ५।१।१२९) इति अञ्-प्रत्ययः। ञकारानुबन्धलोपः। 'यस्येति च' (पा० अ० ६।४।१४८) इति ष्ट्रकार-परवर्त्तिनः अकारस्य लोपः। 'तद्धितेष्वचामादेः' (पा० अ० ७।२।११७) इति उकारस्य औ-वृद्ध्यादेशः।

ककुदः, ककुदम् पुं०, नपुं०। इत्यत्र **'गृह-मेह-देह-पट्ट-पटहाष्टापदाम्बुद-ककुदाश्च' (लि० सू० १८२) इति पुँल्लिङ्गता नपुंसकलिङ्गता च।** कं सुखं कौति शब्दापयति इति ककुदः ककुदं वा। क + कु शब्दे (अ० प०) 'क्विप् च' (पा० अ० ३।२।७६) इति क्विप्-प्रत्ययः। तस्य सर्वापहारी लोपः। 'ह्रस्वस्य पिति कृति तुक्' (पा० अ० ६।१।७१) इति तुक्। उकार-ककारानुबन्धलोपः। एवं ककुत् भवति। ततः 'पृषोदरादीनि यथोपदिष्टम्' (पा० अ० ६।३।१०९) इति तकारस्य स्थाने दकार-करणेन ककुद इति अकारान्तः अयं निष्पद्यते। **अथवा** कं सुखं तस्य कुं भूमिं ददाति इति ककुदः। ककु + डुदाञ् दाने (जु० उ०) 'आतोऽनपुसर्गे कः' (पा० अ० ३।२।३) इति क-प्रत्ययः। ककारानुबन्धलोपः। 'आतो लोप इटि च' (पा० अ० ६।४।६४) इति धातोः आकारस्य लोपः। एवम् अपि अकारान्तः ककुद-शब्दः व्युत्पद्यते। **अथवा** ककुह इति महन्नाम (निघं० ३।३) ततः 'पृषोदरादीनि यथोपदिष्टम्' (पा० अ० ६।३।१०९) इति हकारस्य दकार-करणेन अपि ककुद इति निष्पद्यते। 'प्राधान्ये राजलिङ्गे च वृषाङ्गे ककुदोऽस्त्रियाम्' इत्यमरः।

कटम्, कटः नपुं०, पुं०। इत्यत्र **'कुट-कूट-कपट-कवाट-कर्पट-नट-निकट-कीट-कटानि नपुंसके च' (लि० सू० ६६) इति नपुंसकलिङ्गता पुँल्लिङ्गता च।** कटति वर्षति आवृणोति वा इति कटं, कटो वा। कटे वर्षावरणयोः (भ्वा० प०) 'नन्दिग्रहि०' (पा० अ० ३।१।१३४) इति अच्-प्रत्ययः। चकारानुबन्धलोपः। **अथवा** आकटन्ति आवर्षन्ति अस्मिन् इति कटः। कटे वर्षावरणयोः (भ्वा० प०) 'पुंसि संज्ञायां घः प्रायेण' (पा० अ० ३।३।११८) इति घ-प्रत्ययः। घकारानुबन्धलोपः। एवमपि कट इति निष्पद्यते। 'कटो ना श्रोणि-फलकम्', 'गण्डः कटः', 'कट-किलिञ्जकौ', 'गज-गण्डकटी कटौ' इत्यमरः। 'कटः श्रोणौ द्वयोः पुंसि कलिञ्जेऽतिशये शवे' इति मेदिनी। 'कटः श्रोणौ क्रियाकारे कलिञ्जेऽतिशये शवे। समये गजगण्डेऽपि पिप्पल्यां च कटी मता' इति विश्वः। 'शवे श्रोणौ किलिञ्जे च गजगण्डे भृशे कटः' इति शाश्वतः।

कटकम्, कटकः नपुं०, पुं०। इत्यत्र **'कण्टकानीक-सरक-मोदक-चषक-मस्तक-पुस्तक-तडाक-निष्क-शुष्क-वर्चस्क-पिनाक-भाण्डक-पिण्डक-कटक-शण्डक-पिटक-तालक-फलक-पुलाकानि नपुंसके च' (लि० सू०**

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by S3 Foundation USA

६३) इति नपुंसकलिङ्गता पुँल्लिङ्गता च। कटति वर्षति आ वृणोति वा इति कटकं कटकः वा। 'कृञादिभ्यः संज्ञायां वुन्' (उ० ५। ३५) इति वुन्-प्रत्ययः। **अथवा** 'क्वुन् शिल्पिसंज्ञयोः' (उ० २। ३३) इति क्वुन्-प्रत्ययः वुन्-प्रत्यये नकारानुबन्धलोपः, क्वुन्-प्रत्यये च ककार-नकारानुबन्धलोपः। 'भूभृन्नितम्बवलयचक्रेषु कटकोऽस्त्रियाम्' तथा 'आवापकः परिहार्यः कटको वलयोऽस्त्रियाम्' इत्यमरः। 'कटकोऽस्त्री नितम्बोऽद्रेर्दन्तिनां दन्तमण्डने। सामुद्रलवणे राजधानीवलयोरपि' इति मेदिनी। 'कटको वलये सानौ' इति सिद्धान्तकौमुद्याम् उणादौ तत्त्वबोधिनीकारः।

कटाहः पुं०। **इत्यत्र 'पल्लव-पल्वल-कफ-रेफ-कटाह०' (लि० सू० ११६) इति पुँल्लिङ्गता।** कटेन अतिशयेन आहन्यते गम्यते इति कटाहः। आ + हन हिंसा-गत्योः (अ० प०) 'अन्येष्वपि दृश्यते' (पा० अ० ३। २। १०१) इति ड-प्रत्ययः। डकारानुबन्धलोपः। डित्त्वात् 'टेः' (पा० अ० ६। ४। १४३) इति धातोः अन् इत्यस्य टेर्लोपः। 'अकः सवर्णे दीर्घः' (पा० अ० ६। १। १०१) इति अकारस्य आकारस्य च आ-दीर्घः। 'कटाहः कूर्मकर्परे। द्वीपस्य च प्रभेदे च तथा स्यान्महिषी-शिशौ। तैलादिपाकपात्रे च' इति मेदिनी। 'कटाहो घृततैलादिपाकपात्रेऽपि कर्परे। स्तूपे कटाहः कूर्मपृष्ठे च महिपी-शिशौ' इति विश्वः।

कटिः स्त्री०। **इत्यत्र 'दर्वि-विदि-वेदि-खनि-शान्यश्रि-वेशि-कृष्योषधि-कट्यङ्गुलयः' (लि० सू० २४) इति स्त्रीलिङ्गता।** कट्यते आव्रियते इति कटिः शरीरमध्यभागो वा। कटे वर्षा-वरणयोः (भ्वा० प०) 'सर्वधातुभ्य इन्' (उ० ४। ११९) इति इन्-प्रत्ययः। नकारानुबन्धलोपः। 'कटिः श्रोणी ककुद्मती' इत्यमरः।

कटी स्त्री०। **इत्यत्र 'ईकारान्तश्च' (लि० सू० १०) इति स्त्रीलिङ्गता।** कटिः पूर्वं व्याख्यातः। ततः 'कृदिकारादक्तिनः' (वा० पा० अ० ४। १। ४५) इति ङीष्-प्रत्ययः। ङकार-षकारानुबन्धलोपः। 'यस्येति च' (पा० अ० ६। ४। १४८) इति टकारपरवर्त्तिनः इकारस्य लोपः। **अथवा** कटति इति कटी। कटे वर्षावरणयोः (भ्वा० प०) 'नन्दि-ग्रहि-पचादिभ्यो०' (पा० अ० ३। १। १३४) इति अच्-प्रत्ययः। चकारानुबन्धलोपः। ततः कट-शब्दात् 'जातेरस्त्रीविषयादयोपधात्' (पा० अ० ४। १। ६३) इति ङीष्-प्रत्ययः। ङकार-षकारानुबन्धलोपः। 'यस्येति च' (पा० अ० ६। ४। १४८) इति टकारोत्तरवर्त्तिनः अकारस्य लोपः।

कण्टकम्, कण्टकः नपुं०, पुं०। **इत्यत्र 'कण्टकानीक-सरक-मोदक-चषक-मस्तक-पुस्तक-तडाक-निष्क-शुष्क०' (लि० सू० ६३) इति नपुंसकलिङ्गता पुँल्लिङ्गता च।** कण्टति गच्छति इति कण्टकं कण्टको वा। कटि गतौ (भ्वा० प०)

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by S3 Foundation USA

'ण्वुल्-तृचौ' (पा० अ० ३।१।१३३) इति ण्वुल्-प्रत्ययः। णकार-लकारानुबन्धलोपः। 'युवोरनाकौ' (पा० अ० ७।१।१) इति वु-स्थाने अकादेशः। 'पुंनपुंसकयोः शेषोऽर्धर्च-पिण्याक-कण्टकाः' इत्यमरः। 'कण्टको न स्त्रियां क्षुद्रशत्रौ मत्स्यादिकीकसे। नैयोगिकादिदोषोक्तौ स्याद्रोमाञ्चद्रुमाङ्गयोः' इति मेदिनी। 'कण्टकः क्षुद्रशत्रौ च कर्मस्थानकदोषयोः। रोमाञ्चे च द्रुमाङ्गे च कण्टको मस्करेऽपि च' इति विश्वः। 'कण्टक ऋच्छोः। कण्टकः कन्तपो वा, कृन्ततेर्वा, कण्टतेर्वा स्याद् गतिकर्मणः उद्गततमो भवति' (निरु० ९।३२)।

कण्ठः पुं०। इत्यत्र **'देवासुरात्म-स्वर्ग-गिरि-समुद्र०' (लिं० सू० ४३) इति पुँल्लिङ्गता।** कण्यते शब्द्यते येन सः कण्ठः। कण शब्दे (भ्वा० प०) 'कणेष्ठः' (उ० १।१०३) इति ठ-प्रत्ययः। बहुलवचनात् ठकारस्य 'चुटू' (पा० अ० १।३।७) इति इत्संज्ञा न। इत्संज्ञाभावात् 'तस्य लोपः' (पा० अ० १।३।९) इति लोपः अपि न। **अथवा** कण्ठते इति कण्ठः। कठि शोके (भ्वा० प०, चु० उ०) 'नन्दि-ग्रहि-पचादिभ्यो०' (पा० अ० ३।१।१३४) इति अच्-प्रत्ययः। चकारानुबन्धलोपः। 'इदितो नुम् धातोः' (पा० अ० ७।१।५८) इति नुम्-आगमः। उकार-मकारानुबन्धलोपः। 'नश्चापदान्तस्य झलि' (पा० अ० ८।३।२४) इति नकारस्य अनुस्वारः। 'अनुस्वारस्य ययि परसवर्णः' (पा० अ० ८।४।५८) इति अनुस्वारस्य परसवर्णः णकारः। 'कंण्ठो गलः' इत्यमरः। 'कण्ठो गले सन्निधाने ध्वनौ मदन-पादपे' इति विश्वः। 'समीप-गल-शब्देषु त्रिषु कण्ठं विदुर्बुधाः' इति शाश्वतः।

कण्डुः स्त्री०, पुं०। **इत्यत्र 'मृत्यु-सीधु-कर्कन्धु-किष्कु-कण्डु-रेणवः' (लिं० सू० १७३) इति स्त्रीलिङ्गता पुँल्लिङ्गता च।** कण्डते माद्यति अनेन इति कण्डुः कडि मदे (भ्वा० अ०) अथवा कण्डयति कण्डयते भिद्यते वा अनया इति काडुः कडि भेदने (चु० उ०) धातोः इदित्त्वात् 'इदितो नुम् धातोः' (पा० अ० ७।१।५८) इति नुम्-आगमः। उकार-मकारानुबन्धलोपः। नकारस्य 'नश्चापदान्तस्य झलि' (पा० अ० ८।३।२४) इति अनुस्वारः। अनुस्वारस्य पुनः 'अनुस्वारस्य ययि परसवर्णः' (पा० अ० ८।४।५८) इति परसवर्णः णकारः। एवं कण्ड् इति भवति। उणादि-प्रत्ययानाम् 'उणादयो बहुलम्' (पा० अ० ३।३।१) इति बाहुलकत्वात् 'भृ-मृ-शीङ्-तृ-चरि-त्सरि-तनि-धनि-मि-मस्जिभ्य उः' (उ० १।७) इति उ-प्रत्ययः। **अथवा** कण्डूयनं कण्डूः। कण्डूञ् गात्रविघर्षणे (क० उ०) 'सम्पदादिभ्यः क्विप्' (वा० पा० अ० ३।२।७) इति क्विप्-प्रत्ययः। तस्य सर्वापहारी लोपः। एवं दीर्घोकारान्तः कण्डू-शब्दः अपि भवति। 'कण्डूः खर्जूश्च कण्डूया' इत्यमरः।

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by S3 Foundation USA

कण्वम् नपुं०। इत्यत्र **'श्राद्ध-कुलिश-दैव-पीठ-०' (लि० सू० १६६) इति नपुंसकलिङ्गता।** कणति गच्छति शब्दयति काणयति निमीलति चेष्टते वा इति कण्वः मुनिविशेषो वा। कण गतौ (भ्वा० प०) कण शब्दे (भ्वा० प०), कण निमीलने (चु० उ०) 'अशू-प्रुषि-लटि-कणि-खटि-विशिभ्यः क्वन्' (उ० १। १५१) इति क्वन्-प्रत्ययः। ककार-नकारानुबन्धलोपः। 'कण्वं पापे मुनौ पुंसि' इति मेदिनी। 'कण्व इति मेधावि-नाम' (निघं० ३। १५)।

कति पुं०, स्त्री०, नपुं०। इत्यत्र **'अव्ययं कति-युष्मदस्मदः' (लि० सू० १८४) इति नपुंसकलिङ्गता।** का संख्या एषां ते कति कियन्तः इति तदर्थः किम् शब्दात् 'किमः संख्या-परिमाणे डति च' (पा० अ० ५। २। ४१) इति डति-प्रत्ययः। डकारानुबन्ध-लोपः। 'टेः' (पा० अ० ६। ४। १४३) इति किम् शब्दस्य इम् इत्यस्य टेर्लोपेन कति इति निष्पद्यते।

कन्दः पुं०। इत्यत्र **'ह्रद-कन्द-कुन्द-बुद्बुद-शब्दाः' (लि० सू० ११४) इति पुँल्लिङ्गता।** कन्दति कन्दते इति कन्दः। कदि आह्वाने रोदने च (भ्वा० प०) 'नन्दि-ग्रहि-पचादिभ्यो०' (पा० अ० ३। १। १३४) इति अच्-प्रत्ययः। चकारानुबन्धलोपः। अथवा कन्दनं कन्दः। 'भावे' (पा० अ० ३। ३। १८) इति घञ्-प्रत्ययः। घकार-ञकारानुबन्धलोपः। 'अर्शोऽघ्नः शूरणः कन्दः' इत्यमरः। 'कन्दोऽस्त्री सूरणे सस्यमूले जलधारे पुमान्' इति मेदिनी।

कन्दरम् नपुं०। इत्यत्र **'द्वाराग्र-स्फार-तक्र-वक्र०' (लि० सू० ९०) इति नपुंसक-लिङ्गता।** कन्दति आह्वयति रोदयति वा इति कन्दरम्। कदि आह्वाने रोदने च (भ्वा० प०) अथवा कन्दते वैकल्यं करोति इति कन्दरः। कदि वैकल्ये (भ्वा० आ०) धातोः इदित्त्वात् 'इदितो नुम् धातोः' (पा० अ० ७। १। ५८) इति नुम्-आगमः। उकार-मकारानुबन्धलोपः। 'ऋच्छेररः' (उ० ३। १३१) इति बाहुलकात् अर-प्रत्ययः। **अथवा** केन जलेन दीर्यते विशीर्यते इति कन्दरः। कम् + दृ विदारणे (क्र्या० प०) 'ऋदोरप्' (पा० अ० ३। ३। ५७) इति अप्-प्रत्ययः। पकारानुबन्धलोपः। 'सार्वधातुकार्धधातुकयोः' (पा० अ० ७। ३। ८४) इति धातोः ऋकारस्य 'उरण् रपरः' (पा० अ० १। १। ५१) इति सहकारेण अर्-गुणः। **अथवा** कन्दः पूर्वं व्याख्यातः। कन्दं राति इति कन्दरः। कन्द + रा दाने (अ० प०) 'आतोऽनुपसर्गे कः' (पा० अ० ३। २। ३) इति क-प्रत्ययः। ककारानुबन्धलोपः। 'आतो लोप इटि च' (पा० अ० ६। ४। ६४) इति धातोः आकारस्य लोपः। **अथवा** कन्देन रम्यते यत्र इति कन्दरः कन्द + रमु क्रीडायाम् (भ्वा० प०) 'अन्येष्वपि दृश्यते' (पा० अ० ३। २। १०१) इति ड-प्रत्ययः। डकारानु-

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by S3 Foundation USA

बन्धलोपः। डित्त्वात् 'टेः' (पा० अ० ६।४।१४३) इति धातोः अम् इत्यस्य टेर्लोपः। 'दरी तु कन्दरो वा स्त्री' इत्यमरः। 'कन्दरोऽङ्कुशे। विवरे च गुहायां च' इति हैमः।

कपिः पुं०। इत्यत्र **'ऋषि-राशि-दृति-ग्रन्थि०' (लि० सू० १०९) इति पुँल्लिङ्गता।** कम्पते कम्पयति वा यः सः कपिः वानरः वा। कपि किञ्चिच्चलने (भ्वा० आ०) धातोः इदित्त्वात् 'इदितो नुम् धातोः' (पा० अ० ७। १। ५८) इति नुम्-आगमः। उकार-मकारानुबन्धलोपः। 'कुण्ठि-कम्प्योर्नलोपश्च' (उ० ४।१४५) इति इन्-प्रत्ययः नुम्-आगमस्य नकारस्य लोपश्च। इन्-प्रत्यये नकारानुबन्धलोपः। **अथवा** कं सुखं जलं वा। तदर्थं यः पियति गच्छति सः कपिः। क + पि गतौ (तु० प०) 'क्विप् च' (पा० अ० ३। २। ७६) इति क्विप्-प्रत्ययः अथवा 'अन्येभ्योऽपि दृश्यन्ते' (पा० अ० ३। २। ७५) इति विच्-प्रत्ययः। द्वयोः अपि क्विप्-विच्-प्रत्यययोः सर्वापहारी लोपः। 'कम् उदकनाम' (निघं० १। १२ एवं ४। १७), 'कं सुखनाम' (निघं० ३। ६), 'कं पदपूरणः' (निरु० १। १९), 'कम् अन्नम्' (निरु० ६। ३५)। 'कपिः प्लवङ्ग-प्लवग-शाखामृग-वलीमुखाः' इत्यमरः। 'कपिर्ना सिह्लके शाखामृगे च मधुसूदने' इति मेदिनी विश्वश्च।

कपटम्, कपटः नपुं०, पुं०। इत्यत्र **'कुट-कूट-कपट-कवाट०' (लि० सू० ६६) इति नपुंसकलिङ्गता पुँल्लिङ्गता च।** कम्पते येन सः कपटः। कपि किञ्चिच्चलने (भ्वा० अ०) '''क्रादिभ्योऽटन्' (उ० ४।८२) इति अटन्-प्रत्ययः तथा धातोः इदित्त्वात् 'इदितो नुम् धातोः' (पा० सू० ७। १। ५८) इति जातस्य नुम्-आगमस्य नकारस्य लोपश्च। अटन्-प्रत्यये नकारानुबन्धलोपः। **अथवा** के मस्तके पटः इव आवरकः आच्छादकः इति कपटः। **अथवा** पटति इति पटः। पट गतौ (भ्वा० प०) 'नन्दि-ग्रहि-पचादिभ्यो०' (पा० अ० ३। १। १३४) इति अच्-प्रत्ययः। चकारानुबन्धलोपः। कस्य ब्रह्मणः अपि पटः व्यापकः आवरकः इति कपटः। 'कपटोऽस्त्री व्याज-दम्भोप-धयश्छद्म-कैतवे' इत्यमरः।

कपोलः पुं०। **इत्यत्र 'ऋतु-पुरुष-कपोल-गुल्फ-मेघाभिधानानि' (लि० सू० ४९) इति पुँल्लिङ्गता।** कम्पते चलति इति कपोलः। कपि ईषच्चलने (भ्वा० आ०) धातोः इदित्त्वात् 'इदितो नुम् धातोः' (पा० अ० ७। १। ५८) इति नुम्-आगमः। उकार-मकारानुबन्धलोपः। 'कपि-गडि-गण्डि-कटि-पटिभ्य ओलच्' (उ० १। ६६) इति ओलच्-प्रत्ययः नुम्- आगमस्य नकारस्य लोपश्च। **अथवा** आगम-शास्त्रस्य अनित्यत्वात् नुम्-आगमः एव न। ओलच्-प्रत्यये चकारानुबन्धलोपः। केषुचित् पुस्तकेषु तु सूत्रे ओलच्-स्थाने कोलच् इति पठ्यते। तदा ककारस्य अपि अनुबन्धस्य लोपः। **अथवा** कं सुखं पोलति वर्धयति इति कपोलः। पुल महत्त्वे (भ्वा० प०) तथा (चु०

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by S3 Foundation USA

उ०) 'कर्मण्यण्' (पा० अ० ३। २। १) इति अण्-प्रत्ययः। णकारानुबन्धलोपः। 'पुगन्त-लघूपधस्य च' (पा० अ० ७। ३। ८६) इति धातोः उकारस्य ओ-गुणः। 'गण्डौ कपोलौ' इत्यमरः।

कफः पुं०। इत्यत्र '**पल्लव-पल्वल-कफ-रेफ०**' (**लि० सू० ११६**) **इति पुँल्लिङ्गता।** केन जलेन फलति इति कफः। क + फल निष्पत्तौ (भ्वा० प०) 'अन्येष्वपि दृश्यते' (पा० अ० ३। २। १०१) इति ड-प्रत्ययः। डकारानुबन्धलोपः। 'टेः' (पा० अ० ६। ४। १४३) इति धातोः अल् इत्यस्य टेर्लोपः। **अथवा** के मस्तके फणति फक्कति वा इति कफः। क + फण् गतौ (भ्वा० प०), फक्क नीचैर्गतौ (भ्वा० प०) पूर्ववत् ड-प्रत्ययः। डकारानुबन्धलोपः। फण् धातौ अण् इत्यस्य फक्कधातौ अक्क इत्यस्य टेर्लोपः। 'कफः श्लेष्मा' इत्यमरः।

कबन्धः कबन्धम् पुं०, नपुं०। **इत्यत्र 'कबन्धौषधायुधान्ताः' (लि० सू० १८०) इति पुँल्लिङ्गता नपुंसकलिङ्गता च।** कं सुखं बध्नाति इति कबन्धः। क + बन्ध बन्धने (क्र्या० प०) 'कर्मण्यण्' (पा० अ० ३। २। १) इति अण्-प्रत्ययः। णकारानुबन्धलोपः। 'कबन्धमुदकं पाथः' एवं 'कबन्धोऽस्त्री क्रियायुक्तमपमूर्धकलेवरम्' इत्यमरः। 'कबन्ध-मुदकमापोनीरवार्वारिनारम्। क्लीबमपि' इति संसारावर्त्तः। 'कबन्धोऽस्त्री क्रियायुक्त-मपमूर्धकलेवरे। क्लीबं जले पुंस्युदरें राहुरक्षोविशेषयोः' इति मेदिनी। 'कबन्धं सलिले मुण्डे' इति शाश्वतः। 'कबन्धमुदके रुण्डे कबन्धो राहु-रक्षसोः' इति हैमः। कबन्धं मेघं, कवनमुदकं भवति। तदस्मिन् धीयत, उदकमपि कबन्धमुच्यते। बन्धिरनिभृतत्वे कमनिभृतं च (निरु० १०। ४)।

कमण्डलु, कमण्डलुः नपुं०, पुं०। **इत्यत्र 'मद्गु-मधु-सीधु-शीधु-सानु-कमण्डलूनि नपुंसके च' (लि० सू० ५६) इति नपुंसकलिङ्गता पुँल्लिङ्गता च।** कः प्रजापतिः कं जलं वा। मण्डनं मण्डः। मडि भूषायाप् (भ्वा० प०) धातोः इदित्त्वात् 'इदितो नुम् धातोः' (पा० अ० ७। १। ५८) इति नुम्-आगमः। उकार-मकारानुबन्धलोपः। 'नश्चापदान्तस्य झलि' (पा० अ० ८। ३। २४) इति नकारस्य अनुस्वारः 'अनुस्वारस्य ययि परसवर्णः' (पा० अ० ८। ४। ५८) इति अनुस्वारस्य परसवर्णः णकारः। 'भावे' (पा० अ० ३। ३। १८) इति घञ्-प्रत्ययः। घकार-ञकारानुबन्धलोपः। कस्य प्रजापतेः जलस्य वा मण्डं सारं लाति लभते वा इति कमण्डलुः। कमण्ड + ला दाने (अ० प०), डुलभष् प्राप्तौ (भ्वा० आ०) 'मितद्र्वादीनामुपसंख्यानम्' (वा० पा० अ० ३। २। १८०) इति डु-प्रत्ययः। डकारानुबन्धलोपः। 'टेः' (पा० अ० ६। ४। १४३) इति ला-धातोः आकारस्य लभ्-धातोः अभ् इत्यस्य टेर्लोपः। 'अस्त्री कमण्डलुः कुण्डी' इत्यमरः।

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by S3 Foundation USA

कमलः, कमलम् पुं०, नपुं०। इत्यत्र **'शील-मूल-मङ्गल-साल-कमल-तल-मुसल-कुण्डल०' (लि० सू० १४३) तथा 'पद्म-कमलोत्पलानि पुंसि च' (लि० सू० १५९) इति पुँल्लिङ्गता नपुंसकलिङ्गता च।** यः कामयते सः कमलः, यत् काम्यते तत् कमलम्। कमु कान्तौ (भ्वा० आ०) 'वृषादिभ्यश्चित्' (उ० १। १०६) इति कल-प्रत्ययः। ककारानुबन्धलोपः। **अथवा** कं जलम् अलति=भूषयति अथवा मलते धारयति इति मलः। मल धारणे (भ्वा० प०) 'नन्दि-ग्रहि-पचादिभ्यो०' (पा० अ० ३। १। १३४) इति अच्-प्रत्ययः। चकारानुबन्धलोपः। कस्य=जलस्य मलः धारकः इति कमलः कमलं वा। क + अल भूषण-पर्याप्ति-वारणेषु (भ्वा० प०) 'क-प्रकरणे मूलविभुजादिभ्य उपसंख्यानम्' (वा० पा० अ० ३। २। ५) इति क-प्रत्ययः। ककारानुबन्धलोपः। 'सहस्रपत्रं कमलं शतपत्रं कुशेशयम्', 'सलिलं कमलं जलम्' तथा 'स्यात् कुरङ्गेऽपि कमलः' इत्यमरः। 'कमलं सलिले ताम्रे जलजे व्योम्नि भेषजे। मृगभेदे तु कमलः' इति मेदिनी। 'कमलं क्लोम्नि भेषजे। पङ्कजे सलिलं ताम्रे कमलस्तु मृगान्तरे। कमला श्रीवरनार्योः' इति हैमः। 'कमला श्रीर्जलं पद्मं कमलं कमलो मृगः' इति धरणिः।

कम्बलः पुं०। इत्यत्र **'तूलोत्पल-ताल-कुसूल-तरल०' (लि० सू० १४२) इति पुँल्लिङ्गता।** काम्यते अभिलष्यते यः सः कम्बलः। कमु कान्तौ (भ्वा० आ०) 'वृषादिभ्यश्चित्' (उ० १। १०६) इति कल-प्रत्ययः। ककारानुबन्धलोपः। 'कमेर्बुक्' (उ० १। १०७) इति धातोः बुगागमः। उकार-ककारानुबन्धलोपः। **अथवा** कम्बति मर्दयति इति कम्बलः। कबि मर्दने (काशकृत्स्नधातु पाठे भ्वा० प०) 'इदितो नुम् धातोः' (पा० अ० ७। १। ५८) इति धातोः इदित्त्वात् नुम्-आगमः। उकार-मकारानुबन्ध-लोपः। 'नश्चापदान्तस्य-झलि' (पा० अ० ८। ३। २४) इति नकारस्य अनुस्वारः। 'अनुस्वारस्य ययि परसवर्णः' (पा० अ० ८। ४। ५८) इति अनुस्वारस्य परसवर्णः मकारः। 'वृषादिभ्यश्चित्' (उ० १। १०६) इति कल-प्रत्ययः। ककारानुबन्धलोपः। **अथवा** कम्बनं मर्दनं कम्बः मर्दः। कम्बं लाति ददाति आददाति वा इति कम्बलः। कम्ब + ला दाने (अ० प०) 'आतोऽनुपसर्गे कः' (पा० अ० ३। २। ३) इति क-प्रत्ययः। ककारानुबन्धलोपः। 'आतो लोप इटि च' (पा० अ० ६। ४। ६४) इति धातोः आकारस्य लोपः। 'समौ रल्लक-कम्बलौ' तथा 'प्राकारेऽपि च कम्बलः' इत्यमरः। 'कम्बलो राजनागे स्यात् सास्ना-प्रावारयोरपि। कृमावप्युत्तरासङ्गे सलिले तु नपुंसकम्' इति मेदिनी। 'कम्बलः कृमि-सास्नयोः। नाग-प्रभेदे प्रावारे वैकक्ष्ये कम्बलं जले' इति हैमः।

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by S3 Foundation USA

करः पुं०। इत्यत्र '**घञबन्तः**' (लि० सू० ३६) **इति अबन्तत्वात् पुँल्लिङ्गता।** करणं करः। कृ विक्षेपे (तु० प०) 'ॠदोरप्' (पा० अ० ३। ३। ५७) इति अप्-प्रत्ययः। पकारानुबन्धलोपः। 'उरण् रपरः' (पा० अ० १। १। ५१) इति सहकारेण 'सार्वधातुकार्धधातुकयोः' (पा० अ० ७। ३। ८४) इति धातोः ॠकारस्य अर्-गुणः। **अथवा** करोति इति करः। डुकृञ् करणे (त० उ०) 'नन्दि-ग्रहि-पचादिभ्यो०' (पा० अ० ३। १। १३४) इति अच्-प्रत्ययः। पूर्ववत् धातोः ॠकारस्य अर्-गुणः। 'बलि-हस्तांशवः कराः', 'भागधेयः करौ बलिः' तथा 'भानुः करो मरीचिः०' इत्यमरः। 'करो वर्षोपले रश्मौ पाणौ प्रत्यय-शुण्डयोः' इति मेदिनी।

करण्डः पुं०। इत्यत्र '**षण्ड-भण्ड-करण्ड-भरण्ड०**' (लि० सू० ११२) **इति पुँल्लिङ्गता।** क्रियते विधीयते हिंस्यते वा इति करण्डः। डुकृञ् करणे (त० उ०), कृञ् हिंसायां (स्वा० उ०) 'अण्डन् कृ-सृ-भृ-वृञः' (उ० १। १२९) इति अण्डन्-प्रत्ययः। नकारानुबन्धलोपः। धातोः ॠकारस्य 'उरण् रपरः' (पा० अ० १। १। ५१) इति सहकारेण 'सार्वधातुकार्धधातुकयोः' (पा० अ० ७। ३। ८४) इति अर्-गुणः। **अथवा** करे हस्ते अण्डः यस्य सः करण्डः। कर + अण्ड इत्यवस्थायां 'शकन्ध्वादिषु पररूपं वाच्यम्' (वा० पा० अ० ६। १। ९४) इति रेफोत्तरवर्त्तिनः अकारस्य पररूपम्। **अथवा** केन सुखेन के जले वा रमते रमयति वा इति करण्डः। क + रमु क्रीडायाम् (भ्वा० आ०) 'ञमन्ताड्डः' (उ० १। ११४) इति ड-प्रत्ययः। 'नश्चापदान्तस्य झलि' (पा० अ० ८। ३। २४) इति मकारस्य अनुस्वारः। अनुस्वारस्य 'अनुस्वारस्य ययि परसवर्णः' (पा० अ० ८। ४। ५८) इति परसवर्णः णकारः। 'करण्डो मधुकोशासि-कारण्डवदलाढके' इति मेदिनी।

कररुहः पुं०। इत्यत्र '**देवासुरात्म-स्वर्ग-गिरि-समुद्र०**' (लि० सू० ४३) **इति पुँल्लिङ्गता।** करे हस्ते रोहति उत्पद्यते इति कररुहः। कर + रुह बीजजन्मनि प्रादुर्भावे च (भ्वा० प०) 'इगुपधज्ञाप्रीकिरः कः' (पा० अ० ३। १। १३५) इति क-प्रत्ययः। ककारानुबन्धलोपः। कित्त्वात् 'क्ङिति च' (पा० अ० १। १। ५) इति निषेधात् 'पुगन्तलघूपधस्य च' (पा० अ० ७। ३। ८६) इति धातोः उपधायाः उकारस्य प्राप्तः ओ-गुणः न भवति। 'पुनर्भवः कररुहो नखोऽस्त्री नखरोऽस्त्रियाम्' इत्यमरः।

करवालः पुं०। इत्यत्र '**देवासुरात्म-स्वर्ग-गिरि०**' (लि० सू० ४३) **इति पुँल्लिङ्गता।** वलः एव वालः चालनम्। करेण वालः यस्य सः करवालः खड्ग इति तदर्थः।

कराटम् नपुं०। इत्यत्र '**किरीट-मुकुट०**' (लि० सू० ६५) **इति नपुंसकलिङ्गता।** कः इति आ - समन्तात् रटति इति कराटम्। क + आ + रट + शब्दे (भ्वा० प०)

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by S3 Foundation USA

'नन्दि-ग्रहि-पचादिभ्यो०' (पा० अ० ३।१।१३४) इति अच्-प्रत्ययः। चकारानुबन्ध-लोपः। 'अकः सवर्णे दीर्घः' (पा० अ० ६।१।१०१) इति अकारस्य आकारस्य च आ-दीर्घः। अथवा कराभ्याम् अटति इति कराटम्। कर + अट गतौ (भ्वा० प०) पूर्ववत् अच्-प्रत्ययः। चकारानुबन्धलोपः। अकारस्य अकारस्य च आ-दीर्घः।

करीषम्, करीषः नपुं०, पुं०। इत्यत्र **'यूष-करीष-मिष-विष-वर्षाणि नपुंसके च' (लि० सू० ९५) इति नपुंसकलिङ्गता पुँल्लिङ्गता च।** कीर्यते विक्षिप्यते यः सः करीषः। कृ विक्षेपे (तु० प०) 'कृ-तृभ्यामीषन्' (उ० ४। २७) इति ईषन्-प्रत्ययः। नकारानुबन्धलोपः। 'उरण् रपरः' (पा० अ० १।१।५१) इति सहकारेण धातोः ॠकारस्य 'सार्वधातुकार्धधातुकयोः' (पा० अ० ७।३।८४) इति अर्-गुणः। 'तत्तु शुष्कं करीषोऽस्त्री' इत्यमरः। 'करीषोऽस्त्री शुष्कगोमये' इति सिद्धान्तकौमुद्याम् उणादौ।

कर्कटरज्जुना, कर्कटरज्ज्वा पुं०, स्त्री०। इत्यत्र **'समासे रज्जुः पुंसि च' (लि० सू० ५३) इति रज्जु-शब्दस्य समासे सत्त्वात् पुँल्लिङ्गता स्त्रीलिङ्गता च।** इह रज्जुना इति पुँल्लिङ्गे तृतीयैकवचने रूपम्। रज्ज्वा इति च स्त्रीलिङ्गे तृतीयैकवचने रूपम्। समास-रहितः केवलम् एकलः रज्जुशब्दस्तु **'धेनु-रज्जु-कुहू-तनु-रेणु-प्रियङ्गवः स्त्रियाम्' (लि० सू० ५२)** इति विधानात् स्त्रीलिङ्गः एव। सृज्यते इति रज्जुः। सृज विसर्गे (तु० प०) 'सृजेरसुम् च' (उ० १।१५) इति उ-प्रत्ययः, असुमागमः, धातोः आदेः सकारस्य लोपश्च। ॠ असुम्ज् उ इत्यवस्थायाम् 'इकोयणचि' (पा० अ० ६।१।७७) इति ॠकारस्य र्-यणादेशः। असुम्-आगमे उकार-मकारानुबन्धलोपः। 'स्तोः श्चुना श्चुः' (पा० अ० ८।४।४०) इति सस्य शः। 'झलां जश् झशि' (पा० अ० ८।४।५३) इति शस्य जः। 'शुल्वं वराटकः स्त्री तु रज्जुः स्त्रिषु वटीगुणः' इत्यमरः। 'रज्जुर्वेण्यां गुणेऽपि च' इति मेदिनी। 'रज्जुर्वेण्यां गुणे स्मृता' इति विश्वः। 'अथाप्याद्यन्त-विपर्ययो भवति' (निरु० २।२)। 'वरुण्या रज्जुः' (शत० ब्रा० १।३।१।१४)। 'वरुण्या वा एषा यद् रज्जुः' (शत० ब्रा० ३।२।४।१८)। 'वरुण्या वै यज्ञे रज्जुः' (शत० ब्रा० ६।४।३।८)।

कर्कन्धुः स्त्री०, पुं०। इत्यत्र **'मृत्यु-सीधु-कर्कन्धु-किष्कु-कण्डु-रेणवः' (लि० सू० १७३) इति स्त्रीलिङ्गता पुँल्लिङ्गता च।** अम्यते इति अन्धुः। अम गत्यादिषु (भ्वा० प०) 'अर्जि-दृशि-कम्यमि-पंसि-बाधा-मृजि-पशि-तुग्-धुग्-दीर्घ-हकाराश्च' (उ० १। २७) इति कु-प्रत्ययः धातोः धुगागमश्च। कु-प्रत्यये ककारानुबन्धलोपः। धुगागमे उकार-ककारानुबन्धलोपः। 'नश्चापदान्तस्य झलि' (पा० अ० ८।३।२४)

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by S3 Foundation USA

इति धातोः मकारस्य अनुस्वारः। 'अनुस्वारस्य ययि परसवर्णः' (पा० अ० ८। ४। ५८) इति अनुस्वारस्य परसवर्णः नकारः। **अथवा** अन्धयति इति अन्धुः कूपो वा। अन्ध दृष्ट्युपघाते (चु० प०) 'मृगय्वादयश्च' (उ० १। ३७) इति कु-प्रत्ययः। ककारानुबन्धलोपः। पुनः कर्काणाम् अन्धुः इति कर्कन्धुः। कर्क + अन्धुः इत्यत्र 'शकन्ध्वादिषु पररूपं वाच्यम्' (वा० पा० अ० ६। १। ९४) इति कर्क इत्यंस्य कंकारोत्तर-वर्त्तिनः अकारस्य पररूपम्। **अन्धूः यदि दीर्घान्तः** तदा तु कर्कं कण्टकं दधाति धारयति इति कर्कन्धूः। कर्क + डुधाञ् धारण-पोषणयोः (जु० उ०) 'अन्दू-दृन्भू-जम्बू-कफेलू-कर्कन्धू-दिधिषूः' (उ० १। १३) इति कू-प्रत्ययः। उपपदस्य नुम्-आगमश्च। कू-प्रत्यये ककारानुबन्धलोपः। नुम्-आगमे उकार-मकारानुबन्धलोपः। कित्त्वात् 'आतोलोप इटि च' (पा० अ० ६। ४। ६४) इति धातोः आकारस्य लोपः। **अथवा** अन्धयति इति अन्धूः। अन्ध दृष्ट्युपघाते उणादीनां बाहुलकत्वात् 'कृषि-चमि-तनि-धनि-खर्जिभ्यः ऊः स्त्रियाम्' (उ० १। ८०) इति ऊ-प्रत्ययः। पुनः कर्काणाम् अन्धूः इति कर्कन्धूः पूर्ववत् 'शकन्ध्वादिषु पररूपं वाच्यम्' (वा० पा० अ० ६। १। ९४) इति कर्क इत्यस्य कंकारोत्तर-वर्त्तिनः अकारस्य पररूपम्। 'कर्कन्धूर्बदरी कोली' इत्यमरः। 'यत्स्नेहस्तत् कर्कन्धु' (शत० ब्रा० १२। ७। १। ४)।

कर्दमः पुं०। इत्यत्र 'देवासुरात्म-स्वर्ग-गिरि०' (**लि० सू० ४३**) **इति पुँल्लिङ्गता।** कर्दति कौक्षं कुक्षौ भषं कुत्सितं शब्दं करोति इति कर्दमः। कर्द कुत्सिते शब्दे (भ्वा० प०) 'कलि-कर्द्योः रमः' (उ० ४। ८५) इति अम-प्रत्ययः। 'पङ्कोऽस्त्री शाल-कर्दमौ' इत्यमरः।

कर्पटम्, कर्पटः नपुं०, पुं०। इत्यत्र **'कुट-कूट-कपट-कवाट-कर्पट-नट-निकट-कीट-कटानि नपुंसके च' (लि० सू० ६६) इति नपुंसकलिङ्गता पुँल्लिङ्गता च।** करोति विदधाति, कृणाति हिनस्ति, किरति क्षिपति वा इति कर्। डुकृञ् करणे (त० उ०), कृञ् हिंसायां (क्र्या० उ०) कॄ-विक्षेपे (तु० प०) 'अन्येभ्योऽपि दृश्यन्ते' (पा० अ० ३। २। ७५) इति विच्-प्रत्ययः। 'उरण् रपरः' (पा० अ० १। १। ५१) इति सहकारेण 'सार्वधातुकार्धधातुकयोः' (पा० अ० ७। ३। ८४) इति धातोः ऋकारस्य ॠकारस्य च अर्-गुणः। विच्-प्रत्ययस्य सर्वापहारी लोपः। एवं कर्-शब्दः निष्पद्यते। ततः पटति गच्छति इटि पटः। पट गतौ (भ्वा० प०) 'नन्दि-ग्रहि-पचादिभ्यो०' (पा० अ० ३। १। १३४) इति अच्-प्रत्ययः। चकारानुबन्धलोपः। अथवा पटनं पटः। उक्त-पट्धातोः 'पुंसि संज्ञायां घः प्रायेण' (पा० अ० ३। ३। ११८) इति घ-प्रत्ययः। घकारानुबन्धलोपः। एवम् अपि पट-शब्दः निष्पद्यते। पुनः कर् चासौ पटः इति कर्पटः। कर्-पट-शब्दयोः समासेन 'कर्पट'-व्युत्पत्तिः। **अथवा** विच्-प्रत्ययान्तस्य कर्-शब्दस्य

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by S3 Foundation USA

षष्ठ्येकवचने निष्पन्नस्य करः अर्थात् करस्य पटः एवं षष्ठी-तत्पुरुषसमासेन अपि 'कर्पटः' शब्दः व्युत्पन्नः भवति। 'समौ नक्तक-कर्पटौ' इत्यमरः।

कल्कः पुं०। इत्यत्र **'कोपधः' (लि० सू० ६१) इति पुँल्लिङ्गता।** कलते शब्दयति संख्याति वा इति कल्कः, कल शब्द-संख्यानयोः (भ्वा० आ०)। कलति धारयति इति कल्कः। कल धारणे (काशकृत्स्न-धातुपाठे भ्वा० प०), कलयति क्षिपति इति कल्कः कल क्षेपे (चु० उ०) **अथवा** कलयति गच्छति गणयति वा इति कल्कः **अथवा** कल्यते इति वा कल्कः। एवं कल गतौ संख्याने च (चु० उ०)। सर्वत्र कल-धातोः 'कृ-दाधा-राऽर्चि-कलिभ्यः कः' (उ० ३।४०) इति क-प्रत्ययः। बाहुलकात् ककारस्य 'लशक्वतद्धिते' (पा० अ० १।३।८) इति इत्संज्ञा न। इत्संज्ञाभावात् 'तस्य लोपः' (पा० अ० १।३।९) इति ककारस्य लोपः अपि न। 'कल्कोऽस्त्री शमलैनसोः। दम्भेऽपि' इत्यमरः। 'त्रिषु पापाशये कल्कोऽस्त्री विट्-किट्टेभदन्तयोः' इति विश्वः। 'कल्कोऽस्त्री घृततैलादिशेषे दम्भे विभीतके। विट्-किट्टयोश्च पापे च त्रिषु पापाशये पुनः' इति मेदिनी। 'कल्कः पापाशये पापे दम्भे विट्किट्टयोरपि' इति सिद्धान्तकौमुद्याम् उणादौ।

कलत्रम् नपुं०। इत्यत्र **'द्वाराग्र-स्फार-तक्र-वक्र-वप्र०' (लि० सू० ९०) इति नपुंसकलिङ्गता।** गडति सिञ्चति सिच्यते वा यत् तत् कलत्रम्। गड सेचने (भ्वा० प०) 'गडेरादेश्च कः' (उ० ३।१०६) इति अत्रन्-प्रत्ययः, धातोः आदेः गकारस्य ककारादेशः च। नकारानुबन्धलोपः। ड-लयोरेकत्व-स्मरणात् कलत्रं निष्पद्यते। **अथवा** कलं सुन्दरम् अव्यक्तमधुरध्वनिं वा त्रायते रक्षति स्वस्मिन् इति कलत्रम्। कल + त्रैङ् पालने (भ्वा० प०) 'आदेच उपदेशेऽशिति' (पा० अ० ६।१।४५) इति धातोः ऐकारस्य आकारदेशः। 'आतोऽनुपसर्गे कः' (पा० अ० ३।२।३) इति क-प्रत्ययः। ककारानुबन्धलोपः। 'आतो लोप इटि च' (पा० अ० ६।४।६४) इति धातोः आकारस्य लोपः। **अथवा** कडति माद्यति मदयति वा इति कडत्रम्। कड मदे (भ्वा० प०, तु० प०) 'अमि-नक्षि-यजि-वधि-पतिभ्योऽत्रन्' (उ० ३।१०५) इति बाहुलकात् अत्रन् प्रत्ययः। नकारानुबन्धलोपः। डलयोरभेदात् कलत्रम् अपि। **अथवा** कलते शब्दयति गणयति, कलति धारयति, कलयति क्षिपति, कलयति गच्छति गणयति वा इति कलत्रम्। कल शब्द-संख्यानयोः (भ्वा० आ०), कल धारणे (काशकृत्स्नधातुपाठे भ्वा० प०), कल क्षेपे (चु० उ०), कल गतौ संख्याने च (चु० उ०) सर्वत्र 'अमि-नक्षि-यजि-वधि-पतिभ्योऽत्रन्' (उ० ३।१०५) इति बाहुलकात् अत्रन्-प्रत्ययः। नकारानुबन्धलोपः। 'कलत्रं श्रोणिभार्ययोः' इत्यमरः। 'दुर्गस्थाने नृपादीनां कलत्रं श्रोणिभार्ययोः' इति रभसः। 'कलत्रं श्रोणौ भार्यायां दुर्गस्थाने च भूभुजाम्' इति हैमः।

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by S3 Foundation USA

कल्माषम् नपुं०। इत्यत्र 'शिरीषर्जीषाम्बरीष-पीयूष०' (लि० सू० ९४) इति नपुंसकलिङ्गता। कलति धारयति इति कल् धर्मः। कल धारणे (काशकृत्स्नधातुपाठे भ्वा० प०) 'अन्येभ्योऽपि दृश्यन्ते' (पा० अ० ३। २। ७५) इति विच्-प्रत्ययः। तस्य सर्वापहारिलोपः। एवं कल् व्युत्पद्यते। माषयति अभिभवति वर्णान् धर्मं वा इति माषः। मष हिंसार्थः (भ्वा० प०) 'हन्त्यर्थाश्च' (ग० सू० २००) इति नवगण्यामुक्तानां हन्त्यर्थानां धातूनाम् अपि स्वार्थे णिच्-प्रत्ययविधानात् इह णिच्प्रत्ययः। णकार-चकारानुबन्धलोपः। 'अत उपधायाः' (पा० अ० ७। २। ११६) इति धातोः उपधायाः अकारस्य आ-वृद्धिः। 'नन्दि-ग्रहि०' (पा० अ० ३। १। १३४) इति अच्-प्रत्ययः। चकारानुबन्धलोप। 'बहुल-मन्यत्रापि संज्ञाछन्दसोः' (उ० २। २३) इति णिचः इकारस्य लोपः। कल् चासौ माषश्च अथवा कलः माषः इति कल्माषः। 'चित्रं किर्मीर-कल्माषशबलैताश्च कर्बुरे' इत्यमरः। 'कल्माषो राक्षसे कृष्णे शबलेऽपि' इति हैमः। 'कल्माषः कर्बुरे कृष्णे' इति रभसः।

कवचम् नपुं०। इत्यत्र 'द्वन्द्व-बर्ह-दुःख-बडिश-पिच्छ-बिम्ब-कुटुम्ब-कवच०' (लि० सू० १६९) इति नपुंसकलिङ्गता। कौति कवते कुवते शब्दयति वा इति कवचम्। कु शब्दे (अ० प०), कुङ् शब्दे (भ्वा० आ०, तु० आ०) 'ऋ-तन्यञ्जि-वन्यञ्ज्यर्पि-मद्यत्यङ्गि कु-यु-कृशिभ्यः कत्निज्यतुजलिजिष्णुजिष्ठजिसन्स्यनिथिन्नुल्य-सासानुकः' (उ० ४। २) सूत्रेऽस्मिन् सासानुकः इत्यस्य स्थाने चासानुक इति पाठभेदात् अत्र अनेन सूत्रेण अच-प्रत्ययः। 'सार्वधातुकार्धधातुकयोः' (पा० अ० ७। ३। ८४) इति धातोः उकारस्य ओ-गुणः। 'एचोऽयवायावः' (पा० अ० ६। १। ७८) इति ओकारस्य अव्-आदेशः। अथवा कं वातं वञ्चति गच्छति वञ्चयते प्रलम्भयति व इति कवचम्। गमनार्थक-वञ्च धातुः अन्तर्भावितण्यर्थो वा। क + वञ्च गतौ (भ्वा० प०), क + वञ्च प्रलम्भने (चु० आ०) 'क-प्रकरणे मूलविभुजादिभ्य उपसंख्यानम्' (वा० पा० अ० ३। २। ५) इति क-प्रत्ययः। ककारानुबन्धलोपः। कित्त्वात् 'अनिदितां हल उपधायाः क्ङिति' (पा० अ० ६। ४। २४) इति धातोर्नकारलोपः। 'उरश्छदः कङ्कटको जगरः कवचोऽस्त्रियाम्' इत्यमरः। 'कवचो गर्दभाण्डे च संनाहे पटहेऽपि च' इति विश्वः। 'कवचं कु + अञ्चितं भवति काञ्चितं भवति कायेऽञ्चितं भवति वा' (निरु० ५। २६)।

कवाटम्, कवाटः नपुं०, पुं०। इत्यत्र 'कुट-कूट-कपट-कवाट-कर्पट-नट-निकट-कीट-कटानि नपुंसके च' (लि० सू० ६६) इति नपुंसकलिङ्गता पुँल्लिङ्गता च। कं वातं वटति इति कवाटम्। क+ वट वेष्टने (भ्वा० प०) 'कर्मण्यण्' (पा० अ० ३। २। १) इति अण्-प्रत्ययः। णकारानुबन्धलोपः। 'अत उपधायाः' (पा० अ० ७। २।

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by S3 Foundation USA

११६) इति धातोः उपधायाः अकारस्य आ-वृद्धिः। अथवा कवः शब्दः तं शब्दम् अटति गच्छति प्राप्नोति इति कवाटम्। कुङ् शब्दे (तु० आ०) 'ऋदोरप्' (पा० अ० ३। ३। ५७) इति अप्-प्रत्ययः। पकारानुबन्धलोपः। 'सार्वधातुकार्धधातुकयोः' (पा० अ० ७। ३। ८४) इति धातोः उकारस्य ओ-गुणः। 'एचोऽयवायावः' (पा० अ० ६। १। ७८) इति ओकारस्य अव्-आदेशः। एवं 'कव' शब्दः निष्पद्यते। कव + अट् गतौ (भ्वा० प०) पूर्ववत् 'कर्मण्यण्' (पा० अ० ३। २। १) इति अण्-प्रत्ययः। नकारानुबन्धलोपः। 'अत उपधायाः' (पा० अ० ७। २। ११६) इति धातोः उपधायाः अकारस्य आ-वृद्धिः। ततः कव + आट इति स्थितौ 'अकः सवर्णे दीर्घः' (पा० अ० ६। १। १०१) इति अकारस्य आकारस्य च आ-दीर्घादेशः। 'कपाटमररं तुल्ये' इत्यमरः। 'कपाटश्च कवाटश्च त्रिपु स्यादररं न ना' इति वाचस्पतिः।

कविः पुं०। इत्यत्र **'ऋषि-राशि-दृति-ग्रन्थि-क्रिमि-ध्वनि-बलि-चौलि-कौलि-मौलि-रवि-कवि-कपि-मुनयः' (लि० सू० १०९) इति पुँल्लिङ्गता**। कौति कवते कुवते शब्दयते उपदिशति वा इति कविः। कु शब्दे (अ० प०) कुङ् शब्दे (भ्वा० आ०, तु० आ०) 'अच इः' (उ० ४। १४०) इति इ-प्रत्ययः। 'सार्वधातुकार्धधातुकयोः' (पा० अ० ७। ३। ८४) इति धातोः उकारस्य ओ-गुणः। 'एचोऽयवायावः' (पा० अ० ६। १। ७८) इति ओकारस्य अव्-आदेशः। 'शुक्रो दैत्यगुरुः काव्य उशना भार्गवः कविः' तथा 'धीरो मनीषी ज्ञः प्राज्ञः संख्यावान् पण्डितः कविः' इत्यमरः। 'कविर्वाल्मीकिकाव्ययोः। सूरौ काव्यकरे पुंसि स्यात् खलीने तु योषिति' इति मेदिनी। 'कविर्मेधाविनाम' (निघं० ३। १५)। 'कविः क्रान्तदर्शनो भवति, कवतेर्वा (निरु० १२। १३)। 'एते वै कवयो यद् ऋषयः' (शत० ब्रा० १। ४। २। ८)। 'शुश्रूवांसो वै कवयः' (तैत्ति० ब्रा० ३। २। २। ३)। 'ये विद्वांसस्ते कवयः' (ऐत० ब्रा० ६। २०)। 'असौ वाऽदित्यः कविः' (शत० ब्रा० ६। ७। २। ४)। 'ये वा अनूचानास्ते कवयः' (ऐत० ब्रा० २। २)।

कव्यम् नपुं०। इत्यत्र **'धान्याज्यसस्य-रूप्य-पण्य०' (लि० सू० १६८) इति नपुंसकलिङ्गता**। कूयते शब्द्यते पितृभ्यः यत् तत् कव्यम्। कु शब्दे (अ० प०), कुङ् शब्दे (भ्वा० आ० तथा तु० आ०) 'अचो यत्' (पा० अ० ३। १। ९७) इति यत्-प्रत्ययः। तकारानुबन्धलोपः। 'सार्वधातुकार्धधातुकयोः' (पा० अ० ७। ३। ८४) इति धातोः उकारस्य ओ-गुणः। 'वान्तो यि प्रत्यये' (पा० अ० ६। १। ७९) इति ओकारस्य अव्-आदेशः। 'हव्य-कव्ये दैवपैत्रे अन्ने' इत्यमरः।

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by S3 Foundation USA

कषायम्, कषायः नपुं०, नु०। इत्यत्र '**गोमय-कषाय-मलयान्वयाव्ययानि नपुंसके च' (लि० सू० ८८) इति नपुंसकलिङ्गता पुँल्लिङ्गता च।** कषति हिनस्ति इति कषः। अयते गच्छति इति अयः। उभयत्र कष हिंसायां (भ्वा० प०), अय गतौ (भ्वा० आ०) 'नन्दि-ग्रहि-पचादिभ्यो०' (पा० अ० ३। १। १३४) इति अच्-प्रत्ययः। चकारानुबन्धलोपः। कषश्चासौ अयश्च इति कषायः। कष + अय इत्यत्र 'अकः सवर्णे दीर्घः' (पा० ६। १। १०१) इति अकारस्य अकारस्य च आ-दीर्घः। **अथवा** कषणं कषः हिंसा, कषम् अयते गच्छति करोति इति कषायः। कष + अय् गतौ (भ्वा० आ०) 'कर्मण्यण्' (पा० अ० ३। २। १) इति अण्-प्रत्ययः। णकारानुबन्धलोपः। 'अत उपधायाः' (पा० अ० ७। २। ११६) इति धातोः उपधायाः अकारस्य आ-वृद्धिः। कष + आय इति स्थितौ 'अकः सवर्णे दीर्घः' (पा० अ० ६। १। १०१) इति अकारस्य आकारस्य च आ-दीर्घः। **अथवा** कषा हिंसा तां याति गच्छति करोति इति कषायः। कषा + या गति-प्रापणयोः (अ० प०) 'आतोऽनुपसर्गे कः' (पा० आ० ३। २। ३) इति क-प्रत्ययः। ककारानुबन्धलोपः। 'आतो लोप इटि च' (पा० अ० ६। ४। ६४) इति धातोः आकारस्य लोपः। 'तुवरस्तु कषायोऽस्त्री' तथा 'निर्यासेऽपि कषायोऽस्त्री' इत्यमरः। 'कषायो रसभेदे स्यादङ्गरागे' विलेपने। 'निर्यासे च कषायोऽथ सुरभौ लोहितेऽन्यवत्' इति विश्वः। 'नापि कषाय-स्तुवरः' इति बोपालितः। 'कषायः सुरभौ रसे रागवस्तुनि निर्यासे क्रोधादिषु विलेपने' इति हैमः। 'पुंसि कषायस्तुवरम्' इति क्लीबकाण्डे रत्नकोषः।

कशेरु नपुं०। इत्यत्र '**दारु-कशेरु-जतु-वस्तु-मस्तूनि नपुंसके' (लि० सू० ५८) इति नपुंसकलिङ्गता।** कं सुखं जलं मूर्धानं वा शृणाति हिनस्ति इति कशेरु तृणकन्दं वा। क पूर्वकात् शॄ हिंसायां (क्र्या० प०) 'के श्र एरङ् चास्य' (उ० १। ८८) इति ऊ-प्रत्ययः धातोः ऋकारस्य एरङ् आदेशः, बाहुलकात् प्रत्ययस्य ऊकारस्य उकारः ह्रस्वः च। एरङ् अस्मिन् आदेशे अकार-ङकारानुबन्धलोपः। 'कशेरूस्तृणकन्दे स्त्री' इति सिद्धान्तकौमुदी। कशेरू शब्दः दीर्घोकारान्तः अपि। तत्र पूर्वं व्याख्यात-कशेरुशब्दात् स्त्रियाम् 'अप्राणिजातेश्चारज्जादीनामिति वक्तव्यम्' (वा० पा० अ० ४। १। ६६) इति ऊङ्-प्रत्ययः। ङकारानुबन्धलोपः। 'अकः सवर्णे दीर्घः' (पा० अ० ६। १। १०१) इति उकारस्य ऊकारस्य च ऊ-सवर्णदीर्घः। **अथवा** कशेरु-शब्द-व्युत्पादने बाहुलकात् प्रत्ययस्य ऊकारस्य यत् ह्रस्वत्वं विधीयते, तदेव न विधेयम्। अनेन कशेरूः स्वयमेव व्युत्पद्यते। पुनः 'अप्राणिजातेश्चारज्वादीनामिति वक्तव्यम्' (वा० पा० अ० ४। १। ६६) इति ऊङ्-प्रत्यय-विधानस्य आवश्यकता एव न भवति। अयं दीर्घोकारान्तः कशेरू-शब्दः स्त्रीलिङ्गे अपि।

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by S3 Foundation USA

कंसम्, कंसः नपुं०, पुं०। इत्यत्र **'कंसं चाप्राणिनि' (लि० सू० ९९) इति अप्राणिनि नपुंसकलिङ्गता।** यथा कंसं पानभाजनम्। प्राणी तु कंसः नाम राजा। कंस्ते गच्छति शास्ति वा इति कंसः। कसि गति-शासनयोः धातोः इदित्त्वात् 'इदितो नुम् धातोः' (पा० अ० ७।१।५८) इति नुम्-आगमः। उकार-मकारानुबन्धलोपः। 'नश्चापदान्तस्य झलि' (पा० अ० ८।३।२४) इति नकारस्य अनुस्वारः। 'नन्दिग्रहिपचादिभ्यो०' (पा० अ० ३। १। १३४) इति अच्-प्रत्ययः। चकारानुबन्धलोपः। अथवा कामयते अन्यवस्तु इति कंसः। काम्यते वा यत्तत् कंसम्। कमु कान्तौ (भ्वा० आ०) 'वृ-तृ-वदि-वचि-वसि-हनि-कमि-कषिभ्यः सः' (उ० ३।६२) इति स-प्रत्ययः। 'नश्चापदान्तस्य झलि' (पा० अ० ८। ३। २४) इति धातु-मकारस्य अनुस्वारः। 'कंसोऽस्त्री पान-भाजनम्' इत्यमरः। 'कंसो दैत्यान्तरे स्मृतः। कांस्ये च कांस्यपात्रे च मानभेदे च कीर्त्तितः' इति विश्वः।

काण्डम्, काण्डः नपुं०, पुं०। इत्यत्र **'बाण-काण्डौ नपुंसके च' (लि० सू० ४७) इति नपुंसकलिङ्गता पुँल्लिङ्गता च।** काम्यते इति काण्डं काण्डः वा। कमु कान्तौ (भ्वा० आ०) 'क्वादिभ्यः कित्' (उ० १। ११५) इति ड-प्रत्ययः स च कित्। कित्त्वात् 'अनुनासिकस्य क्वि-झलोः क्ङिति' (वा० अ० ६। ४। १५) इति धातोः उपधायाः अकारस्य आ-दीर्घः। 'नश्चापदान्तस्य झलि' (पा० अ० ८। ३। २४) इति मकारस्य अनुस्वारः। 'अनुस्वारस्य ययि परसवर्णः' (पा० अ० ८। ४। ५८) इति अनुस्वारस्य परसवर्णः णकारः। 'काण्डोऽस्त्री दण्डबाणार्ववर्गावसरवारिपु' इत्यमरः। 'काण्डं स्तम्बे तरुस्कन्धे बाणेऽवसरनीरयोः। कुत्सिते वृक्षभिन्नाडीवृन्दे रहसि न स्त्रियाम्' इति मेदिनी।

काननम् नपुं०। इत्यत्र **'जघनाजिन-तुहिन-कानन-वन०' (लि० सू० ७५) इति तथा 'मुख-नयन-लोह-वन-मांस-रुधिर-कार्मुक-विवर-जल-हल-धनान्नाभिधानानि' (लि० सू० १३७) इति नपुंसकलिङ्गता।** कननं कानः दीप्तिः। कनी दीप्तिकान्तिगतिपु (भ्वा० प०) 'भावे' (पा० अ० ३।३।१८) इति घञ्-प्रत्ययः। घकार-ञकारानुबन्धलोपः। 'अत उपधायाः' (पा० अ० ७। २। ११६) इति धातोः उपधायाः अकारस्य आ-वृद्धिः। कानं दीप्तिं नयति इति काननम्। कान + णीञ् प्रापणे (भ्वा० उ०) 'अन्येष्वपि दृश्यते' (पा० अ० ३। २। १०१) इति ड-प्रत्ययः। डकारानुबन्धलोपः। 'टेः' (पा० अ० ६। ४। १४३) इति धातोः टेः ईकारस्य लोपः। **अथवा** कं जलम् अननं जीवनं यस्य तत् क + अनन = काननम्। **अथवा** कनति

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by S3 Foundation USA

गच्छति इति कननम्। कनी दीप्तिकान्तिगतिषु (भ्वा० प०) 'चलन-शब्दार्थादकर्म-काद्युच्' (पा० अ० ३। २। १४८) इत्यनेन अथवा 'बहुलमन्यत्रापि' (उ० २। ७९) इत्यनेन युच्-प्रत्ययः। चकारानुबन्धलोपः। 'युवोरनाकौ' (पा० अ० ७। १। १) इति यु-स्थाने अनादेशः। एवं कनन-शब्दो निष्पद्यते। ततः कननम् एव काननम्। इत्यत्र कननशब्दात् 'प्रज्ञादिभ्यश्च' (पा० अ० ५। ४। ३८) इति अण्-प्रत्ययः, णकारानुबन्ध-लोपः। 'तद्धितेष्वचामादेः' (पा० अ० ७। २। ११७) इति ककारोत्तरवर्त्तिनः अकारस्य आ-वृद्धिः। 'यस्येति च' (पा० अ० ६। ४। १४८) इति नकारोत्तरवर्त्तिनः अकारस्य लोपः। एवमपि कानन-शब्दो व्युत्पद्यते। 'अटव्यरण्यं गहनं काननं वनम्' इत्यमरः। 'काननं तु ब्रह्मास्ये विपिने गृहे' इति हैमः।

कापेयम् नपुं०। इत्यत्र **'यद्यढग्यगञण्वुञ् छाश्च भावकर्मणि' (लि० सू० १२३ (क))** इति नपुंसकलिङ्गता। कपि-शब्दः पूर्वं व्याख्यातः। कपेः भावः कर्म वा कापेयम्। कपि-शब्दात् 'कपि-ज्ञात्योर्ढक्' (पा० अ० ५। १। १२७) इति ढक्-प्रत्ययः। ककारानुबन्धलोपः। 'आयनेयीनीयियः०' (पा० अ० ७। १। २) इति ढकारस्य एयादेशः। 'किति च' (पा० अ० ७। २। ११८) इति कपि-शब्दस्य अकारस्य आ-वृद्धिः। 'यस्येति च' (पा० अ० ६। ४। १४८) इति पकारपरवर्त्तिनः इकारस्य लोपः।

कार्पासम्, कार्पासः नपुं०, पुं०। इत्यत्र **'चमसांस-रस-निर्यासोपवास-कार्पास-वास-मास-कास-कांस-मांसानि नपुंसके च' (लि० सू० ९८)** इति नपुंसकलिङ्गता पुँल्लिङ्गता च। करोति विदधाति कृणोति हिनस्ति वा इति कर्पासः सस्यभेदो वा। डुकृञ् करणे (त० उ०) कृञ् हिंसायां (स्वा० उ०) 'कृञः पासः' (उ० ५। ४५) इति पास-प्रत्ययः। धातोः ऋकारस्य 'उरण् रपरः' (पा० अ० १। १। ५१) इति सहकारेण 'सार्वधातुकार्धधातुकयोः' (पा० अ० ७। ३। ८४) इति अर्-गुणः। एवं कर्पास-शब्दः निष्पद्यते। ततः कर्पासः एव कार्पासः। 'प्रज्ञादिभ्यश्च' (पा० अ० ५। ४। ३८) इति स्वार्थिकः अण्-प्रत्ययः। णकारानुबन्धलोपः। 'तद्धितेष्वचामादेः' (पा० अ० ७। २। ११७) इति ककारपरवर्त्तिनः अकारस्य आ-वृद्धिः। 'यस्येति च' (पा० अ० ६। ४। १४८) इति सकारोत्तरवर्त्तिनः अकारस्य लोपः। एवं कार्पासः व्युत्पद्यते। ततः स्त्रियां 'जातेरस्त्रीविषयादयोपधात्' (पा० अ० ४। १। ६३) इत्यनेन अथवा 'षिद्गौरादिभ्यश्च' (पा० अ० ४। १। ४१) इति ङीष्-प्रत्ययः। ङकार-षकारानु-बन्धलोपः। 'यस्येति च' (पा० अ० ६। ४। १४८) इति सकार-पर-वर्त्तिनः अकारस्यं लोपः। एवं कार्पासी-शब्दः व्युत्पद्यते। कर्पास-शब्दस्य तु स्त्रियां कर्पास-शब्दात् पूर्वोक्त-

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by S3 Foundation USA

रीत्या ङीष्-प्रत्ययेन तथा सकारोत्तर-वर्त्तिनः अकारस्य लोपेन कर्पासी एव व्युपन्नो भवति। एवं **कार्पास्याः अथवा** कर्पास्याः अवयवः विकारो वा अस्मिन्नर्थे कार्पासी-शब्दात् कर्पासी-शब्दात् च 'अवयवे च प्राण्योषधि-वृक्षेभ्यः' (पा० अ० ४।३।१३५) इति **अथवा** 'बिल्वादिभ्योऽण्' (पा० अ० ४।३।१३६) इति अण्-प्रत्ययः। णकारानुबन्धलोपः। णित्त्वात् 'तद्धितेष्वचामादेः' (पा० अ० ७।२।११७) इति कार्पासी-शब्दे ककार-परवर्त्तिनः आकारस्य, कर्पासी-शब्दे च ककार-परवर्त्तिनः अकारस्य आ-वृद्धिः। 'यस्येति च' (पा० अ० ६।४।१४८) इति सकार-परवर्त्तिनः ईकारस्य लोपः। तदित्थं **कार्पासः** व्युत्पद्यते। कार्पास्याः फलं कार्पासम् इत्यर्थे तु 'फले लुक्' (पा० अ० ४। ३। १६३) इति विकारावयवार्थयोः 'अवयवे च प्राण्योषधि-वृक्षेभ्यः' (पा० अ० ४। ३। १३५) अथवा 'बिल्वादिभ्यश्च' (पा० अ० ४। ३। १३६) इति विहितस्य अण्-प्रत्ययस्य एव लुक् अर्थात् लोपः भवति, तस्मिन् अण्-प्रत्यय-लुकि च जाते 'लुक् तद्धित-लुकि' (पा० अ० १। २। ४९) इति सकार-परवर्त्तिनः ङीष्-प्रत्ययस्य ईकारस्य अपि लुक् जायते। तस्मिन् ईकार-लुकि जाते तम् ईकारं निमित्तं कृत्वा कार्पास-शब्दे सकारोत्तर-वर्त्तिनः अकारस्य 'यस्येति च' (पा० अ० ६। ४। १४८) इति विधीयमानः **अथवा** विहितः लोपः अपि न भवति। तेन कार्पास्याः फलम् अपि **कार्पासम्** एव सिध्यति। 'फलं तु कार्पासं बादरं च तत्' इत्यमरः।

कार्मुकम् नपुं०। इत्यत्र **'मुख-नयन-लोह-वन-मांस-रुधिर०' (लि० सू० १३७) इति नपुंसकलिङ्गता।** यत् करोति यत् क्रियते वा तत् कर्म क्रिया वा। डुकृञ् करणे (त० उ०) 'सर्वधातुभ्यो मनिन्' (उ० ४। १४६) इति मनिन्-प्रत्ययः। इकार-नकारानुबन्धलोपः। 'सार्वधातुकार्धधातुकयोः' (पा० अ० ७।३।८४) इति धातोः ऋकारस्य 'उरण् रपरः' (पा० अ० १।१।५१) इति सहकारेण अर्-गुणः। एवं कर्मन् व्युत्पद्यते। ततः कर्मणे प्रभवति अस्मिन् अर्थे 'कर्मण उकञ्' (पा० अ० ५। १। १०३) इति उकञ्-प्रत्ययः। ञकारानुबन्धलोपः। 'तद्धितेष्व-चामदिः' (पा० अ० ७। २। ११७) इति ककारोत्तरवर्त्तिनः अकारस्य आ-वृद्धिः। 'नस्तद्धिते' (पा० अ० ६। ४। १४४) इति अन् इत्यस्य टेर्लोपः। 'धनुश्चापौ धन्वशरासन-कोदण्ड-कार्मुकम्' इत्यमरः। 'अथ कार्मुकः। वंशे कार्मुकमिष्वासे कर्मठे' इति हैमः।

कार्षापणम्, कार्षापणः नपुं०, पुं०। **इत्यत्र 'कार्षापण-स्वर्ण-सुवर्ण-व्रण-चरण-वृषण-विषाण-चूर्ण-तृणानि नपुंसके च' (लि० स० ६९) इति नपुंसक-**

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by S3 Foundation USA

लिङ्गता पुँल्लिङ्गता च। कर्षस्य अयम् इति कार्षः। कर्ष-शब्दात् 'तस्येदम्' (पा० अ० ४। ३। १२०) इति अण्-प्रत्ययः। णकारानुबन्धलोपः। 'तद्धितेष्वचामादेः' (पा० अ० ७।२।११७) इति ककारोत्तर-वर्त्तिनः अकारस्य आ-वृद्धिः। 'यस्येति च' (पा० अ० ६। ४। १४८) इति षकारोत्तर-वर्त्तिनः अकारस्य लोपः। एवं कार्ष-शब्दः व्युत्पद्यते। आपणनम् आपणः। आ + पण व्यवहारे स्तुतौ च (भ्वा० आ०) 'नित्यं पणः परिमाणे' (पा० अ० ३। ३। ६६) इति अप्-प्रत्ययः, अथवा 'खनो घ च' (पा० अ० ३। ३। १२५) इत्यत्र धित्करणम् अन्यतोऽपि ज्ञापनार्थम्, तेन अत्र अपि पण् धातोः घ-प्रत्ययः। अप्-प्रत्यये पकारानुबन्धलोपः, घ-प्रत्यये च घकारानुबन्धलोपः। एवम् आपणः निष्पद्यते। ततः कार्षस्य कार्षेण वा आपणः कार्ष + आपणः = कार्षापणः सिद्ध्यति। 'कार्षापणः कार्षिकः स्यात्' इत्यमरः। 'कार्षापणोऽस्त्री कार्षिके पणषोडषकेऽपि च' इति मेदिनी।

काव्यम् नपुं०। इत्यत्र **'धान्याज्य-सस्य-रूप्य-पण्य-वर्ण्य०' (लि० सू० १६८) इति नपुंसकलिङ्गता।** कोतुं शब्दयितुम् अवश्यम् आख्यातुम् अर्हम् इति काव्यम्। कुङ् शब्दे (भ्वा० आ०) 'ओरावश्यके' (पा० अ० ३। १। १२५) इति ण्यत्-प्रत्ययः। णकार-तकारानुबन्धलोपः। णित्त्वात् 'अचो ञ्णिति' (पा० अ० ७। २। ११५) इति धातोः उकारस्य औ-वृद्धिः। 'वान्तो यि प्रत्यये' (पा० अ० ६। १। ७९) इति औकारस्य आव्-आदेशः। कवते कुवते कौति वा इति कविः। कुङ् शब्दे (भ्वा० आ०), कुङ् शब्दे (तु० आ०), कु शब्दे (अ० प०) 'अच इः' (उ० ४। १४०) इति इ-प्रत्ययः। धातोः उकारस्य 'सार्वधातुकार्धधातुकयोः' (पा० अ० ७। ३। ८४) इति ओ-गुणः। 'एचोऽयवायावः' (पा० अ० ६। १। ७८) इति ओकारस्य अव्-आदेशः। एवं कविः निष्पद्यते। पुनः कवेः भावः कर्म वा इति काव्यम्। कवि-शब्दात् 'गुण-वचन-ब्राह्मणादिभ्यः कर्मणि च' (पा० अ० ५। १। १२४) इति ष्यञ्-प्रत्ययः। षकार-ञकारानुबन्धलोपः। 'तद्धितेष्वचामादेः' (पा० अ० ७। २। ११७) इति ककारपरवर्त्तिनः अकारस्य आ-वृद्धिः। 'यस्येति च' (पा० अ० ६। ४। १४८) इति वकार-परवर्त्तिनः इकारस्य लोपः। एवम् अपि काव्य-शब्दः निष्पद्यते। 'शुक्रो दैत्यगुरुः काव्य उशना भार्गवः कविः' इत्यमरः। 'काव्यं ग्रन्थे पुमान् शुक्रे काव्या स्यात् पूतनाधियोः' इति मेदिनी। 'त्रयी वै विद्या काव्यं छन्दः' (शत० ब्रा० ८। ५। २। ४)। 'ऊमा वै पितरः प्रातःसवने ऊर्वा माध्यन्दिने काव्यास्तृतीयसवने' (ऐत० ब्रा० ७। ३४)

काशः, काशम् पुं० नं०। इत्यत्र **'दण्ड-मण्ड-खण्ड-शव-सैन्धव-पार्श्वाकाश-कुश-काशाङ्कुश-कुलिशाः' (लि० सू० १८१) इति पुँल्लिङ्गता नपुंसकलिङ्गता च।** काशते दीव्यति इति काशः। काश दीप्तौ (भ्वा० प०) 'नन्दि-ग्रहि-पचादिभ्यो०'

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by S3 Foundation USA

(पा० अ० ३। १। ३४) इति अच्-प्रत्ययः। चकारानुबन्धलोपः। 'काशस्तृणे रोगभेदे' इति हैमः।

काश्मीरम् नपुं०। इत्यत्र **'द्वाराग्र-स्फार-तक्र-वक्र-वप्र०' (लि० सू० ९०) इति नपुंसकलिङ्गता।** कष्टे गच्छति शास्ति वा इति कश्मीरः देशविशेषो वा। कश गति-शासनयोः (अ० आ०) 'कशेर्मुट् च' (उ० ४। ३३) इति ईरन्-प्रत्ययः तस्य मुडागमश्च। ईरन्-प्रत्यये नकारानुबन्धलोपः, मुडागमे च उकार-टकारानुबन्धलोपः। एवं कश्मीर-शब्दः निष्पद्यते। कश्मीर एव काश्मीरः। कश्मीर-शब्दात् 'प्रज्ञादिभ्यश्च' (पा० अ० ५। ४। ३८) इति अण्-प्रत्ययः। णकारानुबन्धलोपः। 'तद्धितेष्वचामादेः' (पा० अ० ७। २। ११७) इति ककार-परवर्त्तिनः अकारस्य आ-वृद्धिः। 'यस्येति च' (पा० अ० ६। ४। १४८) इति रकारोत्तर-वर्त्तिनः अकारस्य लोपः। **अथवा** कश्मीरे जातम् इति कश्मीर-शब्दात् 'तत्र जातः' (पा० अ० ४। ३। २५) इति अण्-प्रत्ययः। शेष-कार्ये पूर्ववत् कृते काश्मीरं व्युत्पद्यते। कश्मीरस्य इदम् अपि काश्मीरम् एव भवति। तत्र कश्मीर-शब्दात् अण्- प्रत्ययः 'तस्येदम्' (पा० अ० ४। ३। १२०) इत्यनेन जायते। शेषकार्यं तु पूर्ववत् कर्त्तव्यम् एव।

काष्ठम् नपुं०। इत्यत्र **'काष्ठ-पृष्ठ-सिक्थोक्थानि नपुंसके' (लि० सू० ७१) इति नपुंसकलिङ्गता भवति।** काशते काश्यते वा दीप्यते इति काष्ठम्। काशृ दीप्तौ (भ्वा० आ०) तथा काशृ दीप्तौ (दि० आ०) 'हनि-कुपि-नी-रमि-काशिभ्यः क्थन्' (उ० २। २) इति क्थन्-प्रत्ययः। ककार-नकारानुबन्धलोपः। 'व्रश्च-भ्रस्ज-सृज-मृज-यज-राज-भ्राच्छशां षः' (पा० अ० ८। २। ३६) इति शस्य षः। 'ष्टुना ष्टुः' (पा० अ० ८। ४। ४१) इति थकारस्य ठकारः। 'काष्ठं दार्विन्धनं त्वेधः' इत्यमरः। 'काष्ठं दारुणि' इति हैमः। 'काष्ठमाख्यातमिन्द्रिये' इति विश्वः।

काष्ठा स्त्री०। **इत्यत्र 'काष्ठा दिगर्था स्त्रियाम्' (लि० सू० ७२) इति स्त्रीलिङ्गता।** काष्ठ-शब्दः पूर्वं व्याख्यातः। ततः स्त्रियाम् 'अजाद्यतष्टाप्' (पा० अ० ४। १। ४) इति टाप्-प्रत्ययः। टकार-पकारानुबन्धलोपः। 'अकः सवर्णे दीर्घः' (पा० अ० ६। १। १०१) इति अकारस्य आकारस्य च आ-दीर्घः। एवं काष्ठा निष्पद्यते। 'अष्टादश निमेषास्ता काष्ठा' तथा 'दिशस्तु ककुभः काष्ठा' एवं 'काष्ठोत्सर्गे स्थितौ दिशि' इत्यमरः। 'काष्ठा च प्रकर्षे स्थानमात्रके। दिशि दारुहरिद्रायां कालमान-प्रभिद्यपि' इति हैमः। 'काष्ठा दारुहरि-द्रायां कालमानप्रहर्षयोः। स्याद् दिशि स्थानमात्रे च' इति विश्वः। 'काष्ठा दिङ्नाम' (निघं० १। ६)। 'तत्र काष्ठा इत्येतदनेकस्यापि सत्त्वस्य नाम भवति। काष्ठा दिशो

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by S3 Foundation USA

भवन्ति क्रान्त्वा स्थिता भवन्ति, काष्ठा उपदिशो भवन्तीतरेतरं क्रान्त्वा स्थिता भवन्ति, आदित्योऽपि काष्ठोच्यते क्रान्ता स्थितो भवति, आज्यन्तोऽपि काष्ठोच्यते क्रान्त्वा स्थितो भवति, आपोऽपि काष्ठा उच्यन्ते क्रान्त्वा स्थिता भवन्तीति स्थावराणाम्' (निरु० २। १५) 'सुवर्गो वै लोकः काष्ठा' (तैत्ति० ब्रा० १।३।६।५)।

कासम्, कासः नपुं०, पुं०। इत्यत्र **'चमसांस-रस-निर्वासोपवास-कार्पास-वास-मास-कास-कांस-मांसानि नपुंसके च' (लि० सू० ९८) इति नपुंसकलिङ्गता पुँल्लिङ्गता च।** कासते इति कासः। कासृ शब्द-कुत्सायाम् (भ्वा० आ०) 'नन्दि-ग्रहि-पचादिभ्यो०' (पा० अ० ३।१।१३४) इति अच्-प्रत्ययः। चकारानुबन्धलोपः। **अथवा** कासते अनेन अस्मिन् वा इति कासः। कासृ शब्द-कुत्सायाम् (भ्वा० आ०) 'हलश्च' (पा० अ० ३।३।१२१) इति घञ्-प्रत्ययः। घकार-ञकारानुबन्धलोपः। 'अत उपधायाः' (पा० अ० ७। २। ११६) इति धातोः ककार-पर-वर्त्तिनः आकारस्य आ-वृद्धिः। अथवा कं सुखम् अस्यति क्षिपति नाशयति इति कासः। क + असु क्षेपणे (दि० प०) 'कर्मण्यण्' (पा० अ० ३। २। १) इति अण्-प्रत्ययः। णकारानुबन्धलोपः। 'अत उपधायाः' (पा० अ० ७।२।११६) इति धातोः अकारस्य आ-वृद्धिः। 'अकः सवर्णे दीर्घः' (पा० अ० ६।१।१०१) इति ककारोत्तरवर्त्तिनः अकारस्य तथा आस् इत्यस्य आकारस्य आ-दीर्घः। 'कासस्तु क्षवथुः पुमान्' इत्यमरः। 'काशस्तृणे रोगभेदे' इति हैमः। 'वाराणस्यां भवेत् कासी क्षवथौ ना तृणेऽस्त्रियाम्' इति रभसः।

कांसम्, कांसः। इत्यत्र 'चमसांस-रस-निर्यासोपवास०' (लि० सू० ९८) इति नपुंसकलिङ्गता पुँल्लिङ्गता च। कंस्ते गच्छति शास्ति वा इति कांसः। कसि गति-शासनयोः (अ० आ०) धातोः इदित्त्वात् 'इदितो नुम् धातोः' (पा० अ० ७।१।५८) इति नुम्-आगमः। उकार-नकारानुबन्धलोपः। 'नश्चापदान्तस्य झलि' (पा० अ० ८।३।२४) इति नकारस्य अनुस्वारः। 'नन्दि-ग्रहि-पचादिभ्यो०' (पा० अ० ३।१।१३४) इति अच्-प्रत्ययः। चकारानुबन्धलोपः। एवं कंसः निष्पद्यते। कंसः एव कांसः। कंस-शब्दात् 'प्रज्ञादिभ्यश्च' (पा० अ० ५। ४। ३८) इति स्वार्थिकः अण्-प्रत्ययः। णकारानुबन्धलोपः। 'तद्धितेष्वचामादेः' (पा० अ० ७। २। ११७) इति ककारोत्तर-वर्त्तिनः अकारस्य आ-वृद्धिः। 'यस्येति च' (पा० अ० ६।४।१४८) इति सकारोत्तर-वर्त्तिनः अकारस्य लोपः। **अथवा** कंसनं कांसः। कसि गति-शासनयोः (अ० आ०) 'हलश्च' (पा० अ० ३। ३। १२१) इति घञ्-प्रत्ययः। घकार-ञकारानुबन्धलोपः। 'अत उपधायाः' (पा० अ० ७।२।११६) इति धातोः उपधायाः अकारस्य आ-वृद्धिः।

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by S3 Foundation USA

किकिः स्त्री०। इत्यत्र '**तिथि-नाडि-रुचि-वीचि-नालि-धूलि-किकि-केलिच्छवि-रात्र्यादयः' (लि० सू० २५) इति स्त्रीलिङ्गता**। कयनं किः ज्ञानम्। कि ज्ञाने (जु० प०) 'सम्पदादिभ्यः क्विप्' (वा० पा० अ० ३। ३। ९४) इति क्विप्-प्रत्ययः। तस्य सर्वापहारिलोपः। किः ज्ञानं तस्य अपि किः ज्ञानम् इति किकिः।

किरीटम् नपुं०। इत्यत्र '**किरीट-मुकुट-ललाट-वट-वीट-शृङ्गाटक-राट-लोष्टानि नपुंसके' (लि० सू० ६५) इति नपुंसकलिङ्गता**। किरति विक्षपति धूल्यादिकम् अथवा धूल्यादिकान् किरति विक्षिपति दूरं रक्षति **अथवा** कीर्यते विक्षिप्यते धूल्यादिकं येन तत् किरीटं शिरोवेष्टनं वा। कॄ विक्षेपे (तु० प०) 'कॄ-तॄ-कृपिभ्यः कीटन्' (उ० ४। १८६) इति कीटन्-प्रत्ययः। ककार-नकारानुबन्धलोपः। 'ॠत इद्धातो' (पा० अ० ७। १। १००) इति धातोः ॠकारस्य 'उरण् रपरः' (पा० अ० १। १। ५१) इति सहकारेण इर्-आदेशः। **अथवा** किरिम् इटति गच्छति प्राप्नोति वा इति किरीटम्। किरति विक्षिपति वस्तु जातम् इति किरिः। कीर्यते विक्षिप्यते वा वस्तुजातं येन सः किरिः सूकरः वा। कॄ विक्षेपे (तु० प०) 'कॄ-गॄ-शॄ-पॄ-कुटि-भिदि-छिदिभ्यश्च' (उ० ४। १। ४४) इति इ-प्रत्ययः अथवा 'सर्वधातुभ्य इन्' (पा० अ० ४। ११९) इति इन्-प्रत्ययः। नकारानुबन्धलोपः। 'उरण्-रपरः' (पा० अ० १। १। ५१) इति सहकारेण 'ॠत इद्धातोः' (पा० अ० ७। १। १००) इति इर्-आदेशः। **अथवा** चिकेति जानाति इति किः। कि ज्ञाने (जु० प०) 'क्विप् च' (पा० अ० ३। २। ७६) इति क्विप्-प्रत्ययः। तस्य सर्वापहारी लोपः। रियति गच्छति रिणोति हिनस्ति वा इति रिः। रि गतौ (तु० प०) रि हिंसायाम् (स्वा० प०) 'क्विप् च' (पा० अ० ३। २। ७६) इति क्विप्-प्रत्ययः। तस्य सर्वापहारी लोपः। पुनः किश्चासौ रिः इति किरिः ज्ञानी गन्ता हिंसकश्चेत्यर्थः। 'वराहः सूकरो घृष्टिः कालः पोत्री किरिः किटिः' इत्यमरः। 'इगुपध-ज्ञा-प्री किरः कः' (पा० अ० ३। १। १३५) इति क-प्रत्यये तु किरः इति अकारान्तः एव शब्दः। तस्यापि स एवार्थः यः किरि-शब्दस्य। 'अथ किरः किरिः भूदारः शूकरः' इति हैमः। पुनः किरिम् इटति गच्छति प्राप्नोति वा इति किरीटम् + किरि + इट (भ्वा० प०) 'इगुपधज्ञा-प्री-किरः कः' (पा० अ० ३। १। १३५) इति क-प्रत्ययः। ककारानुबन्धलोपः। 'अकः सवर्णे दीर्घः' (पा० अ० ६। १। १०१) इति इकारस्य इकारस्य च ई-दीर्घः। एवमपि किरीट-शब्दः व्युत्पद्यते। 'अथ मुकुटं किरीटं पुंनपुंसकम्' इत्यमरः। 'किरीटं मुकुटे न स्त्री' इति चन्द्रगोमी।

किल्बिषम् नपुं०। इत्यत्र '**शिरीषर्जीषाम्बरीष-पीयूष-पुरीष-किल्बिष-कल्माषाणि नपुंसके' (लि० सू० ९४) इति नपुंसकलिङ्गता**। केलयति क्रीडयति विषयेषु इति

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by S3 Foundation USA

किल्बिषम् **अथवा** किलति क्रीडति प्रवर्त्तते वा विचार-शून्यत्वात् येन तत् किल्बिषम् पापम्। किल श्वैत्य-क्रीडनयोः (तु० प०) 'किलेर्बुक् च' (उ० १।५०) इति टिषच्-प्रत्ययः धातोर्बुगागमश्च। प्रत्यये टकार-षकारानुबन्धलोपः, आगमे उकार-ककारानुबन्धलोपः। **अथवा** किलति विक्षिपति इति किल्। किल श्वैत्य-क्रीडनयोः (तु० प०) 'क्विप् च' (पा० अ० ३। २। ७६) इति क्विप्-प्रत्ययः। तस्य सर्वापहारिलोपः। वेपति सिञ्चति विषु सेचने (भ्वा० प०), व्याप्नोति विष्लृ व्याप्तौ (जु० प०) विष्णाति विप्रयुङ्क्ते विष विप्रयोगे (क्र्या० प०) इति विषम्। सर्वत्र विष-धातोः 'इगुपध-ज्ञा-प्री-किरः कः' (पा० अ० ३। १। १३५) इति क-प्रत्ययः। ककारानुबन्धलोपः। कित्त्वात् 'पुगन्तलघूपधस्य च' (पा० अ० ७। ३। ८६) इति धातोः इकारस्य प्राप्तः ए-गुणः 'क्ङिति च' (पा० अ० १। १। ५) इत्यनेन निषिध्यते। पुनः किल् चासौ विषं च इति किल्विषम् पातकम्। 'पापं किल्विष-कल्मषम्' तथा 'अपराधेऽपि किल्विषम्' इत्यमरः। 'किल्विषं पाप-रोगयोः। अपराधेऽपि' इति मेदिनी। 'किल्विषं किल्भिदं सुकृत-कर्मणो भयं कीर्त्तिमस्य भिनत्तीति' (निरु० ११। २४)

किष्कुः स्त्री०, पुं०। इत्यत्र **'मृत्यु-सीधु-कर्कन्धु-किष्कु-कण्डु-रेणवः' (लि० सू० १७३) इति स्त्रीलिङ्गता पुँल्लिङ्गता च।** चिकेति जानाति इति किः। कि ज्ञाने (जु० प०) 'क्विप् च' (पा० अ० ३। २। ७६) इतिं क्विप्-प्रत्ययः। तस्य सर्वापहारी लोपः। स्कुनाति इति स्कुः। स्कुञ् आप्रवणे (क्र्या० उ०) 'क्विप् च' (पा० अ० ३। २। ७६) इति क्विप्-प्रत्ययः, तस्य सर्वाहारिलोपः। किश्चासौ स्कुश्च इति किस्कुः। **अथवा** कौति इति कुः कुशब्दे (अ० प०) 'क्विप् च' (पा० अ० ३। २। ७६) इति क्विप्। तस्य सर्वापहारी लोपः। 'पारस्करप्रभृतीनि च' (पा० अ० ६। १। १५७) इति सुडागमः। उकार-टकारानुबन्धलोपः। एवम् अपि स्कु निष्पद्यते। किश्चासौ स्कुश्च इति किस्कुः 'इदुदुपधस्य चाप्रत्ययस्य' (पा० अ० ८। ३। ४१) इति सस्य षः। 'किष्कुर्हस्ते वितस्तौ च' इत्यमरः। 'किष्कुर्द्वयोर्वितस्तौ च प्रकोष्ठकरेऽपि च' इति मेदिनी।

किसलयम् नपुं०। इत्यत्र **'किसलय-हृदयेन्द्रियोत्तरीयाणि नपुंसके' (लि० सू० ८७) इति नपुंसकलिङ्गता।** कि किञ्चित् सलति गच्छति कम्पते इति किसलयम्। कि + षल् गतौ (भ्वा० प०) 'उणादयो बहुलम्' (पा० अ० ३। ३। १) इति उणादीनां बाहुलकत्वात् 'वलि-मलि-तनिभ्यः कयन्' (उ० ४। १००) इति कयन्-प्रत्ययः। ककार- नकारानुबन्धलोपः। 'धात्वादेः षः सः' (पा० अ० ६। १। ६४) इति धातोः सस्य षः। 'पल्लवोऽस्त्री किसलयम्' इत्यमरः।

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by S3 Foundation USA

कीटम्, कीटः नपुं०, पुं०। इत्यत्र **'कुट-कूट-कपट-कवाट-कर्पट-नट-निकट-कीट-कटानि नपुंसके च' (लि० सू० ६६) इति नपुंसकलिङ्गता पुँल्लिङ्गता च।** कीटयति वर्णयति इति कीटः। कीट वर्णे (चु० प०) 'इगुपध-ज्ञा-प्री-किरः कः' (पा० अ० ३। १। १३५) इति क-प्रत्ययः। ककारानुबन्धलोपः। अथवा चिकेति जानाति इति किः। कि गतौ (जु० प०) 'क्विप् च' (पा० अ० ३। २। ७६) इति क्विप्-प्रत्ययः। तस्य सर्वापहारी लोपः। एटति गच्छति इति इटः। इट गतौ (भ्वा० प०) 'इगुपध-ज्ञा-प्री-किरः कः' (पा० अ० ३। १। १३५) इति क-प्रत्ययः। ककारानुबन्ध-लोपः। कित्त्वात् 'पुगन्तलघूपधस्य च' (पा० अ० ७। ३। ८६) इति धातोः इकारस्य प्राप्तः ए-गुणः 'क्ङिति च' (पा० अ० १। १। ५) इत्यनेन निषिध्यते। पुनः किश्चासौ इटश्च इति कीटः सम्पद्यते। 'अकः सवर्णे दीर्घः' (पा० अ० ६। १। १०१) इति इकारस्य इकारस्य च ई दीर्घः।

कुक्षिः पुं०। इत्यत्र **'सारथ्यतिथि-कुक्षि-बस्ति-पाण्यञ्जलयः' (लि० सू० ११७) इति पुँल्लिङ्गता।** कुष्णाति निष्कृषति **अथवा** कुष्यते निष्कास्यते मलः अस्मात् इति कुक्षिः। **अथवा** कुष्णाति निष्कर्षति सर्वपदार्थेभ्यः रसं यः सः कुक्षिः। सर्वत्र कुष निष्कर्षे (क्र्या० प०) 'प्लुषि-कुषि-शुषिभ्यः क्सिः' (उ० ३। १५५) इति क्सि-प्रत्ययः। ककारानुबन्धलोपः। कित्त्वात् धातोः उपधायाः उकारस्य 'पुगन्तलघूपधस्य च' (पा० अ० ७। ३। ८६) इति प्राप्तः ओ-गुणः 'क्ङिति च' (पा० अ० १। १। ५) इति निषिध्यते। 'षढोः कः सि' (पा० अ० ८। २। ४१) इति धातोः षस्य कः। 'आदेश-प्रत्यययोः' (पा० अ० ८। ३। ५९) इति प्रत्ययस्य सस्य षत्वम्। पुनः क्-ष्-संयोगेन क्षः। 'पिचण्ड-कुक्षी जठरोदरं तुन्दम्' इत्यमरः।

कुङ्कुमम् नपुं०। इत्यत्र **'रुक्म-सिध्म-युग्मेध्म-गुल्माध्यात्म-कुङ्कुमानि नपुंसके' (लि० सू० ८४) इति नपुंसकलिङ्गता।** कुक्यते आदीयते यत् तत् कुङ्कुमम्। कुक आदाने (भ्वा० आ०) 'उणादयो बहुलम्' (पा० अ० ३। ३। १) इति उणादीनां बाहुलकत्वात् उमच्-प्रत्ययः। चकारानुबन्धलोपः 'आच्छीनद्योर्नुम्' (पा० अ० ७। १। ८०) इत्यत्र नुम् इत्यस्य योगविभागेन धातोः नुम्-आगमः। उकार-मकारानुबन्धलोपः 'नश्चापदान्तस्य झलि' (पा० अ० ८। ३। २४) इति नकारस्य अनुस्वारः। 'अनुस्वारस्य ययि परसवर्णः' (पा० अ० ८। ४। ५८) इति अनुस्वारस्य परसवर्णः ङकारः। **अथवा** 'कुङ्कुम' शब्दोऽयं वाचकत्वेन यस्यास्ति तत् कुङ्कुमम्। कुङ्कुम-शब्दात् 'अर्श आदिभ्योऽच्' (पा० अ० ५। २। १२७) इति अच्-प्रत्ययः। चकारानुबन्धलोपः। 'यस्येति

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by S3 Foundation USA

च' (पा० अ० ६। ४। १४८) इति मकारोत्तर-वर्त्तिनः अकारस्य लोपः। 'कुङ्कुमं काश्मीरजन्माग्निशिखं वरम्०' इत्यमरः।

कुचः पुं०। इत्यत्र **'देवासुरात्म-स्वर्ग-गिरि-समुद्र-नख-केश-दन्त-स्तन-भुज-कण्ठ-खड्ग-शर-पङ्काभिधानानि' (लि० सू० ४३) इति पुँल्लिङ्गता।** कोचति शब्दं करोति, कुच शब्दे तारे (भ्वा० प०) कोचति सम्पृक्तः कुटिलः प्रतिष्टब्धः विलिखितः वा भवति, कुच सम्पर्चन-कौटिल्य-प्रतिष्टम्भ-विलेखनेपु (भ्वा० प०) कुचति सङ्कुचति इति कुचः, कुच सङ्कोचे (तु० प०) सर्वत्र कुच धातोः 'इगुपध-ज्ञा-प्री-किरः कः' (पा० अ० ३। १। १३५) इति क-प्रत्ययः। ककारानुबन्धलोपः। कित्त्वात् 'पुगन्तलघूपधस्य च' (पा० अ० ७। ३। ८६) इति धातोः उपधायाः उकारस्य प्राप्तः ओ-गुणः 'क्ङिति च' (पा० अ० १। १। ५) इत्यनेन निपिध्यते। 'स्तनौ कुचौ' इत्यमरः।

कुञ्जः, कुञ्जम् पुं०, नपुं०। इत्यत्र **'व्रज-कुञ्ज-कुथ-कूर्च-प्रस्थ-दर्पार्भार्धर्च-दर्भ-पुच्छाः' (लि० सू० १७९) इति पुँल्लिङ्गता नपुंसकलिङ्गता च।** कुञ्जन्ति अत्र इति कुञ्जः कुञ्जं वा। कुजि अव्यक्ते शब्दे (भ्वा० प०) धातोः इदित्त्वात् 'इदितो नुम् धातोः' (पा० अ० ७। १। ५८) इति नुम्-आगमः। उकार-मकारानुबन्धलोपः। 'नश्चा-पदान्तस्य झलि' (पा० अ० ८। ३। २४) इति नकारास्य अनुस्वारः। 'अनुस्वारस्य ययि परसवर्णः' (पा० अ० ८। ४। ५८) इति अनुस्वारस्य परसवर्णः ञकारः। 'हलश्च' (पा० अ० ३। ३। १२१) इति घञ्-प्रत्ययः। घकार-ञकारानुबन्धलोपः। यद्यपि पाणिनि-धातुपाठे 'कुजि' इति धातुः न सम्प्रति प्राप्यते तथापि 'अथ शुचादयो व्रज्यन्ता द्विसप्ततिः परस्मैभाषाः' इति प्रतिज्ञायां द्विसप्ततिसंख्याकथनानुरोधात् गुजि अव्यक्ते शब्दे इत्यत्र कुजि धातुरपि पूर्वमवश्यमवर्त्तत, अन्यथा कुजिधातुं विना द्विसप्ततिसंख्या नैव उपपद्येत। 'निकुञ्ज-कुञ्जौ वा क्लीबे लतादिपिहितोदरे' इत्यमरः। 'कुञ्जोऽस्त्रियां निकुञ्जेऽपि हनौ दन्ते च दन्तिनाम्' इति विश्वः।

कुटम्, कुटः नपुं०, पुं०। इत्यत्र **'कुट-कूट-कपट-कवाट-कर्पट-नट-निकट-कीट-कटानि नपुंसके च' (लि० सू० ६६) इति नपुंसकलिङ्गता पुँल्लिङ्गता च।** कुटति कुटिली भवति, कोटयति छेदयति इति कुटं कुटो वा। कुट कौटिल्ये (तु० प०) कुट छेदने (चु० प०) 'इगुपध-ज्ञा-प्री-किरः कः' (पा० अ० ३। १। १३५) इति क-प्रत्ययः। ककारानुबन्धलोपः। कित्त्वात् 'पुगन्तलघूपधस्य च' (पा० अ० ७। ३। ८६) इति धातोः उकारस्य प्राप्तः ओ-गुणः 'क्ङिति च' (पा० अ० १। १। ५) इति निषिध्यते। 'अनोकहः कुटः सालः पलाशी दुद्रुमागमः' तथा 'घटः कुट-निपौ' इत्यमरः। कुटस्य कृतस्य कर्मणः (नि० ५। २४)

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by S3 Foundation USA

कुटिः स्त्री०। इत्यत्र **'शष्कुलि-राजि-कुट्यशनि-वर्त्ति०' (लि० सू० २६) इति स्त्रीलिङ्गता**। कुटति कुटिली भवति, कोटयति छेदयति इति कुटिः। कुट कौटिल्ये (तु० प०) कुट छेदने (चु० प०) 'कृ-गृ-शृ-पृ-कुटि-भिदि-छिदिभ्यश्च' (उ० ४। १४४) इति इ-प्रत्ययः तस्य च कित्त्वम्। कित्त्वात् 'पुगन्तलघूपधस्य च' (पा० अ० ७। ३। ८६) इति धातोः उकारस्य प्राप्तः ओ-गुणः 'क्ङिति च' (पा० अ० १। १। ५) इत्यनेन निषिध्यते। **अथवा** 'इगुपधात् कित्' (उ० ४। १२१) इति पूर्वोक्त-कुट धातोः इन्-प्रत्ययः सः च कित्। कित्त्वात् पूर्ववत् धातोः उकारस्य प्राप्तः ओ-गुणः निषिध्यते। नकारानुबन्धलोपः।

कुटी स्त्री०। **इत्यत्र 'ईकारान्तश्च' (लि० सू० १०) इति स्त्रीलिङ्गता**। कुटि-शब्दः पूर्वं व्याख्यातः। ततः स्त्रियां 'कृदिकारादक्तिनः' (ग० सू० पा० अ० ४। १। ४५) इति ङीप्-प्रत्ययः। ङकार-पकारानुबन्धलोपः। 'यस्येति च' (पा० अ० ६। ४। १४८) इति टकार-परवर्त्तिनः इकारस्य लोपः। **अथवा** कुट-धातोः 'इगुपध-ज्ञा-प्री-किरः कः' (पा० अ० ३। १। १३५) इति क-प्रत्ययः। ककारानुबन्धलोपः। कित्त्वात् 'पुगन्त-लघूपधस्य च' (पा० अ० ७। ३। ८६) इति धातोः उकारस्य प्राप्तः ओ-गुणः 'क्ङिति च' (पा० अ० १। १। ५) इति निषिध्यते। एवं क-प्रत्ययेन निष्पन्नात् कुट-शब्दात् 'जातेरस्त्रीविषयादयोपधात्' (पा० अ० ४। १। ६३) इति ङीष्प्रत्यः **अथवा** 'षिद्गौरा-दिभ्यश्च' (पा० अ० ४। १। ४१) इति ङीष्-प्रत्ययः। ङकार-षकारानुबन्धलोपः। 'यस्येति च' (पा० अ० ६। ४। १४८) इति टकार-परवर्त्तिनः अकारस्य लोपः। 'वासः कुटी द्वयोः शाला सभा' इत्यमरः। 'कुटी स्यात् कुम्भदास्यां च सुरायां चित्रगुच्छके' इति मेदिनी।

कुटीरम् नपुं०। इत्यत्र **'द्वाराग्र-स्फार-तक्र-वक्र-वप्र०' (लि० सू० ९०) इति नपुंसकलिङ्गता**। कुटति कुटिली भवति इति कुटीरम्। कुट कौटिल्ये (तु० प०) 'उणादयो बहुलम्' (पा० अ० ३। १। १) इति उणादि-प्रत्ययानां बाहुलकत्वात् 'कृ-शृ-पृ-कटि-पटि-शौटिभ्य ईरन्' (उ० ४। ३१) इति ईरन्-प्रत्ययः सः च कित्। कित्त्वात् 'पुगन्तलघूपधस्य च' (पा० अ० ७। ३। ८६) इति धातोः उपधायाः उकारस्य प्राप्तः ओ-गुणः 'क्ङिति च' (पा० अ० १। १। ५) इति निषिध्यते। ईरन्-प्रत्यये नकारानुबन्ध-लोपः। **अथवा** कुटी-शब्दः पूर्वं व्याख्यातः। ततः ह्रस्वा कुटी अस्मिन् अर्थे 'कुटी-शमी-शुण्डाभ्यो रः' (पा० अ० ५। ३। ८८) इति र-प्रत्ययः। र-प्रत्ययस्य स्वार्थिकत्वेऽपि पुँल्लिङ्गता लोकाश्रयत्वात् लिङ्गस्य। **अथवा** कुट्यां राति ददाति, कुटीं

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by S3 Foundation USA

राति ददाति वा इति कुटीरः। कुटी + रा दाने (अ० प०) 'आतोऽनुपसर्गे कः' (पा० अ० ३। २। ३) इति क-प्रत्ययः। ककारानुबन्धलोपः। कित्त्वात् 'आतो लोप इटि च' (पा० अ० ६। ४। ६४) इति धातोः आकारस्य लोपः। **अथवा** कुट्यां वा रमते इति कुटीरः। कुटी + रमु क्रीडायां (भ्वा० आ०) 'अन्येष्वपि दृश्यते' (पा० अ० ३। २। १०१) इति ड-प्रत्ययः। डकारानुबन्धलोपः। डित्वात् 'टेः' (पा० अ० ६। ४। १४३) इति धातोः अम् इत्यस्य टेर्लोपः।

कुटुम्बम् नपुं०। इत्यत्र **'द्वन्द्व-बर्ह-दुःख-बडिश-पिच्छ-बिम्ब-कुटुम्ब-कवच-वर-शर-वृन्दारकाणि' (लि० सू० १६९) इति नपुंसकलिङ्गता।** कुटति कुटिली भवति, कोटयति छेदयति वा इति कुटुम्बम्। कुट कौटिल्ये (तु० प०) कुट छेदने (चु० प०) 'उणादयो बहुलम्' (पा० अ० ३। १। १) इति उणादिप्रत्ययानां बाहुलकत्वात् उम्बच्-प्रत्ययः सः च कित्। कित्त्वात् 'पुगन्तलघूपधस्य च' (पा० अ० ७। ३। ८६) इति धातोः उकारस्य प्राप्तः ओ-गुणः 'क्ङिति च' (पा० अ० १। १। ५) इति निषिध्यते। प्रत्यये चकारानुबन्धलोपः।

कुडवः पुं०। **इत्यत्र 'मानाभिधानानि' (लि० सू० १०३) इति पुँल्लिङ्गता।** कुण्डति विफलः भवति, कुण्डयति रक्षति, कुण्डते दहति वा इति कुडवः। कुडि वैकल्ये (भ्वा० प०) कुडि रक्षणे (चु० उ०), कुडि दाहे (भ्वा० आ०) 'उणादयो बहुलम्' (पा० अ० ३। १। १) इति उणादि-प्रत्ययानां बाहुलकत्वात् कवच्-प्रत्ययः। ककार-चकारानुबन्धलोपः। धातोः इदित्त्वे अपि आगम-शास्त्रस्य अनित्यत्वात् 'इदितो नुम् धातोः' (पा० अ० ७। १। ५८) इति नुम्-आगमः न। कवच्-प्रत्ययस्य कित्त्वात् 'पुगन्तलघूपधस्य च' (पा० अ० ७। ३। ८६) इति धातोः उपधायाः उकारस्य प्राप्तः ओ-गुणः 'क्ङिति च' (पा० अ० १। १। ५) इति निषेधात् न भवति। 'कुडवः प्रस्थ इत्याद्याः परिमाणार्थकाः पृथक्' इत्यमरः।

कुड्यम् नपुं०। **इत्यत्र 'धान्याज्य-सस्य-रूप्य-पण्य०' (लि० सू० १६८) इति नपुंसकलिङ्गता।** कुण्डति विकलः भवति, कुण्डयति रक्षति, कुण्डते दहति वा इति कुडिः। कुडि वैकल्ये (भ्वा० प०), कुडि रक्षणे (चु० उ०), कुडि दाहे (भ्वा० आ०), 'सर्वधातुभ्य इन्' (उ० ४। ११९) इति इन्-प्रत्ययः। नकारानुबन्धलोपः। धातोः इदित्त्वे अपि आगम-शास्त्रस्य अनित्यत्वात् 'इदितो नुम् धातोः' (पा० अ० ७। १। ५८) इति नुम्-आगमः न। कुड्यां साधु कुड्यम्। कुडि-शब्दात् 'तत्र साधुः' (पा० अ० ४। ४। ९८) इति यत्-प्रत्ययः। तकारानुबन्धलोपः। 'यस्येति च' (पा० अ०

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by S3 Foundation USA

६।४।१४८) इति डकार-परवर्त्तिनः इकारस्य लोपः। **अथवा** कुड्यते कुण्डितुं योग्यं वा इति कुड्यम्। पूर्वोक्त-कुडि-धातुतः 'ऋहलोर्ण्यत्' (पा० अ० ३।१।१२४) इति ण्यत् प्रत्ययः। णकार-तकारानुबन्धलोपः। धातोः इदित्त्वेऽपि आगम-शास्त्रस्य अनित्वत्वात् 'इदितोनुम् धातोः' (पा० अ० ७।१।१५८) इति नुम्-आगमः न। 'भित्तिः स्त्री कुड्यम्' इत्यमरः। 'कुड्यं भित्तौ विलेपने' इति मेदिनी।

कुड्यच्छायः, कुड्यच्छायम् स्त्री० पुं०। इत्यत्र **'सुरा-सेना-च्छाया-शाला-निशा स्त्रियां च' (लि० सू० १२९) इति स्त्रीलिङ्गता नपुंसकलिङ्गता च।** कुड्य-शब्दः पूर्वं व्याख्यातः। छाया-शब्दः व्याख्यायते। छ्यति छिनति इति छाया छो छेदने (दि० प०) 'मा-छा-शासिभ्यो यः' (उ० ४।११०) इति य-प्रत्ययः। 'आदेच उपदेशेऽशिति' (पा० अ० ६।१।४५) इति धातोः ओकारस्य आकारः। 'अजाद्यतष्टाप्' (पा० अ० ४।१।४) इति टाप्-प्रत्ययः। टकार-पकारानुबन्धलोपः। 'अकः सवर्णे दीर्घः' (पा० अ० ६।१।१०१) इति अकारस्य आकारस्य च आ-दीर्घः। **अथवा** 'आदेच उपदेशेऽशिति' (पा० अ० ६।१।१४५) इति धातोः ओकारस्य आकारः। 'श्याद्-व्यधा-स्रु-संस्रवतीणवसावहृ-लिह-श्लिष-श्वसश्च' (पा० अ० ३।१।१४१) इति ण-प्रत्ययः। णकारानुबन्धलोपः। 'आतो युक् चिण्-कृतोः' (पा० अ० ७।३।३३) इति युगागमः। उकार-ककारानुबन्धलोपः। 'अजाद्यतष्टाप्' (पा० अ० ४।१।४) इति टाप्-प्रत्ययः। टकार-पकारानुबन्धलोपः। 'अकः सवर्णे दीर्घः' (पा० अ० ६।१।१०१) इति अकारस्य आकारस्य च आ-दीर्घः। 'छाया सूर्यप्रिया कान्तिः प्रतिबिम्बमनातपः' इत्यमरः। 'छाया स्याद् आतपाभावे प्रतिबिम्बार्कयोषितोः। पालनोत्कोचयोर्दीप्तिसच्छोभा-पङ्क्तिषु स्त्रियाम्' इति विश्व-मेदिन्यौ। 'छाया गृहनाम' (निघं० ३।४)। 'मृत्युर्वै तमश्छाया' (ऐत० ब्रा० ७।२२)। 'तस्माद् छायामभि च ष्ठीवेदभि च मेहेत' (जैमि० ब्रा० २।३७०)। 'तद्धापि छायां पर्यवेक्षेतात्मनोऽप्रणाशनाय' (जैमि० ब्रा० १।१६७)। कुड्यस्य छाया इति कुड्यच्छाया कुण्डच्छायम्। 'षष्ठी' (पा० अ० २।२।८) इति कुड्यशब्दस्य छायाशब्देन समासः। सुपोलुक्। 'छे च' (पा० अ० ६।१।७३) इति तुगागमः। उकार-ककारानुबन्धलोपः। 'झलां जशोऽन्ते' (पा० अ० ८।२।३९) इति तकारस्य दकारः। 'स्तोः श्चुना श्चुः' (पा० अ० ८।४।४०) इति दकारस्य जकारः। 'खरि च' (पा० अ० ८।४।५५) इति जकारस्य चकारः। 'विभाषा सेना-सुराच्छाया-शाला-निशानाम्' (पा० अ० २।४।२५) इति विकल्पेन कुड्यच्छाया-शब्दस्य नपुंसकलिङ्गता। तेन 'ह्रस्वो नपुंसके प्रातिपदिकस्य' (पा० अ० १।२।४७) इति कुड्यच्छाया-शब्दस्य

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by S3 Foundation USA

ह्रस्वत्व-विधानात् कुड्यच्छाय-शब्दः निष्पद्यते। एवं नपुंसकलिङ्गे प्रथमैकवचने कुड्यच्छायम्, तथा स्त्रीलिङ्गे कुड्यच्छाया इति भवति।

कुणपम्, कुणपः नपुं०, पुं०। इत्यत्र **'सूर्य-कुतप-कुणप-द्वीप-विटपानि नपुंसके च' (लि० सू० ७९) इति नपुंसकलिङ्गता पुँल्लिङ्गता च।** क्वणति शब्दयति शब्दयते वा इति कुणपं कुणपः वा। क्वण शब्दे (भ्वा० प०) 'क्वणेः सम्प्रसारणं च' (उ० ३। १४३) इति कपन्-प्रत्ययः, धातोः वकारस्य उकारः सम्प्रसारणं च। 'सम्प्रसारणाच्च' (पा० अ० ६।१।१०८) इति अकारस्य पूर्वरूपम्। कपन्-प्रत्यये ककार-नकारानुबन्ध-लोपः। **अथवा** कुणति शब्दायते इति कुणः। कुण शब्दे (तु० प०) **यद्वा** कुणयति आमन्त्रयते इति कुणः। कुण आमन्त्रणे (चु० प०) 'इगुपध-ज्ञा-प्री-किरः कः' (पा० अ० ३।१।१३५) इति क-प्रत्ययः। ककारानुबन्धलोपः। कित्त्वात् 'पुगन्त-लघूपधस्य च' (पा० अ० ७।३।८६) इति धातोः उकारस्य प्राप्तः ओ-गुणः 'क्ङिति च' (पा० अ० १।१।५१) इति निपिध्यते। एवं कुणं पाति रक्षति पिबति वा इति कुणपः। कुण + पा रक्षणे (अ० प०) पा पाने (भ्वा० प०) 'आतोऽनुपसर्गे कः' (पा० अ० ३। २।३) इति क-प्रत्ययः। ककारानुबन्धलोपः। 'आतो लोप इटि च' (पा० अ० ६।४। ६४) इति धातोः आकारस्य लोपः। 'कुणपः शवमस्त्रियाम्' इत्यमरः। 'कुणपी पुनः। विट् सारिकायां कुणपः पूतिगन्धे शवेऽपि च' इति विश्व-मेदिन्यौ।

कुण्डम् नपुं०। इत्यत्र **'श्राद्ध-कुलिश-दैव-पीठ-कुण्डाङ्काङ्ग-दधि-सक्थ्यक्ष्या-स्यास्पदाकाश-कण्व-बीजानि' (लि० सू० १६६) इति नपुंसकलिङ्गता।** कुणति शब्दं करोति उपकरोति वा इति कुण्डम्। 'कुण शब्दोपकरणयोः' (तु० प०) 'ञम-न्ताड्डः' (उ० १।११४) इति ड-प्रत्ययः। 'क्वादिभ्यः कित्' (उ० १।११५) इति ड-प्रत्ययस्य कित्त्वम्। ड-प्रत्ययस्य कित्त्वात् 'पुगन्त-लघूपधस्य च' (पा० अ० ७।३। ८६) इति धातोः उपधायाः उकारस्य प्राप्तः ओ-गुणः 'क्ङिति च' (पा० अ० १।१। ५) इति निषिध्यते। एवमेव 'अनुनासिकस्य क्विझलोः क्ङिति' (पा० अ० ६।४।१५) इति दीर्घस्तु न भवति संज्ञापूर्वकविधेरनित्यत्वात् बाहुलकात् वा। **अथवा** कुण्डयति रक्षति स्वस्मिन् जलादिकम् इति कुण्डम्। कुडि रक्षणे (चु० उ०) **यद्वा** कुण्डते दहति कुलं यत् तत् कुण्डम्। **अथवा** कुण्ड्यते दह्यते कुलं येन तत् कुण्डम्। कुडि दाहे (भ्वा० आ०), **अथवा** कुण्डति वैकल्यं करोति इति कुण्डम्। कुडि वैकल्ये (भ्वा० प०) सर्वत्र धातोः इदित्त्वात् 'इदितो नुम् धातोः' (पा० अ० ७।१।५८) इति नुम्-आगमः। उकार-मकारानुबन्धलोपः। 'नन्दि-ग्रहि-पचादिभ्यो०' (पा० अ० ३।१।१३४) इति अच्-प्रत्ययः। चकारानुबन्धलोपः। 'अमृते जारजः कुण्डः' तथा 'पिठरः स्थाल्युखा

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by S3 Foundation USA

कुण्डम्' इत्यमरः। 'कुण्डमग्न्यालये मानभेदे जलाशये। कुण्डी कमण्डलौ जारात् पतिवत्नी सुते पुमान्। पिठरे तु न ना' इति मेदिनी। 'कुण्डं देवजलाधारे पिठरेऽथ कमण्डलौ। कुण्डी कुण्डः स्मृतो जारात् पतिपत्नीसुतेऽपि च' इति विश्वः।

कुण्डलः, कुण्डलम् पुं०, नपुं०। इत्यत्र **'शील-मूल-मङ्गल-साल-कमल-तल-मुसल-कुण्डल-पलल-मृणाल०' (लि० सू० १४३) इति पुँल्लिङ्गता नपुंसक-लिङ्गता च**। कुण्डते दहति अशोभां, कुड्यते दह्यते ताप्यते वा अग्नौ निर्माण-काले इति कुण्डलः कुण्डलं वा। कुडि दाहे (भ्वा० आ०), **अथवा** कुण्डयति रक्षति शोभाम् इति कुण्डलः कुण्डलं वा। कुडि रक्षणे (चु० उ०) सर्वत्र धातोः इदित्त्वात् 'इदितो नुम् धातोः' (पा० अ० ७। १। ५८) इति धातोः नुम् आगमः। उकार-मकारानुबन्धलोपः। 'वृषादिभ्यश्चित्' (उ० १। १०६) इति वृषादेः आकृतिगणत्वात् कल-प्रत्ययः स च चित्। ककारानुबन्धलोपः। **अथवा** कुण्डं कुण्डलाकारे लाति इति कुण्डलः कुण्डलं वा। कुण्ड + ला आदाने दाने वा (अ० प०) 'आतोऽनुपसर्गे कः' (पा० अ० ३। २। ३) इति क-प्रत्ययः। ककारानुबन्धलोपः। 'आतो लोप इटि च' (पा० अ० ६। ४। ६४) इति धातोः आकारस्य लोपः। **अथवा** कुण्डं शब्दरक्षकं श्रोत्रम् अलति भूषयति इति कुण्डलः कुण्डलं वा। कुण्ड + अल भूषण-पर्याप्ति-वारणेपु (भ्वा० प०) 'नन्दि-ग्रह-पचादिभ्यो०' (पा० अ० ३। १। १३४) इति अच्-प्रत्ययः। चकारानुबन्धलोपः। 'शकन्ध्वादिषु पररूपं वाच्यम्' (वा० पा० अ० ६। १। ६४) इति डकार-परवर्त्तिनः अकारस्य पररूपम्। 'कुण्डलं कर्णवेष्टनम्' इत्यमरः। 'कुण्डलं कर्ण-भूषायां पाशेऽपि वलयेऽपि च। काञ्चनद्रु-गुडुच्योः स्त्री' इति मेदिनी।

कुतपम्, कुतपः। इत्यत्र **'शूर्प-कुतुप-कुणप-द्वीप-विटपानि नपुंसके च' (लि० सू० ७९) इति नपुंसकलिङ्गता पुँल्लिङ्गता च**। तपति सन्तापयति इति तपः। तप सन्तापे (भ्वा० प०) 'नन्दि-ग्रहि-पचादिभ्यो०' (पा० अ० ३। १। १३४) इति अच्-प्रत्ययः। चकारानुबन्धलोपः। कोः भूमेः तपः सन्तापकम् इति कुतपं कुतपः वा। कु-शब्दस्य तप-शब्देन सह 'षष्ठी' (पा० अ० २। २। ८) इति समासः। 'सुपो धातु-प्रातिपदिकयोः' (पा० अ० २। ४। ७१) इति कुशब्दोत्तरवर्त्तिनः षष्ठीविभक्तेः ङस्-प्रत्ययस्य लुक्। एवं कुतप-शब्दः निष्पद्यते। **अथवा** कु कुत्सितं तपति सन्तापयति इति कुतपं कुतपः वा। कु + तप सन्तापे (भ्वा० प०) 'संज्ञायां भृ-तृ-वृजि-धारि-सहि-तपि-दमः' (पा० अ० ३। २। ४६) इति खच्-प्रत्ययः। खकार-चकारानुबन्धलोपः। 'अरुर्द्विषदजन्तस्य नुम्' (पा० अ० ६। ३। ६७) इत्यत्र 'खित्यनव्ययस्य' (पा० अ० ६। ३। ६६) इत्यत्र अनव्ययस्य इत्यनुवृत्तेः मुम्- आगमः न। **अथवा** कुं भुवं तपति

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by S3 Foundation USA

इति कुतपं कुतपः वा। कु + तप सन्तापे (भ्वा० प०) पूर्ववत् 'संज्ञायां भृ-तृ-वृजि-धारि-सहि-तपि-दमः' (पा० अ० ३। २। ४६) इति खच्-प्रत्ययः। खकार-चकारानुबन्धलोपः। आगमशास्त्रस्य अनित्यत्वात् अत्र 'अरुर्द्विषदजन्तस्य मुम्' (पा० अ० ६। ३। ६७) इति मुम्-आगमः न। 'अंशोऽष्टमोऽह्नः कुतपोऽस्त्रियाम्' इत्यमरः। 'कुतपोऽस्त्रियां दौहित्रे वाद्ये छागजकम्बले। कुशे दिनस्याष्टमांशे ना सूर्ये' इति मेदिनी। 'दिवसस्याष्टमे भागे मन्दी भवति भास्करः। स कालः कुतपो ज्ञेयः पितृणां दत्तमक्षयम्' इति शातातपः।

कुथः, कुथम् पुं०, नपुं०। **इत्यत्र 'व्रज-कुञ्ज-कुथ-कूर्च-प्रस्थ-दर्पाभ्र्भार्धच-दर्भ-पुच्छाः' (लि० सू० १७९) इति पुँल्लिङ्गता नपुंसकलिङ्गता च।** कुथ्यति इति कुथः। कुथ पूतिभावे (दि० प०) 'इगुपधज्ञाप्रीकिरः कः' (पा० अ० ३। १। १३५) इति क-प्रत्ययः। ककारानुबन्धलोपः। कित्त्वात् 'क्ङिति च' (पा० अ० १। १। ५) इति निषेधात् 'पुगन्तलघूपधस्य च' (पा० अ० ७। ३। ८६) इति धातोः उपधायाः उकारस्य प्राप्तः ओ-गुणः न। **अथवा** कुन्थति हिनस्ति नाशयति अशोभाम् इति कुथः। कुथि हिंसायाम् (भ्वा० प०) धातोः इदित्त्वे अपि आगमशास्त्रस्य अनित्यत्वात् 'इदितो नुम् धातोः' (पा० अ० ७। १। ५८) इति प्राप्तः नुम्-आगमः न। पूर्ववत् क-प्रत्ययः। 'अस्त्री कुशं कुथे दर्भः पवित्रम्' तथा 'प्रवेण्यास्तरणं वर्णः परिस्तोमः कुथो द्वयोः' इत्यमरः। 'कुथः स्त्री-पुंसयोर्वर्णकम्बले पुंसि बर्हिषि' इति मेदिनी। 'कुथं त्रिषु' इति बोपालिः।

कुन्तः पुं०। **इत्यत्र 'हस्त-कुन्तान्त-व्रात-वात-दूत-धूर्त्त-सूत-चूत-मुहूर्त्ताः' (लि० सू० १११) इति पुँल्लिङ्गता।** कुं शरीरं तुदति व्यथयति इति कुन्तः। कु + तुद व्यथने (तु० उ०) 'अन्येष्वपि दृश्यते' (पा० अ० ३। २। १०१) इति ड-प्रत्ययः। डकारा-नुबन्धलोपः। 'टेः' (पा० अ० ६। ४। १४३) इति धातोः उद् इत्यस्य टेर्लोपः 'पृषोदरादीनि यथोपदिष्टम्' (पा० अ० ६। ३। १०९) इति निपेधात् 'सुपो धातुप्रातिपदिकयोः' (पा० अ० २। ४। ७१) इति कु-परवर्त्तिनः द्वितीया-विभक्तेः अम् इत्यस्य लुक् न। कुंत इति स्थितौ 'अनुस्वारस्य ययि परसवर्णः' (पा० अ० ८। ४। ५८) इति अनुस्वारस्य परसवर्णः नकारः **अथवा** लुकि सति अपि 'पृषोदरादीनि०' (पा० अ० ६। ३। १०९) इति धातोः नुम्-आगमः। उभावितौ लोपः। **अथवा** कौति शब्दं करोति इति कुन्तः। कु शब्दे (अ० प०) उणादीनां बाहुलकत्वात् 'हसि-मृ-ग्रिण्वामि०' (उ० ३। ८६) इति तन् प्रत्ययः धातोः नुम्-आगमश्च। प्रत्यये नकारानुबन्धलोपः। आगमे उकार मकारानु-

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by S3 Foundation USA

बन्धलोपः। 'प्रासस्तु कुन्तः' इत्यमरः। 'कुन्तः प्रासे चण्डभावे क्षुद्रजातौ गवेधुके' इति विश्वः।

कुन्दः पुं०। इत्यत्र **'ह्रद-कन्द-कुन्द-बुद्बुद-शब्दाः' (लि० सू० ११४) इति पुँल्लिङ्गता।** कौति शब्दं करोति इति कुन्दः। कु शब्दे (अ० प०) 'अब्दादयश्च' (उ० ४। ९९) इति दन्-प्रत्ययः। 'कौतेर्नुम् च' (ग० २०५) इति नुम्-आगमश्च। प्रत्यये नकारानुबन्धलोपः। आगमे उकार-मकारानुबन्धलोपः। **अथवा** कुं शरीरं भुवं वा दायति-शोधयति इति कुन्दः। कु + दैप् शोधने (भ्वा० प०) 'आदेच उपदेशेऽशिति' (पा० अ० ६। १। ४५) इति धातोः ऐकारस्य आकारः। 'आतोऽनुपसर्गे कः' (पा० ३। २। ३) इति क-प्रत्ययः। ककारानुबन्धलोपः। 'आतो लोप इटि च' (पा० अ० ६। ४। ६४) इति धातोः आकारस्य लोपः। 'पृषोदरादीनि यथोपदिष्टम्' (पा० अ० ६। ३। १०९) इति धातोः नुम्-आगमः। उकार-मकारानुबन्धलोपः। **अथवा** कुणति शब्दं करोति इति कुन्दः। कुण शब्दे 'अब्दादयश्च' (उ० ४। ९९) इति दन्-प्रत्ययः नकारानुबन्धलोपः। 'पृपोदरादीनि यथोपदिष्टम्' (पा० अ० ६। ३। १०९) इति धातोः णकारस्य नकारः। **अथवा** कुं भूमिम् उनत्ति उन्दयति क्लेदयति इति कुन्दः। कु + उन्दी क्लेदने (रु० प०) 'कर्मण्यण्' (पा० अ० ३। २। १) इति अण्-प्रत्ययः। णकारानुबन्धलोपः। 'शकन्ध्वादिपु पररूपं वाच्यम्' (वा० पा० अ० ६। १। ९४) इति ककारपरवर्त्तिनः उकारस्य पररूपम्। **अथवा** स्कुन्दते इति कुन्दः। स्कुदि आप्रवणे (भ्वा० आ०) 'नन्दि-ग्रहि-पचादिभ्यो०' (पा० अ० ३। १। १३४) इति अच्-प्रत्ययः। चकारानुबन्धलोपः। धातोः इदित्त्वात् 'इदितो नुम् धातोः' (पा० अ० ७। १। ५८) इति नुम्-आगमः। उकार-मकारानुबन्धलोपः। 'पृपोदरादीनि यथोपदिष्टम्' (पा० अ० ६। ३। १०९) इति धातोः सकारस्य लोपः। 'कुन्दो माध्येऽस्त्री मुकुन्द-भ्रमि-विध्यन्तरेपु ना' इति मेदिनी। 'माध्यं कुन्दम्' इत्यमरः। 'मुकुन्दः कुन्द-कुन्दुरू' इति चामरः। 'माध्यः कुन्दः कुरण्टकः' इति रत्नकोपः।

कुम्भः पुं०। इत्यत्र **'भोपधः' (लि० सू० ८०) इति पुँल्लिङ्गता।** कुं भुवं कुत्सितं वा उम्भति पूरयति इति कुम्भः। कु + उम्भ पूरणे (तु० प०) 'कर्मण्यण्' (पा० अ० ३। २। १) इति अण्-प्रत्ययः। णकारानुवन्धलोपः। 'शकन्ध्वादिषु पररूपं वाच्यम्' (वा० पा० अ० ६। १। ९४) इति ककारोत्तर-वर्त्तिनः उकारस्य पररूपम्। **अथवा** कं जलम् उम्भति पूरयति स्वस्मिन् इति कुम्भः। क + उम्भ पूरणे (तु० प०) पूर्ववत् अण्-प्रत्ययः अकारस्य पररूपं च। **अथवा** कुम्भति स्वस्मिन् जलं प्रपूर्य गर्वति, कुम्भयति

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by S3 Foundation USA

आच्छादयति स्वस्मिन् जलं वा इति कुम्भः। कुभि गर्वे (काशकृत्स्नीये धातुपाठे भ्वा० प०), कुभि आच्छादने (चु० उ०) धातोः इदित्त्वात् 'इदितो नुम् धातोः' (पा० अ० ७। १। ५८) इति नुम्-आगमः। उकार-मकारानुबन्धलोपः। 'नश्चापदान्तस्य झलि' (पा० अ० ८। ३। २४) इति नकारस्य अनुस्वारः। 'अनुस्वारस्य ययि पर-सवर्णः' (पा० अ० ८। ४। ५८) इति अनुस्वारस्य परसवर्णः मकारः। 'नन्दि-ग्रहि-पचादिभ्यो०' (पा० अ० ३। १। १३४) इति अच्-प्रत्ययः। चकारानुबन्धलोपः। 'कुम्भोलूखलकं क्लीबे०' 'कुम्भौ तु पिण्डौ शिरसः' 'कुम्भौ घटेभ-मूर्धांशौ' इति चामरः। 'कुम्भः स्यात् कुम्भ-कर्णस्य सुते वेश्यापतौ घटे। राशिभेदे द्विपाङ्गे च कुम्भं त्रिवृति गुग्गुले' इति विश्वः। 'कुम्भो राश्यन्तरे हस्तिमूर्धांशे राक्षसान्तरे। कार्मुकं वारनार्यां च घटे क्लीबं तु गुग्गुलौ' इति मेदिनी। 'कार्मुके वारनार्यां च कुम्भः क्लीबं तु गुग्गुलौ' इति रभसः।

कुरूः स्त्री०। इत्यत्र **'ऊङाबन्तश्च' (लि० सू० ११) इति स्त्रीलिङ्गता।** करोति इति कुरुः। डुकृञ् करणे (त० उ०) 'कृ-ग्रोरुच्च' (उ० १। २४) इति कु-प्रत्ययः तथा धातोः ऋकारस्य 'उरण् रपरः' (पा० अ० १। १। ५१) इति सहकारेण उर्-आदेशः। कु-प्रत्यये ककारानुबन्धलोपः। कित्त्वात् पुनः 'पुगन्तलघूपधस्य च' (पा० अ० ७। ३। ८६) इति कुर् इत्यस्य उपधायाः उकारस्य प्राप्तः ओ-गुणः 'क्ङिति च' (पा० अ० १। १। ५) इत्यनेन निषेधात् न भवति। 'कुरुर्नृपान्तरे भक्ते पुमान् पुंभूम्नि नीवृति' इति मेदिनी। 'कुरुः कृन्ततेः' (निरु० ६। २३) कुरोः स्त्री कुरूः। कुरु-शब्दात् 'ऊङुतः' (पा० अ० ४। १। ६६) इति ऊङ्-प्रत्ययः। ङकारानुबन्धलोपः। 'अकः सवर्णे दीर्घः' (पा० अ० ६। १। १०१) इति उकारस्य ऊकारस्य च ऊ-दीर्घः।

कुलम् नपुं०। इत्यत्र **'लोपधः' (लि० सू० १४१) इति नपुंसकलिङ्गता।** कोलति संघातयति इति कुलम्। कुल संस्त्याने बन्धुषु च (भ्वा० प०) संस्त्यानं संघातः इति स्वामी। क्वचितु सन्तान इति पठ्यते। सन्तानः विस्तारः इति तदर्थः। बन्धु-शब्देन बन्धुतानुकूलो व्यापारो गृह्यते। कुल संख्याने गणनायाम् (काशकृत्स्नधातुपाठे भ्वा० प०) 'इगुपधज्ञा-प्री-किरः कः' (पा० अ० ३। १। १३५) इति क-प्रत्ययः। ककारा-नुबन्धलोपः। कित्त्वात् 'पुगन्तलघूपधस्य च' (पा० अ० ७। ३। ८६) इति धातोः उपधायाः उकारस्य प्राप्तः ओ-गुणः 'क्ङिति च' (पा० अ० १। १। ५) इति निषेधात् न भवति। **अथवा** कवते कुवते शब्दं करोति इति कुलम्। कुङ् शब्दे (भ्वा० आ०, तु० आ०) 'उणादयो बहुलम्' (पा० अ० ३। ३। १) इति उणादि-प्रत्ययानां बाहुलकत्वात्-'शीङो धुक्-लक्-वलञ्-वालनः' (उ० ४। ३९) इति लक्-प्रत्ययः। ककारानु-

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by S3 Foundation USA

बन्धलोपः। **अथवा** कुं भुवं कुत्सितं वा लाति ददाति आददाति वा इति कुलम्। कु + ला दाने (अ० प०) 'आतोऽनुपसर्गे कः' (पा० अ० ३। २। ३) इति क-प्रत्ययः। ककारानुबन्धलोपः। 'आतो लोप इटि च' (पा० अ० ६। ४। ६४) इति धातोः आकारस्य लोपः। **अथवा** कुं भुवं कौ भुवि वा लीयते इति कुलम्। कु + लूञ् छेदने (क्र्या० उ०), कु + लीङ् श्लेषणे (दि० आ०) 'अन्येष्वपि दृश्यते' (पा० अ० ३। २। १०१) इति ड-प्रत्ययः। डकारानुबन्धलोपः। डित्त्वात् 'टेः' (पा० अ० ६। ४। १४१) इति धातोः ऊकारस्य ईकारस्य च टेर्लोपः। 'सजातीयैः कुलम्' इत्यमरः। 'सन्ततिर्गोत्र-जनन-कुलान्यभिजनान्वयौ' इति चामरः। 'कुलं जनपदे गोत्रे सजातीयगणेऽपि च। भवने च तनौ क्लीबं कण्टकार्योपधौ कुली' इति मेदिनी। 'कुलं कुष्णातेः विकुपितं भवति' (निरु० ६। २३)

कुलिशः, कुलिशम् पुं०, नपुं०। इत्यत्रः **'दण्ड-मण्ड-खण्ड-शव-सैन्धव-पार्श्वाकाश-कुश०' (लि० सू० १८१) इति पुँल्लिङ्गता नपुंसकलिङ्गता।** 'श्राद्ध-कुलिश-देव-पीठ०' (लि० सू० १६६) इत्यनेन तु नपुंसकलिङ्गता एव। कुलिनः पर्वतान् श्यति तनूकरोति इति कुलिशः। कुलिन् + शो तनूकरणे (दि० प०) 'आदेच उपदेशेऽशिति' (पा० अ० ६। १। ४५) इति धातोः ओकारस्य आकारः। 'आतोऽनुपसर्गे कः' (पा० अ० ३। २। ३) इति क-प्रत्ययः। ककारानुबन्धलोपः। 'आतो लोप इटि च' (पा० अ० ६। ४। ६४) इति धातोः आकारस्य लोपः। 'नलोपः प्रातिपदिकान्तस्य' (पा० अ० ८। २। ७) इति नकारस्य लोपः। **अथवा** कुलौ हस्ते शेते इति कुलिशः। 'कुलिर्हस्तो भुजदलः' इति त्रिकाण्डशेषः। कुलि + शीङ् शयने (अ० आ०) 'अन्येष्वपि दृश्यते' (पा० अ० ३। २। १०१) इति ड-प्रत्ययः। डकारानुबन्धलोपः। डित्त्वात् 'टेः' (पा० अ० ६। ४। १४३) इति धातोः ईकारस्य टेर्लोपः। **अथवा** कु ईषत् लिशति अल्पीभवति कौ भुवि वा लिशति अल्पीभवति, कुं मस्तकं लिशति अल्पीकरोति वा इति कुलिशः। सर्वत्र कु + लिश अल्पीभावे (तु० प०) 'कर्मण्यण्' (पा० अ० ३। २। १) इति अण्-प्रत्ययः अथवा 'इगुपध-ज्ञा-प्री-किरः कः' (पा० अ० ३। १। १३५) इति क-प्रत्ययः। ककारानुबन्धलोपः। कित्त्वात् 'पुगन्तलघूपधस्य च' (पा० अ० ७। ३। ८६) इति धातोः उपधायाः प्राप्तः ओ-गुणः 'क्ङिति च' (पा० अ० १। १। ५) इति निषिध्यते। 'ह्रादिनी वज्रमस्त्री स्यात् कुलिशं भिदुरं पविः' इत्यमरः। 'कुलिशो न स्त्रियां प्रोक्तो दम्भोलौ, ना झषान्तरे' इति मेदिनी। 'कुलिश इति वज्रनाम' (निघं० २। २०) 'कुलिशः कुलशातनो भवति' (निरु० ६। १७)।

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by S3 Foundation USA

कुलीरम् नपुं०। इत्यत्र 'द्वाराग्र-स्फार-तक्र-वक्र-वप्र०' (लि० सू० ९०) इति नपुंसकलिङ्गता। कुलम् अस्य अस्ति इति कुली। कुल-शब्दात् 'अत इनि-ठनौ' (पा० अ० ५। २। ११५) इति इनि-प्रत्ययः। प्रत्यये नकारोत्तर-वर्त्तिनः इकारस्य लोपः। 'यस्येति च' (पा० अ० ६। ४। १४८) इति लकार-परवर्त्तिनः अकारस्य लोपः। एवं कुलिन् निष्पद्यते। ततः कुलिनम् ईरयति प्रेरयति इति कुलीरः। ईर क्षेपे (चु० उ०) 'क-प्रकरणे मूलविभुजादीनामुपसंख्यानम्' (वा० पा० अ० ३। २। ५) इति क-प्रत्ययः। ककारानुबन्धलोपः। कित्त्वात् 'पुगन्त-लघूपधस्य च' (पा० अ० ७। ३। ८६) इति धातोः उपधायाः ईकारस्य प्राप्तः ए-गुणः 'क्ङिति च' (पा० अ० १। १। ५) इति निषेधात् न भवति। 'नलोपः प्रातिपदिकान्तस्य' (पा० अ० ८। २। ७) इति कुलिन् इत्यस्य नकारस्य लोपः। 'अकः सवर्णे दीर्घः' (पा० अ० ६। १। १०१) इति इकारस्य ईकारस्य च ई-दीर्घः। **अथवा** कौ भूमौ लीयते **अथवा** कु ईषत् लीयते इति कुली। कु + लीङ् श्लेषणे (दि० आ०) 'सम्पदादिभ्यः क्विप्' (पा० अ० ३। ३। १०८) इति अथवा 'क्विप् च' (पा० अ० ३। २। ७६) इति क्विप्-प्रत्ययः। क्विप्-प्रत्यस्य सर्वापहारि-लोपः। एवं कुली निष्पद्यते। तम् ईरयति इति कुलीरः। पूर्ववत् कुली + ईर् धातोः क-प्रत्ययः। ककारानुबन्धलोपः। कित्त्वात् धातोः ईकारस्य प्राप्तः ए-गुणः 'क्ङिति च' (पा० अ० १। १। ५) इति निषिध्यते। 'अकः सवर्णे दीर्घः' (पा० अ० ६। १। १०१) इति ईकारस्य ईकारस्य च ई-दीर्घः। अथवा कुलिया कुलियि वा रमते इति कुलीरः। कुली + रमु क्रीडायां (भ्वा० आ०) 'अन्येष्वपि दृश्यते' (पा० अ० ३। २। १०१) इति ड-प्रत्ययः। डकारानुबन्धलोपः। डित्त्वात् 'टेः' (पा० अ० ६। ४। १४३) इति धातोः टेः अम् इत्यस्य टेर्लोपः। अथवा कुलियं राति ददाति आददाति वा इति कुलीरः। कुली + रा दाने (अ० पं०) 'आतोऽनुपसर्गे कः' (पा० अ० ३। २। ३) इति क-प्रत्ययः। ककारानुबन्धलोपः। कित्त्वात् 'आतो लोप इटि च' (पा० अ० ६। ४। ६४) इति धातोः आकारस्य लोपः। **अथवा** कोलति संघातयति इति कुलीरः। कुल संस्त्याने बन्धुषु च (भ्वा० प०) संस्त्यानं संघातः इति स्वामी। क्वचित्तु सन्तान इति पठ्यते। सन्तानः विस्तार इति तदर्थः। बन्धु शब्देन बन्धुतानुकूलो व्यापारो गृह्यते। कुल संख्याने गणनायां (काशकृत्स्न-धातुपाठे भ्वा० प०) 'उणादयो बहुलम्' (पा० अ० ३। ३। १) इति उणादि-प्रत्ययानां बाहुलकत्वात् 'कृ-शृ-पॄ-कटि-पटि-शौटिभ्य ईरन्' (उ० ४। ३१) इति ईरन्-प्रत्ययः। नकारानुबन्धलोपः। **अथवा** यत् क्रियते तत् कुरीरं, यत् करोति वा तत् कुरीरम्। डुकृञ् करणे (त० उ०) 'कृञ उच्च' (उ० ४। ३४) इति

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by S3 Foundation USA

ईरन्-प्रत्ययः तथा धातोः ऋकारस्य 'उरण् रपरः' (पा० अ० १।१।५१) इति सहकारेण उर्-आदेशः। प्रत्यये नकारानुबन्धलोपः। एवं कुरीर-शब्दः व्युत्पद्यते। अत्र 'कपिलकादीनां संज्ञाच्छन्दसोर्वा रो लत्वमापद्यते' (वा० पा० अ० ८।२।१८) इति रस्य लः। एवमपि कुलीरः व्युत्पद्यते। 'स्यात् कुलीरः कर्कटकः' इत्यमरः।

कुशः, कुशम् पुं०, नपुं०। इत्यत्र **'दण्ड-मण्ड-खण्ड-शव०' (लि० सू० १८१) इति पुँल्लिङ्गता नपुंसकलिङ्गता च।** कुश्यति संश्लिष्यति भुवं ग्राहकं वा इति कुशः कुशं वा। कुश संश्लेषे (दि० प०) 'इगुपध-ज्ञा-प्री-किरः कः' (पा० अ० ३।१।१३५) इति क-प्रत्ययः। ककारानुबन्धलोपः। कित्त्वात् धातोः उपधायाः उकारस्य 'पुगन्तलघूपधस्य च' (पा० अ० ७।३।८३) इति प्राप्तः ओ-गुणः 'क्ङिति च' (पा० अ० १।१।५) इति निषिध्यते। **अथवा** कौ भूमौ शेते इति कुशः कुशं वा। कु + शीङ् शयने (अ० आ०) 'अन्येष्वपि दृश्यते' (पा० अ० ३।२।१०१) इति ड-प्रत्ययः। डकारानुबन्धलोपः। डित्त्वात् 'टेः' (पा० अ० ६।४।४३) इति धातोः टेः ईकारस्य लोपः। **अथवा** कुं भूमिं मस्तकं वा श्यति खण्डयति इति कुशः कुशं वा। कु + शो तनूकरणे (दि० प०) 'आदेच उपदेशेऽशिति' (पा० अ० ६।१।४५) इति धातोः ओकारस्य आकारः। 'आतोऽनुपसर्गे कः' (पा० अ० ३।२।३) इति क-प्रत्ययः। ककारानुबन्धलोपः। 'आतो लोप इटि च' (पा० अ० ६।४।६४) इति धातोः आकारस्य लोपः। 'अस्त्री कुशं कुथो दर्भः पवित्रम्' इत्यमरः। 'कुशमप्सु च' इति चामरः। 'कुशो रामसुते दर्भे योक्त्रे द्वीपे कुशं जले' इति विश्वः। 'कुशो रामसुते द्वीपे पापिष्ठे योक्त्र-मत्तयोः। कुशी फाले कुशो दर्भे कुशा वल्गा कुशं जले' इति हैमः।

कुसुमम्, कुसुमः नपुं०, पुं०। इत्यत्र **'संग्राम-दाडिम-कुसुमाश्रम-क्षेम-क्षौम-होमोद्यामानि नपुंसके च' (लि० सू० ८५) इत्यनेन नपुंसकलिङ्गता पुँल्लिङ्गता च। 'बल-कुसुम-शुल्ब-पत्तन-रणाभिधानानि' (लि० सू० १५८) इत्यनेन तु नपुंसक-लिङ्गता एव।** कुस्यति श्लिष्यति इति कुसुमं कुसुमः वा। कुस संश्लेषणे (दि० प०) 'कुसेरुम्भोमेदेताः' (उ० ४।१०७) इति उम-प्रत्ययः। बाहुलकात् अत्र धातोः उपधाया उकारस्य 'पुगन्त-लघूपधस्य च' (पा० अ० ७।३।८६) इति ओकारः गुणः न। **अथवा** सु सुष्ठु माति, मिमीते, मायते मीयते वा इति सुमम्। सु + मा माने (अ० प०) माङ् माने शब्दे च (जु० आ०), माङ् माने (दि० आ०) 'आतश्चोपसर्गे' (पा० अ० ३।१।१३६) इति क-प्रत्ययः। ककारानुबन्धलोपः। 'आतो लोप इटि च' (पा० अ० ६।४।६४) इति धातोः आकारस्य लोपः। **अथवा** सु सुष्ठु मन्यते मान्यते वा इति

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by S3 Foundation USA

सुमम्। सु + मन् ज्ञाने (दि० आ०), मनु अवबोधने (त० आ०) 'अन्येष्वपि दृश्यते' (पा० अ० ३। २। १०१) इति ड-प्रत्ययः। डकारानुबन्धलोपः। डित्त्वात् 'टेः' (पा० अ० ६। ४। १४३) इति धातोः अन् इत्यस्य टेर्लोपः। एवं सुम-शब्दः व्युत्पद्यते। 'ततः कु कुत्सितं कौ भूमौ वा सुमम्' इति कुसुमं कुसुमो वा। 'स्त्रियः सुमनसः पुष्पं प्रसूनं कुसुमं सुमम्' इत्यमरः। 'कुसुमं स्त्री रजो-नेत्ररोगयोः फल-पुष्पयोः' इति हैमः।

कुसूलः पुं०। इत्यत्र **'तूलोपल-ताल-कुसूल-तरल-कम्बल-देवल-वृषलाः पुंसि' (लि० सू० १४२) इति पुँल्लिङ्गता।** कुस्यति श्लिष्यति इति कुसूलः धान्य-पात्रं वा। कुस संश्लेषणे (दि० प०) 'खर्जि-पिञ्जादिभ्य ऊरोलचौ' (उ० ४। ९१) इति ऊलच्-प्रत्ययः। चकारानुबन्धलोपः। **अथवा** कौ भूमौ सूते इति कुसूः। कु + पूङ् प्राणिगर्भ-विमोचने (अ० आ०) 'क्विप् च' (पा० अ० ३। २। ७६) इति क्विप्-प्रत्ययः। तस्य सर्वापहारिलोपः। कुसुवं लाति लुनाति वा इति कुसूलः। कुसू + ला दाने (अ० प०), लूञ् छेदने (क्र्या० उ०) 'अन्वेष्वपि दृश्यते' (पा० अ० ३। २। १०१) इति ड-प्रत्ययः। डकारानुबन्धलोपः। डित्त्वात् ला-धातोः आकारस्य तथा लू-धातोः ऊकारस्य 'टेः' (पा० अ० ६। ४। १४३) टेर्लोपः। 'कुसूलं च कुसीदं च मध्यदन्त्यमुदाहृतम्' इति विश्व-प्रामाण्याद् अयं दन्त्यसकारवान् शब्दः।

कुहरम् नपुं०। **इत्यत्र 'द्वाराग्र-स्फार-तक्र-वक्र-वप्र-क्षिप्र०' (लि० सू० ९०) इति नपुंसकलिङ्गता।** कुहयते विस्मापयति इति कुहः। कुह विस्मापने (चु० आ०) 'इगुपध-ज्ञा-प्री-किरः कः' (पा० अ० ३। १। १३५) इति क-प्रत्ययः। ककारानुबन्धलोपः। कित्त्वात् धातोः उपधायाः उकारस्य 'पुगन्तलघूपधस्य च' (पा० अ० ७। ३। ८६) इति प्राप्तः ओ-गुणः 'क्ङिति च' (पा० अ० १। १। ५) इति निषिध्यते। कुह कुत्र कुहं वा राति ददाति आददाति वा इति कुहरम्। कुह + रा दाने (अ० प०) 'आतोऽनुपसर्गे कः' (पा० अ० ३। २। ३) इति क-प्रत्ययः। ककारानुबन्धलोपः। 'आतो लोप इटि च' (पा० अ० ६। ४। ६४) इति धातोः आकारस्य लोपः। **अथवा** कुं भूमिं हरति इति कुहरम्। कु + हृञ् हरणे (भ्वा० उ०) 'हरतेरनुद्यमनेऽच्' (पा० अ० ३। २। ९) इति अच्-प्रत्ययः। चकारानुबन्धलोपः। 'सार्वधातुकार्धधातुकयोः' (पा० अ० ७। ३। ८४) इति धातोः ऋकारस्य 'उरण् रपरः' (पा० अ० १। १। ५१) इति सहकारेण अर्-गुणः। **अथवा** कुह कुत्र रमते इति कुहरम्। कुह + रमु क्रीडायाम् (भ्वा० अ०) 'अन्येष्वपि दृश्यते' (पा० अ० ३। २। १०१) इति ड-प्रत्ययः। डकारानुबन्धलोपः। 'टेः' (पा० अ० ६। ४। १४३) इति धातोः अम् इत्यस्य टेर्लोपः। 'कुहरं सुषिरं बिलम्' इत्यमरः। 'कुहरं गह्वरे छिद्रे क्लीबं नागान्तरे पुमान्' इति मेदिनी।

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by S3 Foundation USA

कुहूः स्त्री०। इत्यत्र **'धेनु-रज्जु-कुहू-सरयु-तनु-रेणु-प्रियङ्गवः स्त्रियाम्' (लि० सू० ५२) इति स्त्रीलिङ्गता।** कोहति हिनस्ति गच्छति विनाशयति, कोहयते विस्मापयति वा इति कुहूः। कुह हिंसागत्योः (काशकृत्स्न-धातुपाठे भ्वा० प०), कुह विस्मापयने (चु० आ०) 'उणादयो बहुलम्' (पा० अ० ३। ३। १) इति उणादि-प्रत्ययानां बाहुलकत्वात् 'नृति-शृध्योः कूः' (उ० १।९१) इति कू-प्रत्ययः। ककारानुबन्धलोपः। प्रत्ययस्य कित्त्वात् 'पुगन्तलघूपधस्य च' (पा० अ० ७।३।८६) इति धातोः उपधायाः उकारस्य प्राप्तः ओ-गुणः 'क्ङिति च' (पा० अ० १।१।५) इति निषेधात् न भवति। **अथवा** 'मृगय्वादयश्च' (उ० १। ३७) इति कु-प्रत्ययः। ककारानुबन्धलोपः। अत्र अपि कु-प्रत्ययस्य कित्त्वात् 'पुगन्त-लघूपधस्य च' (पा० अ० ७। ३। ८६) इति धातोः उपधायाः उकारस्य प्राप्तः ओ-गुणः 'क्ङिति च' (पा० अ० १। १। ५) इति निषिध्यते। ततः कुहु-शब्दात् स्त्रियाम् 'ऊङुतः' (पा० अ० ४। १। ६६) इति ऊङ्-प्रत्ययः। ङकारानु-बन्धलोपः। 'अकः सवर्णे दीर्घः' (पा० अ० ६। १। १०१) इति उकारस्य ऊकारस्य च ऊ-दीर्घः। 'सा नष्टेन्दुकला कुहूः' इत्यमरः। 'कुहूः स्त्री कोकिलालाप-नष्टेन्दुकलदर्शयोः' इति मेदिनी। 'सिनीवाली कुहूरिति देवपत्न्याविति नैरुक्ताः। अमावास्ये इति याज्ञिकाः। या पूर्वामावास्या सा सिनीवाली। योत्तरा सा कुहूरिति विज्ञायते' (निरु० ११। ३१) 'कुहू गूहतेः। क्वाभूदिति वा। क्व सती हूयते इति वा। क्वाहुतं हवि-र्जुहोतीति वा। तस्या एषा भवति।' (निरु० ११। ३२)

कूटम्, कूटः नपुं०, पुं०। इत्यत्र **'कुट-कूट-कपट-कवाट-कर्पट-नट-निकट-कीट-कटानि नपुंसके च' (लि० सू० ६६) इति नपुंसकलिङ्गता पुँल्लिङ्गता च।** कूटयति इति कूटः। कूट आप्रदाने, अवसादने इत्येके। कूट परितापे परिदाहे इत्यन्ये (चु० उ०) 'नन्दि-ग्रहि-पचादिभ्यो०' (३। १। १३४) इति अच्-प्रत्ययः। चकारानु-बन्धलोपः। अत्र 'इगुपध-ज्ञा-प्री-किरः कः' (पा० अ० ३। १। १३५) इति-क-प्रत्ययस्तु न संभवति धातोः चुरादिगणीयत्वेन णिजन्तत्वाद् इगुपधत्वाभावात्। अथवा चौरादिकणिचो वैकल्पिकतया णिचोऽभावे पूर्वोक्तः क-प्रत्ययः अपि भवति। तदा क-प्रत्यये ककारानुबन्धलोपः। **अथवा** कूट्यते इति कूटं कूटो वा। कूट-धातोः 'भावे' (पा० अ० ३। ३। १८) इति घञ्-प्रत्ययः। घकार-ञकारानुबन्धलोपः। 'कूटो-ऽस्त्री शिखरं शृङ्गम्' इत्यमरः। 'पुञ्ज-राशी तूत्करः कूटमस्त्रियाम्' इत्यमरः। 'माया-निश्चलयन्त्रेषु कैतवानृतराशिषु। अयोधने शैलशृङ्गे सीराङ्गे कूटमस्त्रियाम्।' इति चामरः। 'कूटं पूर्द्वारयन्त्रयोः। मायादम्भाद्रिशृङ्गेषु सीराङ्गेऽनृततुच्छयोः। निश्चलेऽयोघने राशौ' इति हैमः।

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by S3 Foundation USA

कूर्चः, कूर्चम् पुं०, नपुं०। इत्यत्र **'व्रज-कुञ्ज-कुथ-कूर्च-प्रस्थ-दर्पार्भार्धर्च-दर्भ-पुच्छाः' (लि० सू० १७९) इति पुँल्लिङ्गता नपुंसकलिङ्गता च।** कुरति शब्दं करोति इति कूर्चः। कुर शब्दे (त० प०) धातोः 'उणादयो बहुलम्' (पा० अ० ३। ३। १) इति उणादिप्रत्ययानां बाहुलकत्वात् 'कुवश्चट् दीर्घश्च' (उ० ४। ९२) इति चट् प्रत्ययः धातोः उकारस्य ऊ-दीर्घश्च। टकारानुबन्धलोपः। 'कूर्चमस्त्री भ्रुवोर्मध्यम्' इत्यमरः। 'कूर्चमस्त्री भ्रुवोर्मध्ये कत्थनश्मश्रुकैतवे' इति मेदिनी।

कूलम् नपुं०। इत्यत्र **'लोपधः' (लि० सू० १४१) इति नपुंसकलिङ्गता।** कूलति आवृणोति इति कूलम्। कूल आवरणे (भ्वा० प०) 'नन्दि-ग्रहि-पचादिभ्यो०' (पा० अ० ३। १। १३४) इति अच्-प्रत्ययः। चकारानुबन्धलोपः। अथवा कौति शब्दं करोति इति कूलम्। कु शब्दे (अ० प०) 'उणादयो बहुलम्' (पा० अ० ३। ३। १) इति उणादिप्रत्ययानां बाहुलकत्वात् 'खर्जि-पिञ्जादिभ्य ऊरोलचौ' (उ० ४। ९१) इति ऊलच्-प्रत्ययः। चकारानुबन्धलोपः। 'अकः सवर्णे दीर्घः' (पा० अ० ६। १। १०१) इति उकारस्य ऊकारस्य च ऊ-दीर्घः। 'कूलं रोधश्च तीरं च प्रतीरं च तटं त्रिषु' इत्यमरः। 'कूलं रुजतेर्विपरीतात्' (निरु० ६। १)।

कृच्छ्रम् नपुं०। इत्यत्र **'द्वाराग्र-स्फार-तक्र-वक्र-वप्र०' (लि० सू० ९०) इति नपुंसकलिङ्गता।** कृन्तति छिनत्ति, कृणत्ति वेष्टते, कृत्यते छिद्यते वेष्ट्यते वा अनेन इति कृच्छ्रम्। कृती छेदने (तु० प०), कृती वेष्टने (रु० प०) 'कृतेश्छः क्रू च' (उ० २। २१) इति रक्-प्रत्ययः एवं धातोः तकारस्य छकारादेशश्च। ककारानुबन्धलोपः। कित्त्वात् धातोः उपधायाः ऋकारस्य 'पुगन्तलघूपधस्य च' (पा० ७। ३। ८६) इति 'उरण् रपरः' (पा० अ० १। १। ५१) इति सहकारेण प्राप्तः अर्-गुणः 'क्ङिति च' (पा० अ० १। १। ५) इति निषिध्यते। 'छे च' (पा० अ० ६। १। ७३) इति धातोः ऋकारस्य अग्रे 'आद्यन्तौ टकितौ' (पा० अ० १। १। ४६) इति व्यवस्थानुसारेण तुगागमः। उकार-ककारानुबन्धलोपः। 'झलां जशोऽन्ते' (पा० अ० ८। २। ३९) इति तकारस्य दकारः। 'स्तोः श्चुना श्चुः' (पा० अ० ८। ४। ४०) इति दकारस्य जकारः। 'खरि च' (पा० अ० ८। ४। ५५) इति जकारस्य चकारः। 'स्यात् कष्टं कृच्छ्रमाभीलम्' तथा 'कृच्छ्रं सान्तपनादिकम्' इत्यमरः। 'कृच्छ्रमंहसि। कष्टे सान्तपने' इति हैमः। 'कृच्छ्रं पापसन्तापनादिनोः' इति मेदिनी। 'गोमूत्रं गोमयं क्षीरं दधि सर्पिः कुशोदकम्। एकसत्रोपवासश्च कृच्छ्रं सान्तपनं स्मृतम्' इति मनुः (११। २१२)।

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by S3 Foundation USA

कृतिः स्त्री०। इत्यत्र 'क्तिन्नन्तः' (लि० सू० ९) इति स्त्रीलिङ्गता। करणं कृतिः। डुकृञ् करणे (त० उ०) 'स्त्रियां क्तिन्' (पा० अ० ३। ३। ९४) इति क्तिन्-प्रत्ययः। ककार-नकारानुबन्धलोपः। कित्त्वात् 'उरण् रपरः' (पा० अ० १।१।५१) इति सहकारेण 'पुगन्तलघूपधस्य च' (पा० अ० ७। ३। ८६) इति धातोः ऋकारस्य प्राप्तः अर्-गुणः 'क्ङिति च' (पा० अ० १। १। ५) इति निषिद्यते।

कृषिः स्त्री०। इत्यत्र 'दर्वि-विदि-वेदि-खनि-शान्यश्रि-वेशि-कृष्योषधि-कट्यङ्गुलयः' (लि० सू० २४) इति स्त्रीलिङ्गता। कृष्यते विलिख्यते या सा कृषिः। कृष विलेखने (भ्वा० प०, तु० उ०) 'इगुपधात् कित्' (उ० ४। १२१) इति इन्-प्रत्ययः, स च कित्। नकारानुबन्धलोपः। कित्त्वात् 'उरण् रपरः' (पा० अ० १। १। ५१) इति सहकारेण 'पुगन्तलघूपधस्य च' (पा० अ० ७। ३। ८६) इति धातोः उपधायाः ऋकारस्य प्राप्तः अर्-गुणः 'क्ङिति च' (पा० अ० १। १। ५) इति निषेधात् न भवति। 'अनृतं कृषिः' इत्यमरः।

कृषी स्त्री०। इत्यत्र 'ईकारान्तश्च' (लि० सू० १०) इति स्त्रीलिङ्गता। पूर्वं कृषि-शब्दः व्याख्यातः तत्र कृषि-शब्दात् 'कृदिकारादक्तिनः' (वा० पा० अ० ४। १। ४५) इति ङीष्-प्रत्ययः। ङकार-षकारानुबन्धलोपः। 'यस्येति च' (पा० अ० ६। ४। ४८) इति षकारोत्तरवर्त्तिनः इकारस्य लोपः।

केदारम् नपुं०। इत्यत्र 'द्वाराग्र-स्फार-तक्र-वक्र-वप्र-क्षिप्र०' (लि० सू० ९०) इति नपुंसकलिङ्गता। केन जलेन दीर्यते इति केदारम्। क + दॄ विदारणे (क्र्या० प०) 'अकर्त्तरि च कारके संज्ञायाम्' (पा० अ० ३। ३। १९) इति कर्मणि घञ्-प्रत्ययः। घकार-ञकारानुबन्धलोपः। 'अचो ञ्णिति' (पा० अ० ७। २। ११५) इति धातोः ॠकारस्य 'उरण् रपरः' (पा० अ० १। १। ५१) इति सहकारेण आर्-वृद्धिः। 'केदाराद्यञ्च' (पा० ४। २। ४०) इति निर्देशात् ककारोत्तरवर्त्तिनः अकारस्य एकारः। अथवा के मूर्ध्नि जले वा दारः अस्य इति केदारम्। के इत्यस्य दार-शब्देन सह 'सप्तमी शौण्डैः' (पा० अ० २। १। ४०) इति समासः। 'सुपो धातु-प्रातिपदिकयोः' (पा० अ० २। ४। ७१) इति प्राप्तः सुपः लुक् 'हलदन्तात् सप्तम्याः संज्ञायाम्' (पा० अ० ६। ३। ९७) इति निषेधात्, न भवति। तेन क + इ + दारम् इति स्थितौ 'आद्-गुणः' (पा० अ० ६। १। ८) इति अकारस्य इकारस्य च ए-गुणः। 'पुंनपुंसकयोर्वप्रः केदारः क्षेत्रम्' इत्यमरः। 'केदारोऽद्रौ शिवे क्षेत्रे भूमिभेदालवालयोः' इति विश्वः।

केयूरम् नपुं०। इत्यत्र 'द्वाराग्र-स्फार-तक्र-वक्र-वप्र-क्षिप्र०' (लि० सू० ९०) इति नपुंसकलिङ्गता। के बाहुमस्तके यौति इति केयूरम्। के - यु मिश्रणामिश्रणयोः

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by S3 Foundation USA

(अ० प०) 'खर्जि-पिञ्जादिभ्यः' (उ० ४।९१) इति ऊर-प्रत्ययः। बाहुलकात् धातोः उकारस्य टेर्लोपः। 'हलदन्तात् सप्तम्याः संज्ञायाम्' (पा० अ० ६।३।९) इति सप्तम्याः 'सुपो धातुप्रातिपदिकयोः' (पा० अ० २।४।७१) इति प्राप्तः लुक् निषिध्यते। 'केयूरमङ्गदं तुल्ये' इत्यमरः।

केलिः स्त्री०। इत्यत्र **'तिथि-नाडि-रुचि-वीचि-नालि-धूलि-किकि-केलिच्छवि-रात्र्यादयः' (लि० सू० २५) इति स्त्रीलिङ्गता।** केलनं केलिः किलति क्रीडति यस्यां सा केलिः। किल श्वैत्य-क्रीडनयोः (तु० प०) 'सर्व-धातुभ्य इन्' (उ० ४।११९) इति इन्-प्रत्ययः। नकारानुबन्धलोपः। 'पुगन्तलघूपधस्य च' (पा० अ० ७।३।८६) इति धातोः उपधायाः इकारस्य ए-गुणः। अथवा केलति चलति यस्यां सा केलिः केलति वा केलिः, **यद्वा** केल्यति विलसति इति केलिः। केलृ चलने (भ्वा० प०), केला विलासे (कण्वा० प०) पूर्ववत् इन्-प्रत्ययः, नकारानुबन्धलोपश्च। 'द्रव-केलि-परीहासा क्रीडा खेला च नर्म च' इत्यमरः। 'केलीषु तद्गानगुणान्निपीय' इति नैषधप्रयोगात् दीर्घेकारान्तोऽपि केलीशब्दः। तदा पूर्वोक्त-केलि शब्दात् स्त्रियां 'कृदिकारादक्तिनः' (वा० पा० अ० ४।१।४५) इति ङीप्-प्रत्ययः। ङकार-पकारानुबन्धलोपः। 'यस्येति च' (पा० अ० ६।४।४८) इति लकारोत्तरवर्त्तिनः इकारस्य लोपः।

केशः पुं०। इत्यत्र **'देवासुरात्म-स्वर्ग-गिरि-समुद्र-नख-केश-दन्त-स्तन-भुज-कण्ठ-खड्ग-शर-पङ्काभिधानानि' (लि० सू० ४६) इति पुँल्लिङ्गता।** क्लिश्यते कष्टम् अवाप्नोति येन स केशः। क्लिश उपतापे (दि० आ०) **अथवा** क्लिश्नाति विबाधते इति केशः। क्लिशू विबाधने (क्र्या० प०) 'क्लिशेरन् लो लोपश्च' (उ० ५।३३) इति अन्-प्रत्ययः धातोः लकारस्य लोपश्च। नकारानुबन्धलोपः। 'पुगन्तलघूपधस्य च' (पा० अ० ७।३।८६) इति धातोः उपधायाः इकारस्य ए-गुणः। **अथवा** के मस्तके शेते इति केशः। के + शीङ् शयने (अ० आ०) 'अन्येष्वपि दृश्यते' (पा० अ० ३।२।१०१) इति ड-प्रत्ययः। डकारानुबन्धलोपः। डित्त्वात् 'टेः' (पा० अ० ६।४।१४३) इति धातोः ईकारस्य टेर्लोपः। 'हलदन्तात् सप्तम्याः संज्ञायाम्' (पा० अ० ६।३।९) इति क-शब्दोत्तर-सप्तम्याः ङि प्रत्ययस्य 'सुपो धातु-प्रातिपदिकयोः' (पा० अ० ६।३।९) इति प्राप्तस्य लुकः निषेधः। **अथवा** कस्य जलस्य शिरसः वा ईशः इति केशः। क + ईशः इत्यत्र 'आद्गुणः' (पा० अ० ६।१।८७) इति अकारस्य ईकारस्य च ए-गुणः। 'कचः केशः शिरोरुहः' इत्यमरः। 'केशः स्यात् पुंसि वरुणे ह्रीबेरे कुन्तलेऽपि च' इति मेदिनी।

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by S3 Foundation USA

कोटिः स्त्री०। इत्यत्र 'लक्षा कोटिः स्त्रियाम्' (लि० सू० १४६) इति स्त्रीलिङ्गता। कुटति कुटिलः भवति इति कोटिः। कुट कौटिल्ये (तु० प०), कुट्यते गम्यते कोटयति कोटयते कोट्यते छेद्यते वा इति कोटिः। कुट गतौ (काशकृत्स्नधातुपाठे भ्वा० प०), कुट छेदने (चु० आ०) सर्वत्र 'सर्वधातुभ्य इन्' (उ० ४। ११९) इति इन्-प्रत्ययः। नकारानुबन्धलोपः। तौदादिकस्य कुट-धातोः 'गाङ्-कुटादिभ्योऽञ्णिन्ङित्' (पा० अ० १।२।१) इति ङित्त्वात् 'क्ङिति च' (पा० अ० १।१।५) इति निषेधात् 'पुगन्तलघूपधस्य च' (पा० अ० ७।३।८६) इति धातोः उपधायाः उकारस्य ओ-गुणाभावे प्राप्ते अपि अत्र बाहुलकात् एव ओ-गुणः। काशकृत्स्नधातुपाठे भौवादिके चौरादिके च कुट धातौ ङित्त्वाभावात् गुणनिषेधाभावेन गुणः स्वभावतः भवत्येव। तत्र बाहुलकात् गुणकरणस्य आवश्यकता न आपतति। कोटिः स्त्री धनुषोऽग्रेऽश्रौ संख्याभेद-प्रकर्षयोः इति मेदिनी। 'अत्युत्कर्षाश्रयः कोट्यः' तथा 'कोणस्तु स्त्रियः पाल्यश्रि-कोटयः' इत्यमरः। 'कोटिरस्याटनी' इति चामरः।

कौलिः पुं०। इत्यत्र 'ऋषि-राशि-दृति-ग्रन्थि-क्रिमि-ध्वनि-बलि-कौलि-मौलि-रवि-कवि-कपि-मुनयः' (लि० सू० १०९) इति पुँल्लिङ्गता। कुं भूमिं लाति ददाति आदत्ते वा इति कुलः। कु + ला दाने (अ० प०) 'आतोऽनुपसर्गे कः' (पा० अ० ३।२।३) इति क-प्रत्ययः। ककारानुबन्धलोपः। 'आतो लोप इटि च' (पा० अ० ६।४।६४) इति धातोः आकारस्य लोपः। एवं कुलशब्दः निष्पद्यते। अथवा कोलति संघातयति इति कुलः। कुल संस्त्याने बन्धुषु च (भ्वा० प०) संस्त्यानं संघातः इति स्वामी। क्वचित्तु सन्तान इति पठ्यते। सन्तानः विस्तारः इति तदर्थः। बन्धु-शब्देन बन्धुतानुकूल-व्यापारः गृह्यते। कुल संख्याने गणनायाम् (काशकृत्स्नधातुपाठे भ्वा० प०) 'इगुपध-ज्ञा-प्री-किरः कः' (पा० अ० ३।१।१३५) इति क-प्रत्ययः। ककारानुबन्धलोपः। कित्त्वात् 'पुगन्तलघूपधस्य च' (पा० अ० ७।३।८६) इति धातोः उपधायाः उकारस्य प्राप्तः ओ-गुणः 'क्ङिति च' (पा० अ० १।१।५) इति निषेधात् न भवति। एवम् अपि कुल-शब्दः व्युत्पद्यते। अथवा कुं भूमिं लुनाति छिनत्ति इति कुलः। अथवा कौ भूमौ लीयते इति कुलः। कु + लूञ् छेदने (क्र्या० उ०) कु + लीङ् श्लेषणे (दि० आ०) उभयत्र इपि 'अन्येष्वपि दृश्यते' (पा० अ० ३।२।१०१) इति ड-प्रत्ययः। डकारानुबन्धलोपः। डित्त्वात् 'टेः' (पा० अ० ६।४।१४३) इति लू धातौ ऊकारस्य तथा ली धातौ ईकारस्य टेर्लोपः। एवम् अपि कुल-शब्दः निष्पद्यते। ततः कुलस्य अपत्यं पुमान् इति कौलिः। कुल-शब्दात् 'अत इञ्' (पा० अ० ४।१।

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by S3 Foundation USA

९५) इति इञ्-प्रत्ययः। ञकारानुबन्धलोपः। 'यस्येति च' (पा० अ० ६। ४। १४८) इति कुल-शब्दे लकारोत्तर-वर्त्तिनः अकारस्य लोपः। 'तद्धितेष्वचामादेः' (पा० अ० ७। २। ११७) इति ककारोत्तरवर्त्तिनः उकारस्य औ-वृद्धिः एवं कौलि-शब्दः सिध्यति।

क्रतुः पुं०। इत्यत्र **'क्रतु-पुरुष-कपोल-गुल्फ-मेघाभिधानानि' (लि० सू० ४९) इति पुँल्लिङ्गता।** यः करोति कार्याणि येन क्रियते वा कार्यं सः क्रतुः। डुकृञ् करणे (त० उ०) 'कृञः कतुः' (उ० १। ७६) इति कतु-प्रत्ययः। ककारानुबन्धलोपः। कित्त्वात् 'सार्वधातुकार्धधातुकयोः' (पा० अ० ७। ३। ८४) इति धातोः ऋकारस्य 'उरण् रपरः' (पा० अ० १। १। ५१) इति सहकारेण प्राप्तः अर्-गुणः 'क्ङिति च' (पा० अ० १। १। ५) इति निषेधात् न भवति। 'इकोयणचि' (पा० अ० ६। १। ७७) इति धातोः ऋकारस्य र्-यणादेशः। 'यज्ञः सवोऽध्वरो यागः सप्ततन्तुर्मखः क्रतुः' इत्यमरः। 'क्रतुर्यज्ञे मुनौ पुंसि' इति मेदिनी। 'क्रतुः कर्मनाम' (निघं० २। १)। 'क्रतुः प्रज्ञा-नाम' (निघं० ३। ९)। 'स यदेव मनसाऽकामयतऽइदं मे स्यादिदं कुर्वीयेति स एव क्रतुः' (शत० ब्रा० ४। १। ४। १)। 'हृत्सु ह्ययं क्रतुर्मनोजवः प्रविष्टः' (शत० ब्रा० ३। ३। ४। ७)। 'क्रतुं दक्षं वरुण सं शिशाधि' (ऋ० ८। ४२। ३)। 'मित्र एव क्रतुः' (शत० ब्रा० ४। १। ४। १)।

क्रिमिः पुं०। इत्यत्र **'ऋषि-राशि-दृति-ग्रन्थि-क्रिमि-ध्वनि-बलि-कौलि-मौलि-रवि-कवि-कपि-मुनयः' (लि० सू० १०९) इति पुँल्लिङ्गता।** यः क्राम्यति पादविक्षेपं करोति सः क्रिमिः। क्रमु पादविक्षेपे (भ्वा० प०) 'क्रमि-तमि-शति-स्तम्भामत इच्च' (उ० ४। १२३) इति इन्-प्रत्ययः स च कित्, धातोः उपधायाः अकारस्य इकारादेशश्च। नकारानुबन्धलोपः। प्रत्ययस्य कित्त्वात् 'पुगन्तलघूपधस्य च' (पा० अ० ७। ३। ८६) इति धातोः उपधायाः इकारस्य प्राप्तः ए-गुणः 'क्ङिति च' (पा० अ० १। १। ५) इति निषेधात् न भवति। 'कृमिर्ना क्रिमिवत् कीटे लाक्षायां क्रमिले खरे' इति विश्व-मेदिन्यौ। 'पारतं पारदं वास्रो वासरः क्रिमिवत् कृमिः' इति द्विरूपकोषः। 'द्रुमामये भवेत् पुंसि कीटे च क्रिमि वा कृमिः' इति रभसः। 'दुर्नामा क्रिमिर्भवति। पापनामा। क्रिमिः क्रव्ये मेद्यति। क्रमतेर्वा स्यात् मरणकर्मणः क्रामतेर्वा' (निरु० ६। १२)।

क्रूरम् नपुं०। इत्यत्र **'द्वाराग्र-स्फार-तक्र-वक्र-वप्र-क्षिप्र-क्षुद्र-नार-तीर-दूर-कृच्छ्र-रन्ध्राश्र-श्वभ्र-भीर-गभीर-क्रूर-विचित्र-केयूर०' (लि० सू० ९०) इति नपुंसक-लिङ्गता।** कृन्तति छिनत्ति इति क्रूरः कृती छेदने (तु० प०)। कृणत्ति वेष्टयति इति क्रूरः कृती वेष्टने (रु० प०) 'कृतेश्छः क्रू च' (उ० २। २१) इति रक्-प्रत्ययः धातोः क्रू

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by S3 Foundation USA

इत्यादेशश्च। रक्-प्रत्यये ककारानुबन्धलोपः। **अथवा** कृणोति हिनस्ति इति क्रूरः, कृञ् हिंसायां (स्वा० उ०) 'उणादयो बहुलम्' (पा० अ० ३।३।१) इति उणादि-प्रत्ययानां बाहुलकत्वात् 'मीनातेरूरन्' (उ० १।६७) **अथवा** 'मसेरूरन्' (उ० ५।३) इति ऊरन्-प्रत्ययः। नकारानुबन्धलोपः। **अथवा** 'खर्जि-पिञ्जादिभ्य ऊरोलचौ' (उ० ५। ९१) इति ऊर-प्रत्ययः। 'इकोयणचि' (पा० अ० ६।१।७७) इति धातोः ऋकारस्य र्-यणादेशः। **अथवा** क्रूडति चलति इति क्रूरः। क्रूड चलने (काशकृत्स्नधातु-पाठे भ्वा० प०) 'नन्दि-ग्रहि-पचादिभ्यः' (पा० अ० ३।१।१३४) इति अच्-प्रत्ययः। चकारानुबन्धलोपः। ड-रयोः अभेदात् क्रूरः भवति। 'नृशंसो घातुकः क्रूरः पापः' तथा 'कक्खटं कठिनं क्रूरं कठोरं निष्ठुरं दृढम्' एवं 'क्रूरौ कठिन-निर्दयौ' इत्यमरः। 'क्रूरस्तु कठिने घोरे नृशंसे चाभिधेयवत्' इति विश्वः। 'क्रूरा नृशंस-घोरोष्ण-कठिनाः' इति हैमः। 'संग्रामो वै क्रूरम्' (शत० ब्रा० १।२।५।१९) 'क्रूरमित्यप्यस्य कृन्ततेः भवति' (निरु० ६।२२)

क्षत्रम् नपुं०। इत्यत्र '**द्वाराग्र-स्फार-तक्र-वक्र-वप्र-क्षिप्र-क्षुद्र-नार-तीर-दूर-कृच्छ-रन्ध्राश्र-श्वभ्र०' (लि० सू० ९०) इति नपुंसकलिङ्गता**। क्षदति संवृणोति सुरक्षति शकलीकरोति भक्षति शत्रुसङ्घम् इति क्षत्त्रम्। क्षद् संवरणे शकलीकरणे भक्षणे च सौत्रः धातुः। 'गु-धृ-वी-पचि-वचि-यमि-सदि-क्षदिभ्यश्च' (उ० ४।१६८) इति त्र-प्रत्ययः। 'खरि च' (पा० अ० ८।४।५५) इति धातोः दकारस्य तकारः। **अथवा** क्षतं प्रहारः अस्ति अस्य इति क्षतः। क्षत-शब्दात् 'अर्श आदिभ्योऽच्' (पा० अ० ५।२। १२७) इति अच्-प्रत्ययः। चकारानुबन्धलोपः। 'शकन्ध्वादिषु पररूपं वाच्यम्' (वा० पा० अ० ६।१।९४) इति तकारपरवर्त्तिनः अकारस्य पररूपम्। पुनः क्षतं क्षतयुक्तं त्रायते रक्षति इति क्षत्त्रम्। त्रैङ् पालने (भ्वा० आ०) 'आदेच उपदेशेऽशिति' (पा० अ० ६।१।४५) इति धातोः ऐकारस्य आकारः। 'आतोऽनुपसर्गे कः' (पा० अ० ३।२।३) इति क-प्रत्ययः। ककारानुबन्धलोपः। 'आतो लोप इटि च' (पा० अ० ६।४।६४) इति धातोः आकारस्य लोपः। बाहुलकात् क्षत शब्दे तकारपरवर्त्तिनः अकारस्य लोपः। एवं क्षत्त्र-शब्दो निष्पद्यते। **अथवा** क्षतात् त्रायते इति क्षत्त्रम्। क्षत + त्रैङ् पालने (भ्वा० प०) 'आदेश उपदेशेऽशिति' (पा० अ० ६।१।४५) इति धातोः ऐकारस्य आकारः। 'अन्येष्वपि दृश्यते' (पा० अ० ३।२।१०१) इति ड-प्रत्ययः। डकारानुबन्धलोपः। डित्त्वात् 'टेः' (पा० अ० ६।४।१४३) इति धातोः आकारस्य टेर्लोपः। पूर्ववत् बाहुलकात् क्षत-शब्दे तकारोत्तर-वर्त्तिनः अकारस्य लोपः। **अथवा** क्षदति शकलीकरोति

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by S3 Foundation USA

भक्षति वा इति क्षत् । क्षद सौत्रो धातुः शकलीकरणे भक्षणे च 'क्विप् च' (पा० अ० ३। २। ७६) इति क्विप्-प्रत्ययः। तस्य सर्वापहारिलोपः। एवं क्षद् क्षत् च हलन्त-शब्दो निष्पद्यते। क्षदः शकलकर्त्तुः भक्षकात् वा त्रायते इति क्षत्त्रम्। क्षद् + त्रैङ् पालने (भ्वा० आ०) पूर्ववत् धातोः ऐकारस्य आकारः। ड-प्रत्ययः। डकारानुबन्धलोपः। डित्त्वात् धातोः आकारस्य टेर्लोपः। 'क्षत्त्रं ब्राह्मणान्तर-जातिः' इति सिद्धान्तकौमुद्याम् उणादौ तत्त्वबोधिनीकारः। 'क्षत्त्रम् उदकनाम' (निघं० १। १२)। 'क्षत्त्रं धननाम' (निघं० २। १०)। 'प्राणो हि वै क्षत्त्रं त्रायते हैवं प्राणः' (शत० ब्रा० १४। ८। १४। ४) 'क्षत्त्रं राजन्यः' (ऐत० ब्रा० ८। ६)। 'ओजः क्षत्त्रम्' (ऐत० ब्रा० ८। २)। 'क्षत्त्रं हि राष्ट्रम्' (ऐत० ब्रा० ७। २२)। 'क्षत्त्रं वा एतदारण्यकानां पशूनां यद् व्याघ्रः' (ऐत० ब्रा० ८। ६)। 'क्षत्त्रं वै पयः' (शत० ब्रा० १२। ७। ३। ८)। 'क्षत्त्रस्यैतद्रूपं यद्धिरण्यम्' (शत० ब्रा० १३। २। २। १७)। 'क्षत्त्रस्य वा एतद्रूपं यद्रात्रिः' (शत० ब्रा० १३। १। १५)। 'क्षत्त्रं हि ग्रीष्मः' (शत० ब्रा० २। १। ३। ५)। 'क्षत्त्रं सोमः' (कौषी० ब्रा० ९। ५, ऐत० ब्रा० २। ३८)। 'क्षत्त्रं वै सोमः' (शत० ब्रा० ३। ४। १। १०)। 'मित्रः क्षत्त्रम्' (तैत्ति० ब्रा० २। ५। ७। ४)। 'क्षत्त्रं वरुणः' (कौषी० ब्रा० ७। १०)। 'क्षत्त्रं वै वरुणः' (शत० ब्रा० २। ५। २। ६)। 'क्षत्त्रं वाऽइन्द्रः' (कौषी० ब्रा० १२। ८)। 'क्षत्त्रमिन्द्रः' (शत० ब्रा० २। ५। ४। ८)। 'क्षत्त्रं वै वैश्वानरः' (शत० ब्रा० ६। ६। १। ७)। 'क्षत्त्रं वै होता' (ऐत० ब्रा० ६। २१)। 'क्षत्त्रं वै साम' (शत० ब्रा० १२। ८। ३। २३)। 'क्षत्त्रमुपांशु-याजः' (शत० ब्रा० ११। २। ७। १२)। 'क्षत्त्रं वै प्रस्तरः' (शत० ब्रा० १। ३। ४। १०)। 'ब्रह्मणः क्षत्त्रं निर्मितम्' (तै० ब्रा० २। ८। ८। ९)। 'तद् यत्र ब्रह्मणः क्षत्त्रं वशमेति तद् राष्ट्रं समृद्धं तद् वीरवदाहास्मिन् वीरो जायते' (ऐत० ब्रा० ८। ९)', 'यस्तान्तवं वस्ते क्षत्त्रं वर्धते न ब्रह्म' (गो० पू० २। ४)।

क्षिप्रम् नपुं०। इत्यत्र 'द्वाराग्र-स्फार-तक्र-वक्र-वप्र-क्षिप्र-क्षुद्र-नार-तीर-दूर०' (लि० सू० ९०) इति नपुंसकलिङ्गता। क्षिप्यति क्षिपति क्षेपयति क्षिप्यते वा अनेन इति क्षिप्रम्। क्षिप प्रेरणे (दि० प०, तु० उ०, चु० उ०) 'स्फायि-तञ्चि-वञ्चि-शकि-क्षिपि-क्षुदि-सृपि-तृपि-दृपि-वन्द्युन्दि-श्विति-वृत्यजि-नी-पदि-मदि-मुदि-खिदि-छिदि-भिदि-मन्दि-चन्दि-दहि-दसि-दम्भि-वसि-वाशि-शीङ्-हसि-सिधि-शुभिभ्यो रक्' (उ० २। १३) इति रक्-प्रत्ययः। ककारानुबन्धलोपः। प्रत्ययस्य कित्त्वात् तस्मिन् परे 'पुगन्तलघूपधस्य च' (पा० अ० ७। ३। ८६) इति धातोः उपधायाः इकारस्य प्राप्तः ए-गुणः 'क्ङिति च' (पा० अ० १। १। ५) इति निषेधात् न भवति। 'लघु क्षिप्रमरं

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by S3 Foundation USA

द्रुतम्' इत्यमरः। 'क्षिप्र-क्षुद्राभीप्सित-पृथुपीवरबहुप्रकर्षार्थाः' इत्यमरः इति सिद्धान्त-कौमुद्याम् उणादौ बालमनोरमाकारः। 'क्षिप्रं क्षिप्रनाम' (निघं० २। १५)। 'यद्वै क्षिप्रं तत्तूर्तम्' (शत० ब्रा० ६। ३। २। २)। 'क्षिप्रं कस्मात् ? संक्षिप्यते विकर्षः' (निरु० ३। ९)।

क्षीरम्, क्षीरः नपुं०, पुं०। इत्यत्र **'चक्र-वज्रान्धकार-सारावारपार-क्षीर-तोमर-शृङ्गार-भृङ्गार-मन्दारोशीर-तिमिर-शिशिराणि नपुंसके च' (लि० सू० ९२) इति नपुंसकलिङ्गता पुँल्लिङ्गता च**। घस्यते भक्ष्यते इति क्षीरम्। घस्लृ अदने (भ्वा० प०) 'घसेः किच्च' (उ० ४। ३५) इति ईरन्-प्रत्ययः स: च कित्। नकारानुबन्धलोपः। प्रत्ययस्य कित्त्वात् तस्मिन् परे 'गम-हन-जन-खन-घसां लोपः क्ङित्यनङि' (पा० अ० ६। ४। ९८) इति धातोः उपधायाः अकारस्य लोपः। 'खरि च' (पा० अ० ८। ४। ५५) इति धातोः घकारस्य ककारः। 'शासि-वसि-घसीनां च' (पा० अ० ८। ३। ६०) इति धातोः सस्य षकारः। क्-ष्-संयोगेन क्ष् + ईर = क्षीर शब्दो व्युत्पद्यते। अथवा क्षियन्ति निवसन्ति स्वस्थाः संसारे गच्छन्ति चलन्ति भ्राम्यन्ति वा येन तत् क्षीरम्। क्षि निवास-गत्योः (तु० प०) 'उणादयो बहुलम्' (पा० अ० ३। ३। १) इति उणादि-प्रत्ययानां बाहुलकत्वात् 'शु-सिचि-मीनां दीर्घश्च' (उ० २। २६) इति क्रन्-प्रत्ययः धातोः इकारस्य ईकारः दीर्घश्च। क्रन्-प्रत्यये ककार-नकारानुबन्धलोपः। प्रत्ययस्य कित्त्वात् तस्मिन् परे 'सार्वधातुकार्धधातुकयोः' (पा० अ० ७। ३। ८४) इति धातोः ईकारस्य प्राप्तः ए-गुणः 'क्ङिति च' (पा० अ० १। १। ५) इति निषेधात् न भवति। **अथवा** क्षयणं हिंसनं क्षीः हिंसा। क्षीष् हिंसायाम् (क्र्या० प०) 'सम्पदादिभ्यः क्विप्' (वा० पा० अ० ३। ३। ९४) इति क्विप्-प्रत्ययः। तस्य सर्वापहारिलोपः। एवं क्षी-शब्दः व्युत्पद्यते। ततः क्षियं क्षयं दैहिकं पतनम् ईरयति दूरीकरोति सेवनेन इति क्षीरम्। ण्यन्तात् ईर गतौ (अ० आ०) 'कर्मण्यण्' (पा० अ० ३। २। १) इति अण्-प्रत्ययः। णकारानुबन्धलोपः। 'इगुपध-ज्ञा-प्री-किरः कः' (पा० अ० ३। १। १३५) इति क-प्रत्ययः। प्रत्यये ककारानुबन्धलोपः। **अथवा** क्षरति सञ्चलति स्वस्थानात् इति क्षीरम्। क्षर सञ्चलने (भ्वा० प०) 'नन्दि-ग्रहि-पचादिभ्यो०' (पा० अ० ३। १। १३४) इति अच्-प्रत्ययः। चकारानुबन्धलोपः। 'पृषोदरादीनि यथोपदिष्टम्' (पा० अ० ६। ३। १०९) इति धातोः उपधायाः अकारस्य ईकारः। 'अम्भोऽर्णस्तोय-पानीय-नीर-क्षीराम्बु-शंवरम्' तथा 'दुग्धं क्षीरं पयः समम्' एवं 'क्षीरमप्सु च' इत्यमरः। 'क्षीरं दुग्धे जले' इति मेदिनी। 'क्षीरं पानीय-दुग्धयोः' इति हैमः। 'क्षीरमिति उदकनाम' (निघं० १। १२)। 'क्षीरं क्षरतेर्घसेर्वेरो नामकरणः' (निरु० २। ५)

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by S3 Foundation USA

क्षुत् स्त्री०। इत्यत्र '**प्रतिपदापद्विपत्सम्पच्छरत्संसत्परिषदुषःसंवित्क्षुत्पुन्मुत्समिधः**' (**लि० सू० २७**) **इति स्त्रीलिङ्गता**। क्षवणं क्षुत्। टु क्षु शब्दे (अ० प०) 'सम्पदादिभ्यः क्विप्' (वा० पा० अ० ३।३।१०८) इति क्विप्-प्रत्ययः। तस्य सर्वापहारिलोपः 'ह्रस्वस्य पिति कृति तुक्' (पा० अ० ६।१।१०९) इति तुगागमः। उकार-ककारानुबन्ध-लोपः।'झलां जशोऽन्ते' (पा० अ० ८।२।३९) इति धातोः धकारस्य दकारः। 'वावसाने' (पा० अ० ८।४।५६) इति विकल्पेन दकारस्य तकारः। 'स्त्री क्षुत् क्षुतं क्षवः पुंसि' इत्यमरः। 'स्त्रियां क्षुत् क्षुतं हंछिका' इति रभसः। अत्र 'क्षुवः क्षुते राजिकायाम्' इत्यपि पाठान्तरम्।

क्षुद्रम् नपुं०। इत्यत्र '**द्वाराग्र-स्फार-तक्र-वक्र-वप्र-क्षिप्र-क्षुद्र-नार-तीर०**' (**लि० सू० ९०**) **इति नपुंसकलिङ्गता**। क्षुणत्ति सम्पिनष्टि इति क्षुद्रम् सम्पिष्यते वा यत् तत् क्षुद्रम्। क्षुदिर् सम्प्रेषणे (उ० उ०) 'स्फायि-तञ्चि-वञ्चि-शकि-क्षिपि-क्षुदि-सृणि-तृपि-दृपि-वन्द्युन्दि-श्विति-वृत्यजि-वी-पदि-मदि-मुदि-खिदि-छिदि-मन्दि-चन्दि-दहि-दम्भि-वसि-वाशि-शीङ्-हसि-सिधि-शुभिभ्यो रक्' (उ० २।१३) इति रक्-प्रत्ययः। ककारानुबन्धलोपः। कित्त्वात् धातोः उपधायाः उकारस्य 'पुगन्तलघूपधस्य च' (पा० अ० ७।३।८६) इति प्राप्तः ओ-गुणः 'क्ङिति च' (पा० अ० १।१।५) इति निषेधात् न भवति। 'कदर्ये कृपणे क्षुद्र-किम्पचानम्पितम्पचाः' इत्यमरः। 'क्षुद्रः स्यादधमक्रूर-कृपणाल्पेषु' इति मेदिनी। 'क्षुद्रो क्रूरेऽधनेऽल्पेऽपि च' इत्यमरः। 'क्षुद्रः स्यादधम-क्रूर-कृपणाल्पेषु वाच्यवत्' इति विश्वः। 'क्षुद्रजन्तुरनस्थि स्यादथवा क्षुद्र एव यः। शतं वा प्रसृतौ येषां केचिदानुकुलादपि' (महाभाष्यम् २।४।१।८)।

क्षुरः पुं०। इत्यत्र '**रोपधः**' (**लि० सू० ८९**) **इति पुँल्लिङ्गता**। क्षौति शब्दयति क्षूयते शब्द्यते वा येन सः क्षुरः। टुक्षु शब्दे (अ० प०) 'ऋज्रेन्द्राग्र-वज्र-विप्र-कुब्र-चुब्र-क्षुर-खुर-भद्रोग्र-भेर-भेल-शुक्र-शुक्ल-गौर-वत्रेरा-मालाः' (उ० २।२९) इति रन्-प्रत्ययः। बाहुलकात् स च कित्। कित्त्वात् 'सार्वधातुकार्धधातुकयोः' (पा० अ० ७।३।८४) इति धातोः उकारस्य प्राप्तः ओ गुणः 'क्ङिति च' (पा० अ० १।१।५) इति निषेधात् न भवति। रन्-प्रत्यये नकारानुबन्धलोपः। अथवा क्षुरति विलिखति क्षुर्यते विलिख्यते वा येन सः क्षुरः। क्षुर विलेखने (तु० प०) 'इगुपध-ज्ञा-प्री-किरः कः' (पा० अ० १। १।३५) इति क -प्रत्ययः। ककारानुबन्धलोपः। कित्त्वात् 'पुगन्तलघूपधस्य च' (पा० अ० ७।३।८६) इति धातोः उपधायाः उकारस्य प्राप्तः ओ-गुणः 'क्ङिति च' (पा० अ० १।१।५) इति निषिध्यते। 'इक्षुगन्धा तु काण्डेक्षुकोकिलाक्षे क्षुरः क्षुरः' तथा आतपः

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by S3 Foundation USA

क्षत्रिये नाभिः कुणपक्षुरकेदराः' इत्यमरः। 'क्षुरः स्याच्छेदने द्रव्ये कोकिलाक्षे च गोक्षुरे' इति विश्व-मेदिन्यौ। 'क्षुरो लोम-च्छेदकः' इति सिद्धान्तकौमुद्याम् उणादौ तत्त्वबोधिनीकारः।

क्षेत्रम् नपुं०। इत्यत्र **'द्वाराग्र-स्फार-तक्र-वक्र-वप्र-क्षिप्र-क्षुद्र-नार-तीर-दूर०' (लि० सू० ९०) इति नपुंसकलिङ्गता।** क्षयति नश्यति, क्षिणोति हिनस्ति, क्षियति निवसति गच्छति वा यस्मिन् तत् क्षेत्रम् **अथवा** क्षीयते इति क्षेत्रम्। क्षि क्षये (भ्वा० प०), क्षि हिंसायाम् (स्वा० प०), क्षि निवास-गत्योः (तु० प०) 'दादिभ्यच्छन्दसि' (उ० ४। १७१) इति त्रन्-प्रत्ययः **अथवा** 'सर्वधातुभ्यः ष्ट्रन्' (उ० ४। १६०) इति ष्ट्रन्-प्रत्ययः। त्रन्-प्रत्यये नकारानुबन्धलोपः। ष्ट्रन्-प्रत्यये तु पकार-नकारानुबन्धलोपः 'पुंनपुंसकयोर्वप्रः केदारः क्षेत्रम्' इत्यमरः। 'क्षेत्रं पत्नी-शरीरयोः' इति चामरः। 'क्षेत्रं शरीरे केदारे सिद्धस्थान-कलत्रयोः' इति मेदिनी। 'क्षेत्रं भारतादौ भगाङ्गयोः केदार-सिद्धभू-पत्न्योः' इति हैमः। 'क्षेत्रं क्षियतेर्निवास-कर्मणः' (निरु० १०। १४)। 'इयं वै क्षेत्रं पृथिवी' (कौषी० ब्रा० ३०। १०, गोप० उ० ५। १०)।

क्षेत्रज्ञः पुं०। इत्यत्र **'देवासुरात्म-स्वर्ग-गिरि-समुद्र-नख-केश-दन्त-स्तन-भुज-कण्ठ-खड्ग-शर-पङ्काभिधानानि' (लि० सू० ४३) इति पुँल्लिङ्गता।** क्षेत्र-शब्दः पूर्वं व्याख्यातः। क्षेत्रं जानाति इति क्षेत्रज्ञः। क्षेत्र + ज्ञा अवबोधने (क्र्या० प०) 'आतोऽनुपसर्गे कः' (पा० अ० ३। २। ३) इति क-प्रत्ययः। ककारानुबन्धलोपः। 'आतो लोप इटि च' (पा० अ० ६। ४। ६४) इति धातोः आकारस्य लोपः। 'ज्ञेत्रज्ञ आत्मा पुरुषः' इत्यमरः। 'पुंस्यात्मनि प्रवीणे न क्षेत्रज्ञो वाच्यलिङ्गकः' इति चामरः। 'क्षेत्रज्ञात्म-निपुणे' इति हैमः।

क्षेमम्, क्षेमः नपुं०, पुं०। इत्यत्र **'संग्राम-दाडिम-कुसुमाश्रम-क्षेम-क्षौम-होमोद्दा-मानि नपुंसके च' (लि० सू० ८५) इति नपुंसकलिङ्गता पुँल्लिङ्गता च।** क्षयति नाशयति, क्षिणोति हिनस्ति अशुभं, क्षियति निवसति गच्छति वा यस्मिन् **अथवा** क्षीयते नाश्यते अशुभम् अनेन इति क्षेमम्। क्षि क्षवे (भ्वा० प०), क्षि हिंसायां (स्वा० प०), 'क्षि निवास-गत्योः' (तु० प०) सर्वत्र 'अर्ति-सु-हु-सृ-धृ-क्षि-क्षु-भा-या-वा-पदि-यक्षि-नीभ्यो मन्' (उ० १। १४०) इति मन्-प्रत्ययः। नकारानुबन्धलोपः। 'सार्वधातु-कार्धधातुकयोः' (पा० अ० ७। ३। ८४) इति धातोः इकारस्य ए-गुणः। 'कुशलं क्षेम-मस्त्रियाम्' इत्यमरः। 'क्षेमस्तु मङ्गले लब्धसंरक्षणे मोक्षे क्षेमोमाधनहर्यपि' इति हैमः। 'क्षेमोऽस्त्री लब्धरक्षणे चण्डायां ना शुभे न स्त्री कात्यायन्यां च योषिति' इति मेदिनी। 'चण्डा धनहरी क्षेमदुष्पत्रगणहासकाः' इति चामरः।

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by S3 Foundation USA

क्षौमम्, क्षौमः नपुं०, पुं०। इत्यत्र **'संग्राम-दाडिम-कुसुमाश्रम-क्षेम-क्षौम-होमोद्दामानि नपुंसके च' (लि० सू० ८५) इति नपुंसकलिङ्गता पुँल्लिङ्गता च।** यः क्षौति शब्दयति सः क्षौमः **अथवा** यत्र क्षौति शब्दयति तत् स्थानं क्षोमम्। टु क्षु शब्दे (अ० प०) 'अर्त्ति-स्तु-सु-हु-सृ-धृ-क्षि-क्षु-भा-या-वा-पदि-यक्षि-नीभ्यो मन्' (उ० १।१४०) इति मन्-प्रत्ययः। नकारानुबन्धलोपः। 'सार्वधातुकार्धधातुकयोः' (पा० अ० ७।३।८४) इति धातोः उकारस्य ओ-गुणः। 'स्यादट्टः क्षोमममस्त्रियाम्' इत्यमरः। क्षोमम् एव क्षौमम्। 'प्रज्ञादिभ्यश्च' (पा० अ० ५।४।३८) इति स्वार्थे अण्-प्रत्ययः। णकारानुबन्धलोपः। प्रत्ययस्य णित्त्वात् तस्मिन् परे 'तद्धितेष्वचामादेः' (पा० अ० ७।२।११७) इति क्षोम-शब्दस्य आद्यचः क्षकार-परवर्त्तिनः ओकारस्य औ-वृद्धिः। 'यस्येति च' (पा० अ० ६।४।१४८) इति मकारोत्तरवर्त्तिनः अकारस्य लोपः। एवं क्षौम-शब्दः व्युत्पद्यते। **अथवा** क्षौति शब्दयति इति क्षुमा, क्षूयते शब्द्यते वा इति क्षुमा। टु क्षु शब्दे (अ० प०) 'अर्त्ति-स्तु-सु-०' इति मन्-प्रत्ययः। नकारानुबन्धलोपः। संज्ञा-पूर्वकविधेरनित्यत्वात् 'सार्वधातुकार्धधातुकयोः' (पा० अ० ७।३।८४) इति धातोः उकारस्य ओ-गुणः न। एवं व्युत्पन्न-क्षुम-शब्दात् 'अजाद्यतष्टाप्' (पा० अ० ४।१।४) इति टाप्-प्रत्ययः। टकार-पकारानुबन्धलोपः। 'अकः सवर्णे दीर्घः' (पा० अ० ६।१।१०१) इति अकारस्य आकारस्य च आ-दीर्घः। ततः क्षुमायाः विकारः क्षौमम्। क्षुमा-शब्दात् 'तस्य विकारः' (पा० अ० ४।३।१३४) इति अण्-प्रत्ययः। णकारानुबन्धलोपः। 'तद्धितेष्वचामादेः' (पा० अ० ७।२।११७) इति क्षकारोत्तरवर्त्तिनः उकारस्य आद्यचः औ-वृद्धिः। 'यस्येति च' (पा० अ० ६।४।१४८) इति मकारोत्तर-वर्त्तिनः आकारस्य लोपः। एवम् अपि क्षौम-शब्दः व्युत्पद्यते। 'क्षौमं वल्कलजांशुके। शणजेऽतसीजे' इति मेदिनी। 'वाल्कं क्षौमादं' इत्यमरः। 'अतसी स्यादुमा क्षुमा' इति चामरः।

क्षवेलितः, क्ष्वेलितम्। इत्यत्र 'घृत-भूत-मुस्त-क्ष्वेलितैरावत-पुस्तक-बुस्त-लोहिताः' (लि० सू० १७७) इति पुँल्लिङ्गता नपुंसकलिङ्गता च। क्ष्वेलनं क्ष्वेला। क्ष्वेलृ (भ्वा० प०) 'गुरोश्च हलः' (पा० अ० ३।३।१०३) इति अ-प्रत्ययः। 'अजाद्यतष्टाप्' (पा० अ० ४।१।४) इति टाप्-प्रत्ययः टकार-पकारानुबन्धलोपः। 'अकः सवर्णे दीर्घः' (पा० अ० ६।१।१०१) इति अकारस्य आकारस्य च आ-दीर्घः। एवं क्ष्वेला-शब्दः निष्पद्यते। क्ष्वेला सञ्जाता अस्य इति क्ष्वेलितम्। क्ष्वेला-शब्दात् तदस्य सञ्जातं तारकादिभ्य इतच् (पा० अ० ५।२।३६) इति इतच्-प्रत्ययः। चकारानुबन्धलोपः। 'यस्येति च' (पा० अ० ६।४।१४८) इति लकारोत्तरवर्त्तिनः आकारस्य लोपः। एवं क्ष्वेलित-शब्दः व्युत्पद्यते।

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by S3 Foundation USA

खड्गः पुं०। इत्यत्र '**देवासुरात्म-स्वर्ग-गिरि-समुद्र-नख-केश-दन्त-स्तव-भुज-कण्ठ-खड्ग-शर-पङ्काभिधानानि**' (**लि० सू० ४३**) इति **पुँल्लिङ्गता**। खाडयति भिनत्ति इति खड्गः **अथवा** खण्ड्यते भिद्यते येन सः खड्गः। खड भेदने (चु० उ०) 'छा-पू-खडिभ्यः कित्' (उ० १।१२४) इति गन्-प्रत्ययः, स च कित्। नकारानुबन्ध-लोपः। अथवा खण्डते मथ्नाति इति खड्गः **अथवा** खण्ड्यते भिद्यते येन सः खड्गः। खडि मन्थे (भ्वा० आ०), खडि भेदने (चु० उ०) धातोः प्रयोगे तु आगमशास्त्रस्य अनित्यत्वात् 'इदितो नुम् धातोः' (पा० अ० ७।१।५८) इति इदित्व-प्रयुक्तः नुम्-आगमः न। गन्-प्रत्ययः तु पूर्ववत् एव। नकारानुबन्धलोपः अपि तथा एव। 'गण्डके खड्ग-खड्गिनौ' तथा 'खड्गे तु निस्त्रिंश-चन्द्रहासादिरिष्टयः' इत्यमरः। 'खड्गो गण्डक-शृङ्गासि-बुद्धभेदेषु गण्डके' इति मेदिनी। 'खड्गो गण्डकशृङ्गे स्यात्रिस्त्रिंशे गण्डकेऽपि च' इति शब्दतरङ्गिणी।

खण्डः, खण्डम् पुं०, नपुं०। इत्यत्र '**दण्ड-मण्ड-खण्ड-शव-सैन्धव-पार्श्वाकाश-कुश-काशाङ्कुश-कुलिशाः**' (**लि० सू० १८१**) इति **पुँल्लिङ्गता नपुंसकलिङ्गता च**। खनति अवदारयति, खन्यते अवदीर्यते वा यः सः खण्डः। खनु अवदारणे (भ्वा० प०) 'ञमन्ताड्डः' (उ० १।११४) इति ड-प्रत्ययः। 'नश्चापदान्तस्य झलि' (पा० अ० ८।३।२४) इति धातोः नकारस्य अनुस्वारः। 'अनुस्वारस्य ययि परसवर्णः' (पा० अ० ८।४।५८) इति अनुस्वारस्य परसवर्णः णकारः। **अथवा** खण्डते मथ्नाति खण्ड्यते मथ्यते वा यः सः खण्डः। खडि मन्थे (भ्वा० आ०) **यद्वा** खण्डयति भिनत्ति खण्ड्यते भिद्यते वा यः सः खण्डः। खडि भेदने (चु० उ०) सर्वत्र धातोः इदित्त्वात् 'इदितो नुम् धातोः' (पा० अ० ७।१।५८) इति नुम्-आगमः। उकार-मकारानुबन्धलोपः। पूर्ववत् नकारस्य अनुस्वारः, अनुस्वारस्य च परसवर्णः णकारः। ततः 'नन्दि-ग्रहि-पचादिभ्यो०' (पा० अ० ३।१।१३४) इति अच्-प्रत्ययः। चकारानुबन्धलोपः। **अथवा** खण्डनं खण्डः। उक्तरीत्या खन धातुतः खडि-धातुतः व्युत्पन्नात् खण्ड् इत्यस्यात् 'अकर्त्तरि च कारके संज्ञायाम्' (पा० अ० ३।३।१९) इति घञ्-प्रत्ययः। घकार-ञकारानुबन्धलोपः। 'भित्तं शकलखण्डे वा' इत्यमरः। 'खण्डोऽर्ध ऐक्षवे। मणिदोषे च' इति हैमः। 'खण्डोऽस्त्री शकले चेक्षुविकार-मणिदोषयोः। खण्डः पानान्तरं मदे' इति मेदिनी।

खनिः स्त्री०। इत्यत्र '**दर्वि-विदि-वेदि-खनि-शान्यश्रि-वेशि-कृष्योषधि-कट्यङ्गुलयः**' (**लि० सू० २४**) इति **स्त्रीलिङ्गता**। खन्यते यया यत्र वा इति खनिः। खनु अवदारणे (भ्वा० प०) 'खनि-कष्यज्यसि-वसि-वनि-सनि-ध्वनि-ग्रन्थि-

CC-0 Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by S3 Foundation USA

चरिभ्यश्च' (उ० ४। १४१) इति इ-प्रत्ययः अथवा 'सर्वधातुभ्य इन्' (उ० ४। ११९) इति इन्-प्रत्ययः। नकारानुबन्धलोपः।

खनी स्त्री०। इत्यत्र **'ईकारान्तश्च' (लि० सू० १०) इति स्त्रीलिङ्गता**। खनि-शब्दः पूर्वं व्याख्यातः। ततः 'कृदिकारादक्तिनः' (वा० पा० अ० ४। १। ४५) इति ङीष्-प्रत्ययः। ङकार-षकारानुबन्धलोपः। 'यस्येति च' (पा० अ० ६। ४। १४८) इति नकार-परवर्त्तिनः इकारस्य लोपः। एवं खनी-शब्दः व्युत्पद्यते।

खारी स्त्री०। इत्यत्र **'चुल्लि-वेणि-खार्यश्च' (लि० सू० ३२) इति तथा 'खारी-मानिके स्त्रियाम्' (लि० सू० १०५) इति स्त्रीलिङ्गता**। खम् आकाशम् आसमन्तान् राति ददाति आददाति वा इति खारी। ख + आ + रा दाने (अ० प०) 'कप्रकरणे मूल-विभुजादिभ्य उपसंख्यानम्' (वा० पा० अ० ३। २। ५) इति क-प्रत्ययः। ककारानुबन्धलोपः। 'आतो लोप इटि च' (पा० अ० ६। ४। ६४) इति धातोः आकारस्य लोपः। एवं खार-शब्दः व्युत्पद्यते। ततः स्त्रीत्वविवक्षायां 'षिद्-गौरादिभ्यश्च' (पा० अ० ४। १। ४१) इति ङीष्-प्रत्ययः। ङकार-षकारानुबन्धलोपः। 'यस्येति च' (पा० अ० ६। ४। १४८) इति रेफोत्तरवर्त्तिनः अकारस्य लोपः। अथवा खे आकाशे रमते इति खरः। ख + रमु क्रीडायाम् (भ्वा० आ०) 'अन्येष्वपि दृश्यते' (पा० अ० ३। २। १०१) इति ड-प्रत्ययः। डकारानुबन्धलोपः। डित्त्वात् 'टेः' (पा० अ० ६। ४। १४३) इति धातोः अम् इत्यस्य टेर्लोपः। एवं खर-शब्दः निष्पद्यते। खरस्य अयं खारः। खर-शब्दात् 'तस्येदम्' (पा० अ० ४। ३। १२०) इति अण्-प्रत्ययः। णकारानुबन्धलोपः। 'यस्येति च' (पा० अ० ६। ४। १४८) इति रेफोत्तर-वर्त्तिनः अकारस्य लोपः। 'तद्धितेष्वचामादेः' (पा० अ० ७। २। ११७) इति खकारोत्तर-वर्त्तिनः अकारस्य आ-वृद्धिः। एवं खार-शब्दः व्युत्पद्यते। ततः स्त्रियाम् 'टिड्ढाणञ्०' (पा० अ० ४। १। १५) इति ङीप्-प्रत्ययः। ङकार-पकारानुबन्धलोपः। 'यस्येति च' (पा० अ० ६। ४। १४८) इति रेफोत्तर-वर्त्तिनः अकारस्य लोपः। 'अस्त्रियामाढकद्रोणौ खारी वाहो निकुञ्चकः' इत्यमरः।

खिलः, खिलम् पुं०, नपुं०। इत्यत्र **'शील-मूल-मङ्गल-साल-कमल-तल-मूसल-कुण्डल-पलल-मृणाल-वाल-निगल-पलाल-विडाल-खिल-शूलाः पुंसि च' (लि० सू० १४३) इति पुँल्लिङ्गता नपुंसकलिङ्गता च**। खिलति इति खिलः। खिल उञ्छे (तु० प०) 'इगुपध-ज्ञा-प्री-किरः कः' (पा० अ० ३। १। १३५) इति क-प्रत्ययः। ककारानुबन्धलोपः। कित्त्वात् 'पुगन्तलघूपधस्य च' (पा० अ० ७। ३। ८६)

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by S3 Foundation USA

इति धातोः इकारस्य प्राप्तः ए-गुणः 'क्ङिति च' (पा० अ० १।१।५) इत्यनेन निषिध्यते। **अथवा** खिल्यते अस्मिन् इति खिलः। 'हलश्च' (पा० अ० ३।३।१२१) इति घञ्-प्रत्ययः। घकार-ञकारानुबन्धलोपः। संज्ञापूर्वकविधेरनित्यवात् अत्र 'पुगन्त-लघूपधस्य च' (पा० अ० ७।३।८६) इति धातोः इकारस्य ए-गुणः न। 'द्वे खिलाप्रहते समे' इत्यमरः। 'खिलमप्रहते क्लीबं सार-संक्षिप्तवेधसोः' इति मेदिनी।

गजः पुं०। इत्यत्र **'ध्वज-गज-मुञ्ज-पुञ्जाः' (लि० सू० ११०) इति पुँल्लिङ्गता।** गजति माद्यति इति गजः। गज मदने (भ्वा० प०) 'नन्दि-ग्रहि-पचादिभ्यो०' (पा० अ० ३।१।१३४) इति अच्-प्रत्ययः। चकारानुबन्धलोपः। **अथवा** गच्छति इति गः। गम्लृ गतौ (भ्वा० प०) 'अन्येष्वपि दृश्यते' (पा० अ० ३।२।१०१) इति ड-प्रत्ययः। डकारानुबन्धलोपः। 'टेः' (पा० अ० ६।४।१४३) इति धातोः अम् इत्यस्य टेर्लोपः जयति इति जः। जि जये (भ्वा० प०) पूर्ववत् ड-प्रत्ययः। डकारानुबन्धलोपः। धातोः इकारस्य 'टेः' (पा० अ० ६।४।१४३) इति टेर्लोपः। गश्चासौ जः इति गजः अथवा गानां युद्धे गमनकर्त्तृणां रिपूणां जः जेता इति गजः। 'मतङ्गजो गजो नागः' इत्यमरः।

गणः पुं०। इत्यत्र **'गोपधः' (लि० सू० ६७) पुँल्लिङ्गता।** गण्यते इति गणः। गण संघाते (चु० उ०) 'अकर्त्तरि च कारके संज्ञायाम्' (पा० अ० ३।३।१९) इति घञ्-प्रत्ययः। घकार-ञकारानुबन्धलोपः। अल्लोपस्य स्थानिवद्भावात् 'अत उपधायाः' (पा० अ० ७।२।११६) इति धातोः उपधायाः अकारस्य प्राप्तः आ-वृद्धिः न भवति। **अथवा** गणयति इति गणः। 'नन्दि-ग्रहि-पचादिभ्यो०' (पा० अ० ३।१।१३४) इति अच्-प्रत्ययः। चकारानुबन्धलोपः। 'समवायश्चयो गणः' एवं 'सेनामुखं गुल्मगणौ' तथा 'संघाते प्रमथे गणः' इत्यमरः। 'गणः स्यात् प्रमथे संघे संख्या सैन्य-प्रभेदयोः' इति मेदिनी। 'गणः वाङ्नाम' (निघं० १।११) 'गणः गणनाद् गुणश्च' (निरु० ६।३६)।

गण्डः पुं०। इत्यत्र **'क्रतु-पुरुष-कपोल-गुल्फ-मेघाभिधानानि' (लि० सू० ४९) इति तथा 'गण्ड-मण्ड-करण्ड-भरण्ड-वरण्ड-तुण्ड-गण्ड-मुण्ड-पाषण्ड-शिखण्डाः' (लि० सू० ११२) इति पुँल्लिङ्गता।** गच्छति इति गण्डः। गम्लृ गतौ (भ्वा० प०) 'ञमन्ताड्डः' (उ० १।११४) इति ड-प्रत्ययः। 'नश्चापदान्तस्य झलि' (पा० अ० ८।३।२४) इति मकारस्य अनुस्वारः। 'अनुस्वारस्य ययि परसवर्णः' (पा० अ० ८।४।५८) इति अनुस्वारस्य पर-सवर्णः णकारः। **अथवा** गण्डति इति गण्डः। गडि वदनैकदेशे (भ्वा० प०) धातोः इदित्त्वात् 'इदितो नुम् धातोः' (पा० अ० ७।१।५८) इति नुम्-आगमः। उकार-मकारानुबन्धलोपः। पूर्ववत् 'नश्चापदान्तस्य झन्ति'

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by S3 Foundation USA

(पा० अ० ८ । ३ । २४) इति नकारस्य अनुस्वारः। 'अनुस्वारस्य ययि परसवर्णः' (पा० अ० ८ । ४ । ५८) इति अनुस्वारस्य परसवर्णः णकारः। 'नन्दि-ग्रहि-पचादिभ्यो०' (पा० अ० ३ । १ । १३४) इति अच्-प्रत्ययः। चकारानुवन्धलोपः। 'गण्डः कटः' तथा 'गण्डौ कपोल-विस्फोटौ' इत्यमरः। 'गण्डः स्यात् पुंसि खड्गिनि। ग्रहयोगे भेदे च वीथ्यङ्गे पिटकेऽपि च। चिह्नवीरकपोलेषु हयभूषणवुद्‌बुदे' इति मेदिनी।

गन्धः पुं०। इत्यत्र **'पल्लव-पल्वल-कफ-रेफ-कटाह-निर्व्यूह-मठ-मणि-तरङ्ग-तुरङ्ग-गन्ध-मृदङ्ग-सङ्ग-समुद्ग-पुङ्खाः' (लि० सू० ११६) इति पुँल्लिङ्गता।** गन्धयति इति गन्धः। गन्ध अर्दने (चु० आ०) 'नन्दि-ग्रहि-पचादिभ्यो०' (पा० अ० ३ । १ । १३४) इति अच्-प्रत्ययः। चकारानुवन्धलोपः। 'रूपं शब्दो गन्धरसस्पर्शाश्च विषया अमी' इत्यमरः। 'गन्धः सम्बन्धलेशयोः। गन्धकामोदगर्वेषु' इति हैमः।

गभीरम् नपुं०। इत्यत्र **'द्वाराग्र-स्फार-तक्र०' (लि० सू० ९०) इति नपुंसकलिङ्गता।** गम्यते ज्ञायते प्राप्यते वा जलजन्तुभिः यः सः गभीरः। गम्लृ गतौ (भ्वा० प०) 'गभीर-गम्भीरौ' (उ० ४। ३६) इति ईरन्-प्रत्ययः धातोः मकारस्य भकारादेशश्च। **अथवा** गम्यते यत्र स गः आकाशः। गम्लृ गतौ 'अन्येष्वपि दृश्यते' (पा० अ० ३ । २ । १०१) इति ड-प्रत्ययः। डकारानुबन्धलोपः। डित्त्वात् 'टेः' (पा० अ० ६ । ४ । १४३) इति धातोः अम् इत्यस्य टेर्लोपः। भयनं भीः। ञि भी भये (जु० प०) 'क्विप् च' (पा० अ० ३ । २ । ७६) इति अथवा 'सम्पदादिभ्यः क्विप्' (वा० पा० अ० ३ । ३ । १०८) इति क्विप्-प्रत्ययः। तस्य सर्वापहारिलोपः। गे आकाशे शून्ये वा भियं भयं राति ददाति इति गभीरः। ग + भी + रा दाने (अ० प०) 'आतोऽनुपसर्गे कः' (पा० अ० ३ । २ । ३) इति क-प्रत्ययः। ककारानुबन्धलोपः। 'आतो लोप इटि च' (पा० अ० ६ । ४ । ६४) इति धातोः आकारस्य लोपः। **अथवा** गे आकाशे शून्ये भियः भयात् रमते इति गभीरः। ग + भी + रमु क्रीडायां (भ्वा० आ०) 'अन्येष्वपि दृश्यते' (पा० अ० ३ । २ । १०१) इति ड-प्रत्ययः। डकारानुबन्धलोपः। डित्त्वात् 'टेः' (पा० अ० ६ । ४ । १४३) इति धातोः अम् इत्यस्य टेर्लोपः। 'निम्नं गभीरं गम्भीरम्' इत्यमरः। 'गभीरमुदकनाम' (निघं० १ । १२)। 'गभीरः महन्नाम' (निघं० ३ । ३)। 'गभीरा वाङ्नाम' (निघं० १ । ११)। 'गभीरे द्यावापृथिवीनाम' (निघं० ३ । ३०)।

गरः पुं०। इत्यत्र **'घञबन्तः' (लि० सू० ३६) इति पुँल्लिङ्गता।** गरणं गरः गीर्यते वा गरः। गॄ निगरणे (तु० प०) 'ॠदोरप्' (पा० अ० ३ । ३ । ५७) इति अप्-प्रत्ययः। पकारानुबन्धलोपः। 'सार्वधातुकार्धधातुकयोः' (पा० अ० ७ । ३ । ८४) इति धातोः

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by S3 Foundation USA

ऋकारस्य 'उरण् रपरः' (पा० अ० १।१।५१) इति सहकारेण अर्-गुणः। **अथवा** गृणाति इति गरः। गृ निगरणे (तु० प०) 'नन्दिग्रहि०' (पा० अ० ३।१।१३४) इति अच्-प्रत्ययः। चकारानुबन्धलोपः। पूर्ववत् धातोः ऋकारस्य अर्-गुणः।

गरुत् पुं०। इत्यत्र 'मरुद्-गरुत्-तरदृत्विजः' (लि० सू० १०८) इति पुँल्लिङ्गता। गिरति निगलति अथवा गृणाति शब्दयति इति गरुत् 'गृ निगरणे' (तु० प०) गृ शब्दे (क्र्या० प०) 'मृ-ग्रोरुतिः' (उ० १।९४) इति उति-प्रत्ययः। इकारानुबन्धलोपः। 'सार्वधातुकार्धधातुकयोः' (पा० अ० ७।३।८४) इति धातोः ऋकारस्य 'उरण् रपरः' (पा० अ० १।१।५१) इति सहकारेण अर्-गुणः। 'गरुत्-पक्षच्छदाः पत्त्रं पतत्रं च तनूरुहम्' इत्यमरः।

गलः पुं०। इत्यत्र 'देवासुरात्म-स्वर्ग-गिरि-समुद्र-नख-केश-दन्त-स्तन-भुज-कण्ठ-खड्ग-शर-पङ्काभिधानानि' (लि० सू० ४३) इति पुँल्लिङ्गता। गिलति निगरति इति गलः। गृ निगरणे (तु० प०) 'नन्दि-ग्रहि-पचादिभ्यो०' (पा० अ० ३।१।१३४) इति अच्-प्रत्ययः। चकारानुबन्धलोपः। 'सार्वधातुकार्धधातुकयोः' (पा० अ० ७।३।८४) इति धातोः ऋकारस्य 'उरण् रपरः' (पा० अ० १।१।५१) इति सहकारेण अर्-गुणः। 'अचि विभाषा' (पा० अ० ८।२।२१) इति रेफस्य विभाषया ल्-आदेशः। **अथवा** गीर्यते अनेन इति गलः। गृ निगरणे (तु० प०) 'पुंसि संज्ञायां घः प्रायेण' (पा० अ० ३।३।११८) इति घ-प्रत्ययः। घकारानुबन्धलोपः। पूर्ववत् धातोः ऋकारस्य अर्-गुणः रेफस्य ल्-आदेशश्च। **अथवा** गलति अति इति गलः। गल अदने (भ्वा० प०) 'नन्दि-ग्रहि-पचादिभ्यो०' (पा० अ० ३।१।१३४) इति अच्-प्रत्ययः। चकारानुबन्धलोपः। अथवा गल्यते अद्यते अनेन इति गलः। गल अदने (भ्वा० प०) 'पुंसि संज्ञायां घः प्रायेण' (पा० अ० ३।३।११८) इति घ-प्रत्ययः। घकारानुबन्धलोपः। 'कण्ठो गलः' इत्यमरः। 'गलः कण्ठे सर्जरसे' इति मेदिनी।

गह्वरम् नपुं०। इत्यत्र 'द्वाराग्र-स्फार-तक्र-वक्र०' (लि० सू० ९०) इति नपुंसक-लिङ्गता। गाहते विलोडयति गाह्यते विलोड्यते वा यत् तद् गह्वरम्। गाहू विलोडने (भ्वा० आ०) 'छित्वर-छत्वर-धीवर-पीवर-तीवर-नीवर-गह्वर-कट्वर-संयद्वराः' (उ० ३।१) इति ष्वरच्-प्रत्ययः, धातोः उपधायाः आकारस्य अकारः ह्रस्वश्च। **अथवा** गहति हिनस्ति गच्छति गह्यते हिंस्यते गम्यते वा यस्मिन् तद् गह्वरम्। गह हिंसागत्योः (काशकृत्स्नधातुपाठे भ्वा० प०) पूर्ववत् ष्वरच्-प्रत्ययः। पकार-चकारानुबन्धलोपः। 'देवखातबिले गुहा गह्वरम्' तथा 'गह्वरं गण्डशैलास्तु' इत्यमरः। 'गुहादम्भौ गह्वरे द्वे'

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by S3 Foundation USA

इति चामरः। 'गह्वरस्तु गुहादम्भनिकुञ्जगहनेष्वपि' इति विश्वः। 'गह्वरं बिल-दम्भयोः' इति शाश्वतः। 'गह्वरम् उदकनाम' (निघं० १।१२)।

गाण्डीवः, गाण्डीवम् पुं०, नपुं०। **इत्यत्र 'वक्त्र-नेत्रारण्य-गाण्डीवानि पुंसि च' (लि० सू० १३९) इति पुँल्लिङ्गता नपुंसकलिङ्गता च।** गाण्डिः ग्रन्थिः अस्ति अस्य इति गाण्डीवः, गाण्डीवम्। गाण्डि-शब्दात् 'कृदिकारादक्तिनः' (वा० पा० अ० ४।१।४५) इति वैकल्पिकः ङीप्-प्रत्ययः। ङकार-पकारानुबन्धलोपः। 'यस्येति च' (पा० अ० ६।४।१४८) इति गाण्डि-शब्दस्य इकारस्य लोपः। 'गाण्ड्यजगात्संज्ञायाम्' (पा० अ० ५।२।११०) इति व-प्रत्ययः।

गाथम्, गाथः नपुं०, पुं०। **इत्यत्र 'तीर्थ-प्रोथ-यूथ-गाथानि नपुंसके च' (लि० सू० ७३) इति नपुंसकलिङ्गता पुँल्लिङ्गता च।** यद् गीयते तद् गाथम्, यो वा गीयते स गाथः। उभयत्र अपि गै शब्दे (भ्वा० प०) 'आदेच उपदेशेऽशिति' (पा० अ० ६।१।४५) इति धातोः ऐकारस्य आकारः। गा स्तुतौ (जु० प०), गाङ् गतौ (भ्वा० आ०). 'उपि-कुपि-गार्तिभ्यस्थन्' (उ० २।४) इति थन्-प्रत्ययः। नकारानुबन्धलोपः। ततः स्त्रियां तु 'अजाद्यतष्टाप्' (पा० अ० ४।१।४) इति टाप्-प्रत्ययः। टकार-पकारानुबन्धलोपः। 'अकः सवर्णे दीर्घः' (पा० अ० ६।१।१०१) इति अकारस्य आकारस्य च आ-दीर्घः। एवं गाथा-शब्दः अपि व्युत्पद्यते। 'गाथा श्लोके संस्कृतान्यभाषायां शेष-वृत्तयोः' इति मेदिनी।

गिरिः पुं०। **इत्यत्र 'देवासुरात्म-स्वर्ग-गिरि-समुद्र-नख-केश-दन्त-स्तन-भुज-कण्ठ-खड्ग-शर-पङ्काभिधानानि' (लि० सू० ४३) इति पुँल्लिङ्गता।** गिरति निगलति, गृणाति शब्दयति वा इति गिरिः। गॄ निगरणे (तु० प०), गॄ शब्दे (क्र्या० प०) 'कॄ-गॄ-शॄ-पॄ-कुटि-भिदि-छिदिभ्यश्च' (उ० ४।१४४) इति इ-प्रत्ययः स च कित्। 'ॠत इद्धातोः' (पा० अ० ७।१।१००) इति 'उरण् रपरः' (पा० अ० १।१।५१) इति सहकारेण धातोः ॠकारस्य इर्-आदेशः। 'अद्रि-गोत्र-गिरि-ग्रावाचल-शैल-शिलोच्चयाः' इत्यमरः। 'गीर्णि-गिरौ' इति चापरः। 'गिरिः पूज्येऽक्षिरुजि कन्दुके। शैले गैरेयके गीर्णावपि' इति हैमः। 'गिरिर्ना नेत्र-रुग्भिदि। अद्रौ गिरिजके योपिद्गीर्णे पूज्ये पुनस्त्रिपु' इति मेदिनी। 'गिरिर्गोत्राक्षिरोगयोः' इति सिद्धान्तकौमुद्याम् उणादौ। 'गिरिर्वै रुद्रस्य योनिः' (मैत्रा० सं० १।१०।२०) 'तस्य वृत्रस्य एतच्छरीरं यद् गिरयो यदश्मानः' (शत० ब्रा० ३।४।३।१३)। 'शीर्षहार्यं गिरौ जीवनम्' (तै० सं० ६।१।९।४)। 'गिरिर्मेघनाम' (निघं० १।१०)। 'गिरिः पर्वतः' (निघं० १।२०)।

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by S3 Foundation USA

गीः स्त्री०। **इत्यत्र 'आशीर्-धूः-पूर्-गीर्-द्वारः' (लि० सू० २८) इति स्त्रीलिङ्गता।** गृणन्ति यां सा गीः। गॄ शब्दे (क्र्या० प०) 'सम्पदादिभ्यः क्विप्' (वा० पा० अ० ३। ३। ९४) इति क्विप्-प्रत्ययः। तस्य सर्वापहारिलोपः। 'उरण् रपरः' (पा० अ० १। १। ५१) इति सहकारेण धातोः ॠकारस्य 'ॠत इद् धातोः' (पा० अ० ७। १। १००) इति इर्-आदेशः। एवं गिर् शब्दः निष्पद्यते। तस्य प्रथमैकवचने गीः भवति। 'ब्राह्मी-तु भारती भाषा गीर्वाग्वाणी सरस्वती' इत्यमरः। 'गीः स्त्री भाषा-सरस्वत्योः' इति अमरकोषे सुधा-व्याख्यायां भानुजिदीक्षितः। 'गीः वाङ्नाम' (निघं० १। ११) 'गिरः स्तुतयो गृणातेः' (निरु० १। १०)। 'गिरा गीत्या स्तुत्या' (निरु० ६। २४)। 'विशो गिरः' (शत० ब्रा० ३। ६। १। २४)। 'वाग् वै गीः' (शत० ब्रा० ७। २। २। ५)।

गीतम् नपुं०। **इत्यत्र 'निष्ठा च' (लि० सू० १२०) इति नपुंसकलिङ्गता।** गीयते यत् तद् गीतं गानं वा गीतम्। गै शब्दे (भ्वा० प०) 'नपुंसके भावे क्तः' (पा० अ० ३। ३। ११४) इति क्त-प्रत्ययः। ककारानुबन्धलोपः। 'आदेच उपदेशेऽशिति' (पा० अ० ६। १। ४५) इति धातोः ऐकारस्य आकारः। 'घु-मा-स्था-गा-पा-जहातिसां हलि' (पा० अ० ६। ४। ६६) इति आकारस्य ईकारः। 'गीतं गानमिमे समे' इत्यमरः। 'गीतं शब्दितगानयोः' इति हैमः।

गुणः पुं०। **इत्यत्र 'णोपधः' (लि० सू० ६७) इति पुँल्लिङ्गता।** गुण्यते इति गुणः। गुण आमन्त्रणे (चु० उ०) 'अकर्तरि च कारके संज्ञायाम्' (पा० अ० ३। ३। १९) इति घञ्-प्रत्ययः। घकार-ञकारानुबन्धलोपः। **अथवा** 'एरच्' (पा० अ० ३। ३। ५६) इति अच्-प्रत्ययः। चकारानुबन्धलोपः। **अथवा** गुणयति इति गुणः। गुण आमन्त्रणे (चु० उ०) 'नन्दि-ग्रहि-पचादिभ्यो०' (पा० अ० ३। १। १३४) इति अच्-प्रत्ययः। चकारानुवन्धलोपः। 'मौर्वीज्या शिञ्जिनी गुणः', 'गुणाः सत्त्वं रजस्तमः', 'शुल्वं वराटकः स्त्री तु रज्जुस्त्रिपु वटी गुणः', 'मौर्व्यां द्रव्याश्रिते सत्त्वशुक्लसन्ध्यादिके गुणः' इति चामरः। 'गुणो मौर्व्यामप्रधाने रूपादौ सूद इन्द्रिये। त्यागे शौर्यादिसन्ध्यादिसत्त्वाद्यावृत्तिरज्जुपु। शुक्लादावपि वट्यां च' इति मेदिनी। 'गुणो ज्यासूत्र-तन्तुषु। रज्जौ सत्त्वादौ सन्ध्यादौ शौर्यादौ भीम इन्द्रिये। रूपादावप्रधाने च दोपान्यस्मिन् विशेषणे' इति हैमः।

गुल्फः पुं०। **इत्यत्र 'क्रतु-पुरुष-कपोल-गुल्फ-मेघाभिधानानि' (लि० सू० ४९) इति पुँल्लिङ्गता।** गलति गालयते गल्यते वा इति गुल्फः। गल अदने (भ्वा० प०), गल स्रवणे (चु० आ०) 'कलि-गलिभ्यां फगस्योच्च' (उ० ५। २६) इति फक्-प्रत्ययः। धातोः उपधायाः अकारस्य उकारादेशश्च। 'तद्ग्रन्थी घुटिके गुल्फौ' इत्यमरः।

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by S3 Foundation USA

गुल्मम् नपुं०। इत्यत्र 'रुक्म-सिध्म-युग्मेध्म-गुल्माध्यात्म-कुङ्कुमानि नपुंसके' (लि० सू० ८४) इति नपुंसकलिङ्गता। गुड्यते अस्मात् इति गुल्मः। गुड रक्षायां (तु० प०) 'भीमादयोऽपादाने' (पा० अ० ३। ४। ७४) इति मक्-प्रत्ययः। ककारानुबन्धलोपः। कित्त्वात् 'पुगन्तलघूपधस्य च' (पा० अ० ७। ३। ८६) इति धातोः उपधायाः उकारस्य प्राप्तः ओ-गुणः 'क्ङिति च' (पा० अ० १। १। ५) इति निषिध्यते। डलयोः ऐक्यात् गुल्म इति व्युत्पद्यते। गुडति रक्षति इति गुल्मम् इत्यर्थे तु 'उणादयो बहुलम्' (पा० अ० ३। ३। १) इति उणादीनां बाहुलकत्वात् 'इषि-युधीन्धि-दसि-श्या-धू-सूभ्यो मक्' (उ० १। १४५) इति मक्-प्रत्ययः। ककारानुबन्धलोपः। अत्र अपि डलयोः अभेदात् गुल्मं जायते। 'अप्रकाण्डे स्तम्बगुल्मौ', 'गुल्मस्तु प्लीहा पुंसि', 'सेनामुखं गुल्मगणौ वाहिनी पृतना चमूः। अनीकिनी', 'गुल्मा रुक्स्तम्बसेनाश्च' इति चामरः। 'गुल्मः सेनाघट्टभिदोः सेनारक्षणरुग्भिदोः। स्तम्बोऽस्त्रियामामलक्येलावलीवस्त्रवेश्मसु' इति मेदिनी।

गृहः, गृहम् पुं०, नपुं०। इत्यत्र 'गृह-मेह-देह-पट्ट-पटहाष्टापदाम्बुद-ककुदाश्च' (लि० सू० १८२) इति पुँल्लिङ्गता नपुंसकलिङ्गता च। गृह्णाति इति गृहम्। ग्रह उपादाने (क्र्या० उ०) 'गेहे कः' (पा० अ० ३। १। १४४) इति क-प्रत्ययः। ककारानुबन्धलोपः। 'ग्रहिज्या-वयि-व्यधि०' (पा० अ० ६। १। १६) इति धातोः रेफस्य ऋकारः सम्प्रसारणम् 'सम्प्रसारणाच्च' (पा० अ० ६। १। १०८) इति धातोः अकारस्य पूर्वरूपम्। 'गृहं गेहोदवसितं वेश्म सद्म निकेतनम्। निशान्तवस्त्यसदनं भवनागारमन्दिरम्। गृहाः पुंसि च भूम्न्येव निकाय्यनिलयालयाः' इत्यमरः। 'गृहं गृहाश्च पुंभूम्नि कलत्रेऽपि च सद्मनि' इति मेदिनी। 'गृहा वै दुर्याः' (शत० ब्रा० १। १। २। २२, ऐत० ब्रा० १। १३)। 'ऋतवो (प्राणाः) गृहाः' (ऐत० ब्रा० ५। २५, जैमि० ब्रा० २। ३९)। 'गृहा गार्हपत्यः (अग्निः)' (काठ० सं० ८।७, मैत्रा० स्वं० १।५।१०)। 'गृहा वै प्रतिष्ठा' (शत० ब्रा० १।१।१।१९) 'गृहाणां ह पितर ईशते' (शत० ब्रा० २।४।२।२४)। 'गृहा वै सूक्तम्' (ऐत० ब्रा० ३।२३)। 'प्रतीच्या दिशा गृहाः पशवो मार्जयन्ताम्' (तैत्ति० सं० १।६।५। १२, काठ० सं० ५।५)।

गृहस्थूणम् नपुं०। इत्यत्र 'गृहशशाभ्यां क्लीबे' (लि० सू० २२) इति गृहपूर्वस्थूण-शब्दस्य नपुंसकलिङ्गता। गृह-शब्दः पूर्वं व्याख्यातः। स्थूण-शब्दः व्याख्यायते। तिष्ठति येन छादनादिकं तत् स्थूणम्। ष्ठा गति-निवृत्तौ (भ्वा० प०) 'धात्वादेः षः सः' (पा० अ० ६। १। ६४) इति धातोः षस्य सः। एवं षकारे निवृत्ते तत्प्रयुक्ते

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by S3 Foundation USA

ठकारे अपि निवृत्ते 'स्था' भवति। पुन: स्था इत्यस्मात् 'रास्ना-सास्ना-स्थूणा-वीणा:' (उ० ३। १५) इति न-प्रत्यय: धातो: आकारस्य ऊकारादेश: प्रत्ययस्य नकारस्य च णत्वम्। एवं स्थूण-शब्द: व्युत्पद्यते।

गोचर: पुं०। इत्यत्र **'घाजन्तश्च' (लि० सू० ३७) इति पुँल्लिङ्गता।** गाव: चरन्ति अस्मिन् इति गोचर:। गो + चर् भक्षणे (भ्वा० प०) 'गोचर-सञ्चर-वह-व्रज-व्यजापण-निगमाश्च' (पा० अ० ३। ३। ११९) इति घ-प्रत्यय:। घकारानुबन्धलोप:।

गोत्रम् नपुं०। इत्यत्र **'द्वाराग्र-स्फार-तक्र-वक्र०' (लि० सू० ९०) इति नपुंसकलिङ्गता।** गूयते शब्द्यते अनेन, गवते शब्दयति वा येन तद् गोत्रम्। गुङ् अव्यक्ते शब्दे (भ्वा० आ०) 'गु-धृ-वी-पचि-वचि-यमि-सदि-क्षदिभ्यस्त्र:' (उ० ४। १६८) इति त्र-प्रत्यय:। 'सार्वधातुकार्धधातुकयो:' (पा० अ० ७। ३। ८४) धातो: उकारस्य ओ-गुण:। **अथवा** गां त्रायते रक्षति इति गोत्रम्। गो + त्रैङ् पालने (भ्वा० आ०) 'आदेच उपदेशेऽशिति' (पा० अ० ६। १। ४५) इति धातो: ऐकारस्य आकारा-देश:। 'आतोऽनुपसर्गे क:' (पा० अ० ३। २। ३) इति क-प्रत्यय:। ककारानुबन्धलोप:। 'आतो लोप इटि च' (पा० अ० ६। ४। ६४) इति धातो: आकारस्य लोप:। 'अद्रि-गोत्र-गिरि-ग्रावाचल-शैल-शिलोच्चया:' एवं 'सन्ततिर्गोत्रजनन-कुलान्यभिजनान्वयौ' तथा 'गोत्रं च नाम्नि च' इत्यमर:। 'गोत्रं क्षेत्रेऽन्वये छत्रे सम्भाव्ये बोधवर्त्मनो:। वने नाम्नि च गोत्रोऽद्रौ। गोत्रा भुवि गवां गणो' इति हैम:। 'गोत्रा भूगव्ययोर्गोत्र: शैले गोत्रं कुला-ख्ययो:। सम्माननीयबोधे च काननच्छत्रवर्त्मसु' इति मेदिनी। 'गोत्र: मेघनाम' (निघं० १। १०)।

गोमयम्, गोमय: नपुं०, पुं०। इत्यत्र **'गोमय-कषाय-मलयान्वयाव्ययानि नपुंसके च' (लि० सू० ८८) इति नपुंसकलिङ्गता पुँल्लिङ्गता च।** गो: पुरीषं गोमयम्, गोमय: वा। गोशब्दात् 'गोश्च पुरीषे' (पा० अ० ४। ३। १४५) इति मयट्-प्रत्यय:। टकारानुबन्धलोप:। 'गोविट् गोमयमस्त्रियाम्' इत्यमर:।

गोशाल:, गोशालम् स्त्री०, पुं०। इत्यत्र **'सुरा-सेना-च्छाया-शाला-निशा स्त्रियां च' (लि० सू० १२९) इति स्त्रीलिङ्गता नपुंसकलिङ्गता च।** गच्छति इति गौ: गम्यते यत्र यया वा सा अपि गौ:। गम्लृ गतौ (भ्वा० प०) 'गमेर्डो:' (उ० २। ६८) इति डो-प्रत्यय:। डकारानुबन्धलोप:। डित्त्वात् धातो: अम् इत्यस्य 'टे:' (पा० अ० ६। ४। १४३) इति टेर्लोप:। एवं गो-शब्द: निष्पद्यते। 'अनड्वान् सौरभेयी गौ:' तथा 'माहेयी सौरभेयी गौरुस्रा माता च शृङ्गिणी' एवं 'स्वर्गेक्षुपशुवाग्वज्रदिङ्नेत्रघृणिभूजले। लक्ष्यदृष्ट्या

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by S3 Foundation USA

स्त्रियां पुंसि गौः' इत्यमरः। 'गौः स्वर्गे च बलीवर्दे रश्मौ च कुलिशे पुमान्। स्त्री सौरभेयी दृग्बाण-दिग्वाग्भूष्वप्सु भूम्नि च' इति मेदिनी। 'गौर्नादित्ये बलीवर्दे किरण-क्रतुभेदयोः। स्त्री तु स्याद् दिशि भारत्यां भूमौ च सुरभावपि। नृस्त्रियोः स्वर्ग-वज्राम्बुरश्मि-दृग्बाणलोमसु' इति केशवः। 'गौः स्वर्गे वृषभे रश्मौ वज्रे चन्द्रमसि स्मृतः। अर्जुने नेत्रदृग्बाण-भूवाग्वारिषु गौर्मता' इति विश्वः। 'गौः पृथिवीनाम' (निघं० १। १)। 'गौः वाङ्नाम' (निघं० १। ११)। 'गावः रश्मिनाम' (निघं० १। ५)। 'गौः स्तोतृनाम' (निघं० ३। १६)। 'गौः आदित्यो भवति गमयति रसान्, गच्छत्यन्तरिक्षे' (निरु० २। १४)। 'गावो गमनात्' (निरु० १२। ७)। 'गौरिति पृथिव्या नामधेयं यद् दूरं गता भवति यच्चास्यां भूतानि गच्छन्ति, गातेर्वौकारो नामकरणः' (निरु० २। २)। 'अन्तरिक्षं गौः' (ऐत० ब्रा० ४। १५)। 'गावो वा आदित्याः' (ऐत० ब्रा० ४। १७)। 'अन्नं हि गौः' (शत० ब्रा० ४। ३। ४। २५)। 'अन्नमु गौः' (शत० ब्रा० ७। ५। २। १९)। 'प्राणो हि गौः' (शत० ब्रा० ४। ३। ४। २५)। 'इडा हि गौः' (शत० ब्रा० २। ३। ४। ३४)। 'सरस्वती हि गौः' (शत० ब्रा० १४। २। १। ७)। 'विराट् वै गौः' (शत० ब्रा० ७। ५। २। १९)। 'आग्नेयो वै गौः' (शत० ब्रा० ७। ५। २। १९)। 'इमे वै लोका गौर्यद्धि किं च गच्छतीमांस्तल्लोकान् गच्छति' (शत० ब्रा० ६। १। २। ३४)। 'तस्मादाहुर्गावः पुरुषस्य रूपमिति' (शत० ब्रा० १२। ९। १। ४)। 'तस्मादेषा गौः उपजीवनीया' (शत० ब्रा० २। २। ४। १२)। 'इन्द्रियं वै वीर्यं गावः' (शत० ब्रा० ५। ४। ३। १०)। 'अन्नं वै गौः' (तै० ब्रा० ३। ९। ८। ३)। 'यज्ञो वै गौः' (तै० ब्रा० ३। ९। ८। ३)। 'गौर्वै सार्पराज्ञी' (कौषी० ब्रा० २७। ४)। 'वैश्वदेवी वै गौः' (गोप० उ० ३। १९)। 'गौर्वाव सर्वस्य मित्रम्' (तै० सं० २। ५। २। ६)। 'गौर्वै वाग्, गौर्विराट्, गौरिडा, गौः खल्वेन गौः, गौरिदं सर्वम्' (मैत्रा० सं० ४। २। ३)। 'गौर्हि यज्ञिया मेध्या' (मैत्रा० सं० १। ८। ९)। 'गौः प्रजापति-र्देवता' (मैत्रा० सं० २। १३। १४)। 'या गौः सा सिनीवाली सा एव जगती' (ऐत० ब्रा० ३। ४८)। 'गौर्वै स्रुचः' (तै० ब्रा० ३। ३। ५। ४)। 'सर्वस्य वै गावः प्रेमाणं सर्वस्य चारुतां गताः' (ऐत० ब्रा० ४। १७)। 'गौर्वै देवानां मनोता' (ऐत० ब्रा० २। १०)। 'इयं वैं पृथ्वी गौः' (काठ० सं० ३७। ६)। 'ज्यापि गौरुच्यते गमयतीषून्' (निरु० २। ६)। शलन्ति अत्र इति शाला। शल गतौ (भ्वा० प०) 'हलश्च' (पा० अ० ३। ३। १२१) इति घञ्-प्रत्ययः। घकार-ञकारानुबन्धलोपः। 'अत उपधायाः' (पा० अ० ७। २। ११६) इति धातोः उपधायाः अकारस्य आ-वृद्धिः। एवं शाल-शब्दः व्युत्पद्यते। ततः स्त्रियाम् 'अजाद्यतष्टाप्' (पा० अ० ४। १। ४) इति टाप्-प्रत्ययः। टकार-पकारानुबन्धलोपः। 'अकः सवर्णे दीर्घः' (पा० अ० ६। १। १०१) इति अकारस्य आकारस्य च आ-

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by S3 Foundation USA

दीर्घः। इत्थं शाला-शब्दः निष्पद्यते। 'वासः कुटी द्वयोः शाला सभा' एवं 'स्कन्ध-शाखाशाले' इत्यमरः। 'शाला तरुस्कन्धशाखा शाला भवनमिष्यते' इति शाश्वतः। 'शालो हाले मत्स्यभेदे शालौकस्तत्प्रदेशयोः। स्कन्धशाखायाम्' इति हैमः। ततः गवां शाला गोशालम् गोशाला वा। 'षष्ठी' (पा० अ० २। २। ८) इति गोशब्दस्य शाला-शब्देन समासः। सुपो लुक्। 'विभाषा सेना-सुराच्छाया-शाला-निशानाम्' (पा० अ० २। ४। २५) इति विकल्पेन गोशाला-शब्दस्य नपुंसकलिङ्गता। तेन 'ह्रस्वो नपुंसके प्रातिपदिकस्य' (पा० अ० १। २। ४७) इति गोशालाशब्दस्य ह्रस्वस्य विधानात् गोशाल-शव्दः निष्पद्यते। एवं नपुंसकलिङ्गे प्रथमैकवचने गोशालम् तथा स्त्रीलिङ्गे गोशाला इति भवति।

गौः स्त्री० पुं०। इत्यत्र **'गो-मणि-यष्टि-मुष्टि-पाटलि-बस्ति-शाल्मलि-त्रुटि-मसि-मरीचयः' (लि० सू० १७२) इति स्त्रीलिङ्गता पुँल्लिङ्गता च।** अयं गो-शब्दः पूर्वं गोशालाशब्द-व्याख्याने व्याख्यातः।

ग्रन्थिः पुं०। इत्यत्र **'ऋषि-राशि-दृति-ग्रन्थि-क्रिमि-ध्वनि-बलि-कौलि-मौलि-रवि-कवि-कपि-मुनयः' (लि० सू० १०९) इति पुँल्लिङ्गता।** ग्रन्थते कौटिल्यम् आचरति कुटिलो वा भवति इति ग्रन्थिः। ग्रथि कौटिल्ये (भ्वा० आ०) धातोः इदित्त्वात् 'इदितो नुम् धातोः' (पा० अ० ७। १। ५८) इति नुम्-आगमः, उकार-मकारानुबन्ध-लोपः। एवं ग्रन्थ् इति निष्पद्यते। **अथवा** ग्रथ्नाति सन्दृभ्नाति इति ग्रन्थिः। ग्रन्थ सन्दर्भे (क्र्या० प०) **अथवा** ग्रन्थयति बध्नाति इति ग्रन्थिः। ग्रन्थ बन्धने (चु० प०) 'खनि-कष्यज्यसि-वसि-वनि-सनि-ध्वनि-ग्रन्थि-चलिभ्यश्च' (उ० ४। १४१) इति इ-प्रत्ययः **अथवा** 'सर्वधातुभ्य इन्' इति इन्-प्रत्ययः। नकारानुबन्धलोपः। 'ग्रन्थिस्तु ग्रन्थिपर्णे ना बन्धे रुग्भेदपर्वणोः' इति मेदिनी। 'ग्रन्थिर्ना पर्वपरुषी' इत्यमरः।

ग्रामता स्त्री०। **इत्यत्र 'तलन्तः' (लि० सू० १७) इति स्त्रीलिङ्गता।** ग्रसते ग्रस्यते वा यः सः ग्रामः। ग्रसु अदने (भ्वा० आ०) 'ग्रसेरा च' (उ० १। १४३) इति मन्-प्रत्ययः, धातोः सकारस्य आकारादेशश्च। नकारानुबन्धलोपः। 'अकः सवर्णे दीर्घः' (पा० अ० ६। १। १०१) इति अकारस्य आकारस्य च आ-दीर्घः। **अथवा** ग्रामयति आमन्त्रयते इति ग्रामः। ग्राम आमन्त्रणे (चु० प०) 'नन्दि-ग्रहि-पचादिभ्यो०' (पा० अ० ३। १। १३४) इति अच्-प्रत्ययः। चकारानुबन्धलोपः। 'समौ संवसथग्रामौ' इत्यमरः। 'शब्दादिपूर्वो वृन्देऽपि ग्रामः' इति चामरः। 'ग्रामः स्वरे संवसथे वृन्दे शब्दादिपूर्वकः' इति विश्वः। 'ग्रामः स्वरे संवसथे' इति मेदिनी। 'छन्दांसीव खलु वै ग्रामः' (तै० सं० ३। ४। ९। २)। ग्रामाणां समूहः ग्रामता। 'ग्राम-जन-बन्धुभ्यस्तल्' (पा० अ० ४। २।

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by S3 Foundation USA

४३) इति तल्-प्रत्ययः। लकारानुबन्धलोपः। ततः तल्प्रत्ययान्तस्य स्त्रीत्वात् 'अजाद्यतष्टाप्' (पा० अ० ४। १। ४) इति टाप्-प्रत्ययः। टकार-पकारानुबन्धलोपः। 'अकः सवर्णे दीर्घः' (पा० अ० ६। १। १०१) इति अकारस्य आकारस्य च आ-दीर्घः। इत्थं ग्रामता व्युत्पद्यते।

ग्लानिः स्त्री०। **इत्यत्र 'मिन्यन्तः' (लि० सू० ६) इति स्त्रीलिङ्गता।** ग्लायति म्लायति यस्यां सा ग्लानिः। ग्लै हर्षक्षये (भ्वा० प०) 'वहि-श्रि-श्रु-यु-द्रु-ग्ला-हा-त्वरिभ्यो नित्' (उ० ४। ५२) इति नि-प्रत्ययः। स च नित्। नित्त्वं स्वरार्थम्। 'आदेच उपदेशेऽशिति' (पा० अ० ६। १। ४५) इति धातोः ऐकारस्य आकारः। **अथवा** ग्लानम् इति ग्लानिः। ग्लै हर्षक्षये (भ्वा० प०) 'ग्ला-म्ला-ज्या-हाभ्यो निः' (पा० अ० ३। ३।९४) इति नि-प्रत्ययः। 'आदेच उपदेशेऽशिति' (पा० अ० ६। १। ४५) इति धातोः ऐकारस्य आकारः। 'ग्लानिर्दौर्बल्यम्' इति सिद्धान्तकौमुद्याम् उणादौ तत्त्व-बोधिनीकारः।

घटः पुं०। **इत्यत्र 'घाजन्तश्च' (लि० सू० ३७) इति तथा 'टोपधः' (लि० सू० ६४) इति पुँल्लिङ्गता।** घटते इति घटः। घट चेष्टायां (भ्वा० आ०) 'नन्दि-ग्रहि-पचादिभ्यो०' (पा० अ० ३। १। १३४) इति अच्-प्रत्ययः। चकारानुबन्धलोपः। 'घटः कुटनिपौ' इत्यमरः। 'घटः समाधिभेदेभशिरःकूटकुटेषु च' इति मेदिनी।

घस्रः पुं०। **इत्यत्र 'रश्मिदिवसाभिधानानि' (लि० सू० १००) इति पुँल्लिङ्गता।** 'उणादयो बहुलम्' (पा० अ० ३। ३। १) इति उणादिप्रत्ययानां वाहुलकत्वात् घसति भक्षति तमः इति घस्रः। घस्लृ अदने (भ्वा० प०) इत्यत्र 'स्फायि-तञ्चि०' (उ० २। १३) इति रक्-प्रत्ययः **अथवा** 'ऋज्रेन्द्राग्र०' (उ० २। २९) इति रन्-प्रत्ययः। रक् प्रत्यये ककारानुबन्धलोपः, रन्-प्रत्यये च नकारानुबन्धलोपः। 'घस्रो दिनाहनी वा तु क्लीबे दिवसवासरौ' इत्यमरः। 'घस्रस्तु दिवसे हिंस्रे' इति मेदिनी।

घृतः, घृतम् पुं०, नपुं०। **इत्यत्र 'घृत-भूत-मुस्त-क्ष्वेलितैरावत-पुस्तक-बुस्त-लोहिताः' (लि० सू० १७७) इति पुँल्लिङ्गता नपुंसकलिङ्गता च।** घ्रियते सिच्यते जिघर्ति दीप्यते वा यः स घृतः यत् तद् वा घृतम्। घृ सेवने (भ्वा० प०), घृ क्षरण-दीप्त्योः (जु० उ०) 'अञ्जि-घृ-सिभ्यः क्तः' (उ० ३। ८९) इति क्त-प्रत्ययः। अघरत् असिञ्चत् अक्रियत असिच्यत, अजिघः अदीप्यत, अघ्रियत अदीप्यत वा यः सः घृतः यत् तद् वा घृतम् अस्मिन् भूतार्थे तु 'निष्ठा' (पा० अ० ३। २। १०२) इति क्त-प्रत्ययः। घरतात् सिञ्चतात्, जिघर्तात् दीव्यतात् अस्मिन् आशिषि अर्थे च 'क्तिच् क्तौ च संज्ञायाम्'

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by S3 Foundation USA

(पा० अ० ३।३।१७४) इति क्त-प्रत्ययः। ककारानुबन्ध-लोपः। कित्त्वात् धातोः ऋकारस्य 'सार्वधातुकार्धधातुकयोः' (पा० अ० ७।३।८४) इति 'उरण् रपरः' (पा० अ० १।१।५१) इति सहकारेण प्राप्तः अर्-गुणः 'क्ङिति च' (पा० अ० १।१।५) इति निषेधात् न भवति। 'घृतमाज्यं हविः' इति मेदिनी। 'घृतमाज्याम्बुदीप्तेषु' इति हैमः। 'घृतमुदकनाम' (निघं० १।१२)। 'घृतमित्युदकनाम जिघर्त्तेः सिञ्चतिकर्मणः' (निरु० ७।२४)। 'घृतं वै देवा वज्रं कृत्वा सोममघ्नन्' (गो० उ० २।४)। 'एतद्वा अग्नेः प्रियं धाम यद् घृतम्' (तै० ब्रा० १।१।९।६)। 'सर्वदेवत्यं वै घृतम्' (तां० ब्रा० १८।२।६)। 'बहुदेवत्यं वै घृतम्' (कौपी० ब्रा० २०।४)। 'तेजो वा एतत् पशूनां यद् घृतम्' (ऐत० ब्रा० ८।२०)। 'पशवो घृतम्' (मैत्रा० सं० १।१०)। 'भूतिर्दध्ना घृतेन वर्धताम्' (मैत्रा० सं० ४।८।९, तैत्ति० सं० ३।२।६।१)। 'यदघ्रियत तद् घृतम्' (मैत्रा० सं० २।३।४) एवं (तैत्ति० सं० २।३।१०।१)। 'उल्वं घृतम्' (शत० ब्रा० ६।६।२।१५)। 'रेतः सिक्तिर्वै घृतम्' (कौपी० ब्रा० १६।५)। 'अन्तो वै पयसां घृतम्' (जैमि० ब्रा० १।२२४)। 'घृतं वै देवानां मधु' (काठ० सं० २६।३)। 'एतद्रूपा वै पशवो यद् घृतम्' (काठ० सं० ११।२)। 'घृतं देवानामायुतं मनुष्याणाम्' (मैत्रा० सं० ३।६।२)। 'तेजो वै घृतम्' (काठ० सं० १०।१, तैत्ति० सं० २।२।९।६, मैत्रा० सं० १।६।८)। 'स घृङ्ङ्करोत् तद् घृतस्य घृतत्वम्' (काठ० सं० २४।७)। 'पशवो वै घृतश्च्युतः' (तां० ब्रा० ९।१।१७)।

चक्रम्, चक्रः नपुं०, पुं०। इत्यत्र 'चक्र-वज्रान्धकार-सारावारपार-क्षीर-तोमर-शृङ्गार-भृङ्गार-मन्दारोशीर-तिमिर-शिशिराणि नपुंसके च' (लि० सू० ९२) इति नपुंसकलिङ्गता पुँल्लिङ्गता च। क्रियते अनेन इति चक्रं चक्रो वा। डुकृञ् करणे (त० उ०) 'घञर्थे क-विधानम्' (पा० अ० ३।३।५८) इति क-प्रत्ययः। ककारानुबन्धलोपः। 'कृञादीनां के द्वे भवत इति वक्तव्यम्' (वा० पा० अ० ६।१।१२) इति कृ-धातोः द्वित्वम्। कृ कृ अ इति स्थितौ 'उरत्' (पा० अ० ७।४।६६) इति पूर्वस्य कृ इत्यस्य ऋकारस्य स्थाने 'उरण् रपरः' (पा० अ० १।१।५१) इति सहकारेण अर् आदेशः। 'हलादिः शेषः' (पा० अ० ७।४।६०) इति र-लोपः। 'कुहोश्चुः' (पा० अ० ७।४।६२) इति कस्य चकारः। चकृ अ इति स्थितौ 'इको यणचि' (पा० अ० ६।१।७७) इति ऋकारस्य र्-आदेशः। 'वरूथिनी बलं सैन्यं चक्रं चानीकमस्त्रियाम्', 'चक्रं रथाङ्गम्' इत्यमरः। 'चक्रः कोके पुमान्। क्लीबं व्रजे सैन्यरथाङ्गयोः। राष्ट्रे दम्भान्तरे कुम्भकारोपकरणास्त्रयोः। जलावर्त्तेऽपि' इति मेदिनी। 'चक्रं चकतेर्वा चरतेर्वा क्रामतेर्वा' (निरु० ४।२६)। 'वज्रो वै चक्रम्' (जैनि० ब्रा० १।५१, तै० ब्रा० १।४।४।१०)।

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by S3 Foundation USA

चत्वरम् नपुं०। इत्यत्र **'द्वाराग्र-स्फार-तक्र-वक्र-वप्र०' (लि० सू० ९०) इति नपुंसकलिङ्गता।** चत्यते परिभाष्यते याच्यते वा यत् तद् चत्वरम्। चते परिभाषणे याचने च (भ्वा० उ०) 'कृ-गॄ-शॄ-वृञ्-चतिभ्यः ष्वरच्' (उ० २।१२३) इति ष्वरच्-प्रत्ययः। षकार-चकारानुबन्धलोपः। 'अङ्गनं चत्वराजिरे' तथा 'समे स्थण्डिल-चत्वरे' इत्यमरः। 'चत्वरं स्थण्डिलेऽङ्गणे' इति मेदिनी। 'चत्वरं स्यात् पथां श्लेषे स्थण्डिलाङ्गनयोः' इति हैमः।

चत्वारिंशत् स्त्री०। इत्यत्र **'विंशत्यादिरानवतेः' (लि० सू० १३) इति स्त्रीलिङ्गता।** चत्वारः दशतः परिमाणम् अस्ति अस्य सङ्घस्य इति चत्वारिंशत्। चतुर्-शब्दात् 'पङ्क्ति-विंशति-त्रिंशच्चत्वारिंशत्पञ्चाशत्षष्टिसप्तत्यशीति-नवतिशतम्' (पा० अ० ५।१।५९) इति शत्-प्रत्ययः, चतुर्-शब्दस्य चत्वारिन् इति आदेशश्च। 'नश्चापदान्तस्य झलि' (पा० अ० ८।३।२४) इति नकारस्य अनुस्वारः। एवं चत्वारिंशत् व्युत्पद्यते।

चन्दनम्, चन्दनः नपुं०, पुं०। इत्यत्र **'मान-यानाभिधान-नलिन-पुलिनोद्यान-शयनासन-स्थान-चन्दनालान-समान-भवन-वसन-सम्भावन-विभावन-विमानानानि नपुंसके च' (लि० सू० ७६) इति नपुंसकलिङ्गता पुँल्लिङ्गता च।** यत् चन्दति आह्लादयति दीपयति, येन चन्द्यते आह्लाद्यते दीप्यते वा तद् चन्दनं सः चन्दनः वा। चदि आह्लादे (भ्वा० प०) धातोः इदित्त्वात् 'इदितो नुम् धातोः' (पा० अ० ७।१।५८) इति नुम्-आगमः। उकार-मकारानुबन्धलोपः। 'बहुलमन्यत्रापि' (उ० २।७९) इति युच् प्रत्ययः। अथवा चन्दयति इति चन्दनम्। अथवा चन्द्यते आह्लाद्यते येन तद् चन्दनम्। ण्यन्तात् चदि आह्लादे दीप्तौ च (भ्वा० प०) 'ल्युट् च' (पा० अ० ३।३।११५) इति अथवा 'कृत्यल्युटो बहुलम्' (पा० अ० ३।३।११३) इति ल्युड्-आगमः। लकार-टकारानुबन्धलोपः। युच्-प्रत्यये तु चकारानुबन्धलोपः। 'युवोरनाकौ' (पा० अ० ७।१।१) इति यु-स्थाने अनादेशः। 'गन्धसारो मलयजो भद्रश्रीश्चन्दनोऽस्त्रियाम्' इत्यमरः।

चमसम्, चमसः नपुं० पुं०। इत्यत्र **'चमसांस-रस-निर्यासोपवास-कार्पासि-वास-माल-कास-कांस-मांसानि नपुंसके च' (लि० सू० ९८) इति नपुंसकलिङ्गता पुँल्लिङ्गता च।** चम्यते भक्ष्यते येन तद् चमसम्, येन सः वा चमसः सोमपात्रं वा। चमु अदने (भ्वा० प०), 'चमु भक्षणे' (स्वा० प०) 'अत्यवि-चमि-तमि-नमि-रभि-नभि-तपि-पति-पनि-महिभ्योऽसच्' (उ० ३।११७) इति असच्-प्रत्ययः। चकारानुबन्धलोपः। 'चमसो यज्ञपात्रस्य भेदेऽस्त्री पिटके स्त्रियाम्' इति मेदिनी। 'चमसः मेघनाम' (निघं० १।१०)। 'चमसः कस्मात् ? चाम्यन्त्यस्मिन्निति' (निरु० १०।१२)।

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by S3 Foundation USA

चमूः स्त्री०। इत्यत्र 'अन्यूप्रत्ययान्तो धातुः' (लि० सू० ४) इति स्त्रीलिङ्गता। चमति चम्नोति भक्षयति शत्रून् इति चमूः। चमु अदने (भ्वा० प०), चमु भक्षणे (स्वा० प०) 'कृषि-चमि-तनि-धनि-सर्जि-खर्जिभ्य ऊः स्त्रियाम्' (उ० १।८०) इति स्त्रियाम् ऊ-प्रत्यय। 'ध्वजिनी वाहिनी सेना पृतनाऽनीकिनी चमूः' इत्यमरः। 'चमूः सेनाविशेषे च सेनामात्रे च योषिति' इति मेदिनी। 'चम्वौ द्यावा-पृथिव्योर्नाम' (निघं० ३।१०)।

चयः पुं०। इत्यत्र 'घाजन्तश्च' (लि० सू० ३७) इति पुँल्लिङ्गता। चयन चयः चीयते वा यः सः, चिञ् चयने (स्वा० उ०) 'एरच्' (पा० अ० ३।३।५६) इति अच्-प्रत्ययः। चकारानुबन्धलोपः। 'सार्वधातुकार्धधातुकयोः' (पा० अ० ७।३।८४) इति धातोः इकारस्य ए-गुणः। 'एचोऽयवायावः' (पा० अ० ६।१।७८) इति एकारस्य अय्-आदेशः। 'स्याच्चयो वप्रमस्त्रियाम्' इत्यमरः। 'समुदायः समुदयः समवायश्चयो गणः' इति चामरः। 'चयः समूहे प्राकारमूलबन्धे समाहृतौ' इति मेदिनी।

चरणम्, चरणः नपुं०, पुं०। इत्यत्र **'कार्षापण-स्वर्ण-सुवर्ण-व्रण-चरण-वृषण-विषाण-चूर्ण-तृणानि नपुंसके च' (लि० सू० ६९) इति नपुंसकलिङ्गता पुँल्लिङ्गता च।** चरन्ति अनेन इति चरणं चरणो वा। चर गतौ (भ्वा० प०) 'करणाधिकरणयोश्च' (पा० अ० ३।३।११७) इति ल्युट्-प्रत्ययः। लकार-टकारानुबन्धलोपः। 'युवोरनाकौ' (पा० अ० ७।१।१) इति यु-स्थाने अनादेशः। 'अट्-कुप्वाङ्-नुम्-व्यवायेऽपि' (पा० अ० ८।४।२) इति नस्य णः। 'पादः पदङ्घ्रिश्चरणोऽस्त्रियाम्' इत्यमरः। 'चरणोऽस्त्री बह्वृचादौ मूले गोत्रे पदेऽपि च। भ्रमणे भक्षणे चापि नपुंसक उदाहृतः' इति मेदिनी। 'आदित्य एव चरणं यदा ह्येवैष उदेत्यथेदं सर्वं चरति' (शत० ब्रा० १०।३।५।३)। 'चक्षुरेव चरणं चक्षुषा ह्ययमात्मा चरति' (शत० ब्रा० १०।३।५।७)।

चर्म नपुं०। इत्यत्र 'मन्द्व्यच्कोऽकर्त्तरि' (लि० सू० १४९) इति नपुंसकलिङ्गता। चरति गच्छति भक्षति चर्यते गम्यते भक्ष्यते वा यत् तत् चर्म। चर गति-भक्षणयोः (भ्वा० प०) 'सर्वधातुभ्यो मनिन्' (उ० ४।१४६) इति मनिन्-प्रत्ययः। इकार-नकारानुबन्ध-लोपः। एवं चर्मन् व्युत्पद्यते। तस्य प्रथमा-द्वितीयैकवचने 'चर्म' प्रति भवति। 'अजिनं चर्म कृत्तिः स्त्री' तथा 'फलकोऽस्त्री फलं चर्म' इत्यमरः। 'चर्म चरतेर्वोच्चृतं भवतीति वा' (निरु० २।५)। 'जिह्वा चर्म' (तै० सं० ६।२।११।४)। 'चर्म वाऽएतत् कृष्णस्य मृगस्य तन्मानुषं, शर्म देवत्रा' (शत० ब्रा० ३।२।१।८)।

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by S3 Foundation USA

चषकम्, चषकः नपुं०, पुं०। इत्यत्र **'कण्टकानीक-सरक-मोदक-चषक-मस्तक-पुस्तक-तडाक-निष्क-शुष्क-वर्चस्क-पिनाक-भाण्डक-पिण्ड-कर्कटक-शण्डक-पिटक-ताल-फलक-पुलाकानि नपुंसके च' (लि० सू० ६३) इति नपुंसकलिङ्गता पुँल्लिङ्गता च।** चपन्ति भक्षयन्ति पिबन्ति वा येन यस्मिन् वा तद् चषकं स चषको वा। चष भक्षणे (भ्वा० उ०) 'क्वुन् शिल्पिसंज्ञयोरपूर्वस्यापि' (उ० २। ३३) इति क्वुन्-प्रत्ययः। कनावितौ लोपः। 'युवोरनाकौ' (पा० अ० ७। १। १) इति वु-स्थाने अकादेशः। 'चषकोऽस्त्री पानपात्रम्' इत्यमरः। 'चषकोऽस्त्री सुरापात्रे मद्यमद्यप्रभेदयोः' इति मेदिनी।

चामरम् नपुं०। इत्यत्र **'द्वाराग्र-स्फार-तक्र-वक्र-वप्र०' (लि० सू० ९०) इति नपुंसकलिङ्गता।** चमति चम्नोति भक्षयति चम्यते भक्ष्यते वा इति चमरः। चमु अदने (भ्वा० प०), चमु भक्षणे (भ्वा० प०) 'अर्त्ति कमि-भ्रमि-चमि-देवि-वासिभ्यश्चित्' (उ० ३। १३२) इति अर-प्रत्ययः सः च चित्। चित्त्वं स्वरार्थम्। 'चमरो मृगः' इत्यमरः। 'चमरं चामरे स्त्री तु मञ्जरी-मृगभेदयोः' इति मेदिनी। ततः स्त्रियां 'षिद्-गौरादिभ्यश्च' (पा० अ० ४। १। ४१) इति ङीप्-प्रत्ययः। ङकार-पकारानुबन्धलोपः। 'यस्येति च' (पा० अ० ६। ४। १४८) इति रकारोत्तरवर्त्तिनः अकारस्य लोपः। 'चमरी तु मृगान्तरे' इति हैमः। पुनः चमर्याः इदं चामरम् अस्मिन् अर्थे चमरी शब्दात् 'तस्येदम्' (पा० अ० ४। ३। १२०) इति अण्-प्रत्ययः। णकारानुबन्धलोपः। णित्त्वात् 'तद्धितेष्व-चामादेः' (पा० अ० ७। २। ११७) इति चमरी-शब्दे चकारोत्तर-वर्त्तिनः अकारस्य आ-वृद्धिः। 'यस्येति च' (पा० अ० ६। ४। १४८) इति रकारोत्तरवर्त्तिनः ईकारस्य लोपः। 'चामरं तु प्रकीर्णकम्' इत्यमरः। 'चमरं चामरं स्त्री तु मञ्जरीमृगभेदयोः' तथा 'चामरं चामरापि च। दण्डं च बालव्यजने' इति मेदिनी। 'चमरश्चामरे दैत्ये चमरी तु मृगान्तरे' इति हैमः। 'चामरं बालव्यजनं रोमगुच्छकम्' इति रभसः।

चातुर्यम् नपुं०। इत्यत्र **'त्व-ष्यञौ तद्धितौ' (लि० सू० १२१) इति नपुंसक-लिङ्गता।** चतलि भाषते याचते वा इति चतुरः पटुः इत्यर्थः। चते परिभाषणे याचने च (भ्वा० प०) 'मन्दि-वाशि-मथि-चति-चङ्क्यङ्किभ्य उरच्' (उ० १। ३८) इति उरच्-प्रत्ययः। चकारानुबन्धलोपः। 'दक्षे तु चतुर-पेशल-पटवः सूत्थान उष्णश्च' इत्यमरः। चतुरस्य भावः कर्म वा चातुर्यम्। चतुर-शब्दात् 'गुणवचनब्राह्मणादिभ्यः कर्मणि च' (पा० अ० ५। १। १२४) इति ष्यञ्-प्रत्ययः। षकार-ञकारानुबन्धलोपः। ञित्त्वात् 'तद्धितेष्वचामादेः' (पा० अ० ७। २। ११७) इति चकारोत्तर-वर्त्तिनः अकारस्य आ-

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by S3 Foundation USA

वृद्धिः। 'यस्येति च' (पा० अ० ६। ४। १४८) इति रकारपरवर्त्तिनः अकारस्य लोपः। एवं चातुर्य-शब्दः निष्पद्यते।

चातुरी स्त्री०। इत्यत्र **'ईकारान्तश्च' (लि० सू० १०) इति स्त्रीलिङ्गता**। चातुर्य-शब्दः पूर्वं व्याख्यातः। ततः ष्यञ्-प्रत्ययस्य पित्वसामर्थ्यात् 'पिद्गौरादिभ्यश्च' (पा० अ० ४। १। ४१) इति ङीप्-प्रत्ययः। चातुर्य ङीप् इति स्थितौ ङकारा-पकारानुबन्ध-लोपः। 'यस्येति च' (पा० अ० ६। ४। १४८) इति यकार-परवर्त्तिनः अकारस्य लोपः। 'हलस्तद्धितस्य' (पा० अ० ६। ४। १५) इति यकारस्य लोपः। एवं चातुरी-शब्दः व्युत्पद्यते।

चित्तम् नपुं०। इत्यत्र **'नवीनीतावतानानृतामृत-निमित्त-चित्त-पित्त-व्रत-रजत-वृत्त-पलितानि' (लि० सू० १६५) इति नपुंसकलिङ्गता**। चेतनं चित्तम्। **अथवा** चेतति येन तत् चित्तम्। चिती संज्ञाने (भ्वा० प०) 'नपुंसके भावे क्तः' (३। ३। ११४) इति क्त-प्रत्ययः। अथवा 'अञ्जि-घृ-सिभ्यः क्तः' (उ० ३। ८९) इति बाहुलकात् क्त-प्रत्ययः। ककारानुबन्धलोपः। 'आर्धधातुकस्येड् वलादेः' (पा० अ० ७। २। ३५) इति प्राप्तः इडागमः 'श्वीदितो निष्ठायाम्' (पा० अ० ७। २। १४) इत्यनेन निषिध्यते। 'चित्तं तु चेतो हृदयम्' इत्यमरः। 'चित्तं प्रज्ञानाम' (निघं० ३। २)। 'चित्तं चेततेः' (निरु० १। ६)। 'चित्तं विज्ञातम्' (तै० सं० ४। १। ९। १, मैत्रा० सं० २। ७। ७)। 'मनो वै चित्तम्' (मैत्रा० सं० ४। २। ६)।

चित्रम् नपुं०। इत्यत्र **'द्वाराग्र-स्फार-तक्र-वक्र-वप्र०' (लि० सू० ९०) इति नपुंसकलिङ्गता**। चिन्वन्ति यत् तत् चित्रम्, चीयते वा यत् तत् चित्रम्। चिञ् चयने (भ्वा० उ०) 'अमि-चि-मिदि-शसिभ्यः क्त्रः' (उ० ४। १६५) इति क्त्र-प्रत्ययः। ककारानुबन्धलोपः। क्त्त्वात् धातोः इकारस्य 'सार्वधातुकार्धधातुकयोः' (पा० अ० ७। ३। ८४) इति प्राप्तः ए-गुणः 'क्ङिति च' (पा० अ० १। १। ५) इति निषेधात् न भवति। **अथवा** चित्रयति चित्रयते वा यत् तत् चित्रम्। चित्र चित्रीकरणे चित्रीकरणम् आलेख्यम् इति मैत्रेयः। चित्र आलेख्यकरणे इति दुर्गः (चु० उ०) 'नन्दि-ग्रहि-पचादिभ्यो०' (पा० अ० ३। १। १३४) इति अच्-प्रत्ययः। चकारानुबन्धलोपः। **अथवा** चेतति चेत्यते वा येन तद् इति चित्। चिती संज्ञाने (भ्वा० प०) 'क्विप् च' (पा० अ० ३। २। ७६) इति क्विप्-प्रत्ययः। तस्य सर्वापहारिलोपः। चितं त्रायते रक्षति इति चित्रम्। चित + त्रैङ् पालने (भ्वा० अ०) 'आदेच उपदेशेऽशिति' (पा० अ० ३। २। ४५) इति धातोः ऐकारस्य आकारः। 'आतोऽनुपसर्गे कः' (पा० अ० ३। २। ३) इति

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by S3 Foundation USA

क-प्रत्ययः। ककारानुबन्धलोपः। 'आतो लोप इटि च' (पा० अ० ६। ४। ६४) इति धातोः आकारस्य लोपः। 'विस्मयोऽद्भुतमाश्चर्यं चित्रमित्यपि' तथा 'चित्रं किर्मीरकल्माषशबलैताश्च कर्बुरे' एवम् 'आलेख्याश्चर्ययोश्चित्रम्' इत्यमरः। 'चित्राखुपर्णी गोडुम्बा-सुभद्रा-दन्तिकासु च। मायायां सर्पनक्षत्रनदीभेदेषु च स्त्रियाम्। तिलकालेख्ययोः क्लीबं कर्बुराद्भुतयोरपि। तद्युक्तयोस्त्वन्यलिङ्गं चित्री झिल्ल्यां नपुंसकम्। गोस्तने वस्त्रभेदे च रेखा लेखनभेदयोः' इति मेदिनी। 'चित्रं खे तिलकेऽद्भुते। आलेख्ये कर्बुरे चित्रा त्वाखुपर्णी-सुभद्रयोः। गोडुम्बाप्सरलोर्दन्त्यां नक्षत्रोरगभेदयोः' इति हैमः। 'चित्रं चायनीयं महत्त्वम्' (निरु० २२। ६)। 'चित्ररूपा वै पशवः' (तै० ब्रा० ३। १०१)। 'चित्राण्येव नक्षत्राणां रूपम्' (जै० ब्रा० २। ४२९)। 'सर्वाणि चित्राण्यग्निः' (शत० ब्रा० ७। ४। १। २४)।

चिबुकम् नपुं०। इत्यत्र **'चिबुक-शालूक-प्रातिपदिकांशुकोल्मूकानि नपुंसके' (लि० सू० ६२) इति नपुंसकलिङ्गता।** चीवति चीव्यते वा यत् तद् चिबुकम्। चीवृ आदान-संवरणयोः (भ्वा० प०) 'मृगय्वादयश्च' (उ० १। ३७) इति कु-प्रत्ययः। ककारानुबन्धलोपः। बाहुलकात् धातोः ईकारस्य इकारः ह्रस्वः। चिवुः एव चिवुकम्। 'सर्वप्रातिपदिकेभ्यः स्वार्थे कन्' (वा० पा० अ० ५। ३। ९६) इति स्वार्थे कन्-प्रत्ययः। नकारानुबन्धलोपः। व-बयोः अभेद-स्मरणात् चिबुक-शब्दः व्युत्पद्यते। **अथवा** चिनोति शोभाम् इति चिबुकम्। चिञ् चयने (स्वा० उ०) 'उणादयो बहुलम्' (पा० अ० ३। ३। १) इति उणादि-प्रत्ययानां बाहुलकत्वात् 'समि कस उकन्' (उ० २। ३०) इति उकन् प्रत्ययः धातोः बुगागमश्च। प्रत्यये नकारानुबन्धलोपः, आगमे उकार-ककारानुवन्धलोपः। अत्र अपि व-वयोरभेदस्मरणात् चिबुक इत्येव जायते। 'अधस्ताच्चिबुकम्' इत्यमरः। 'अधरादधरोष्ठस्य चिबुः स्याच्चिबुकं तथा' इति निगमः।

चिह्नम् नपुं०। इत्यत्र **'जघनाजिन-तुहिन-कानन-वन-वृजिन-विपिन-वेतन-शासन-सोपान-मिथुन-श्मशान-रत्न-निम्न-चिह्नानि नपुंसके' (लि० सू० ८०५) इति नपुंसकलिङ्गता।** चाहयति, चह्यते अनेन वा इति चिह्नम्। चह परिकल्कने (भ्वा० प०) 'पृषोदरादीनि यथोपदिष्टम्' (पा० अ० ६। ३। १०९) इति नक्-प्रत्ययः धातोः उपधायाः अकारस्य इकारादेशश्च। ककारानुबन्धलोपः। कित्त्वात् 'पुगन्तलघूपधस्य च' (पा० अ० ७। ३। ८६) इति धातोः उपधायाः इकारस्य प्राप्तः ए-गुणः 'क्ङिति च' (पा० अ० १। १। ५) इति निषेधात् न भवति। 'कलङ्काङ्कौ लाञ्छनं च चिह्नं लक्ष्म च लक्षणम्' इत्यमरः। 'चिह्नं लक्ष्म-पताकयोः' इति मेदिनी।

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by S3 Foundation USA

चुल्लिः स्त्री०। **इत्यत्र 'चुल्लि-वेणि-खार्यश्च' (लि० सू० ३२) इति स्त्रीलिङ्गता।** चुल्ल्यते अस्मिन् इति चुल्लिः। चुल्ल भावकरणे (भ्वा० प०) 'सर्वधातुभ्य इन्' (उ० ४। ११९) इति इन्-प्रत्ययः। नकारानुबन्धलोपः। **अथवा** चुद्यते प्रेर्यते अग्मिन् अग्निः इति चुल्लिः। चुद प्रेरणे (चु० प०) 'पृषोदरादीनि यथोपदिष्टम्' (पा० अ० ६। ३। १०९) इति लिक्-प्रत्ययः। ककारानुबन्धलोपः। 'तोर्लि' (पा० अ० ८। ४। ६०) इति दकारस्य लकारः परसवर्णः। अत्र लिक्-प्रत्ययस्य किन्त्वात् तस्मिन् परे 'क्ङिति च' (पा० अ० १। १। ५) इति निषेधात् 'पुगन्तलघूपधस्य च' (पा० अ० ७। ३। ८६) इति धातोः उपधायाः उकारस्य प्राप्तः ओ-गुणः न भवति। 'अश्मन्तमुद्धानमधिश्रयणी चुल्लिरन्तिका' इत्यमरः।

चूतः पुं०। **इत्यत्र 'हस्त-कुन्तान्त-व्रात-वात-दूत-धूर्त्त-सूत-चूत-मुहूर्त्ताः' (लि० सू० १११) इति पुँल्लिङ्गता।** चूष्यते स्म इति चूतः। चूष पाने (भ्वा० प०) 'निष्ठा' (पा० अ० ३। २। १०२) इति क्त-प्रत्ययः। 'पृषोदरादीनि यथोपदिष्टम्' (पा० अ० ६। ३। १०९) इति धातोः षस्य लोपः। **अथवा** यः रसं च्योतति सः चूतः। च्युतिर् क्षरणे 'नन्दि-ग्रहि-पचादिभ्यो०' (पा० अ० ३। १। १३४) इति अच्-प्रत्ययः। चकारानुबन्ध-लोपः। 'पृषोदरादीनि यथोपदिष्टम्' (पा० अ० ६। ३। १०९) इति धातोः उकारस्य ऊ-दीर्घः यकारस्य लोपश्च। 'आम्रश्चूतो रसालोऽसौ सहकारोऽतिसौरभः' इत्यमरः।

चूर्णम्, चूर्णः नपुं०, पुं०। **इत्यत्र 'कार्षापण-स्वर्ण-सुवर्ण-व्रण-चरण-वृषण-विषाण-चूर्ण-तृणानि नपुंसके च' (लि० सू० ६९) इति नपुंसकलिङ्गता पुँल्लिङ्गता च।** चूर्ण्यते यः सः चूर्णः। 'चूर्ण प्रेरणे' (चु० प०) 'सत्यापपाश०' (पा० अ० ३। १। २५) इति णिच्-प्रत्ययः। णकार-चकारानुबन्धलोपः। 'अकर्त्तरि च भावे संज्ञायाम्' (पा० अ० ३। ३। १९) इति घञ्-प्रत्ययः। घकार-ञकारानुबन्धलोपः। **अथवा** चूर्णयति इति चूर्णः। चूर्ण प्रेरणे (चु० उ०) 'नन्दि-ग्रहि-पचादिभ्यो०' (पा० अ० ३। १। १३४) इति अच्-प्रत्ययः। चकारानुबन्धलोपः। **अथवा** 'एरच्' (पा० अ० ३। ३। ५६) इति अच्-प्रत्ययः। चकारानुबन्धलोपः। सर्वत्र 'णेरनिटि' (पा० अ० ६। ४। ५१) इति णिच्-प्रत्ययस्य इकारस्य लोपः। 'चूर्णानि वासयोगाः स्युः' एवं 'चूर्णे क्षोदः' इत्यमरः। 'चूर्णो धूलौ क्षारभेदे चूर्णानि वासयुक्तिषु' इति मेदिनी। 'चूर्णानि वासयोगाः स्युश्चूर्णो धूलिः सशर्करा' इति शाश्वतः।

छत्रम् नपुं०। **इत्यत्र 'द्वाराग्र-स्फार-तक्र०' (लि० सू० ९०) इति तथा 'त्रान्तः' (लि० सू० १५४) इति नपुंसकलिङ्गता।** छादयति अपवारयति यत् तत् छाद्यते

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by S3 Foundation USA

अपवार्यते वा येन तद् इति छत्रम्। ण्यन्तात् छद अपवारणे (चु० उ०) 'सर्वधातुभ्यः ष्ट्रन्' (उ० ४। १६०) इति ष्ट्रन्-प्रत्ययः, षकार-नकारानुबन्धलोपः। ततः 'निमित्तापाये नैमित्तिकस्याप्यपायः' इति न्यायेन ट्र इत्यस्य स्थाने 'त्र' इत्येव अवशिष्यते। 'णेरनिटि' (पा० अ० ६। ४। ५१) इति णिचः इकारस्य लोपः। 'इस्-मन्-त्रन्-क्विपु च' (पा० अ० ६। ४। ९७) इति धातोः उपधायाः आकारस्य अकारः ह्रस्वः। 'खरि च' (पा० अ० ८। ४। ५५) इति दकारस्य तकारः। 'छत्रं त्वातपत्रम्' इत्यमरः। 'छत्रं स्यादातपत्राणे' इति हैमः। 'छत्रा मिसावतिच्छत्रे कुस्तुम्बुरु-शिलीन्ध्रयोः। नपुंसके चातपत्रे' इति मेदिनी।

छदिः स्त्री०। इत्यत्र **'छदिः स्त्रियामेव' (लि० सू० १३६) इति स्त्रीलिङ्गता।** छादयति छाद्यते वा यया इति छदिः। ण्यन्तात् छद अपवारणे (चु० उ०) धातोः 'अर्चि-शुचि-हु-सृपि-छादि-छर्दिभ्य इसिः' (उ० २। १७०) इति इसि-प्रत्ययः। इकारानुबन्ध-लोपः। 'णेरनिटि' (पा० अ० ६। ४। ५१) इति णिचः इकारस्य लोपः। 'इस्-मन्-त्रन्-क्विपु च' (पा० अ० ६। ४। ९७) इति धातोः उपधायाः आकारस्य ह्रस्वः अकारः। सकारस्य रुत्वविसर्गौ 'अथ पटलं छदिः' इत्यमरः। 'छदिः गृहनाम' (निघं० ३। ४)। 'अन्तरिक्षं वै छदिश्छन्दः' (शत० ब्रा० ८। ५। २। ६)। 'अतिच्छन्दा वै छदिश्छन्दः सा हि सर्वाणि छन्दांसि छादयति' (शत० ब्रा० ८। २। ४। ५)। 'सिंहो वयश्छदिश्छन्दः' (मैत्रा० सं० २। ८। २, तैत्ति० सं० ४। ३। ५। २)।

छर्दिः स्त्री०। इत्यत्र **'छर्दिः स्त्रियामेव' (लि० सू० १३६) इति स्त्रीलिङ्गता।** छर्दयति वमति, छर्द्यते वम्यते सन्दीप्यते वा यया वा या सा छर्दिः। छर्द वमने (चु० उ०) 'अर्चि-शुचि-हु-सृपि-छादि-छर्दिभ्य इसिः' (उ० २। ११०) इति इसि-प्रत्ययः। इकारानुबन्धलोपः। अथवा छृदी सन्दीपने (चु० उ०) उक्त सूत्रेण इसि-प्रत्ययः। इकारानुबन्धलोपः। धातोः ऋकारस्य 'उरण् रपरः' (पा० अ० १। १। ५१) इति सहकारेण 'पुगन्तलघूपधस्य च' (पा० अ० ७। ३। ८६) इति अर्-गुणः। सकारस्य रुत्वविसर्गौ।

छविः स्त्री०। **इत्यत्र 'तिथि-नाडि-रुचि-वीचि-नालि-धूलि-किकि-कलिच्छवि-रात्र्यादयः' (लि० सू० २५) इति स्त्रीलिङ्गता।** छ्यति छिनत्ति असारं तमो वा या यया वा सा छविः। छो छेदने (दि० प०) 'कृवि-घृष्वि-छवि-स्थवि-किकीदिवि' (उ० ४। ५७) इति क्विन्-प्रत्ययः। ककार-नकारानुबन्धलोपः। 'आदेच उपदेशेऽशिति' (पा० अ० ६। १। १४५) इति धातोः ओकारस्य आकारः। तस्य आकारस्य पुनः

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by S3 Foundation USA

'कृवि-धृष्वि-छवि-स्थवि-किकीदिवि' (उ० ४। ५७) इति अकारः ह्रस्वः। 'स्युः प्रभा-रुग्-रुचिस्त्विड्-भा-भाश्छवि-द्युति-दीप्तयः' तथा 'शोभा कान्तिर्द्युतिश्छविः' इत्यमरः। 'छविस्तु रुचिशोभायाम्' इति हैमः। 'छविः शोभा-रुचोर्योषित्' इति मेदिनी।

छत्रम् पुं०, नपुं०। इत्यत्र **'पत्र-पात्र-पवित्र-सूत्रच्छत्राः पुंसि च' (लि० सू० १५७) इति पुँल्लिङ्गता नपुंसकलिङ्गता च।** छत्र-शब्दः पूर्वं व्याख्यातः।

छात्रः पुं०। इत्यत्र **'भृत्रामित्र-छात्र-पुत्र-मन्त्र-वृत्र-मेढ्रोष्ट्राः पुंसि' (लि० सू० १५६) इति पुँल्लिङ्गता।** गुरोर्दोपावरणं दोपाच्छादनं वा छत्रम्। छत्र-शब्दः पूर्वं व्याख्यातः। तच्छीलमस्ति अस्य अस्मिन् अर्थे छत्रशब्दात् 'छत्रादिभ्यो णः' (पा० अ० ४। ४। ६२) इति ण-प्रत्ययः। णकारानुबन्धलोपः। 'तद्धितेष्वचामादेः' (पा० अ० ७। २। ११७) इति छकारोत्तरवर्त्तिनः अकारस्य आ-वृद्धिः। 'यस्येति च' (पा० अ० ६। ४। १४८) इति त्रकारोत्तरवर्त्तिनः अकारस्य लोपः। 'छात्रान्तेवासिनौ शिष्ये' इत्यमरः।

जगत् नपुं०। इत्यत्र **'वियज्जगत्-सकृच्छकन्-पृषच्छकृद्-सकृदुदश्वितः' (लि० सू० १६४) इति नपुंसकलिङ्गता।** गच्छति इति जगत्। गम्लृ गतौ (भ्वा० प०) 'वर्त्तमाने पृषद्-बृहन्-महज्जगच्छतृवच्च' (उ० २। ८५) इति अति-प्रत्ययः, धातोः जग् आदेशश्च। प्रत्यये इकारानुबन्धलोपः। **अथवा** 'द्युति-गमि-जुहोतीनां द्वे च' (वा० पा० अ० ३। २। १७८) इति क्विप्-प्रत्ययः धातोः द्वित्वं च। 'पूर्वोऽभ्यासः' (पा० अ० ६। १। ४) इति पूर्वस्य गम् इत्यस्य अभ्यास-संज्ञा। 'हलादिः शेषः' (पा० अ० ७। ४। ६०) इति अभ्यास-संज्ञकस्य 'गम्' इत्यस्य मकारस्य लोपः। 'कुहोश्चुः' (पा० अ० ७। ४। ६२) इति अभ्यास-संज्ञकस्य गकारस्य जकारादेशः। 'गमः क्वौ' (पा० अ० ६। ४। ४०) इति धातोः मकारस्य लोपः। 'ह्रस्वस्य पिति कृति तुक्' (पा० अ० ६। १। ७१) इति धातोः तुग्-आगमः। उकार-ककारानुबन्धलोपः। क्विप्-प्रत्यय-सर्वापहारिलोपः। 'त्रिविष्टपं भुवनं जगत्' एवं 'जगदिङ्गेऽपि च' इत्यमरः। 'जगत् स्याद् विष्टपे क्लीबं वायौ ना। जङ्गमे त्रिपु' इति मेदिनी। 'जगत् स्थावर-जङ्गमं च' (निरु० ५। ३)। 'जगत् जङ्गमं' (निरु० ९। १३)। 'इयं पृथिवी। वै जगती, अस्यां हीदं सर्वं जगत्' (शत० ब्रा० ६। २। १। २९)। 'सर्वं वाऽइदमात्मा जगत्' (शत० ब्रा० ४। ५। ९। ८)। 'यः पुरुपमात्रस्य स जगच्चित्' (काठ० सं० २१। ४)।

जघनम् नपुं०। इत्यत्र **'जघनाजिन-तुहिन-कानन-वन-वृजिन-विपिन-वेतन-शासन-सोपान-मिथुन-श्मशान-रत्न-निम्न-चिह्नानि नपुंसके' (लि० सू० ७५) इति नपुंसकलिङ्गता।** हन्ति यद् येन वा हन्यते तद् जघनम्। हन हिंसा-गत्योः (अ०

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by S3 Foundation USA

प०) 'हन्तेः शरीरावयवे द्वे च' (उ० ५। ३२) इति अच्-प्रत्ययः धातोः द्वित्वं च। 'पूर्वोऽभ्यासः' (पा० अ० ६।१।४) इति पूर्वस्य 'हन्' इत्यस्य अभ्याससंज्ञा। 'हलादिः शेषः' (पा० अ० ७।४।६०) इति अभ्यास-संज्ञकस्य 'हन्' इत्यस्य नकारस्य लोपः। 'अभ्यासाच्च' (पा० अ० ७। ३। ५५) इति अभ्यास-संज्ञकात् 'ह' इत्यस्मात् परस्य 'हन्' इत्यस्य हकारस्य घकारः। 'कुहोश्चुः' (पा० अ० ७। ४। ६२) इति अभ्यास-संज्ञकस्य हकारस्य झकारः। 'अभ्यासे चर्च' (पा० अ० ८। ४। ५४) इति झकारस्य जकारः। 'पश्चान्नितम्बः स्त्रीकट्याः क्लीवे तु जघनं पुरः' इत्यमरः। 'जघनं स्यात् स्त्रियाः श्रोणिपुरोभागे कटावपि' इति मेदिनी। 'जघनं जघन्यतेः' (निरु० २। २०)।

जठरम् नपुं०। इत्यत्र 'द्वाराग्र-स्फार-तक्र-वक्र-वप्र०' (लि० सू० ९०) इति नपुंसकलिङ्गता। जजन्ति जायते उत्पद्यते जन्तुः मलादिकं वा यस्मिन् यस्मात् वा इति जठरम्। जन जनने (जु० प०), जनी प्रादुर्भावे (दि० आ०) 'जनेरष्ठ च' (उ० ५। ३८) इति अर-प्रत्ययः धातोः नकारस्य ठादेशश्च। 'पिचण्डकुक्षी जठरोदरं तुन्दम्' तथा 'जठरः कठिनेऽपि स्यात्' इत्यमरः। 'जठरो न स्त्रियां कुक्षौ वृद्धकर्कटयोस्त्रिपु' इति मेदिनी। 'जठरमुदरं भवति जग्धमस्मिन् ध्रियते धीयते वा' (नि० ४। ७)। 'मध्यं वै जठरम्' (शत० ब्रा० ७। १। १। २२)।

जतु नपुं०। इत्यत्र 'श्मश्रु-जानु-वसु-स्वाद्वश्रु-जतु-त्रपु-तालूनि नपुंसके' (लि० सू० ५४) तथा 'दारु-कशेरु-जतु-वस्तु-मस्तूनि नपुंसके' (लि० सू० ५८) इति नपुंसकलिङ्गता। जजन्ति जायते उत्पद्यते यद् येन वा तद् जतु। जन जनने (जु० प०), जनी प्रादुर्भावे (दि० आ०) 'फलि-पाटि-नमि-मनि-जनां गुक्-पटि-नाकि-धतश्च' (उ० १। १८) इति उ-प्रत्ययः धातोः नकारस्य तकारादेशश्च। 'राक्षा लाक्षा जतु क्लीबे यावोऽलक्तो द्रुमामयः' इत्यमरः। 'श्रीवेष्टाद्याश्च निर्यासा असन्नन्ता अबाधिताः। कशेरु-जतु-वस्तूनि हित्वा तु-रु-विरामकाः' इति चामरः।

जनपदः पुं०। इत्यत्र 'नाड्यप-जनोपपदानि व्रणाङ्ग-पदानि' (लि० सू० १०७) इति पुँल्लिङ्गता। जायते इति जनः। जनी प्रादुर्भावे (दि० आ०) पद्यते गच्छति प्राप्नोति यत् तत् पदम्। पद गतौ (दि० आ०), पद गतौ (चु० आ०) उभयत्र 'नन्दिग्रहि-पचादिभ्यो०' (पा० अ० ३। १। १३४) इति अच्-प्रत्ययः। चकारानुबन्धलोपः। एवं जन-शब्दः पदशब्दश्च व्युत्पद्यते। ततः जनः पदं वस्तु यत्र सः जनपदः। अथवा जनस्य पदं जनपदः। जनशब्दस्य पदशब्देन सह षष्ठीतत्पुरुष-समासः। 'नीवृज्जनपदः' इत्यमरः। 'भवेज्जनपदो जानपदोऽपि जनदेशयोः' इति विश्वः मेदिनी च।

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by S3 Foundation USA

जयः पुं०। **इत्यत्र 'घाजन्तश्च' (लि० सू० ३७) इति पुँल्लिङ्गता।** जयनं जयः जि जये (भ्वा० प०) 'एरच्' (पा० अ० ३। ३। ५६) इति अच्-प्रत्ययः। **अथवा** जयति इति जयः। जि जये (भ्वा० प०) 'नन्दि-ग्रहि-पचादिभ्यो०' (पा० अ० ३। १। १३४) इति अच्-प्रत्ययः। उभयत्र चकारानुवन्धलोपः। 'सार्वधातुकार्धधातुकयोः' (पा० अ० ७। ३। ८४) इति धातोः इकारस्य ए-गुणः। 'एचोऽयवायावः' (पा० अ० ६। १। ७८) इति एकारस्य अय्-आदेशः। 'जयने जयः' एवं 'विजयो जयः' इत्यमरः।

जलम् नपुं०। **इत्यत्र 'मुख-नयन-लोह-वन-मांस-रुधिर-कार्मुक-विवर-जल-हल-धनान्नाभिधानानि' (लि० सू० १३७) इति नपुंसकलिङ्गता।** जलति अपवारयति दोषादिकम् इति जलम्। जल अपवारणे (भ्वा० प०) 'नन्दि-ग्रहि-पचादिभ्यो०' (पा० अ० ३। १। १३४) इति अच्-प्रत्ययः। चकारानुबन्धलोपः। 'आपः स्त्री भूम्नि वार्वारि सलिलं कमलं जलम्' इत्यमरः। 'जलं गोकलले नीरे ह्रीबेरेऽप्यन्यवज्जडे' इति मेदिनी।

जानु नपुं०। **इत्यत्र 'श्मश्रु-जानु-वसु-स्वाद्वश्रु-जतु-त्रपु-तालूनि नपुंसके' (लि० सू० ५४) इति नपुंसकलिङ्गता।** जजन्ति जायते वा उत्पद्यते इति जानु। जन जनने (जु० प०), जनी प्रादुर्भावे (दि० आ०) 'दृ-सनि-जनि-चरि-चटि-रहिभ्यो ञुण्' (उ० १। ३) इति ञुण्-प्रत्ययः। ञकार-णकारानुबन्धलोपः। 'अत उपधायाः' (पा० अ० ७। २। ११६) इति धातोः उपधायाः अकारस्य आ-वृद्धिः। 'जनि-वृद्ध्योश्च' (पा० अ० ७। ३। ३५) इति वृद्धि-निषेधस्तु न, प्रत्यये ञकार-णकारद्वयानुबन्ध-निर्देशबलात्। 'जानूरु-पर्वाष्ठीवदस्त्रियाम्' इत्यमरः। जानु-शब्दस्य अर्धर्चादि-गणे पाठात् 'अर्धर्चादयः पुंसि च' (पा० अ० २। ४। ३१) इति पुंसि च अपि अयं शब्दः।

जृम्भम्, जृम्भः नपुं०, पुं०। **इत्यत्र 'जृम्भं नपुंसके च' (लि० सू० ८२) इति नपुंसकलिङ्गता पुँल्लिङ्गता च।** जृम्भणं जृम्भं जृम्भो वा। जृभि गात्रविनिमये (भ्वा० आ०) धातोः इदित्त्वात् 'इदितो नुम् धातोः' (पा० अ० ७। १। ५८) इति नुम्-आगमः। उकार-मकारानुबन्धलोपः। 'नश्चापदान्तस्य झलि' (पा० अ० ८। ३। २४) इति नकारस्य अनुस्वारः। 'अनुस्वारस्य ययि परसवर्णः' (पा० अ० ८। ४। ५८) इति अनुस्वारस्य परसवर्णः मकारः ततः 'भावे' (पा० अ० ३। ३। १८) इति घञ्-प्रत्ययः। घकार-ञकारानुबन्धलोपः। अस्य शब्दस्य घञ्प्रत्ययान्तत्वात् 'घञबन्तः' (लि० सू० ३६) इत्यनेन अपि पुँल्लिङ्गता भवति। **अथवा** 'गुरोश्च हलः' (पा० अ० ३। ३। १०३) इति

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by S3 Foundation USA

अ-प्रत्ययेन अपि जृम्भ-शब्दः निष्पद्यते। 'जृम्भस्तु त्रिषु जृम्भणम्' इत्यमरः। 'जृम्भा विकास-जृम्भणयोस्त्रिषु' इति मेदिनी।

ज्योक् स्त्री०। इत्यत्र **'स्रक्-त्वग्-ज्योग्-वाग्-यवागू-नौ-स्फिजः' (लि० सू० ३०) इति स्त्रीलिङ्गता।** जिनाति इति ज्योक्। ज्या वयोहानौ (क्र्या० प०) 'पृषोदरादीनि यथोपदिष्टम्' (पा० अ० ६। ३। १०९) इति उक्-प्रत्ययः। 'आद् गुणः' (पा० अ० ६। १। ८७) इति आकारस्य उकारस्य च ओ-गुणः। चिरं निरन्तरं वा ज्योक्-शब्दस्य अर्थः। स्वरादिगणे पाठात् 'स्वरादिनिपातमव्ययम्' (पा० अ० १। १। ३७) इति ज्योक्-शब्दस्य अव्ययत्वम् अपि भवति।

ज्योत्स्ना स्त्री०। **इत्यत्र 'तारा-धारा-ज्योत्स्नादयश्च' (लि० सू० ३३) इति स्त्रीलिङ्गता।** द्योतते दीव्यति यः येन वा स इति ज्योतिः। द्युत दीप्तौ (भ्वा० आ०) 'द्युतेरिसन्नादेश्च जः' (उ० २। ११२) इति इसिन्-प्रत्ययः धातोः दकारस्य जकारादेशश्च। प्रत्यये इकारानुबन्धलोपः। 'पुगन्तलघूपधस्य च' (पा० अ० ७। ३। ८६) इति धातोः उपधायाः उकारस्य ओ-गुणः। एवं ज्योतिस् अयं शब्दः निष्पद्यते। तस्य प्रथमैकवचने ज्योतिः भवति। 'ज्योतिर्भद्योतदृष्टिषु' इत्यमरः। 'ज्योतिरग्नौ दिवाकरे पुमान्, नपुंसके दृष्टौ स्यान्नक्षत्र-प्रकाशयोः इति मेदिनी। ज्योतिः अस्ति अस्याम् इति ज्योत्स्ना। ज्योतिस् अस्मात् शब्दात् 'ज्योत्स्ना-तमिस्रा-शृङ्गिणोर्जस्विन्नूर्जस्वल-गोमिन्मलिन-मलीमसाः' (पा० अ० ५। २। ११४) इति न-प्रत्ययः शब्दस्य इकारस्य लोपश्च। 'अजाद्यतष्टाप्' (पा० अ० ४। १। ४) इति टाप्-प्रत्ययः। टकार-पकारानुबन्धलोपः। 'अकः सवर्णे दीर्घः' (पा० अ० ६। १। १०१) इति अकारस्य आकारस्य च आ-दीर्घः। एवं ज्योत्स्ना-शब्दः व्युत्पद्यते। 'चन्द्रिका कौमुदी ज्योत्स्ना' इत्यमरः। 'ज्योत्स्ना चन्द्रातपेऽपि स्याज्ज्योत्स्ना युक्तनिशि स्मृता' इति मेदिनी।

तक्रम् नपुं०। **इत्यत्र 'द्वाराग्र-स्फार-तक्र-वक्र-वप्र-क्षिप्र०' (लि० सू० ९०) इति नपुंसकलिङ्गता।** तञ्चति यस्य वा तञ्चनं क्रियते तत् तक्रम्। तनक्ति तच्यते वा यत् तत् तक्रम्। तञ्चु गतौ (भ्वा० प०), 'तञ्च सङ्कोचने' (रु० प०) 'स्फायि-तञ्चि-वञ्चि-शकि-क्षिपि-क्षुदि-सृपि-तृपि-दृपि-वन्द्युन्दि-श्विति-वृत्यजि-नी-पदि-मदि-मुदि-खिदि-छिदि-भिदि-मन्दि-चन्दि-दहि-हसि-दम्भि-वसि-वासि-शीङ्-हसि-सिधि-शुभिभ्यो रक्' (उ० २। १३) इति रक्-प्रत्ययः। ककारानुबन्धलोपः। प्रत्ययस्य कित्त्वात् 'अनुदात्तोपदेश-वनति-तनोत्यादीनामनुनासिकलोपो झलि क्ङिति' (पा० अ० ६। ४।

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by S3 Foundation USA

३७) इति धातोः ञकारस्य लोपः। 'न्यङ्क्वादीनां च' (पा० अ० ६। ३। ५३) इति चस्य कः। 'तक्रं ह्युदश्विन्मथितं पादाम्ब्वर्धाम्बु निर्जलम्' इत्यमरः।

तक्षा पुं०। **इत्यत्र 'नान्तः' (लि० सू० ४८) इति पुँल्लिङ्गता।** तक्षति तनूकरोति, त्वचति संवृणोति, वक्ति भाषते, तक्षते हिनस्ति वा इति तक्षा। तक्षू तनूकरणे (भ्वा० प०), तक्ष त्वचने त्वचनं संवरणमिति दुर्ग-काश्य-मैत्रेयाः त्वचो ग्रहणमिति स्वामी। तक्ष त्वचने (काशकृत्स्नधातुपाठे भ्वा० प०), तक्ष हिंसायां (काशकृत्स्नधातुपाठे भ्वा० आ०) सर्वत्र 'कनिन् यु-वृषि-तक्षि-राजि-धन्वि-द्यु-प्रतिदिवः' (उ० १। १५६) इति कनिन्-प्रत्ययः। ककारेकार-नकारानुबन्धलोपः। एवं तक्षन् इति नान्तः शब्दः व्युत्पद्यते। तस्य प्रथमैकवचने पुँल्लिङ्गे तक्षा इति भवति। 'तक्षा तु वर्धकिस्त्वष्टा रथकारस्तु काष्ठवत्' इत्यमरः।

तडाकम्, तडाकः नपुं०, पुं०। **इत्यत्र 'कण्टकानीक-सरक-मोदक-चषक-मस्तक-पुस्तक-तडाक-निष्क-शुष्क-वर्चस्क-पिनाक-भाण्डक-पिण्ड-कर्कट-शण्डक-पिटक-तालक-फलक-पुलाकानि नपुंसके च' (लि० सू० ६३) इति नपुंसकलिङ्गता पुँल्लिङ्गता च।** ताड्यते आहन्यते जलतरङ्गैः इति तडाकं तडाको वा सरोवरः। तड आघाते (चु० उ०) 'पिनाकादयश्च' (उ ४। १६) इति आक-प्रत्ययः। **अथवा** तडा इति शब्दं करोति इति तडाकं तडाको वा। तडा + डुकृञ् करणे (त० उ०) 'अन्येष्वपि दृश्यते' (पा० अ० ३। २। १०१) इति ड-प्रत्ययः। डकारानुबन्धलोपः। डित्त्वात् 'टेः' (पा० अ० ६। ४। १४३) इति धातोः ऋकारस्य टेर्लोपः। **अथवा** तडा इति शब्दं कायति शब्दयति करोति वा इति तडाकं तडाको वा। तडा + कै शब्दे (भ्वा० प०) 'आदेच उपदेशेऽशिति' (पा० अ० ६। १। ४५) इति धातोः ऐकारस्य आकारः। 'आतोऽनुपसर्गे कः' (पा० अ० ३। २। ३) इति क-प्रत्ययः। ककारानुबन्धलोपः। कित्त्वात् 'आतो लोप इटि च' (पा० अ० ६। ४। ६४) इति धातोः आकारस्य लोपः। 'पद्माकरस्तडागोऽस्त्री' इत्यमरः। 'तडागस्तु जलाधारविशेषे यन्त्रकूटके' इति मेदिनी।

तनुः स्त्री०। **इत्यत्र 'धेनु-रज्जु-कुहू-सरयु-तनु-रेणु-प्रियङ्गवः स्त्रियाम्' (लि० सू० ५२) इति स्त्रीलिङ्गता।** तनोति विस्तारयति तन्यते वा येन यया वा इति तनुः। तनु विस्तारे (त० उ०) 'भृ-मृ-शीङ्-तृ-चरि-त्सरि-तनि-धनि-मि-मस्जिभ्य उः' (उ० १। ७) इति उ-प्रत्ययः। 'स्त्रियां मूर्त्तिस्तनुस्तनूः' इत्यमरः। 'पेलवं विरलं तनु' इति चामरः। 'त्वग्देहयोरपि तनुः' इत्यपि अमरः। 'तनुः काये कृशे चाल्पे विरलेऽपि

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by S3 Foundation USA

च वाच्यवत्' इति विश्वः। 'तनुर्वपुस्त्वचोः। विरलेऽम्ले कृशे' इति हैमः। 'तनुः काये त्वचि स्त्री स्यात् त्रिष्वल्पे विरले कृशे' इति मेदिनी।

तनुः नपुं०। **इत्यत्र 'इसुसन्तः' (लि० सू० १३४) इति नपुंसकलिङ्गता।** तनु शब्दः पूर्वं व्याख्यातः। तस्मिन् एव अर्थे उस्-प्रत्ययान्तः 'तनुस्' अयं शब्दः अस्ति। तथाहि तनु विस्तारे (त० उ०) 'अर्त्ति-पृ-वपि-यजि-तनि-धनि-तपिभ्यो नित्' (उ० २। ११९) इति उसि-प्रत्ययः स च नित्। नित्त्वं स्वरार्थम्। प्रत्यये इकारानुबन्धलोपः। 'तनुषेऽनङ्गम्' इति सुबन्धुः। 'स्यात्तनुस्तनुषा सार्धं धनुषा च धनुं विदुः' इति द्विरूपेषु विश्वः। 'तनुषी तनुविस्तृती' इति वैजयन्ती।

तन्त्रम् नपुं०। **इत्यत्र 'द्वाराग्र-स्फार-तक्र-वक्र-वप्र-क्षिप्र०' (लि० सू० ९०) इति नपुंसकलिङ्गता।** तन्त्रयति इति तन्त्रम्। तत्रि धारणे (चु० प०) धातोः इदित्वात् 'इदितो नुम् धातोः' (पा० अ० ७। १। ५८) इति नुम्-आगमः। उकार-मकारानुबन्ध-लोपः। 'नन्दिग्रहि-पचादिभ्यो०' (पा० अ० ३। १। १३४) इति अच्-प्रत्ययः। चकारानु-बन्धलोपः। **अथवा** तन्त्रणं तन्त्र्यते वा यत् तत् तन्त्रम्। अच्प्रत्ययान्तात् उक्त तन्त्र-धातोः 'भावे' (पा० अ० ३। ३। १८) इति घञ्-प्रत्ययः। घकार-ञकारानुबन्धलोपः। **अथवा** तननं तन्त्रम्, तन्यते अनेन वा इति तन्त्रम्। 'तनु विस्तारे' (त० ड०) 'सर्वधातुभ्यः ष्ट्रन्' (उ० ४। १६०) इति ष्ट्रन्-प्रत्ययः। षकार-नकारानुबन्धलोपः। ततः 'निमित्तापाये नैमित्तिकस्याप्यपायः' इति न्यायेन 'ट्र' इत्यस्य स्थाने 'त्र' इत्येव अवशिष्यते। 'तन्त्रं प्रधाने सिद्धान्ते सूत्रवाये परिच्छदे' इत्यमरः। 'तन्त्रं कुटुम्बकृत्ये स्यात् सिद्धान्ते चौपधोत्तमे। प्रधाने तन्तुवाये च शास्त्रभेदे परिच्छदे। श्रुति-शाखान्तरे हेतावुभयार्थ-प्रयोजके। इति कर्त्तव्यतायां च' इति मेदिनी।

तपः नपुं०, पुं०। **इत्यत्र 'असन्तो द्व्यच्कः' (लि० सू० १५२) इति नपुंसकलिङ्गता। 'घाजन्ताश्च' (लि० सू० ३७) इति पुँल्लिङ्गता च।** तपति तप्यते वा येन यस्मिन् वा इति तपः। तप सन्तापे (भ्वा० प०), तप ऐश्वर्ये (दि० आ०), तप दाहे (चु० उ०) 'सर्वधातुभ्योऽसुन्' (उ० ४। १९०) इति असुन्-प्रत्ययः। उनावितौ लोपः। अथवा तपनं तपः। भावे 'पुंसि संज्ञायां घः प्रायेण' (पा० अ० ३। ३। ११८) इति घ-प्रत्ययः। घकारानुबन्धलोपः। अथवा तपति इति तपः। तप् इति धातोः 'नन्दि-ग्रहि-पचादिभ्यो०' (पा० अ० ३। १। १३४) इति अच्-प्रत्ययः। चकारानुबन्धलोपः। 'तपो माघे' तथा 'तपः कृच्छ्रादिकर्म च' इत्यमरः। 'तपो लोकान्तरेऽपि च। चान्द्रायणादौ धर्मे च पुमान् शिशिर-माघयोः' इति मेदिनी। असुन्-प्रत्ययान्तः तपः शब्दः नपुंसकलिङ्गः, घ-प्रत्ययान्तः

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by S3 Foundation USA

अच्-प्रत्ययान्तश्च पुँल्लिङ्गे। 'तपेन वर्षाः शरदा हिमागमः' इति (शिशुपालवधमहाकाव्यम् १। ६६)। 'प्राचीपतिस्तपस्तङ्कः' इति त्रिकाण्डशेषः (१। १। ५७)। 'तपः ज्वलतो नामधेयम्' (निघं० १। १७)। 'तपे वा अग्निः' (शत० ब्रा० ३। ४। ३। २)। 'एतत् खलु वाव तप इत्याहुर्यः स्वयं ददातीति' (तै० सं० ६। १। ६। ३)। 'तपसा वै लोकं जयन्ति' (मैत्रा० सं० १। ८। ४)। 'तपो हि स्वाध्यायः' (तैत्ति० आ० २। १४। २)। 'मनो वाव तपः' (जै० ब्रा० ३। ३३४)। 'असौ वाऽआदित्यस्तपः' (शत० ब्रा० ८। ७। १। ५)। 'तप आसीद् गृहपतिः' (तै० ब्रा० ३। १२। ९। ३)। 'तपः स्विष्टकृत्' (शत० ब्रा० ११। २। ७। १८)। 'तपो दीक्षा' (तै० सं० ४। ३। ८। १), (मैत्रा० सं० २। ८। ४), (शत० ब्रा० ३। ४। ३। २)। 'ऋतेन तपः' (काठ० सं० ३५। १५)। 'तपसा देवा देवतामग्र आयन् तपसर्षयः सुवरन्वविन्दन्, तपसा सपत्नान् प्रणुदामारातीस्तपसि सर्वं प्रतिष्ठितम्, तस्मात्तपः परमं वदन्ति' (तैत्ति० आ० १०। ६३। १)। 'स्वाध्याय-प्रवचन एवेति नाको मौद्गल्यः। तद्धि तपस्तद्धि तपः' (तैत्ति० आ० ७। ९। १)। 'ब्रह्म तपसि प्रतिष्ठितम्' (ऐत० ब्रा० ३। ६)। 'तपसा वै प्रजापतिः प्रजा असृजत' (काठ० सं० ६। ७)। 'तपो वा एष उपैति यो वाचं यच्छति' (मै० सं० १। ८। ४)। 'तपसा वै लोकं जयन्ति' (शत० ब्रा० ३। ४। ४। २७)। 'तपसा ब्रह्मणा सह तस्य दोहमशीमहि' (मैत्रा० ४। ९। १३)। 'एतद्वै तपो यो दीक्षित्वा पयोव्रतेऽसत्' (शत० ब्रा० ९। ५। १। ८)। 'तपो वै पुष्करपर्णम्' (तै० आ० १। २५। १)। 'तपो वै यज्ञस्य श्लेष्म' (काठ० सं० ३४। ९)। 'तपो हि स्वाध्यायः' (तैत्ति० आ० २। १४। २)।

तरङ्गः पुं०। इत्यत्र '**पल्लव-पल्वलि-कफ-रेफ-कटाह-निर्व्यूह-मठ-मणि-तरङ्ग-तुरङ्ग-गन्ध-मृदङ्ग-सङ्ग-समुद्र-पुङ्खाः**' (**लि० सू० ११६**) इति पुँल्लिङ्गता। तरति प्लवते यः येन वा तरङ्गः। तृ प्लवन-तरणयोः (भ्वा० प०) 'तरत्यादिभ्यश्च' (उ० १। १२०) इति अङ्गच्-प्रत्ययः। चकारानुबन्धलोपः। 'सार्वधातुकार्धधातुकयोः' (पा० अ० ७। ३। ८४) इति धातोः ॠकारस्य 'उरण् रपरः' (पा० अ० १। १। ५१) इति सहकारेण अर्-गुणः। 'भङ्गस्तरङ्ग ऊर्मिर्वा स्त्रियां वीचिः' इत्यमरः। 'तरङ्गस्तुरगादीना-मुत्फाले वस्त्रभङ्गयोः' इति विश्वः।

तरत् पुं०। इत्यत्र '**मरुद्-गरुत्-तरद्-ऋत्विजः**' (**लि० सू० १०८**) इति पुँल्लिङ्गता। 'उणादयो बहुलम्' (पा० अ० ३। ३। १) इति उणादिप्रत्ययानां बाहुलकत्वात् तरति इति तरत् अस्मिन् अर्थे तृ प्लवन-तरणयोः (भ्वा० प०) 'वर्त्तमाने पृषद्-बृहन्महज्जगच्छतृ-वच्च' (उ० २। ८५) इति अति-प्रत्ययः। इकारानुबन्धलोपः। 'सार्वधातुकार्धधातुकयोः'

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by S3 Foundation USA

(पा० अ० ७। ३। ८४) इति धातोः ॠकारस्य 'उरण् रपरः' (पा० अ० १। १। ५१) इति सहकारेण अर्-गुणः। 'तरत् स मन्दी धावति धारा सुतस्यान्धसः। तरत् स मन्दी-धावति' (ऋ० सं० ७। १। १५)।

तलः, तलम् पुं०। नपुं०। इत्यत्र **'शील-मूल-मङ्गल-साल-कमल-तल-मुसल-कुण्डल-पलल-मृणाल-वाल-निगल-पलाल-बिडाल-खिल-शूलाः पुंसि च' (लि० सू० १४३) इति पुँल्लिङ्गता नपुंसकलिङ्गता च।** तलति इति तलः तलं वा। तल प्रतिष्ठायाम् (भ्वा० प०) 'नन्दि-ग्रहि-पचादिभ्यो०' (पा० अ० ३। १। १३४) इति अच्-प्रत्ययः। चकारानुबन्धलोपः। अथवा तलनं तलः तलं वा। तल प्रतिष्ठायां (भ्वा० प०) 'पुंसि संज्ञायां घः प्रायेण' (पा० अ० ३। ३। ११८) इति घ-प्रत्ययः। घकारानु-बन्धलोपः। 'तलश्चपेटे तालद्रौ तलं ज्यावातवारणे। त्सरौ स्वभावाधरयोस्तन्त्रीघाते च सव्यतः' इति विश्वः। 'तलं स्वरूपेऽनूर्ध्वेऽस्त्री क्लीबं ज्याघातवारणे। कानने कार्यबीजे च पुंसि तालमहीरुहे। चपेटे च त्सरौ तन्त्रीघाते सव्येन पाणिना' इति मेदिनी। 'गोधे तले ज्याघातवारणे' तथा 'अधः स्वरूपयोरस्त्री तलम्' इत्यमरः।

तलभम् नपुं०। इत्यत्र **'तलेभं नपुंसकम्' (लि० सू० ८१) इति नपुंसकलिङ्गता।** तलति प्रतिष्ठते इति तलभम्। तल प्रतिष्ठायां (भ्वा० प०) 'उणादयो बहुलम्' (पा० अ० ३। ३। १) इति उणादिप्रत्ययानां बाहुलकत्वात् 'कृ-शृ-शलि-कलि-गर्दिभ्योऽभच्' (उ० ३। १२२) इति अभच्-प्रत्ययः। चकारानुबन्धलोपः।

तल्पम् नपुं०। इत्यत्र **'पात्र-रूपोडुप-तल्प-शिल्प-पुष्प-शष्प-समीपान्तरीपाणि नपुंसके' (लि० सू० ७८) इति नपुंसकलिङ्गता।** तालयति प्रतिष्ठापयति तल्यते प्रतिष्ठाप्यते वा यत् यस्मिन् वा तत् तल्पम्। तल प्रष्ठियाम् (चु० उ०) 'खष्प-शिल्प-शष्प-वाष्प-रूप-पर्प-तल्पाः' (उ० ३। २८) इति प-प्रत्ययः। 'सत्याप-पाश-रूप-वीणा-तूल-श्लोक-सेना-लोभ-त्वच-वर्म-वर्ण-चूर्ण-चुरादिभ्यो णिच्' (पा० अ० ३। १। २५) इति विहितस्य णिच्-प्रत्ययस्य इकारस्य 'णेरनिटि' (पा० अ० ६। ४। ५१) इति लुक्। 'तल्पं शय्याट्टदारेषु' इत्यमरः।

तारा स्त्री०। इत्यत्र **'तारा-धारा-ज्योत्स्नादयश्च' (लि० सू० ३३) इति स्त्रीलिङ्गता।** तरन्ति तीर्यते वा अनया इति तारा। तॄ-तरण-प्लवनयोः (भ्वा० प०) 'षिद्-भिदादिभ्यो-ऽङ्' (पा० अ० ३। ३। १०४) इति अङ्-प्रत्ययः। ङकारानुबन्धलोपः। 'सार्वधातुकार्ध-धातुकयोः' (पा० अ० ७। ३। ८४) इति धातोः ॠकारस्य 'उरण् रपरः' (पा० अ० १।

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by S3 Foundation USA

१।५१) इति सहकारेण अर्-गुणः। निपातनात् अर्-इत्यस्य अकारस्य आ-दीर्घः। 'अजाद्यतष्टाप्' (पा० अ० ४।१।४) इति टाप्-प्रत्ययः। टकार-पकारानुबन्धलोपः। 'अकः सवर्णे दीर्घः' (पा० अ० ६।१।१०१) इति अकारस्य आकारस्य च आ-दीर्घः। **अथवा** तारयति इति तारा। णिच्-प्रत्ययान्तात् तारि-धातोः 'नन्दि-ग्रहि-पचादिभ्यो०' (पा० अ० ३।१।१३४) इति अच्-प्रत्ययः। चकारानुबन्धलोपः। 'णेरणिटि' (पा० अ० ६।४।५१) इति णिच्-प्रत्ययस्य इकारस्य लोपः। णित्त्व-प्रयुक्तायाम् तृ धातोः ॠकारस्य आर्-वृद्धौ 'निमित्तापाये नैमित्तिकस्याप्यपायः' इति न्यायेन निवृत्तायां मूल धातुः तृ इत्येव अवशिष्यते। ततः तृ अ इति स्थितौ धातोः ॠकारस्य अर् गुणः, अर् इत्यस्य अकारस्य निपातनात् आ-दीर्घः, टाप् प्रत्ययः, टकार-पकारानुबन्धलोपः, अकारस्य आकारस्य च आ-दीर्घः पूर्ववद् एव ज्ञेयः। 'नक्षत्रमृक्षं भं तारा तारकाप्युडु वा स्त्रियाम्' इत्यमरः। 'नक्षत्रे नेत्रमध्ये च तारा स्यात्तार इत्यपि' इति व्याडिः। 'ऋक्षाक्षिमध्ययोस्तारा सुग्रीवगुरु-योषितोः। बुद्धदेव्यां मता तारा' इति विश्वः।

तालकम्, तालकः नपुं०, पुं०। **इत्यत्र 'कण्टकानीक-सरक०' (लि० सू० ६३) इति नपुंसकलिङ्गता पुँल्लिङ्गता च।** तलति प्रतिष्ठापयति इति तालकं तालको वा। तल प्रतिष्ठायाम् 'ण्वुल्तृचौ' (पा० अ० ३। १। १३३) इति ण्वुल्-प्रत्ययः। णकार-लकारानुबन्धलोपः। 'अत उपधायाः' (पा० अ० ७। २। ११६) इति धातोः उपधायाः अकारस्य आ-वृद्धिः। 'युवोरनाकौ' (पा० अ० ७। १। १) इति वु-स्थाने अक इत्यादेशः।

तालः पुं०। **इत्यत्र 'तूलोपल-ताल-कुसूल-तरल-कम्बल-देवल-वृषलाः पुंसि' (लि० सू० १४२) इति पुँल्लिङ्गता।** तालयति तल्यते वा इति तालः। तल प्रतिष्ठायां (चु० प०) ण्यन्तात् तल धातोः 'नन्दि-ग्रहि-पचादिभ्यो०' (पा० अ० ३।१।१३४) इत्यनेन अथवा 'एरच्' (पा० अ० ३।३।५६) इति अच्-प्रत्ययः। चकारानुबन्धलोपः। **अथवा** तलन्ति अत्र इति तालः। तल प्रतिष्ठायां (चु० प०) ण्यन्तात् 'हलश्च' (पा० अ० ३।३।१२१) इति अथवा तलनं तालः इत्यत्र 'भावे' (पा० अ० ३।३।१८) इति घञ्-प्रत्ययः। घकार-ञकारानुबन्धलोपः। 'णेरनिटि' (पा० अ० ६।४।५१) इति णिच्-प्रत्ययस्य इकारस्य लोपः। 'निमित्तापाये नैमित्तिकस्याप्यपायः' इति न्यायेन णित्त्व-प्रयुक्तायाम् 'अत उपधायाः' (पा० अ० ७। २। ११६) इति विहितायाम् आ-वृद्धौ निवृत्तायाम् अपि ञित्त्व-प्रयुक्ता 'अत उपधायाः' (पा० अ० ७। २। ११६) इति आ-वृद्धिः पुनः भवति एव। 'तालः कालक्रिया-मानम्', 'तृणराजाह्वयस्तालः', 'प्रादेशताल-

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by S3 Foundation USA

गोकर्णास्तर्जन्यादियुते तते', 'पिञ्जरं पीतनं तालमालं च हरितालके' इति चामरः। 'तालः कालक्रियामाने हस्तमानद्रुभेदयोः। करास्फोटे करतले हरिताले त्सरावपि' इति हैमः। 'तालः करतलेऽङ्गुष्ठमध्यमाभ्यां च सम्मिते। गीतकालक्रियामाने करस्फाले द्रुमान्तरे। वाद्यभाण्डे च कांस्यस्य त्सरौ ताली जटोषधौ। क्लीबं तु हरिताले स्यात्' इति विश्व-मेदिन्यौ।

तालु नपुं०। इत्यत्र **'श्मश्रु-जानु-वसु-स्वाद्वश्रु-जतु-त्रपु-तालूनि नपुंसके' (लि० सू० ५४) इति नपुंसकलिङ्गता।** तरन्ति प्लवन्ते उच्छलन्ति निःसरन्ति वर्णाः येन यस्माद् वा तत् तालु। तृ प्लवन-तरणयोः (भ्वा० प०) 'त्रो रश्च लः' (उ० १।५) इति ञुण्-प्रत्ययः। ञकार-णकारानुबन्धलोपः। 'अचो ञ्णिति' (पा० अ० ७।२।११५) इति 'उरण् रपरः' (पा० अ० १।१।५१) इति सहकारेण धातोः ॠकारस्य आर्-वृद्धिः। 'त्रो रश्च लः' (उ० १।५) इत्यनेन एव आर् इत्यस्य रस्य लः। **अथवा** तालयति तल्यते प्रतिष्ठाप्यते वा वर्णसमूहः यस्मिन् तत् तालु। तल प्रतिष्ठायां (चु० उ०) 'सत्याप-पाश-रूप-वीणा-तूल-श्लोक-सेना-लोम-त्वच-वर्म-चूर्ण-चुरादिभ्यो णिच्' (पा० अ० ३।१।२५) इति णिच्-प्रत्ययः। णकार-चकारानुबन्धलोपः। 'अत उपधायाः' (पा० अ० ७।२।११६) इति धातोः उपधायाः अकारस्य आ-वृद्धिः। 'मृगय्वादयश्च' (उ० १। ३७) इति उ-प्रत्ययः। 'णेरनिटि' (पा० अ० ६।४।५१) इति णिच्-प्रत्ययस्य इकारस्य लोपः। 'तालु तु काकुदम्' इत्यमरः। 'तालु तरतेस्तीर्णतममङ्गं, लततेर्वा स्याद् (लम्बकर्मणो) विपरीताद् यथा तलं लतेत्यविपर्ययः' (निरु० ५।२७)। 'अवक्रन्देन तालुम्' (मैत्रा० सं० ३।१।५।१, तैति० सं० ५।७।११।७, काठ० सं० ५३।१)।

तिथिः स्त्री०। इत्यत्र **'तिथि-नाडि-रुचि-वीचि-नालि-धूलि-किकि-केलिच्छवि-रात्र्यादयः' (लि० सू० २५) इति स्त्रीलिङ्गता।** अतन्ति सततं गच्छन्ति व्यवहरन्ति यस्यां सा तिथिः। अत सातत्य-गमने (भ्वा० आ०) 'ऋ-तन्यञ्जि-वन्यञ्ज्यर्पि०' (उ० ४। २) इति इथिन्-प्रत्ययः। नकारानुबन्धलोपः। 'पृषोदरादीनि यथोपदिष्टम्' (पा० अ० ६।३।१०९) इति धातोः अकारस्य लोपः। 'प्रतिपद् द्वे इमे स्त्री तदाद्यास्तिथयो द्वयोः' इत्यमरः।

तिमिरम्, तिमिरः नपुं०, पुं०। इत्यत्र **'चक्र-वज्रान्धकार-सारावारपार-क्षीर-तोमर-शृङ्गार-भृङ्गार-मन्दारोशीर-तिमिर-शिशिराणि नपुंसके च' (लि० सू० १२) इति नपुंसकलिङ्गता पुँल्लिङ्गता च।** तिम्यति आर्द्रीभवति इति तिमिरं तिमिरः वा। तिम

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by S3 Foundation USA

आर्द्रीभावे (दि० प०) 'इषि-मदि-मुदि-खिदि-छिदि-भिदि-मन्दि-चन्दि-तिमि-मिहि-मुहि-मुचि-रुचि-रुधि-बन्धि-शुषिभ्यः किरच्' (उ० १।५१) इति किरच्-प्रत्ययः। ककार-चकारानुबन्धलोपः। कित्त्वात् 'पुगन्तलघूपधस्य च' (पा० अ० ७।३।८६) इति धातोः उपधायाः इकारस्य प्राप्तः ए-गुणः 'क्ङिति च' (पा० अ० १।१।५) इति निषेधात् न भवति। 'अन्धकारोऽस्त्रियां ध्वान्तं तमिस्रं तिमिरं तमः' इत्यमरः। 'तिमिरं ध्वान्ते नेत्रामयान्तरे' इति मेदिनी। 'तिमिरं तमोऽक्षिरोगश्च' इति सिद्धान्तकौमुद्याम् उणादौ।

तीरम् नपुं०। इत्यत्र **'द्वाराग्र-स्फार-तक्र-वक्र-वप्र-क्षिप्र०' (लि० सू० ९०) इति नपुंसकलिङ्गता।** तीरयति पारयति कर्म समाप्नोति वा इति तीरम्। तीर कर्म-समाप्तौ (चु० उ०) 'सत्याप-पाश' (पा० अ० ७। २। ११६) इति णिच्-प्रत्ययः। णकार-चकारानुबन्धलोपः। 'नन्दि-ग्रहि-पचादिभ्यो' (पा० अ० ३। १। १३४) इति अच्-प्रत्ययः। चकारानुबन्धलोपः। 'णेरनिटि' (पा० अ० ६।४।५१) इति णिच्प्रत्ययस्य इकारस्य लोपः। अथवा तीर्यते समाप्यते यत् तत् तीरम्। तॄ प्लवन-तरणयोः (भ्वा० प०) 'उणादयो बहुलम्' (पा० अ० ३। ३। १) इति उणादि-प्रत्ययानां बाहुलकत्वात् 'हिंसेरीरन्नीरचौ' (उ० ५।१८) इति ईरच्-प्रत्ययः। चकारानुबन्धलोपः। 'पृषोदरादीनि यथोपदिष्टम्' (पा० अ० ६। ३। १०९) इति धातोः ॠकारस्य लोपः। **अथवा** 'नन्दि-ग्रहि-पचादिभ्यो०' (पा० अ० ३। १। १३४) इति अच्-प्रत्ययः। चकारानुबन्धलोपः। 'ॠत इद् धातोः' (पा० अ० ७। १। १००) इति धातोः ॠकारस्य 'उरण् रपरः' (पा० अ० १। १। ५१) इति सहकारेण इर् आदेशः। 'र्वोरुपधाया दीर्घ इकः' (पा० अ० ८। २। ७६) इति इर् इत्यस्य इकारस्य ई-दीर्घः। 'कूलं रोधश्च तीरं च प्रतीरं च तटं त्रिषु' इत्यमरः। 'तीरो वङ्गे तीरं पुनस्तटे' इति हैमः।

तीर्थम्, तीर्थः नपुं०, पुं०। **इत्यत्र 'तीर्थ-प्रोथ-यूथ-गाथानि नपुंसके च' (लि० सू० ७३) इति नपुंसकलिङ्गता पुँल्लिङ्गता च।** तारयति यत् तीर्यते येन यस्मिन् वा इति तीर्थं तीर्थः वा। तॄ प्लवन-तरणयोः (भ्वा० प०) 'पा-तॄ-तुदि-वचि-रिचि-सिचिभ्यस्थक्' (उ० २। ७) इति थक्-प्रत्ययः। ककारानुबन्धलोपः। 'उरण्-रपरः' (पा० अ० १। १। ५१) इति सहकारेण 'ॠत इद् धातोः' (पा० अ० ७। १। १००) इति धातोः ॠकारस्य इर्-आदेशः। 'र्वोरुपधाया दीर्घ इकः' (पा० अ० ८। २। ७६) इति इर् इत्यस्य रेफस्य उपधायाः इकारस्य ई-दीर्घः। 'अङ्गुल्यग्रे तीर्थं दैवं स्वल्पाङ्-गुल्योर्मूले कामम्' तथा 'निपानागमयोस्तीर्थमृषिजुष्टजले गुरौ' इत्यमरः। 'तीर्थं शास्त्राध्वरक्षेत्रोपायोपाध्याय-मन्त्रिषु। अवतारर्षिजुष्टाम्भः स्त्रीरजःसु च विश्रुतम्'

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by S3 Foundation USA

इति विश्वः। 'तीर्थं शास्त्राध्वरक्षेत्रोपाय-नारीरजःसु च। अवतारर्षिजुष्टाम्बुपात्रोपाध्याय-मन्त्रिषु' इति मेदिनी। 'अप्सु स्नाति साक्षादेव दीक्षातपसि अवरुन्धे, तीर्थे स्नाति, तीर्थे हि अङ्गिरसः तां (दीक्षां) प्रावेशयन्, तीर्थे स्नाति तीर्थमेव समानानां भवति' (तैत्ति० सं० ६।१।१।२)। 'तीर्थेन हि प्रतरन्ति तद् यथा समुद्रं तीर्थेन प्रतरेयुः' (गोप० पू० ५।२)। 'दक्षिणतस्तीर्थानां गाधम्' (काठ० सं० २९।८)।

तुण्डः पुं०। इत्यत्र **'षण्ड-मण्ड-करण्ड-भरण्ड-वरण्ड-तुण्ड-गण्ड-मुण्ड-पाखण्ड-शिखण्डाः' (लि० सू० ११२) इति पुँल्लिङ्गता।** तुण्डते त्रोटयति इति तुण्डः। तुडि तोडने तोडनं दारणं हिंसनं च (भ्वा० आ०) धातोः इदित्त्वात् 'इदितो नुम् धातोः' (पा० अ० ७।१।५८) इति नुम्-आगमः। उकार-मकारानुबन्धलोपः। 'नश्चापदान्तस्य झलि' (पा० अ० ८।३।२४) इति नकारस्य अनुस्वारः। 'अनुस्वारस्य ययि परसवर्णः' (पा० अ० ८।४।५८) इति अनुस्वारस्य परसवर्णः णकारः। 'नन्दि-ग्रहि-पचादिभ्यो' (पा० अ० ३।१।१३४) इति अच्-प्रत्ययः। चकारानुबन्धलोपः। 'वक्त्रास्ये वदनं तुण्डमाननं लपनं मुखम्' इत्यमरः।

तुरङ्गः पुं०। इत्यत्र **'पल्लव-पल्वल-कफ-रेफ-कटाह-निर्व्यूह-मठ-मणि-तरङ्ग-तुरङ्ग-गन्ध-मृदङ्ग-सङ्ग-समुद्र-पुङ्खाः' (लि० सू० ११६) इति पुँल्लिङ्गता।** तोरणं तुरः। तुर त्वरणे (जु० प०) 'घञर्थे क-विधानम्' (वा० पा० अ० ३।३।५८) इति क-प्रत्ययः। ककारानुबन्धलोपः। कित्त्वात् 'पुगन्त-लघूपधस्य च' (पा० अ० ७।३।८६) इति धातोः उपधायाः उकारस्य प्राप्तः ओ-गुणः 'क्ङिति च' (पा० अ० १।१।५) इति निषेधात् न भवति। अथवा बाहुलकात् 'भावे' (पा० अ० ३।३।१८) इति घञ्-प्रत्ययः। घकार-ञकारानुबन्धलोपः। 'पुगन्तलघूपधस्य च' (पा० अ० ७।३।८६) इति धातोः उपधायाः उकारस्य प्राप्तः ओ-गुणः संज्ञापूर्वकविधेरनित्यत्वात् न भवति। ततः तुरेण त्वरया गच्छति इति तुरङ्गः। तुर + गम्लृ गतौ (भ्वा० प०) 'गमश्च' (पा० अ० ३।२।४७) इति खच्-प्रत्ययः। खकार-चकारानुबन्धलोपः। 'अरुर्द्विषदजन्तस्य मुम्' (पा० अ० ६।३।६७) इति मुम्-आगमः। उकार-मकारानुबन्धलोपः। ततः तुर + म् + गम् + अ इति स्थितौ 'खच्च डिद्वा वाच्यः' (वा० पा० अ० ३।२।३८) इति खच्-प्रत्ययस्य डित्त्वात् 'टेः' (पा० अ० ६।४।४३) इति धातोः अम् इत्यस्य टेर्लोपः। 'नश्चापदान्तस्य झलि' (पा० अ० ८।३।२४) इति मकारस्य अनुस्वारः। 'अनुस्वारस्य ययि परसवर्णः' (पा० अ० ८।४।५८) इति अनुस्वारस्य परसवर्णः ङकारः। 'घोटके पीतितुरगतुरङ्गाश्व-तुरङ्गमाः' इत्यमरः।

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by S3 Foundation USA

तुहिनम् नपुं०। इत्यत्र **'जघनाजिन-तुहिन-कानन-वन-वृजिन-विपिन-वेतन-शासन-सोपान-मिथुन-श्मशान-रत्न-निम्न-चिह्नानि नपुंसके' (लि० सू० ७५) इति नपुंसकलिङ्गता।** तोहति अर्दयति हिनस्ति अर्द्यते याच्यते वा सेवनार्थम् इति तुहिनम्। तुहिर् अर्दने (भ्वा० प०) अर्दनं हिंसा। गतिर्याचनं चापि तदर्थः यथा हि अर्द गतौ याचने च (भ्वा० प०) 'वेपि-तुह्योर्ह्रस्वश्च' (उ० २।५३) इति इनन्-प्रत्ययः। नकारानुबन्धलोपः। 'पुगन्त-लघूपधस्य च' (पा० अ० ७।३।८६) इति धातोः उपधायाः उकारस्य ओ-गुणः। तोह् इन इत्यवस्थायां 'वेपि-तुह्योर्ह्रस्वश्च' (उ० २।५३) इत्यनेन एव धातोः उपधायाः ओकारस्य उकारः ह्रस्वः। 'अवश्यायस्तु नीहारस्तुषारस्तुहिनं हिमम्' इत्यमरः। 'तुषारो हिम-देशयोः। शीकरे हिमभेदे च' इति हैमः।

तूर्यम् नपुं०। इत्यत्र **'धान्याज्य-सस्य-रूप्य-पण्य-वर्ण्य-धृष्य-हव्य-कव्य-काव्य-सत्यापत्य-मूल्य-शिक्य-कुड्य-मद्य-हर्म्य-तूर्य-सैन्यानि' (लि० सू० १६८) इति नपुंसकलिङ्गता।** तूरणं तूर् गति-त्वरणं हिंसनं वेति तदर्थः। तूरी गतित्वरणहिंसनयोः (दि० आ०) 'क्विप् च' (पा० अ० ३। २। ७६) इति क्विप्-प्रत्ययः। तस्य सर्वापहारिलोपः। तूरं याति गच्छति प्राप्नोति वा इति तूर्यम्। तूर् + या गतिप्रापणयोः (अ० प०) 'आतोऽनुपसर्गे कः' (पा० अ० ३।२।३) इति क-प्रत्ययः। ककारानुबन्ध-लोपः। 'आतो लोप इटि च' (पा० अ० ६।४।६४) इति धातोः आकारस्य लोपः।

तूलः पुं०। इत्यत्र **'तूलोपल-ताल-कुसूल-तरल-कम्बल-देवल-वृषलाः पुंसि' (लि० सू० १४२) इति पुँल्लिङ्गता।** तूलति तूल्यते वा इति तूलः। तूल निष्कर्षे (भ्वा० प०) निष्कर्षो निष्कोषणं निष्कोषणं नाम वहिर्निस्सारणम्। 'इगुपध-ज्ञा-प्री-किरः कः' (पा० अ० ३। १। १३५) इति क-प्रत्ययः। ककारानुबन्धलोपः। **अथवा** 'अकर्त्तरि च कारके संज्ञायाम्' (पा० अ० ३। ३। १९) इति घञ्-प्रत्ययः। घकार-ञकारानुबन्धलोपः। 'नूदस्तु यूपः क्रमुको ब्रह्मण्यो ब्रह्मदारु च। तूलं च' तथा 'पिचुस्तूलः' इत्यमरः। 'तूलं स्याद् ब्रह्मदारुणि। आकाशेऽथ पिचौ न स्त्री' इति विश्व-मेदिन्यौ। 'पुँल्लिङ्गस्तु पिचौ तूलः क्लीबं स्याद् ब्रह्मदारुणि' इति रुद्रः।

तृट् स्त्री०। इत्यत्र **'प्रावृड्-विप्रुड्-रुट्-तृड्-विट्-विषः' (लि० सू० २३) इति स्त्रीलिङ्गता।** तर्षणं तृट्। ञितृषा पिपासायाम् (दि० प०) 'सम्पदादिभ्यः क्विप्' (वा० पा० अ० ३। ३। ९४) इति क्विप्-प्रत्ययः। तस्य सर्वापहारिलोपः। एवं तृष् एष शब्दः निष्पद्यते। तस्य प्रथमैकवचने तृट् भवति। 'इच्छा काङ्क्षा स्पृहेहा तृड् वाञ्छा लिप्सा मनोरथः। कामोऽभिलाषस्तर्षश्च' तथा 'उदन्या तु पिपासा तृट् तर्षः' इत्यमरः। 'तृट्

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by S3 Foundation USA

तृष्णावत्तर्षवच्च भवेल्लिप्सा-पिपासयोः' इति हैमः। 'तृट् लिप्सायामुदन्यायां स्मरपुत्र्यामपि स्त्रियाम्' इति मेदिनी।

तृटिः स्त्री०। **इत्यत्र 'तृटि-सीमा-सम्बध्याः' (लि० सू० ३१) इति स्त्रीलिङ्गता।**

तृणम्, तृणः। इत्यत्र 'कार्षापण-स्वर्ण-सुवर्ण-व्रण-चरण-वृषण-विषाण-चूर्ण-तृणानि नपुंसके च' (लि० सू० ६९) इति नपुंसकलिङ्गता पुँल्लिङ्गता च। यत् तृणेढि तृहति हिनस्ति तत् तृणम्, तृह्यते हिंस्यते वा यत् येन वा तत् तृणम्। तृह हिंसायां (रु० प०) तृहू हिंसार्थः (तु० प०) 'तृहेः क्नो हलोपश्च' (उ० ५।८) इति क्न-प्रत्ययः धातोः हकारस्य लोपश्च। प्रत्यये ककारानुबन्धलोपः। 'ऋवर्णान्नस्य णत्वं वाच्यम्' (वा० पा० अ० ८।४।१) इति नस्य णः। **अथवा** तृण्यते अद्यते भक्ष्यते यत् तत् तृणम्। तृणु अदने (त० उ०) 'अकर्त्तरि च कारके संज्ञायाम्' (पा० अ० ३।३।१९) इति घञ्-प्रत्ययः। घकार-ञकारानुबन्धलोपः। संज्ञापूर्वकविधेरनित्यत्वात् अत्र 'पुगन्तलघूपधस्य च' (पा० अ० ७।३।८६) इति धातोः उपधायाः ऋकारस्य 'उरण् रपरः' (पा० अ० १।१।५१) इति अर्-गुणः न। 'तृणमर्जुनम्' इत्यमरः। 'यत्किञ्चित् तृन्द्यात् तृणं तत्', 'तर्दनमिति तृणम्' (निरु० १।९, १४)।

तोमरम्, तोमरः नपुं०, पुं०। **इत्यत्र 'चक्र-वज्रान्धकार-सारावारपार-क्षीर-तोमर-शृङ्गार-भृङ्गार-मन्दारोशीर-तिमिर-शिशिराणि नपुंसके च' (लि० सू० ९२) इति नपुंसकलिङ्गता पुँल्लिङ्गता च।** तौति गच्छति इति तौः, तु सौत्रो धातुः गत्यर्थकः। 'अन्येभ्योऽपि दृश्यन्ते' (पा० अ० ३।२।७५) इति विच्-प्रत्ययः। सार्वधातुकार्धधातुकयोः (पा० अ० ७।३।८४) इति धातोः उकारस्य ओ-गुणः। विच्-प्रत्ययस्य सर्वापहारिलोपः। एवं 'तो' शब्दः व्युत्पद्यते। म्रियते इति मरः। अन्तर्भावितण्यर्थात् मृङ् प्राणपरित्यागे (तु० आ०) धातोः 'नन्दिग्रहि-पचादिभ्यो०' (पा० अ० ३।१।१३४) इति अच्-प्रत्ययः। चकारानुबन्धलोपः। 'उरण् रपरः' (पा० अ० १।१।५१) इति सहकारेण 'सार्वधातुकार्धधातुकयोः' (पा० अ० ७।३।८४) इति धातोः ऋकारस्य अर्-गुणः। एवं 'मर'-शब्दः निष्पद्यते। तोश्चासौ मरः इति तोमरः। **अथवा** तोः गन्ता म्रियते येन सः तोमरः। तो + मृङ् प्राणपरित्यागे (तु० आ०) 'पुंसि संज्ञायां घः प्रायेण' (पा० अ० ३।३।११८) इति घ-प्रत्ययः। घकारानुबन्धलोपः। पूर्ववत् धातोः ऋकारस्य अर्-गुणः। **अथवा** तौति हिनस्ति येन सः, तूयते हिंस्यते वा येन सः तोमरः तत् तोमरं वा। तु इति सौत्रो धातुः गति-वृद्धि-हिंसासु। ततः 'उणादयो बहुलम्' (पा० अ० ३।३।१) इति उणादीनां बाहुलकत्वात् 'ऋच्छेररः' (उ० ३।

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by S3 Foundation USA

१३१) इति अर-प्रत्ययः तस्य मुडागमश्च। आगमे उकारटकारानुबन्धलोपः। 'सार्वधातुकार्धधातुकयोः' (पा० अ० ७। ३। ८४) इति धातोः उकारस्य ओ-गुणः। 'शर्वला तोमरोऽस्त्रियम्' इत्यमरः।

तोरणम् नपुं०। इत्यत्र **'ऋण-लवण-पर्ण-तोरण-रणोष्णानि नपुंसके' (लि० सू० ६८) इति नपुंसकलिङ्गता।** तुतुरति अनेन अस्मिन् वा इति तोरणम्। तुर त्वरणे (जु० प०) 'करणाधिकरणयोश्च' (पा० अ० ३। ३। ११७) इति ल्युट्-प्रत्ययः। लकार-टकारानुबन्धलोपः। 'पुगन्तलघूपधस्य च' (पा० अ० ७। ३। ८६) इति धातोः उपधायाः उकारस्य ओ-गुणः। 'युवोरनाकौ' (पा० अ० ७। १। १) इति यु-स्थाने अनादेशः। 'अट्-कुप्वाङ्-नुम्-व्यवायेऽपि' (पा० अ० ८। ४। २) इति नस्य णः। **अथवा** तोलयन्ति अस्मिन् इति तोरणम्। तुल उन्माने (चु० प०) 'सत्याप-पाश०' (पा० अ० ७। २। ११६) इति णिच्-प्रत्ययः। णकार-चकारानुबन्धलोपः। 'पुगन्तलघूपधस्य च' (पा० अ० ७। ३। ८६) इति धातोः उपधायाः उकारस्य ओ-गुणः। 'करणाधिकरणयोश्च' (पा० अ० ३। ३। ११७) इति ल्युट्-प्रत्ययः। लकार-टकारानुबन्धलोपः। 'णेरनिटि' (पा० अ० ६। ४। ५१) इति णिच्-प्रत्ययस्य इकारस्य लोपः। 'युवोरनाकौ' (पा० अ० ७। १। १) इति यु-स्थाने अनादेशः। एवं तोलनशब्दः निष्पद्यते। र-लयोरेकत्वस्मरणात् तोरणं भवति। 'तोरणोऽस्त्री बहिर्द्वारम्' इत्यमरः।

त्यागः पुं०। इत्यत्र **'घञबन्तः' (लि० सू० ३६) इति पुँल्लिङ्गता।** त्यजनं त्यागः। त्यज हानौ (भ्वा० प०) 'भावे' (पा० अ० ३। ३। १८) इति घञ्-प्रत्ययः। घकार-ञकारानुबन्धलोपः। 'अत उपधायाः' (पा० अ० ७। २। ११६) इति धातोः उपधायाः अकारस्य आ-वृद्धि। 'चजोः कु घिण्ण्यतोः' (पा० अ० ७। ३। ५२) इति धातोः जकारस्य गकारः। 'त्यागो विहायितं दानमुत्सर्जनविसर्जने' इत्यमरः। 'त्यागो दाने च वर्जने' इति मेदिनी।

त्रपु नपुं०। इत्यत्र **'श्मश्रु-जानु-वसु-स्वाद्वश्रु-जतु-त्रपु-तालूनि नपुंसके' (लि० सू०५४) इति नपुंसकलिङ्गता।** त्रपते लज्जते इव अग्निं दृष्ट्वा इति त्रपु। त्रपूष् लज्जायां (भ्वा० आ०) 'शृ-स्वृ-स्निहि-त्रप्यसि-वसि-हनि-क्लिदि-बन्धि-मनि-वेपश्च' (उ० १। १०) इति उ-प्रत्ययः। 'त्रपु पिच्चटकम्। रङ्ग वङ्गे' इत्यमरः। 'रङ्गसीसकयोस्त्रपु' इति रुद्रः।

त्रिभुवनम् नपुं०। इत्यत्र **'त्रिविष्टपत्रिभुवने नपुंसके' (लि० सू० ४४) इत्यनेन 'द्विगुः स्त्रियां च' (लि० सू० १३३) इत्यनेन च नपुंसकलिङ्गता।** त्रयाणां भुवनानां

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by S3 Foundation USA

समाहारः त्रिभुवनम्। इत्यत्र त्रिशब्दस्य भुवनशब्देन सह समाहारार्थे 'तद्धितार्थोत्तरपदसमाहारे च' (पा० अ० २।१।५१) इति समासः। 'सुपो धातु-प्रतिपदिकयोः' (पा० अ० २।४।७१) इति त्रिशब्दोत्तरस्य भुवनशब्दोत्तरस्य च आम् इत्यस्य सुपः लुक्। 'संख्यापूर्वो द्विगुः' (पा० अ० २।१।५२) इति त्रिभुवनशब्दस्य द्विगु-संज्ञा। 'द्विगुरेकवचनम्' (पा० अ० २।४।१) इति त्रिभुवनशब्दस्य एकवचनम्। 'स नपुंसकम्' (पा० अ० २।४।१७) इति त्रिभुवनशब्दस्य च नपुंसकलिङ्गता। एवं प्रथमैकवचने नपुंसकलिङ्गे त्रिभुवनम् भवति।

त्रिरात्रम् नपुं०। **इत्यत्र 'संख्यापूर्वो रात्रिः' (लि० सू० १३२) इत्यनेन अथवा 'संख्यापूर्वं रात्रं क्लीबम्' (वा० पा० अ० २।४।२९) इत्यनेन नपुंसकलिङ्गता।** तिसृणां रात्रीणां समाहारः त्रिरात्रम्। इत्यत्र त्रिशब्दस्य रात्रि-शब्देन सह समाहारार्थे 'तद्धितार्थोत्तरपदसमाहारे च' (पा० अ० २।१।५१) इति समासः। 'सुपो धातुप्रातिपदिकयोः' (पा० अ० २।४।७१) इति त्रिशब्दोत्तरस्य रात्रिशब्दोत्तरस्य च आम् इति सुपः लुक्। 'अहः सर्वैकदेशसंख्यातपुण्याच्च रात्रेः' (पा० अ० ५।४।८७) इति अच्-प्रत्ययः। चकारानुबन्धलोपः 'यचि भम्' (पा० अ० १।४।१८) इति त्रिरात्रि-शब्दस्य भसंज्ञा। 'यस्येति च' (पा० अ० ६।४।१४८) इति त्रिरात्रिशब्दस्य इकारस्य लोपः। 'संख्यापूर्वो द्विगुः' (पा० अ० २।१।५२) इति त्रिरात्रिशब्दस्य द्विगुसंज्ञा। 'स नपुंसकम्' (पा० अ० २।४।१७) इति नपुंसकलिङ्गता। 'द्विगुरेकवचनम्' (पा० अ० २।४।१), इति त्रिरात्र-शब्दस्य प्रथमैकवचने त्रिरात्रं भवति।

त्रिविष्टपम् नपुं०। **इत्यत्र 'त्रिविष्टपत्रिभुवने नपुंसके' (लि० सू० ४४) इति नपुंसकलिङ्गता।** विशन्ति यस्मिन् इति विष्टपम्। विश प्रवेशने (तु० प०) 'विटप-पिष्टप-विशिलोलपाः' (उ० ३।१४५) सूत्रेऽस्मिन् पिष्टप-स्थाने विष्टपेति दन्त्यौष्ठ्यादिमेव पठन्ति। युक्तं चैतत्। 'यत्र ब्रध्नस्य विष्टपम्' इत्यादौ तथा दर्शनात्। अमरकोषेऽपि 'विष्टपं भुवनं जगत्, इति प्रचुरपाठाच्च इति सिद्धान्तकौमुद्याम् उणादौ तत्त्वबोधिनीकारः' तथा च अनेन सूत्रेण कपन्-प्रत्ययः, प्रत्ययस्य तुडागमश्च। प्रत्यये ककार-नकारानुबन्धलोपः, आगमे उकार-टकारानुबन्धलोपः। प्रत्ययस्य कित्त्वात् धातोः उपधायाः इकारस्य 'पुगन्तलघूपधस्य च' (पा० अ० ७।३।८६) इति प्राप्तः ए-गुणः 'क्ङिति च' (पा० अ० १।१।५) इति निषेधात् न भवति। 'व्रश्च-भ्रस्ज-सृज-मृज-यज-राज-भ्राजच्छशां षः' (पा० अ० ८।२।३६) इति धातोः शस्य षः। 'ष्टुना ष्टुः' (पा० अ० ८।४।४१) इति तुडागमस्य तकारस्य टकारः। एवं विष्टपशब्दः व्युत्पद्यते **अथवा** विष्टं पाति रक्षति

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by S3 Foundation USA

इति विष्टपम्। विष्ट + पा रक्षणे (अ० प०) 'आतोऽनुपसर्गे कः' (पा० अ० ३।२।३) इति क-प्रत्ययः। ककारानुबन्धलोपः। 'आतो लोप इटि च' (पा० अ० ६।४।६४) इति धातोः आकारस्य लोपः। 'विटप-पिष्टप-विशिपोलपाः' (उ० ३।१४५) इति उज्जलदत्त-पाठ-रीत्या तृतीयं विष्टपम् इति त्रिविष्टपम्। 'पिष्टपो विष्टपोऽप्यस्त्री भुवनं च नपुंसकम्' इत्यमरमाला। 'सुरलोको द्योदिवौ द्वे स्त्रियां क्लीबे त्रिविष्टपम्' इत्यमरः। 'नभो विष्टपं वृषो गौर्ना पृश्निश्चापि सुरालयः' इति रत्नमाला।

त्रिंशत् स्त्री०। इत्यत्र **'विंशत्यादिरानवतेः' (लि० सू० १३) इति स्त्रीलिङ्गता।** त्रयो दशतः परिमाणमस्य सङ्घस्य इति त्रिंशत्। त्रिशब्दात् 'पङ्क्ति-विंशति-त्रिंशच्चत्वारिंशत्पञ्चाशत्षष्टिसप्तत्यशीतिनवतिशतम्' (पा० अ० ५।१।५९) इति शत्-प्रत्ययः त्रि-शब्दस्य त्रिन्-आदेशश्च। 'नश्चापदान्तस्य झलि' (पा० अ० ८।३।२४) इति नकारस्य अनुस्वारः। एवं त्रिंशत् व्युत्पद्यते।

त्रुटिः स्त्री०, पुं०। इत्यत्र **'शष्कुलि-राजि-कुट्यशनि-वर्त्ति-भृकुटि-त्रुटि-वलि-पङ्क्तयः' (लि० सू० २६) इति स्त्रीलिङ्गता तथा 'गो-मणि-यष्टि-पुष्टि-पाटलि-वस्ति-शाल्मलि-त्रुटि-मसि-मरीचयः' (लि० सू० १७२) इति स्त्रीलिङ्गता पुँल्लिङ्गता च।** त्रुटति इति त्रुटिः (तु० प०) 'इगुपधात् कित्' (उ० ४।१२१) इति इन् प्रत्ययः स च कित्। कित्त्वात् 'पुगन्तलघूपधस्य च' (पा० अ० ७।३।८६) इति धातोः उपधायाः उकारस्य प्राप्तः ओ-गुणः 'क्ङिति च' (पा० अ० १।१।५) इत्यनेन निषिध्यते। इन्-प्रत्यये नकारानुबन्धलोपः। 'सूक्ष्मोपकुञ्चिका तुत्था कोरङ्गी त्रिपुटा त्रुटिः' एवम् 'स्त्रियां मात्रा त्रुटी पुंसि लवलेश-कणाणवः' तथा 'सूक्ष्मैलायां त्रुटिः स्त्री स्यात् कालेऽल्पे संशयेऽपि सा' इत्यमरः। 'त्रुटिः स्त्री संशये स्वल्पे सूक्ष्मैलाकालमानयोः' इति मेदिनी।

त्वक् स्त्री०। **इत्यत्र 'स्रक्-त्वग्-ज्योग्-वाग्-यवाग्-नौ-स्फिजः' (लि० सू० ३०) इति स्त्रीलिङ्गता।** तनोति विस्तारयति तन्यते विस्तीर्यते वा इति त्वक्। तनु विस्तारे (त० उ०) 'तनोतेरनश्च' (उ० २।६४) इति चिक्-प्रत्ययः धातोः अन् इत्यस्य व इति अकार-विशिष्टः आदेशः। प्रत्यये इकार-चकारानुबन्धलोपः। प्रथमैकवचने 'चोः कुः' (पा० अ० ८।२।३०) इति चकारस्य ककारः। **अथवा** त्वचति इति त्वक्। त्वच् संवरणे (तु० प०) 'अन्येभ्योऽपि दृश्यन्ते' (पा० अ० ३।२।७५) इति विच्-प्रत्ययः। तस्य सर्वापहारिलोपः। 'चोः कुः' (पा० अ० ८।२।३०) इति प्रथमैकवचने चस्य कः। 'त्वक् स्त्री वल्कं वल्कलमस्त्रियाम्' तथा 'स्त्रियां त्वगसृग्धरा'

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by S3 Foundation USA

इत्यमरः। 'त्वक् स्त्री चर्मणि वल्के च गुडत्वचि विशेषतः' इति मेदिनी। 'पुंसि संज्ञायां घः प्रायेण' (पा० अ० ३। ३। ११८) इति घ-प्रत्यये तु घकारानुबन्धलोपः। तदा अयम् अकारान्तः अपि पुँल्लिङ्गे 'त्वच' शब्दः। 'त्वक्पत्रमुत्कटं भृङ्गं त्वचं चोचं वराङ्गकम्' इत्यमरः। 'त्वक्त्वचचोचशब्दाः स्युर्वल्के चर्मणि पत्रके' इति धरणिः। 'त्वक् सूददोहाः' (श० ब्रा० ८। १। ४। ५)। 'त्वक् प्रस्तायः' (जैमि० ब्रा० १। ३६। ६)।

युष्मद् त्रिलि०। इत्यत्र **'अव्ययं कति-युष्मदस्मदः' (लि० सू० १८४) इति पुँल्लिङ्गता स्त्रीलिङ्गता नपुंसकलिङ्गता च।** योपति सेवते हिनस्ति वा इति युष्मद्। युष सौत्रः धातुः अथवा युप हिंसायां (काशकृत्स्नधातुपाठे भ्वा० प०) 'युष्यसिभ्यां मदिक्' (उ० १। १३९) इति मदिक्-प्रत्ययः। इकार-ककारानुबन्धलोपः। कित्त्वात्। 'पुगन्तलघूपधस्य च' (पा० अ० ७। ३। ८६) इति धातोः उपधायाः उकारस्य प्राप्तः ओ-गुणः 'क्ङिति च' (पा० अ० १। १। ५) इति निषेधात् न भवति।

त्विट् स्त्री०। इत्यत्र **'प्रावृड्-विप्रुड्-रुट्-तृड्-विट्-त्विषः' (लि० सू० २३) इति स्त्रीलिङ्गता।** त्वेपति इति त्विट् 'त्विष दीप्तौ' (भ्वा० उ०) 'अन्येभ्योऽपि दृश्यते' (पा० अ० ३। २। १७८) इति क्विप्। तस्य सर्वापहारिलोपः। अथवा त्वेषणं त्विट्। अत्र त्विष् दीप्तौ (भ्वा० उ०) धातोः 'सम्पदादिभ्यः क्विप्' (पा० अ० ३। ३। ९४) इति क्विप्। तस्य सर्वापहारिलोपः। एवं त्विष् शब्दः निष्पद्यते। तस्य प्रथमैकवचने त्विट् भवति। 'स्युः प्रभा रुग्-रुचि-स्त्विड्-भा-भाश्छवि-द्युति-दीप्तयः' इत्यमरः। 'त्विट् शोभापि' इति त्वामरः। 'कान्तौ वाचि रुचौ त्विट् स्त्री' इति रभसः। 'त्विट् शोभायां जिगीषायां व्यवसाये रुचौ गिरि' इति मेदिनी।

दण्डः, दण्डम् पुं०, नपुं०। इत्यत्र **'दण्ड-मण्ड-खण्ड-शव-सैन्धव-पार्श्वाकाश-कुश-काशाङ्कुश-कुलिशाः' (लि० सू० १८९) इति पुँल्लिङ्गता नपुंसकलिङ्गता च।** दाम्यति दम्यते वा येन स दण्डः। दमु उपशमे (दि० प०) 'जमन्ताड्डः' (उ० १। ११४) इति ड-प्रत्ययः। 'नश्चापदान्तस्य झलि' (पा० अ० ८। ३। २४) इति मकारस्य अनुस्वारः। 'अनुस्वारस्य ययि परसवर्णः' (पा० अ० ८। ४। ५८) इति अनुस्वारस्य परसवर्णः णकारः। **अथवा** दण्डयति इति दण्डः। दण्ड निपातने (चु० उ०) 'सत्याप-पाश-रूप०' (पा० अ० ७। २। ११६) इति णिच्-प्रत्ययः। णकार-चकारानुबन्धलोपः। 'नन्दि-ग्रहि-पचादिभ्यो०' (पा० अ० ३। १। १३४) इति अच्-प्रत्ययः। चकारानुबन्ध-लोपः। 'णेरनिटि' (पा० अ० ६। ४। ५१) इति णिच्-प्रत्ययस्य इकारस्य लोपः। **अथवा** दण्डनं दण्डः। अत्रापि णिच्-प्रत्ययान्त-दण्डि-धातोः 'पुंसि संज्ञायां घः प्रायेण'

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by S3 Foundation USA

(पा० अ० ३ । ३ । ११८) इति घ-प्रत्ययः। घकारानुबन्धलोपः। पूर्ववत् णिच्प्रत्ययस्य इकारस्य लोपः। **अथवा** दण्ड्यते अनेन इति दण्डः। इहापि णिच्प्रत्ययान्त-दण्डि-धातोः 'हलश्च' (पा० अ० ३ । ३ । १२१) इति घञ्-प्रत्ययः। घकार-ञकारानुबन्धलोपः। पूर्ववत् णिच्प्रत्ययस्य इकारस्य लोपः। **अथवा** दण्डः अस्ति अस्य इति दण्डः। दण्ड-शब्दात् 'अर्श आदिभ्योऽच्' (पा० अ० ५ । २ । १२७) इति अच्-प्रत्ययः। चकारानुबन्ध-लोपः। 'शकन्ध्वादिषु पररूपं वाच्यम्' (वा० पा० अ० ६ । १ । ९४) इति डकारपरवर्त्तिनः अकारस्य पररूपम्। 'माठरः पिङ्गलो दण्डश्चण्डांशोः पारिपार्श्वकः' तथा 'साहसं तु दमो दण्डः' इत्यमरः। 'दण्डोऽस्त्री लगुडेऽपि स्यात्' इति चामरः। 'दण्डो यमे मानभेदे लगुडे दम-सैन्ययोः। व्यूहभेदे-प्रकाण्डेऽश्वे कोणमन्थानयोरपि। अभिमाने ग्रहे दण्डश्चण्डांशोः पारिपार्श्वके' इति विश्वः। 'दण्डः सैन्ये दमे यमे। मानव्यूहभेदेष्वश्वे-ऽर्कानुचरे मथि। प्रकाण्डे लगुडे कोणे चतुर्थोपाय-गर्वयोः' इति हैमः। 'वज्रो वै दण्डो विरक्षस्तायै' (शत० ब्रा० ३ । २ । १ । ३२)। 'दण्डो ददतेर्धारियति-कर्मणः। अक्रूरो ददते मणिमित्यभिभाषन्ते। दमनादित्यौपमन्यवः। दण्डमस्याकर्षतेति गर्हायाम्' (निरु० २ । ४)।

दधि नपुं०। इत्यत्र '**श्राद्ध-कुलिश-दैव-पीठ-कुण्डाङ्काङ्ग-दधि-सक्थ्यक्ष्यास्यास्प-दाकाश-कण्व-बीजानि**' (लि० सू० १६६) इति नपुंसकलिङ्गता। दधते इति दधि। दध धारणे (भ्वा० प०) 'सर्वधातुभ्य इन्' (उ० ४ । ११९) इति इन्-प्रत्ययः। नकारानुबन्धलोपः। 'द्रप्सं दधि घनेतरत्' इत्यमरः। 'द्रप्सं दध्यघनं तथा' इति नाममाला।

दन्तः पुँ०। इत्यत्र '**देवासुरात्म-स्वर्ग-गिरि-समुद्र-नख-केश-दन्त-स्तन-भुज-कण्ठ-खड्ग-शर-पङ्काभिधानानि**' (लि० सू० ४३) इति पुँल्लिङ्गता। यः दाम्यति येन वा दम्यते स दन्तः। अन्तर्भावितण्यर्थात् दमु उपशमे (दि० प०) 'हसि-मृ-ग्रिण्वामि-दमि-लू-पू-धूर्विभ्यस्तन्' (उ० ३ । ८६) इति तन्-प्रत्ययः। नकारानुबन्धलोपः। 'नश्चापदान्तस्य झलि' (पा० अ० ८ । ३ । २४) इति धातोः मकारस्य अनुस्वारः। 'अनुस्वारस्य ययि परसवर्णः' (पा० अ० ८ । ४ । ५८) इति अनुस्वारस्य परसवर्णः नकारः। 'रदना दशना दन्ता रदाः' इत्यमरः। 'दन्तोऽद्रिकटके कुञ्जे दशनेऽथौषधौ स्त्रियाम्' इति मेदिनी।

दर्पः, दर्पम् पुं०, नपुं०। इत्यत्र '**व्रज-कुञ्ज-कुथ-कूर्च-प्रस्थ-दर्पार्भार्धर्च-दर्भ-पुच्छाः**' (लि० सू० १७९) इति पुँल्लिङ्गता नपुंसकलिङ्गता च। दृप्यति दृपति वा इति दर्पः। दृप हर्ष-मोहनयोः मोहनं गर्वः (दि० प०) दृप उत्क्लेशे (तु० प०) 'नन्दि-

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by S3 Foundation USA

ग्रहि-पचादिभ्योः' (पा० अ० ३।१।१३४) इति अच्-प्रत्ययः। चकारानुबन्धलोपः। 'पुगन्तलघूपधस्य च' (पा० अ० ७।३।८६) इति धातोः उपधायाः ऋकारस्य 'उरण्रपरः' (पा० अ० १।१।५१) इति सहकारेण अर्-गुणः। अथवा दर्पणं दर्पः। दृप धातोः 'अकर्त्तरि च कारके संज्ञायाम्' (पा० अ० ३।३।१९) इति घञ्-प्रत्ययः। घकार-ञकारानुबन्धलोपः। पूर्ववत् धातोः उपधायाः ऋकारस्य अर्-गुणः।

दर्भः, दर्भम् पुँ०, नपुं०। इत्यत्र '**व्रज-कुञ्ज-कुथ-कूर्च-प्रस्थ-दर्पार्भार्धर्च-दर्भ-पुच्छाः' (लि० सू० १७९) इति पुँल्लिङ्गता नपुंसकलिङ्गता च**। दृणाति विदारयति तीक्ष्णाग्रतया इति दर्भः। दर्भेण काकासुरस्य कृतम् अक्षि-दारणं विश्वविदितमेव। दॄ विदारणे (क्र्या० प०) 'दॄ-दलिभ्यां भः' (उ० ३।१५१) इति भ-प्रत्ययः। 'उरण् रपरः' (पा० अ० १।१।५१) इति सहकारेण 'सार्वधातुकार्धधातुकयोः' (पा० अ० ७। ३।८४) इति धातोः ॠकारस्य अर्-गुणः। **अथवा** दृभ्यते इति दर्भः, दर्भणं वा दर्भः। दृभि ग्रन्थे (तु० प०) 'अकर्त्तरि च कारके संज्ञायाम्' (पा० अ० ३।३।१९) इति घञ्-प्रत्ययः। घकार-ञकारानुबन्धलोपः। 'पुगन्तलघूपधस्य च' (पा० अ० ७।३।८६) इति धातोः उपधायाः ऋकारस्य 'उरण् रपरः' (पा० अ० १।१।५१) इति सहकारेण अर्-गुणः। 'अस्त्री कुशं कुथो दर्भः पवित्रम्' इत्यमरः। 'दर्भो वा ओषधीनामपहतपाप्मा' (ऐत० आर० १।२।३)। 'उभयं वैतदन्नं यद् दर्भा आपश्च ह्येता ओषधयश्च या वै वृत्राद् बीभत्समाना आपो धन्व दृभ्यन्त्य उदायंस्ते दर्भा अभवन् यद् दृभ्यन्त्य उदायंस्तस्माद् दर्भास्ता हैताः शुद्धा मेध्या आपो वृत्राभिप्रक्षरिता यद् दर्भा यदु दर्भास्तेनौषधयः' (आप० ब्रा० ७।२।३।२)। 'अपां वा एतत् तेजो वर्चः यद् दर्भाः' (तै० ब्रा० ७।२।९।५)। 'एतर्हि पाञ्चाला दर्भान् कुशा इत्येवाचक्षते' (जैमि० ब्रा० २।१००)। 'ते (दर्भाः) हि शुद्धा मेध्याः' (शत० ब्रा० १।२।१।१२,७।३।२।३)। 'आपो दर्भाः' (शत० ब्रा० २।२।३।११)। 'आपो वै दर्भाः' (३।१।३।१८)। 'पवित्रं वै दर्भाः' (तै० ब्रा० १। ३।७।१)। 'आपो दर्भाः' (शत० ब्रा० २।२।३।११)।

दर्विः स्त्री०। इत्यत्र '**दर्वि-विदि-वेदि-खनि-शान्यश्रि-वेशि-कृष्योषधि-कट्यङ्गुलयः' (लि० सू० २४) इति स्त्रीलिङ्गता**। दृणाति विदारयति, दृणोति हिनस्ति द्रियते आद्रियते सम्मान्यते वा इति दर्विः। दॄ विदारणे (क्र्या० प०), दृ हिंसायां (स्वा० प०), दृङ् आदरे (तु० आ०) 'उल्मुक-दर्वि-होमिनः' (उ० ३।८४) इति वि-प्रत्ययः **अथवा** 'वृ-दृभ्यां विन्' (उ० ४।५४) इति विन्-प्रत्ययः। विन्-प्रत्यये नकारानुबन्धलोपः। 'उरण् रपरः' (पा० अ० १।१।५१) इति सहकारेण 'सार्वधातुकार्ध-धातुकयोः' (पा० अ० ७।३।८४) इति दॄ विदारणे धातोः ॠकारस्य,

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by S3 Foundation USA

दृ हिंसायां, दृङ् आदरे धात्वोः ऋकारस्य अर्-गुणः। 'दर्विः कम्बिः खजाका च' इत्यमरः। 'एष खलु वै स्त्रिया हस्तो यद् दर्विः' (मैत्रा० सं० १।१०।१६)।

दर्वी स्त्री०। इत्यत्र 'ईकारान्तश्च' (लि० सू० १०) इति स्त्रीलिङ्गता। दर्वि-शब्दः पूर्वं व्याख्यातः। ततः 'कृदिकारादक्तिनः' (ग० सू० ५० पा० अ० ४।१।४५) इति ङीप्-प्रत्ययः। ङकार-पकारानुबन्धलोपः। 'यस्येति च' (पा० अ० ६।४।१४८) इति वकार-परवर्त्तिनः इकारस्य लोपः। 'दर्वी पणातर्द्वोः' इति हैमः।

दशनः पुं०। इत्यत्र 'देवासुरात्म-स्वर्ग-गिरि-समुद्र-नख-केश-दन्त-स्तन-भुज-कण्ठ-खड्ग-शर-पङ्काभिधानानि' (लि० सू० ४३) इति पुँल्लिङ्गता। दश्यते अनेन इति दशनः। दन्श दशने (भ्वा० प०) 'करणाधिकरणयोश्च' (पा० अ० ३।३।११७) इति करणे ल्युट्-प्रत्ययः। लकार-टकारानुबन्धलोपः। 'युवोरनाकौ' (पा० अ० ७।१।१) इति यु-स्थाने अनादेशः। 'पृषोदरादीनि यथोपदिष्टम्' (पा० अ० ६।३।१०९) इति धातोः नकारस्य लोपः। 'रदना दशना दन्ताः' इत्यमरः।

दंष्ट्रा स्त्री०। इत्यत्र 'यात्रा-मात्रा-भस्त्रा-दंष्ट्रा-वरत्राः स्त्रियामेव' (लि० सू० १५५) इति अथवा 'ऊङाबन्तश्च' (लि० सू० ११) इति स्त्रीलिङ्गता। दशन्ति अनया दश्यते वा अनया इति दंष्ट्रा। दंश दशने (भ्वा० प०) 'दाम्नी-शश-यु-युज-स्तु-तुद-सि-सिच-मिह-पत-दश-नहः करणे' (पा० अ० ३।२।१८२) इति करणे ष्ट्रन्-प्रत्ययः। षकार-नकारानुबन्धलोपः। ष्ट्रन् इत्यत्र षकारे निवृत्ते तन्निमित्तजः ट्रकारः स्वरूपे एव 'त्र' इति रूपे तिष्ठति। ततः दंश् त्र इति स्थितौ 'व्रश्च-भ्रस्ज-सृज-मृज-यज-राज-भ्राजच्छशां षः' (पा० अ० ८।२।३६) इति धांतोः शस्य षः। 'ष्टुना ष्टुः' (पा० अ० ८।४।४१) इति त्र इत्यस्य तकारस्य टकारः। 'अजाद्यतष्टाप्' (पा० अ० ४।१।४) इति टाप्-प्रत्ययः। टकार-पकारानुबन्धलोपः। 'अकः सवर्णे दीर्घः' (पा० अ० ६।१।१०१) इति अकारस्य आकारस्य च आ-दीर्घः। एवं दंष्ट्रा-शब्दः व्युत्पद्यते।

दाडिमम्, दाडिमः। इत्यत्र 'सङ्ग्राम-दाडिम-कुसुमाश्रम-क्षेम-क्षौम-होमोद्दामानि नपुंसके च' (लि० सू० ८५) इति नपुंसकलिङ्गता पुँल्लिङ्गता च। दलनं दालः दल विशरणे (भ्वा० प०) 'भावे' (पा० अ० ३।३।१८) इति घञ्-प्रत्ययः। घकार-ञकारानुबन्धलोपः। 'अत उपधायाः' (पा० अ० ७।२।११६) इति धातोः उपधायाः अकारस्य आ-वृद्धिः। दालेन निर्वृत्तं निर्वृत्तः वा इति दालिभं दालिभः वा। 'भाव-प्रत्ययान्तादिमब् वक्तव्यः' (वा० पा० अ० ४।४।२०) इति दालशब्दात् इमप्-प्रत्ययः। पकारानुबन्धलोपः। 'यस्येति च' (पा० अ० ६।४।१४८) इति दालशब्दस्य

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by S3 Foundation USA

लकारोत्तरवर्त्तिन अकारस्य लोपः। एवं दालिम-शब्दः त्युत्पद्यते। डलयोरेकत्वस्मरणात् दालिम-शब्दः दाडिम-रूपे परिवर्त्तते। 'समौ करक-दाडिमौ' तथा 'त्रिषु पात्री पुटी वाटी पेटी कुवलदाडिमौ' इत्यमरः। 'दाडिम्बसारपिण्डीरस्वाद्वम्ल-शुक-वल्लभाः' इति रभसः। 'दाडिमस्तु त्रिलिङ्गः स्यादेलायां करके त्रिषु' इति मेदिनी।

दाराः पुं०। इत्यत्र 'दाराक्षत-लाजासूनां बहुत्वं च' (लि० सू० १०६) इति पुँल्लिङ्गता बहुवचनता च। दारयन्ति विघटयन्ति भ्रातॄन् इति दाराः। दॄ विदारणे (क्र्या० प०) 'हेतुमति च' (पा० अ० ३।१।२६) इति णिच्-प्रत्ययः। णकार-चकारानुबन्ध-लोपः। 'उरण् रपरः' (पा० अ० १।१।५१) इति सहकारेण 'अचो ञ्णिति' (पा० अ० ७।२।११५) इति धातोः ॠकारस्य आर्-वृद्धिः। एवं दारि सञ्जायते। ततः 'दार-जारौ कर्त्तरि णिलुक् च' (वा० पा० अ० ३।३।२०) इति घञ्-प्रत्ययः णिच्-प्रत्ययस्य इकारस्य च लोपः। घञ्-प्रत्यये घकार-ञकारानुबन्धलोपः। यद्यपि 'नन्दि-ग्रहि-पचादिभ्यो०' (पा० अ० ३।१।१३४) इति अच्-प्रत्यय द्वारा अपि दारि अच् इति स्थितौ चकारानुबन्धलोपे कृते 'णेरनिटि' (पा० अ० ६।४।५१) इति णिच्-प्रत्ययस्य इकारस्य लोपेन अपि दार-शब्दस्य सिद्धिः सम्भवा। 'कर्षाऽऽत्वतो घञोऽन्त उदात्तः' (पा० अ० ६।१।१५९) इति घञ्न्यन्तोदात्तत्वात् स्वरे अपि समानता अस्ति तथापि 'अच्कावशक्तौ' (पा० अ० ६।२।१५७) इति स्वरबाधनार्थं दारशब्दः 'दार-जारौ कर्त्तरि णिलुक् च' (वा० पा० अ० ३।३।२०) इति घञ्प्रत्ययेन णिच्प्रत्ययस्य इकारस्य लोपेन एव साधनीयः भवति। 'भार्या जायाथ पुं भूम्नि दाराः' इत्यमरः। दार-शब्दात् 'अजाद्यतष्टाप्' (पा० अ० ४।१।४) इति टाप्-प्रत्ययः। टकार-पकारानुबन्धलोपः। 'अकः सवर्णे दीर्घः' (पा० अ० ६।१।१०१) इति अकारस्य आकारस्य च आ-दीर्घः। एवम् आकारान्तः स्त्रीलिङ्गे अपि दारा शब्दः व्याडि-शुभाङ्कद्वारा 'क्रोडा हारा तथा दारा त्रय एते यथाक्रमम्। क्रोडे हारे च दारेषु शब्दाः प्रोक्ता मनीषिभिः' इति कथयित्वा निर्दिष्टः।

दारु नपुं०। इत्यत्र 'दारु-कशेरु-जतु-वस्तु-मस्तूनि नपुंसके' (लि० सू० ५८) इति नपुंसकलिङ्गता। दीर्यते विदीर्यते इति दारु। दॄ विदारणे (क्र्या० प०) 'दॄ-सनि-जनि-चरि-चटि-रहिभ्यो ञुण्' (उ० १।३) इति ञुण्-प्रत्ययः। ञकार-णकारानु-बन्धलोपः। ञित्त्वात् णित्त्वात् च तत्परे 'उरण् रपरः' (पा० अ० १।१।५१) इति सहकारेण 'अचो ञ्णिति' (पा० अ० ७।२।११५) इति धातोः ॠकारस्य आर्-वृद्धिः। 'काष्ठं दारु' तथा 'भद्रदारु-द्रुकिलिमं पीतदारु च दारु च' इत्यमरः।

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by S3 Foundation USA

'पुंनपुंसकयोर्दारु' इति त्रिकाण्डशेषः। 'दारु स्यात् पित्तले काष्ठे देवदारौ नपुंसकम्' इति मेदिनी। 'दारु दृणातेर्वा द्रूणातेर्वा' (निरु० ४। १५)। अत्र हि 'तृष्वीमनुप्रसृति द्रूणानः' (ऋ० सं० ३। ४। २३। १) इति निगमः। द्रूञ् हिंसायां (क्र्या० उ०) 'द्रूणातिः हिंसार्थकः' (निघं० २। १९)।

दिक् स्त्री०। इत्यत्र **'भा-स्रुक्-स्रग्-दिगुष्णिगुपानहः' (लि० सू० २०) इति स्त्रीलिङ्गता।** दिशति अवकाशम् इति दिक्। दिश अतिसर्जने (तु० उ०) 'ऋत्विग्-दधृक्-स्रग्-दिगुष्णिगञ्चु-युजि-क्रुञ्चां च' (पा० अ० ३। २। ५९) इति क्विन्-प्रत्ययः। तस्य सर्वापहारिलोपः। एवं दिश्-शब्दः व्युत्पद्यते। तस्य प्रथमैकवचने दिक् भवति। तथाहि दिश्-शब्दात् 'स्वौजसमौट्०' इति सु-प्रत्ययः। उकारानुबन्धलोपः। 'हल्-ङ्याब्भ्यो दीर्घात् सुतिस्यपृक्तं हल्' (पा० अ० ६। १। ६८) इति सुप्रत्ययस्य सकारस्य लोपः। 'क्विन्प्रत्ययस्य कुः' (पा० अ० ८। २। ६२) इति दिश्-शब्दस्य शकारस्य ककारः। 'झलां जशोऽन्ते' (पा० अ० ८। २। ३९) इति ककारस्य गत्वे तु 'वाऽवसाने' (पा० अ० ८। ४। ५६) इति विकल्पेन गस्य कत्वेन दिक् एव भवति। कत्वाभावे दिग् तिष्ठति। भागुरिमतेन दिश्-शब्दात् 'अजाद्यतष्टाप्' (पा० अ० ४। १। ४) इति टाप्-प्रत्ययः। टकार-पकारानुबन्धलोपः। एवं दिशा शब्दः स्त्रीलिङ्गे भवति। 'दिशस्तु ककुभः काष्ठा आशाश्च हरितश्च ताः' इत्यमरः। 'दिक् तु स्त्रियां दिशा दान्ती ककुब् देववधूः पविः' इति शब्दार्णवः। 'दिशः दिशतेरासदनादपि वाभ्यशनात्' (निरु० २। १५)। 'पञ्च वै दिशः' (शत० ब्रा० ५। ४। ४। ६)। 'सप्तदिशः' (शत० ब्रा० ९। ५। २। ८)। 'नव दिशः' (शत० ब्रा० ६। ३। १। २१, ६। ८। २। १०)। 'दश दिशः' (शत० ब्रा० ६। ३। १। २१, ८। ४। २। २३)। 'दिशो वै स नाकः स्वर्गो लोकः' (शत० ब्रा० ८। ६। १। ४)। 'स्वर्गो हि लोको दिशः' (शत० ब्रा० ८। १। २। ४)। 'ता वा एता देव्यः। दिशो ह्येताः' (शत० ब्रा० ९। ५। १। ३९)। 'दिशोऽग्निः' (शत० ब्रा० ६। २। २। ३४, ६। ३। १। २१, ६। ८। २। १०)। 'वायुर्दिशां यथा गर्भः' (शत० ब्रा० १४। ९। ४। २१)। 'दिशो वै हरितः' (शत० ब्रा० २। ५। १। ५)। 'तद् यत् तच्छ्रोत्रं दिश एव तत्' (शत० ब्रा० १०। ३। ३। ७)। 'छन्दांसि वै दिशः' (शत० ब्रा० ८। ३। १। १२, ९। ५। १। ३९)। 'अपरिमिता हि दिशः' (शत० ब्रा० ६। ५। २। ७)। 'दिशः सप्तहोत्राः' (यजु० १३। ५)। 'ध्रुवाऽसि दिशोऽसि' (यजु० ११। ५८)। 'ऋतवो वै दिशः प्रजननः' (गोप० उ० ६। १२)। 'दिशो वै श्रोत्रे स्थिताः। (तैत्ति० ब्रा० ३। १०। ८। ६)। 'श्रोत्रं दिशः' (जैमि० उ० ३। २। ८)। 'दिशः परिधयः' (तैत्ति० ब्रा० २। १। ५। २, ऐत० ब्रा० ५।

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by S3 Foundation USA

२८)। 'दिशो वै प्राणः' (जै० उ० ४। २। ११)। 'दिशः परिधानीयाः' (जैमि० उ० ३। ४। २)। 'दिशां वा एतत्साम यद् वैरूप्यम्' (तां० ब्रा० १२। ४। ७)। 'दिशः समानः' (जै० उ० ४। २२। ९)।

दिनम् नपुं०। इत्यत्र 'दिनाहनी नपुंसके' (लि० सू० १०८) इति पुँल्लिङ्गता अपि भवति। नपुंसकलिङ्गता। अर्धर्चादिगणे पाठात् दिनशब्दे 'अर्धर्चाः पुंसि च' (पा० अ० २। ४। ३१) इति पुँल्लिङ्गता अपि भवति। द्यति खण्डयति अन्धकारं निर्व्यापारावस्थां च इति दिनम् 'दो अवखण्डने' (दि० प०) 'बहुलमन्यत्रापि' (उ० २। ५०) इति किनन्-प्रत्ययः। ककार-नकारानुबन्धलोपः। 'आदेच उपदेशेऽशिति' (पा० अ० ६। १। ४५) इति धातोः ओकारस्य आकारः। 'आतो लोप इटि च' (पा० अ० ६। ४। ६४) इति आकारस्य लोपः। अथवा दीयते क्षीणं भवति इति दिनम्। दीङ् क्षये (दि० आ०) 'इण्-सिञ्-जि-दीङुष्यविभ्यो नक्' (उ० ३। २) इति नक्-प्रत्ययः बाहुलकात् धातोः ईकारस्य ह्रस्वः इकारश्च। 'घस्रो दिनाहनी वा तु क्लीबे दिवस-वासरौ' इत्यमरः।

दिवसः पुं०। इत्यत्र 'रश्मि-दिवसाभिधानानि' (लि० सू० १००) इति पुँल्लिङ्गता। अर्धर्चादिगणे दिवस-शब्दस्य पाठात् अस्य 'अर्धर्चाः पुंसि च' (पा० अ० २। ४। ३१) इति नपुंसकता अपि भवति। यस्मिन् पदार्थाः दीव्यन्ति प्रकाशन्ते सः दिवसः तद् दिवसं वा। दिवु क्रीडा-विजिगीषा-व्यवहार-द्युति-स्तुति-मोद-मद-स्वप्न-कान्ति-गतिषु (दि० प०) 'दिवः कित्' (उ० ३। १२१) इति असच्-प्रत्ययः, स च कित्। प्रत्यये चकारानुबन्धलोपः। प्रत्ययस्य कित्त्वात् तस्मिन् परे 'पुगन्तलघूपधस्य च' (पा० अ० ७। ३। ८६) इति धातोः उपधायाः इकारस्य प्राप्तः ए-गुणः 'क्ङिति च' (पा० अ० १। १। ५) इति निषेधात् न भवति। 'घस्रो दिनाहनी वा तु क्लीबे दिवस-वासरौ' इत्यमरः।

दीधितिः स्त्री०। इत्यत्र 'दीधितिः स्त्रियाम्' (लि० सू० १०१) इति स्त्रीलिङ्गता। दीधीते दीप्यते इति दीधितिः। दीधीङ् दीप्ति-देवनयोः (अ० आ०) 'क्तिच्-क्तौ च संज्ञायाम्' (पा० अ० ३। ३। १७४) इति क्तिच्-प्रत्ययः। ककार-चकारानुबन्धलोपः। 'आर्धधातुकस्येड् वलादेः' (पा० अ० ७। २। ३५) इति इडागमः। टकारानुबन्धलोपः। अत्र 'ति-तु-त्र-त-थ-सि-सु-सर-कसेषु च' (पा० अ० ७। २। ९) इति इडागमस्य निषेधः तु न भवति अग्रे (तितुत्रेष्वग्रहादीनामिति वक्तव्यम्) (वा० पा० अ० ७। २। ९) इति तस्य निषेधात्। 'यीवर्णयोर्दीधी-वेव्योः' (पा० अ० ७। ४। ५३) इति धातोः धकार-परवर्त्तिनः ईकारस्य लोपः। 'भानुः करो मरीचिः स्त्रीपुंसयो-र्दीधितिः स्त्रियाम्' इत्यमरः। 'दीधितयः रश्मिनाम' (निघं० १। ५)। 'दीधितयः अङ्गुलिनाम' (निघं० २।

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by S3 Foundation USA

५)। 'दीधितयोऽङ्गुलयो भवन्ति, धीयन्ते कर्मसु' (निरु० ५। १०)। 'दीधितिं विधानम्' (नि० ३। ४)।

दीपः पुं०। **इत्यत्र 'पोपधः' (लि० सू० ७७) इति पुँल्लिङ्गता।** दीप्यते दीपयति वा इति दीपः। दीप्यते अनेन इति वा दीपः। दीपी दीप्तौ (दि० आ०) 'इगुपध-ज्ञा-प्री-किरः कः' (पा० अ० ३। १। १३५) इति क-प्रत्ययः। ककारानुबन्धलोपः। दीपयति वा इति अन्तर्भावितण्यर्थे 'नन्दि-ग्रहि-पचादिभ्यो०' (पा० अ० ३। १। १३४) इति अच्-प्रत्ययः वा। चकारानुबन्धलोपः। दीप्यते अनेन इत्यर्थे तु 'अकर्त्तरि च कारके संज्ञायाम्' (पा० अ० ३। ३। १९) इति घञ्-प्रत्ययः। घकार-ञकारानुबन्धलोपः। 'दीपः प्रदीपः' इत्यमरः।

दुन्दुभिः स्त्री०, पुं०। **इत्यत्र अक्षार्थे 'दुन्दुभिरक्षेषु' (लि० सू० १४) इति स्त्रीलिङ्गता।** किन्तु अक्षभिन्नार्थे वाद्यविशेषार्थे असुरार्थे वा तु पुँल्लिङ्गता एव। 'दुन्दु' शब्देन भाति शोभते इति दुन्दुभिः। दुन्दु + भा दीप्तौ (अ० प०) 'उणादयो बहुलम्' (पा० अ० ३। ३। १) इति उणादि-प्रत्ययानां बाहुलकत्वात् कि-प्रत्ययः। ककारानुबन्ध-लोपः। 'आतो लोप इटि च' (पा० अ० ३। २। ३) इति धातोः आकारस्य लोपः। **अथवा** द्याम् = दिवम् उभति शब्देन पूरयति इति दुन्दुभिः। दिन् + उभ पूरणे (तु० प०) 'पृषोदरादीनि यथोपदिष्टम्' (पा० अ० ६। ३। १०९) इति इ-प्रत्ययः धातोः दुन्द् आदेशश्च। **अथवा** दुन्द् इति शब्देन उभति पूरयति नभः इति दुन्दुभिः। दुन्द् + उभ पूरणे (तु० प०) 'इगुपधात् कित्' (उ० ४। २१) इति इन्-प्रत्ययः स च कित्। नकारानुबन्धलोपः। 'भेर्यामानकदुन्दुभी' तथा 'स्याद् भेर्यां दुन्दुभिः पुंसि स्यादक्षे दुन्दुभिः स्त्रियाम्' इत्यमरः। 'दुन्दुभिः पुमान्। वरुणे दैत्य-भेर्योश्च स्त्र्यक्षे बिन्दुत्रिकद्वये' इति मेदिनी। 'दुन्दुभिस्तु भेर्यां दितिसुते विषे। अक्षबिन्दुत्रिक-द्वन्द्वे' इति विश्वः। 'भेरी स्त्री दुन्दुभिः पुमान्' इति स्वामी। 'दुन्दुभिरिति शब्दानुकरणं द्रुमो भिन्न इति वा दुन्दुभ्यतेर्वा स्याच्छब्द-कर्मणस्तस्यैषा भवति' (निरु० ९। १२)। 'परमा वा एषा वाग् या दुन्दुभी' (तै० ब्रा० १। ३। ६)। 'एषा वै परमा वाग् या सप्तदशानां दुन्दुभी' (शत० ब्रा० ५। १। ५। ६)।

दुःखम् नपुं०। **इत्यत्र 'द्वन्द्व-बर्ह-दुःख-बडिश-पिच्छ-बिम्ब-कुटुम्ब-कवच-वर-शर-वृन्दारकाणि' (लि० सू० १६९) इति नपुंसकलिङ्गता।** दुःखयति इति दुःखम्। सुखं-दुःख तत्क्रियायाम् (चु० उ०) 'नन्दि-ग्रहि-पचादिभ्यो०' (पा० अ० ३। १। १३४) इति अच्-प्रत्ययः। चकारानुबन्धलोपः। अथवा दुर् निन्दितं खनति इति दुःखम्।

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by S3 Foundation USA

दुर् + खनु अवदारणे (भ्वा० प०) 'अन्येष्वपि दृश्यते' (पा० अ० ३।२।१०१) इति ड-प्रत्ययः। डकारानुबन्धलोपः। डित्त्वात् 'टेः' (पा० अ० १०।४।१४३) इति धातोः अन् इत्यस्य टेर्लोपः। 'खरवसानयोर्विसर्जनीयः' (पा० अ० ८।३।१५) इति रेफस्य विसर्गः। 'पीडा बाधा व्यथा दुःखमामनस्यं प्रसूतिजम्' इत्यमरः।

दुहिता स्त्री०। **इत्यत्र 'ऋकारान्ता मातृ-दुहितृ-स्वसृ-पोतृ-ननान्दरः' (लि० सू० ३) इति स्त्रीलिङ्गता।** दोग्धि प्रपूरयति पतिगृहम् अथवा रिक्तं करोति पितृगृहम् इति दुहिता। **अथवा** दोहति अर्दति गच्छति पतिगृहं याचति वा माता-पितरौ हिनस्ति वा इति दुहिता। दुह प्रपूरणे (अ० उ०) दुहिर् अर्दने (भ्वा० प०) अर्दनं गतिर्याचना हिंसनं च। 'नप्तृ-नेष्टृ-त्वष्टृ-होतृ-पोतृ-भ्रातृ-जामातृ-मातृ-पितृ-दुहितृ' (उ० २।९७) इति तृच्-प्रत्ययः। चकारानुबन्धलोपः। 'आर्धधातुकस्येड् वलादेः' (पा० अ० ७।२।३५) इति इडागमः। टकारानुबन्धलोपः। एवं दुहितृ-शब्दः व्युत्पद्यते। **अथवा** दहति इति दुहिता। दह भस्मीकरणे (भ्वा० प०) धातोः पूर्ववद् एव तृच्-प्रत्ययः तथा निपातनाद् धातोः दकारपरवर्त्तिनः अकारस्य उकारादेशश्च। शेषकार्याणि तु यथापूर्वम्। तस्य स्त्रीलिङ्गे प्रथमैकवचने 'दुहिता' भवति। 'आत्मजस्तनयः सूनुः सुतः पुत्रः स्त्रियां त्वमी। आहुर्दुहितरं सर्वे' इत्यमरः। 'सुता तु दुहिता पुत्री' इति त्रिकाण्डशेषः। अत्र दुहितृ-शब्दे 'ऋन्नेभ्यो ङीप्' (पा० अ० ४।१।५) इति ङीप् तु न भवति 'न षट्-स्वस्रादिभ्यः' (पा० अ० ४।१।१०) इति निषेधात्। 'दुहिता दुर्हिता दूरे हिता दोग्धेर्वा' (निरु ३।४)।

दूतः पुं०। **इत्यत्र 'हस्त-कुन्तान्त-व्रात-वात-दूत-धूर्त्त-सूत-चूत-मुहूर्त्ताः' (लि० सू० १११) इति पुँल्लिङ्गता।** दवति गच्छति स्वामिनः कार्यार्थम् **अथवा** दुनोति उपतापयति स्वामिनं तस्य अनुशासनम् अतिक्रम्य अथवा शत्रून् भेदं जनयित्वा दुनोति यः स दूतः। दु गतौ (भ्वा० प०) टु दु उपतापे (स्वा० प०) 'दु-तनिभ्यां दीर्घश्च' (उ० ३।९०) इति क्त-प्रत्ययः, धातोः उकारस्य ऊकारः दीर्घश्च। **अथवा** दूयते स्म परितप्यते स्म इति दूतः। दूङ् परितापे (दि० आ०) 'गत्यर्थाकर्मक-श्लिष्-शीङ्-स्थाऽऽस-वस-जन-रुह-जीर्यतिभ्यश्च' (पा० अ० ३।४।७२) इति क्त-प्रत्ययः। ककारानुबन्धलोपः। **अथवा** दूयते परितापयति शत्रुं तत्र भेदम् उत्पाद्य, स्व-स्वामिनं वा तस्य आज्ञाम् उल्लङ्घ्य इति दूतः। अन्तर्भावितण्यर्थात् दूङ् परितापे (दि० आ०) धातोः 'क्तिच्-क्तौ च संज्ञायाम्' (पा० अ० ३।३।१७४) इति क्त-प्रत्ययः। ककारानुबन्धलोपः। 'स्यात् सन्देशहरो दूतः' इत्यमरः। 'दूतः जवतेर्वा द्रवतेर्वा वारयतेर्वा' (निरु० ५।१)।

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by S3 Foundation USA

दूरम् नपुं०। **इत्यत्र 'द्वाराग्र-स्फार-तक्र-वक्र-वप्र-क्षिप्र-क्षुद्र-नार-तीर-दूर०' (लि० सू० ९०) इति नपुंसकलिङ्गता।** दुःखेन ईयते गम्यते लभ्यते यत् तद् दूरम्। दुर्+इण् गतौ (अ० प०) 'दुरिणो लोपश्च' (उ० २। २०) इति रक्-प्रत्ययः धातोः इकारस्य लोपः। प्रत्यये ककारानुबन्धलोपः। दुर् र इत्यवस्थायां 'रोरि' (पा० अ० ८। ३। १४) इति दुर् इत्यस्य रेफस्य लोपः। 'ढ्रलोपे पूर्वस्य दीर्घोऽणः' (पा० अ० ६। ३। १११) इति दु इत्यस्य उकारस्य ऊ-दीर्घः। **अथवा** दुः दुःखेन रमयति आनन्दयति इति दूरम् दुर् + अन्तर्भावितण्यर्थात् रमु क्रीडायां (भ्वा० आ०) 'अन्येष्वपि दृश्यते' (पा० अ० ३। २। १०१) इति ड-प्रत्ययः। डकारानुबन्धलोपः। डित्त्वात् 'टेः' (पा० अ० ६। ४। १४३) इति धातोः अम् इत्यस्य टेर्लोपः। दुर् र् अ इत्यवस्थायां पूर्ववत् दुर् इत्यस्य रेफस्य लोपः, दु इत्यस्य उकारस्य च ऊ-दीर्घः। 'स्याद् दूरं विप्रकृष्टम्' इत्यमरः। 'दूरं कस्मात् ? द्रुतं भवति दुरयं वा' (निरु० ३। १९)।

दृढः, दृढम् पुँ०, नपुं०। **इत्यत्र 'शृङ्गार्ध-निदाघोद्यम-शल्य-दृढाः' (लि० सू० १०८) इति पुँल्लिङ्गता नपुंसकलिङ्गता च।** दर्हति स्म इति दृढः दृढं वा। दृह वृद्धौ (भ्वा० प०) 'गत्यर्थाकर्मक-श्लिष्-शीङ्-स्थाऽऽस-वस-जन-रुह-जीर्यतिभ्यश्च' (पा० अ० ३। ४। ७२) इति क्त-प्रत्ययः। ककारानुबन्धलोपः। 'दृढः स्थूल-बलयोः' (पा० अ० ७। २। २०) इति 'आर्धधातुकस्येड् वलादेः' (पा० अ० ७। २। ३५) इति प्राप्तः इडागमस्य अभावः, क्तप्रत्ययस्य तकारस्य ढकारः तथा धातोः हकारस्य लोपः निपात्यते। **अथवा** दृंहति स्म इति दृढः दृढं वा। दृ दृहि वृद्धौ (भ्वा० प०) धातोः इदित्त्वात् 'इदितो नुम् धातोः' (पा० अ० ७। १। ५८) इति नुम् आगमः। उकार-मकारानुबन्धलोपः। दृन्ह् इति स्थितौ पूर्ववत् क्त-प्रत्ययः। ककारानुवन्धलोपः। 'दृढः स्थूलबलयोः' (पा० अ० ७। २। २०) इति 'आर्धधातुकस्येड् वलादेः' (पा० अ० ७। २। ३५) इति प्राप्तः इडभावः, प्रत्ययस्य तकारस्य ढकारः हकारस्य तथा नुमागमस्य नकारस्य लोपश्च निपात्यते। 'तीव्रकान्त-नितान्तानि गाढ-बाढ-दृढानि च' एवं 'कक्खटं कठिनं क्रूरं कठोरं निष्ठुरं दृढम्' एवं 'शक्तस्थूलौ त्रिषु दृढौ' इत्यमरः। 'दृढं स्थूले नितान्ते च प्रगाढे बलवत्यपि' इति मेदिनी।

दृतिः पुं०। **इत्यत्र 'ऋषि-राशि-दृति-ग्रन्थि-क्रिमि-ध्वनि-बलि-कौलि-मौलि-रवि-कवि-कपि-मुनयः' (लि० सू० १०९) इति पुँल्लिङ्गता।** दृणाति विदारयति इति दृतिः। दृ विदारणे (क्र्या० प०) 'दृणातेर्ह्रस्वश्च' (उ० ४। १८५) इति ति-प्रत्ययः धातोः ऋकारस्य ह्रस्वः ऋकारश्च। **अथवा** द्रियते असौ दृतिः। दृङ् आदरे (तु० आ०)

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by S3 Foundation USA

'क्तिच्-क्तौ च संज्ञायाम्' (पा० अ० ३।३।११७) इति क्तिच्-प्रत्ययः। ककार-चकारानुबन्धलोपः। कित्त्वात् 'उरण् रपरः' (पा० अ० १।१।५१) इति सहकारेण 'सार्वधातुकार्धधातुकयोः' (पा० अ० ७।३।८४) इति धातोः ऋकारस्य प्राप्तः अर्-गुणः 'क्ङिति च' (पा० अ० १।१।५) इति निषिध्यते। 'दृतिश्चर्मपुटे-मत्स्ये ना' इति मेदिनी।

देवलः पुँ०। इत्यत्र **'तूलोपल-ताल-कुसूल-तरल-कम्बल-देवल-वृषलाः पुंसि' (लि० सू० १४२)** इति पुँल्लिङ्गता। जीविकायै देवान् अर्थात् देवसम्बन्धितं स्वं धनं लाति गृह्णाति इति देवलः। देव + ला आदाने (अ० प०) 'आतोऽनुपसर्गे कः' (पा० अ० ३।२।३) इति क-प्रत्ययः। ककारानुबन्धलोपः। 'आतो लोप इटि च' (पा० अ० ६।४।६४) इति धातोः आकारस्य लोपः। '.देवाजीवी तु देवलः' इत्यमरः।

देवः पुं०। इत्यत्र **'देवासुरात्म-स्वर्ग-गिरि-समुद्र-नख-केश-दन्त-स्तन-भुज-कण्ठ-खड्ग-शर-पङ्काभिधानानि' (लि० सू० ४३)** इति पुँल्लिङ्गता। दीव्यति इति देवः। 'दिवु क्रीडा-विजिगीषा-व्यवहार-द्युति-स्तुति-मोद-मद-स्वप्न-कान्ति-गतिषु' (दि० प०) 'नन्दि-ग्रहि-पचादिभ्यो०' (पा० अ० ३।१।१३४) इति अच्-प्रत्ययः। चकारानुबन्धलोपः। 'पुगन्तलघूपधस्य च' (पा० अ० ७।३।८६) इति धातोः उपधायाः इकारस्य ए-गुणः। एवं देवः शब्दः व्युत्पद्यते। 'अमरा निर्जरा देवास्त्रिदशा विबुधाः सुराः' इत्यमरः। 'राजा भट्टारको देव इति चामरः।' 'देवं हृषीके देवस्तु नृपतौ तोयदे सुरे' इति हैमः। 'देवः सुरे धने राज्ञि देवमाख्यातमिन्द्रिये। देवी कृताभिषेकायां तेजनी-स्पृक्कयोरपि' इति मेदिनी। 'विद्वांसो हि देवाः' (शत० ब्रा० ३।७।३।१०)। 'सत्यमेव देवाः' (शत० ब्रा १।१।१।४)। 'मर्त्या ह वा ऽ अग्रे देवा आसुः स यदैव ते संवत्सरमापुरथामृता आसुः' (शत० ब्रा० १।१।२।१२)। 'उभये ह वाऽ इदमग्रे सहासुर्देवाश्च मनुष्याश्च' (शत० ब्रा० २।३।४।४)। 'देवाश्च वा असुराश्च प्रजापते र्द्वयाः पुत्रा आसन्' (तां० त्रा० १८।१।२)। 'देवा वै सर्पाः' (तै० ब्रा० २।२।६।२)। 'प्राणा देवाः' (शत० ब्रा० ६।३।१।१५)। 'न वै देवा स्वपन्ति' (शत० ब्रा० ३।२।२।२२) 'सत्यमेव देवा अनृतं मनुष्याः' (शत० ब्रा० १।१।१।४)। 'आनन्दोत्थानो हैव सर्वे देवाः' (शत० ब्रा० १०।३।५।१३)। 'देवा एकरूपाः सर्वे शुक्लाः' (जैमि० ब्रा० १।२७८)। 'नहि देवा अश्रु कुर्वन्ति' (मैत्रा० सं० २।१।१०)। 'देवो दानाद्वा दीपनाद्वा द्योतनाद्वा द्युस्थाने भवतीति वा' (निरु० ७।४।१५)।

देहः, देहम् पुँ०, नपुं०। इत्यत्र **'गृह-मेह-देह-पट्ट-पटहाष्टपदाम्बुद-ककुदाश्च' (लि० सू० १८२)** इति पुँल्लिङ्गता नपुंसकलिङ्गता च। दिह्यते इति देहः देहं वा।

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by S3 Foundation USA

दिह उपचये (अ० उ०) 'अकर्त्तरि च कारके संज्ञायाम्' (पा० अ० ३। ३। १९) इति घञ्-प्रत्ययः। घकार-ञकारानुबन्धलोपः। 'पुगन्तलघूपधस्य च' (पा० अ० ७। ३। ८६) इति धातोः उपधायाः इकारस्य ए-गुणः। 'कायो देहः क्लीबपुंसोः' इत्यमरः।

दैवम् नपुं०। इत्यत्र '**श्राद्ध-कुलिश-दैव-पीठे-कुण्डाकाङ्ग-दधि-सक्थ्यक्ष्या-स्पदाकाश-कण्व-बीजानि**' (**लि० सू० १६६**) **इति नपुंसकलिङ्गता**। देव-शब्दः पूर्वं व्याख्यातः। देवात् आगतम् इति दैवम् 'तत आगतः' (पा० अ० ४। ३। ७४) इति अण्-प्रत्ययः। णकारानुबन्धलोपः। 'यस्येति च' (पा० अ० ६। ४। १४८) इति वकार-परवर्त्तिनः अकारस्य लोपः। 'तद्धितेष्वचामादेः' (पा० अ० ७। २। ११७) इति दकारपरवर्त्तिनः एकारस्य ऐ-वृद्धिः। **अथवा** देवे भवं दैवं, देवस्य इदं वा दैवम्। आद्ये 'तत्र भवः' (पा० अ० ४। ३। ५३) इति अण्-प्रत्ययः, अन्त्ये च 'तस्येदम्' (पा० अ० ४। ३। १२०) इति अण्-प्रत्ययः। शेषकार्यं पूर्ववत्। **अथवा** देवस्य अपत्यम् इति दैवम्। 'देवाद् यञञौ' (पा० अ० ४। १। ८५) इति अञ्-प्रत्ययः। ञकारानुबन्ध-लोपः। शेषकार्यं पूर्ववत्। 'दैवं दिष्टं भागधेयं भाग्यं स्त्री नियतिर्विधिः' इत्यमरः।

दैवः पुं०। इत्यत्र '**दैवं पुंसि च**' (**लि० सू० १६७**) **इति पुँल्लिङ्गता**। दैवशब्दः पूर्वं व्याख्यातः।

दोः पुं०। इत्यत्र '**देवासुरात्म-स्वर्ग-गिरि-समुद्र-नख-केश-दन्त-स्तन-भुज-कण्ठ-खड्ग-शर-पङ्काभिधानानि**' (**लि० सू० ४३**) **इति पुँल्लिङ्गता**। यः दाम्यति येन वा दम्यते स दोः बाहुर्वा। दमु उपशमे (दि० प०) 'दमेर्डोसिः' (उ० २। ७०) इति डोसि-प्रत्ययः। डकारेकारानुबन्धलोपः। डित्त्वात् 'टेः' (पा० अ० ६। ४। १४३) इति धातोः अम् इत्यस्य टेर्लोपः। एवं दोस् अयं शब्दः व्युत्पद्यते। अस्य प्रथमैकवचने दोः भवति। 'भुज-बाहू प्रवेष्टो दोः' इत्यमरः। 'दोर्दोषा च भुजा बाहुः पाणिर्हस्तः करस्तथा' इति धनञ्जयः। 'दोः शिताम भवति दोः द्रवतेः' (निरु० ४। ३)।

द्यूः स्त्री०। इत्यत्र '**अन्यू-प्रत्ययान्तो धातुः**' (**लि० सू० ४**) **इति स्त्रीलिङ्गता**। अन्तर्भावितण्यर्थः दिवु क्रीडा-विजिगीषा-व्यवहार-द्युति-स्तुति-मोद-भव-स्वप्न-कान्ति-गतिषु (दि० प०) 'क्विप् च' (पा० अ० ३। २। ७६) इति क्विप्-प्रत्ययः। तस्य सर्वापहारिलोपः 'च्छ्वोः शूडनुनासिके च' (पा० अ० ६। ४। १९) इति वकारस्य ऊठ् आदेशः, ठकारानुबन्ध-लोपः। 'इको यणचि' (पा० अ० ६। १। ७७) इति धातोः इकारस्य य्-आदेशः। एवं द्यू-शब्दः निष्पद्यते।

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by S3 Foundation USA

द्यौः स्त्री०। इत्यत्र 'द्यौः स्त्रियाम्' (लि० सू० ४५) इति स्त्रीलिङ्गता। यः द्योतते यस्यां यया वा द्योतते सा द्यौः अथवा यस्यां द्यौति अभिगच्छति सर्वः सा द्यौः। द्युत दीप्तौ (भ्वा० आ०), द्यु अभिगमने (अ० प०) 'उणादयो बहुलम्' (पा० अ० ३।३।१) इति उणादीनां बाहुलकत्वात् 'गमे र्डोः' (उ० २।६८) इति डो-प्रत्ययः। डकारानुबन्ध-लोपः। डित्त्वात् तस्मिन् परे 'टेः' (पा० अ० ६।४।१४३) इति द्युत् अस्मिन् धातौ उत् इत्यस्य तथा द्यु-धातौ उकारस्य टेर्लोपः। एवं द्यो-शब्दः निष्पद्यते, तत्प्रथमैकवचने 'गोतोणित्' (पा० अ० ७।१।९०) इत्यत्र गकारम् अपनीय केवलम् ओतः अपि परे सर्वनामस्थानस्य णिद्वद्भाव-विधानात् 'अचो ञ्णिति' (पा० अ० ७।२।११५) इति द्यो-शब्दे ओकारस्य औ-वृद्धया द्यौः भवति। अथवा द्यु-धातौ 'अन्येभ्योऽपि दृश्यन्ते' (पा० अ० ३।२।७५) इति विच्-प्रत्ययेन अपि द्यो-शब्दः व्युत्पद्यते। तथाहि 'सार्व-धातुकार्धधातुकयोः' (पा० अ० ७।३।७४) इति धातोः उकारस्य ओ-गुणः। विच्-प्रत्ययस्य सर्वापहारिलोपः। अथवा दीव्यति इति दिव्। दिवु क्रीडा-विजिगीषा-व्यवहार-द्युति-स्तुति-मोद-मद-स्वप्न-कान्ति-गतिषु (दि० प०) 'क्विप् च' (पा० अ० ३।२।७६) इति क्विप्-प्रत्ययः। तस्य सर्वापहारिलोपः। एवं दिव्-शब्दः व्युत्पद्यते। तस्य प्रथमैक-वचने द्यौः भवति। तथाहि-दिव्-शब्दात् सु-प्रत्ययः। उकारानुबन्धलोपः। 'दिव औत्' (पा० अ० ७।१।८४) इति वकारस्य औकारः। 'इको यणचि' (पा० अ० ६।१।७७) इति दकार-परवर्त्तिनः इकारस्य यकारः। सकारस्य 'स-सजुषो रुः' (पा० अ० ८।२।६६) इति रुत्वम्। उकारानुबन्धलोपः। 'खरवसानयोर्विसर्जनीयः' (पा० अ० ८।३।१५) इति रेफस्य विसर्गः। एवं द्यौः भवति। 'सुरलोको द्यो-दिवौ द्वे स्त्रियाम्' इत्यमरः। 'द्यो-दिवौ द्वे स्त्रियाम्' इति चामरः। 'द्यो-दिवौ स्त्रियामभ्रं व्योम पुष्करमम्बरम्' इत्यपि अमरः। 'द्यौः स्त्री स्वर्गे च गगने दिवं क्लीबं तयोः स्मृतम्' इति मेदिनी। 'द्यौस्तु स्वर्गे विहायसि' इति हैमः। 'द्यौः स्त्री स्वर्गान्तरिक्षयोः' इति सिद्धान्त-कौमुद्याम् उणादौ। 'आपो वै द्यौः' (शत० ब्रा० ६।४।१।९)। 'द्यौर्यशः' (शत० ब्रा० १२।३।४।७)। 'द्यौरिन्द्रेण गर्भिणी' (शत० ब्रा० १४।९।४।२१)। 'द्यौरेवात्मा' (शत० ब्रा० ६।३।३।१५)। 'द्यौर्वै सर्वेषां देवानामायतनम्' (शत० ब्रा० १४।३।२।८)। 'द्यौर्ब्राह्मणी' (जैमि० उ० ३।४।९)। 'द्यौरुत्तरवेदिः' (शत० ब्रा० ७।३।१।२७)। 'द्यौर्वा अपां सदनं दिवि ह्यापः सन्नाः' (शत० ब्रा० ७।५।२।५६)। 'प्राणो वै दिवः' (शत० ब्रा० ६।७।४।३)। 'वागिति द्यौः' (जैमि० ब्रा० ४।२२।११)। 'द्यौः सावित्री' (गोप० पू० १।३३)। 'द्यौः अद्युतदिव वा अद इति तद्दिवो दिवत्वम्' (तां० ब्रा० २०।१४।२)।

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by S3 Foundation USA

द्रोणम्, द्रोणः नपुं०, पुं०। इत्यत्र **'द्रोणाढकौ नपुंसके च' (लि० सू० १०४) इति नपुंसकलिङ्गता पुँल्लिङ्गता च।** द्रवति द्रूयते वा येन इति द्रोणं द्रोणः वा। द्रु गतौ (भ्वा० प०) 'कृ-वृ-जृ-सि-द्रु-पन्यनि-स्वपिभ्यो नित्' (उ० ३। १०) इति न-प्रत्ययः। स च नित्। नित्त्वं स्वरार्थम्। 'सार्वधातुकार्धधातुकयोः' (पा० अ० ७। ३। ८४) इति धातोः उकारस्य ओ-गुणः। 'अट्-कुप्वाङ्-नुम्-व्यवायेऽपि' (पा० अ० ८। ४। २) इति नस्य णः। 'अस्त्रियामाढक-द्रोणौ खारी वाहो निकुञ्चकः' इत्यमरः। 'द्रोणः काकेऽपि च' इति चामरः। 'द्रोणोऽस्त्रियामाढके स्यादाढकादिचतुष्टये। पुमान् कृपी-पतौ कृष्ण-काके स्त्री नीवृदन्तरे। स्त्रियां काष्ठाम्बु-वाहिन्यां गवादन्यामपीष्यते' इति मेदिनी। 'द्रोणः कृपीपतौ कृष्णकाके स्यादाढकेऽपि च। आढवापचतुष्के च द्रोणी स्यान्नीवृदन्तरे। द्रोणी काष्ठाम्बुवाहिन्यां गवां घास-भुजां स्थितौ' इति विश्वः। 'द्रोणं द्रुममयं भवति' (निरु० ५। २६)

द्वन्द्वम् नपुं०। इत्यत्र **'द्वन्द्व-बर्ह-दुःख-बडिश-पिच्छ-बिम्ब-कुटुम्ब-कवच-वर-शर-वृन्दारकाणि' (लि० सू० १६९) इति नपुंसकलिङ्गता।** 'द्वन्द्वं रहस्यमर्यादा-वचनव्युत्क्रमणयज्ञपात्रप्रयोगाभिव्यक्तिषु' (पा० अ० ८। १। १५) इति द्वि-शब्दस्य द्वित्वं, पूर्वद्विशब्दस्य इकारस्य अम्-भावः, उत्तरद्विशब्दस्य इकारस्य अत्वं शब्दस्य च नपुंसकत्वं निपातनात् भवति। तेन द्व् अम् द्व् अ इति स्थितौ मकारस्य 'नश्चापदान्तस्य झलि' (पा० अ० ८। ३। २४) इति अनुस्वारः। अनुस्वारस्य 'अनुस्वारस्य ययि परसवर्णः' (पा० अ० ८। ४। ५८) इति परसवर्ण-नकारः। एवं द्वन्द्वशब्दः निष्पद्यते। 'स्त्रीपुंसौ मिथुनौ द्वन्द्वम्' तथा 'द्वन्द्वं कलह-युग्मयोः' इत्यमरः। 'द्वन्द्वं रहस्ये कलहे तथा मिथुन-युग्मयोः' इति मेदिनी।

द्वारम् नपुं०। इत्यत्र 'द्वाराग्र-स्फार-तक्र-वक्र-वप्र०' **(लि० सू० ९०) इति** नपुंसकलिङ्गता। द्वारयति इति द्वारम्। द्वृ संवरणे (भ्वा० प०) 'हेतुमति च' (पा० अ० ३। १। २६) इति णिच् प्रत्ययः। णकार-चकारानुबन्धलोपः। 'अचो ञ्णिति' (पा० अ० ७। २। ११५) इति धातोः ऋकारस्य 'उरण् रपरः' (पा० अ० १। १। ५१) इति सहकारेण आर्-वृद्धिः। 'नन्दि-ग्रहि-पचादिभ्यो०' (पा० अ० ३। १। १३४) इति अच्-प्रत्ययः। चकारानुबन्धलोपः। 'णेरनिटि' (पा० अ० ६। ४। ५१) इति णिच्-प्रत्ययस्य इकारस्य लोपः। 'स्त्री द्वार्द्वारं प्रतीहारः' इत्यमरः। 'द्वारं निर्गमेऽभ्युपाये' इति हैमः। 'द्वारो जवतेर्वा द्रवतेर्वा वारयतेर्वा तासामेषा भवति' (निरु० ८। ९)।

द्वाः स्त्री०। इत्यत्र **'आशीर्धूःपूर्गीर्द्वारः' (लि० सूं० २८) इति स्त्रीलिङ्गता।** द्वारयति संवृणोति, द्वार्यते संव्रियते या यया वा इति द्वाः। द्वृ संवरणे (भ्वा० प०) 'हेतुमति च'

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by S3 Foundation USA

(पा० अ० ३। १। २६) इति णिच्-प्रत्ययः। णकार-चकारानुबन्ध-लोपः। 'उरण् रपरः' (पा० अ० १।१।५१) इति सहकारेण 'अचो ञ्णिति' (पा० अ० ७।२।११५) इति धातोः ऋकारस्य आर्-वृद्धिः। एवं द्वारि अस्यां स्थितौ 'उणादयो बहुलम्' (पा० अ० ३। ३। १) इति उणादीनां बाहुलकत्वात् 'क्विब् वचि-प्रच्छि-श्रि-स्तु-द्रु-प्रु-ज्वां दीर्घोऽसम्प्रसारणं च' (उ० २।५८) इति क्विप्-प्रत्ययः। **अथवा** 'अन्येभ्योऽपि दृश्यन्ते' (पा० अ० ३।२।७५) इति विच्-प्रत्ययः। अथवा 'क्विप् च' (पा० अ० ३।२।७६) इति क्विप्-प्रत्ययः। 'णेरनिटि' (पा० अ० ६।४।५०) इति णिच्-प्रत्ययस्य इकारस्य लोपः। क्विब्-विच्-प्रत्यययोः सर्वापहारिलोपः। द्वार् अस्यां स्थितौ प्रथमैकवचने सु-प्रत्ययः। उकारानुबन्धलोपः। 'हल्ङ्याब्भ्यो दीर्घात् सु-ति-यपृक्तं हल्' (पा० अ० ६। १।६८) इति सकारस्य लोपः। 'खरवसानयोर्विसर्जनीयः' (पा० अ० ८।३।१५) इति रेफस्य विसर्गः। 'स्त्री द्वार्द्वारं प्रतीहारः' इत्यमरः। 'द्वारो जवतेर्वा द्रवतेर्वा वारयतेर्वा। यज्ञे गृहद्वारः इति क्रात्थक्यः। अग्निरिति शाकपूणिः' (निरु० ८।९ - १०)।

द्वीपम्, द्वीपः नपुं०, पुं०। इत्यत्र **'शूर्प-कुतप-कुणप-द्वीप-विटपानि नपुंसके च' (लि० सू० ७९) इति नपुंसकलिङ्गता पुँल्लिङ्गता च।** द्वयो पार्श्वयोः गताः आपः यस्मिन् इति द्वीपं द्वीपः वा। द्विशब्दस्य अप्शब्देन सह 'अनेकमन्यपदार्थे' (पा० अ० २।२।२४) इति व्यधिकरणपदः बहुव्रीहिसमासः। 'ऋक्पूरब्धूःपथामानक्षे' (पा० अ० ५।४।७४) इति अ-प्रत्ययः, द्वि अप् अ इति स्थितौ 'द्व्यन्तरूपसर्गेभ्योऽप ईत्' (पा० अ० ६। ३। ९७) इति अप् इत्यस्य अकारस्य ईकारः। 'अकः सवर्णे दीर्घः' (पा० अ० ६। १। १०१) इति इकारस्य ईकारस्य च ई-दीर्घः। 'द्वीपोऽस्त्रियामन्तरीपं यदन्तर्वारिणस्तटम्' इत्यमरः।

द्वैहायनम् नपुं०। इत्यत्र **'यद्यढग्यगञणवुञ्छाश्च भावकर्मणि' (लि० सू० १२३) (क) इति नपुंसकलिङ्गता।** द्विहायनस्य भावः कर्म वा इति द्वैहायनम्। द्विहायनशब्दात् 'हायनान्तयुवादिभ्योऽण्' (पा० अ० ५।१।१३०) इति अण्-प्रत्ययः। णकारानुबन्ध-लोपः। 'यस्येति च' (पा० अ० ६। ४। १४८) इति हायनशब्दे णकार-परवर्त्तिनः अकारस्य लोपः। 'तद्धितेष्वचामादेः' (पा० अ० ७।२।११७) इति द्विशब्दस्य इकारस्य ऐ-वृद्धिः।

धनम् नपुं०। इत्यत्र **'मुख-नयन-लोह-वन-मांस-रुधिर-कार्मुक-विवर-जल-हल-धनान्नाभिधानानि' (लि० सू० १३७) इति नपुंसकलिङ्गता।** दधाति धारयति पोषयति वा, धीयते ध्रियते पुष्यते वा येन तत् इति धनम्। डुधाञ् धारण-पोषणयोः

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by S3 Foundation USA

(जु० उ०) 'कृ-पृ-वृ-जि-मन्दि-निधाञः क्युः' (उ० २। ८२) इति बाहुलकात् केवलात् अपि क्यु-प्रत्ययः। ककारानुबन्धलोपः। कित्त्वात् तस्मिन् परे धातोः आकारस्य 'आतो लोप इटि च' (पा० अ० ६।४।६४) इति लोपः। 'युवोरनाकौ' (पा० अ० ७।१।१) इति यु-स्थाने अनादेशः। **अथवा** दधन्ति यद् धान्यवन्तं करोति धन्यते धान्यवान् वा क्रियते येन तद् धनम्। धन धान्ये (जु० उ०) 'नन्दि-ग्रहि-पचादिभ्यो०' (पा० अ० ३।१।१३४) इति अच्-प्रत्ययः। चकारानुबन्धलोपः। **अथवा** धनति यत् प्राप्य शब्दं करोति हर्षेण जनः तद् धनम्। धन शब्दे (काश-कृत्स्नधातुपाठे भ्वा० प०) अत्र अपि पूर्ववत् अच्-प्रत्ययः। चकारानुबन्धलोपश्च। 'रिक्थमृक्थं धनं वसु' इत्यमरः। 'धनं तु गोधने वित्ते' इति मेदिनी। 'धनं गोधन-वित्तयोः' इति विश्वः। 'धनं धिनोतीति सतः' (निरु० ३।६)। 'धनं मे शंस्य पाहि' (काठ० सं० ७।३)। 'राष्ट्राणि वै धनानि' (ऐत० ब्रा० ८।२६)। 'तस्माद् हिरण्यं कनिष्ठं धनानाम्' (तै० ब्रा० ३।११।८।७)।

धनुः नपुं०। इत्यत्र **'इसुसन्तः' (लि० सू० १३४) इति नपुंसकलिङ्गता।** धनति शब्दं करोति, दधन्ति धनं प्राप्नोति येन, धन्यते धनं वा प्राप्यते येन तद् धनुः। धन शब्दे (काशकृत्स्नधातुपाठे भ्वा० प०) धन धान्ये (जु० प०) 'अर्त्ति-पृ-वपि-यजि-तनि-धनि-तपिभ्यो नित्' (उ० २। ११९) इति उसि-प्रत्ययः स च नित्। नित्त्वं स्वरार्थम् प्रत्यये इकारानुबन्धलोपः। एवं धनुस् अयं शब्दः व्युत्पद्यते। अस्य प्रथमा-द्वितीयैकवचने धनुः भवति। 'अथास्त्रियौ धनुश्चापौ' इत्यमरः। 'धनुः प्रियाले ना न स्त्री राशि-भेदे शरासने। धनुर्धरे त्रिषु' इति सान्तेषु मेदिनी। 'स्यात्तनुस्तनुपा सार्धं धनुपा च धनुं विदुः' इति विश्वः। 'धनुश्चापौ' इत्यमरः। 'धनुर्धन्वतेर्गतिकर्मणः वध-कर्मणो वा। धन्वन्त्यस्मादिषवः' (निरु० ९।१६)। 'वज्रो वै धनुः' (मैत्रा० सं० ४।४।३)। 'वार्त्रघ्नं वै धनुः' (शत० ब्रा० ५।३।५।२७)।

धनुः पुं०। इत्यत्र **'उकारान्तः' (लि० सू० ५१) इति पुँल्लिङ्गता।** धनति शब्दं करोति, दधन्ति धनं प्राप्नोति येन, धन्यते धनं वा प्राप्यते येन सः धनुः। धन शब्दे (काशकृत्स्न-धातुपाठे भ्वा० प०), धन धान्ये (जु० प०) 'भृ-मृ-शीङ्-तृ-चरि-त्सरि-तनि-धनि-मि-मस्जिभ्यउः' (उ० १।७) इति उ-प्रत्ययः। 'धनुः पुमान् प्रियाल-द्रौ राशिभेदे शरासने' इति नान्तेषु मेदिनी। 'धनुना च धनुर्विदुः' तथा 'धनुरिवाजनि वक्रः' इति श्रीहर्ष-प्रयोगः। धनुर्धन्वते गतिकर्मणः वधकर्मणो वा। धन्वन्त्यस्मादिषयः (निरु० ९।१६)। 'वार्त्रघ्नं वै धनुः' (शत० ब्रा ५।३।५।२७)। 'वज्रो वै धनुः' (मैत्रा० सं० ४।४।३)।

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by S3 Foundation USA

धान्यम् नपुं०। इत्यत्र '**धान्याज्य-सस्य-रूप्य-पण्य-वर्ण्य-धृष्य-हव्य-कव्य-काव्य-सत्यापत्य-मूल्य-शिक्य-कुड्य-मद्य-हर्म्य-तूर्य-सैन्यानि**' (**लि० सू० १६८**) **इति नपुंसकलिङ्गता**। धन-शब्दः पूर्वं व्याख्यातः धनस्य भावः कर्म वा इति धान्यम्। धन-शब्दात् 'गुणवचनब्राह्मणादिभ्यः कर्मणि च' (पा० अ० ५। १। १२४) इति ष्यञ्-प्रत्ययः। षकार-ञकारानुबन्धलोपः। 'यस्येति च' (पा० अ० ६। ४। १४८) इति नकारोत्तर-वर्त्तिनः अकारस्य लोपः। 'तद्धितेष्वचामादेः' (पा० अ० ७। २। ११७) धकारोत्तर-वर्त्तिनः अकारस्य आ-वृद्धिः। एवं धान्य-शब्दः व्युत्पद्यते। **अथवा** दधाति धारयति पालयति यत् तद् धान्यम्। डुधाञ् धारण-पोषणयोः (जु० उ०) 'दधातेर्यन्नुट् च' (उ० ५। ४८) इति यत्-प्रत्ययः तस्य नुडागमश्च। धा नुट् यत् इति स्थितौ प्रत्यये तकारानुबन्धलोपः, आगमे उकार-टकारानुबन्धलोपः। **अथवा** धाने पोषणे यत् साधु तद् धान्यम्। धान-शब्दात् 'तत्र साधुः' (पा० अ० ६। ४। १४८) इति यत्-प्रत्ययः। तकारानुबन्धलोपः। 'यस्येति च' (पा० अ० ६। ४। १४८) इति नकार-परवर्त्तिनः अकारस्य लोपः। महाभाष्यकारस्तु धिनोतेर्धान्यमाह 'धान्यानां भवने क्षेत्रे खञ्' (पा० अ० ५। २। १) इति सूत्रे। 'धान्यमसि धिनुहि देवान्' (यजुः १। २०) इति वचनेन धिनोतेरपि धान्यम् अङ्गीकार्यम्। 'धान्यं व्रीहिः स्तम्बकरिः' इत्यमरः। 'धान्यं तु व्रीहौ धान्याके' इति हैमः। 'धान्यं व्रीहिषु धान्याके' इति मेदिनी।

धारा स्त्री०। **इत्यत्र 'तारा-धारा-ज्योत्स्नादयश्च' (लि० सू० ३३) इति स्त्रीलिङ्गता।** धार्यन्ते अत्र अनया वा इति धारा। धृञ् धारणे (भ्वा० उ०) 'हेतुमति च' (पा० अ० ३। १। २६) इति णिच्-प्रत्ययः। णकार-चकारानुबन्धलोपः। 'अचो ञ्णिति' (पा० अ० ७। २। ११५) इति धातोः ऋकारस्य 'उरण् रपरः' (पा० अ० १। १। ५१) इति रहकारेण आर्-वृद्धिः। एवं धारि-इत्यवस्थायां 'षिद्-भिदादिभ्योऽङ्' (पा० अ० ३। ३। १०४) इति अङ्-प्रत्ययः। ङकारानुबन्धलोपः। 'णेरनिटि' (पा० अ० ६। ४। ५१) इति णिच्-प्रत्ययस्य धकार-परवर्त्तिनः इकारस्य लोपः। एवं धार-शब्दः व्युत्पद्यते। ततः स्त्रियाम् 'अजाद्यतष्टाप्' (पा० अ० ४। १। ४) इति टाप्-प्रत्ययः। टकार-पकारानुबन्धलोपः। 'अकः सवर्णे दीर्घः' (पा० अ० ६। १। १०१) इति अकारस्य आकारस्य च आ-दीर्घः। 'धारा सैन्याग्रिमस्कन्धे तुरङ्गगति-पञ्चके' इति मेदिनी। 'महान्तमिन्द्रपर्वतं वियद्वः सृजो विधारा अव दानवं हन्' (ऋ० सं० ४। १। ३२)।

धूर्तः पुं०। **इत्यत्र 'हस्त-कुन्तान्त-वात-दूत-धूर्त्त-सूत-चूत-मुहूर्त्ताः' (लि० सू० १११) इति पुँल्लिङ्गता।** धूर्वति हिनस्ति इति धूर्तः। धुर्वी हिंसायां (भ्वा० प०) 'हसि-

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by S3 Foundation USA

नृ-ग्रिण्-वाऽमि-दभि-लू-पू-धूर्वीभ्यस्तन्' (उ० ३। ८६) इति तन्-प्रत्ययः। नकारानुबन्ध-लोपः। 'लोपो व्योर्वलि' (पा० अ० ६। १। ६६) इति धातोः वकारस्य लोपः। 'हलि च' (पा० अ० ८। २। ७७) इति धातोः उकारस्य ऊ-दीर्घः। 'राल्लोपः' (पा० अ० ६। ४। २१) इति धातु-वकार-लोपस्तु क्ङितीत्यननुवृत्ति-पक्षे बोध्यः। **अथवा** धूर्व्यते स्म इति धूर्तः। धूर्वी-धातोः कर्मणि 'निष्ठा' (पा० अ० ३। २। १०२) इति क्त-प्रत्ययः। **अथवा** धूर्वति स्म इति धूर्तः। धूर्वी-धातोः कर्तरि 'मति-बुद्धि-पूजार्थेभ्यश्च' (पा० अ० ३। २। १८८) इति चकारात् क्त-प्रत्ययः। **अथवा** धूर्वणं धूर्तम्। धूर्वी-धातोः भावे 'कृत्यल्युटो बहुलम्' (पा० अ० ३। ३। ११३) इति क्त-प्रत्ययः। पुनः धूर्तमस्यास्तीति धूर्तः। धूर्त-शब्दात् 'अर्श आदिभ्योऽच्' (पा० अ० ५। २। १२७) इति अच्-प्रत्ययः। चकारानुबन्धलोपः। 'शकन्ध्वादिषु पररूपं वाच्यम्' (वा० पा० अ० ६। १। ९४) इति तकार-परवर्त्तिनः अकारस्य पररूपम्। क्त-प्रत्यये तु ककारानुबन्धलोपः, पूर्ववत् धातोः वकारस्य लोपः, उकारस्य ऊ-दीर्घश्च भवति एव। 'उन्मत्तः कितवो धूर्तो धत्तूरः कनकाह्वयः। मातुलो मदनश्च' एवं 'धूर्तोऽक्षदेवी कितवोऽक्षधूर्तो द्यूतकृत्समाः' तथा 'धूर्तस्तु वञ्चकः' इत्यमरः। 'धूर्तं तु खण्डलवणे धत्तूरे ना विटे त्रिषु' इति मेदिनी। 'धूर्तं तु खण्डलवणे धूर्तो धत्तूर-मायिनोः' इति हैमः।

धूः स्त्री०। अत्र **'आशीर्धूःपूर्गीर्द्वारः' (लि० सू० २८) इति स्त्रीलिङ्गता।** धूर्वति हिनस्ति इति धूः। धुर्वी हिंसायां (भ्वा० प०) 'भ्राज-भास-धुर्वि-द्युतोर्जि-पॄ-जु-ग्रावस्तुवः क्विप्' (पा० अ० ३। २। १७७) इति क्विप्-प्रत्ययः। तस्य सर्वापहारिलोपः। 'राल्लोपः' (पा० अ० ६। ४। २१) इति धातोः वकारस्य लोपः। एवं धुर्-शब्दः व्युत्पद्यते। तस्य प्रथमैकवचने सु-प्रत्ययः। उकारानुबन्धलोपः। 'हल्ङ्याभ्यो०' (पा० अ० ६। १। ६८) इति सस्य लोपः। 'र्वोरुपधाया दीर्घ इकः' (पा० अ० ८। २। ७६) इति धुर् इत्यस्य उकारस्य ऊ-दीर्घः। 'खरवसानयोर्विसर्जनीयः' (पा० अ० ८। ३। १५) इति रेफस्य विसर्गः। 'धूः स्त्री क्लीबे यानमुखम्' इत्यमरः। 'धूर्यानमुख-भारयोः' इति हैमः।

धूलिः स्त्री०। **इत्यत्र 'तिथि-नाडि-रुचि-वीचि-नालि-धूलि-किकि-केलिच्छवि-रात्र्यादयः' (लि० सू० २५) इति स्त्रीलिङ्गता।** धुवति धूयते वा इति धूलिः। धू विधूनने (तु० प०) 'पृषोदरादीनि यथोपदिष्टम्' (पा० अ० ६। ३। १०९) इति लि-प्रत्ययः। 'रेणुर्द्वयोः स्त्रियां धूलिः' इत्यमरः।

धृष्यम् नपुं०। **इत्यत्र 'धान्याज्य-सस्य-रूप्य-पण्य०' (लि० सू० १६८) इति नपुंसकलिङ्गता।** धर्षयितुं योग्यम् इति धृष्यम्। धृष प्रसहने (चु० उ०) 'सत्यापपाश०'

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by S3 Foundation USA

(पा० अ० ३।१।२५) इति णिच्-प्रत्ययः। णकार-चकारानुबन्धलोपः। 'ऋहलोर्ण्यत्' (पा० अ० ३।१।१२४) इति ण्यत्-प्रत्ययः। णकार-तकारानुबन्धलोपः। 'णेरनिटि' (पा० अ० ६।४।५१) इति अथवा 'बहुलमन्यत्रापि संज्ञाछन्दसोः' (उ० २।२३) इति णिच्प्रत्ययस्य इकारस्य लोपः।

धेनुः स्त्री०। **इत्यत्र 'धेनु-रज्जु-कुहू-सरयु-तनु-रेणु-प्रियङ्गवः स्त्रियाम्' (लि० सू० ५२) इति स्त्रीलिङ्गता।** धयन्ति पिबन्ति दुग्धं यस्याः सा धेनुः, **अथवा** धीयते या सा धेनुः, **अथवा** धापयति पाययति स्वदुग्धं या सा धेनुः, **अथवा** धयन्ति पिबन्ति आनन्दरसं यया सा धेनुः। सर्वत्र धेट् पाने (भ्वा० प०) 'धेट इच्च' (उ० ३।३४) इति नु-प्रत्ययः, धातोः एकारस्य इकारादेशश्च। धातोः एकारस्य इकारादेशः 'आदेच उपदेशेऽशिति' (पा० अ० ६।१।४५) इति धातोः एकारस्य विधीयमानस्य आकारादेशस्य विनिवारणार्थं बोध्यम्। 'सार्वधातुकार्धधातुकयोः' (पा० अ० ७।३।८४) इति इकारस्य ए-गुणः। 'धेनुः स्यान्नवप्रसूतिका' इत्यमरः। 'धेनुरिति वाङ्-नामसु पठितम्' (निघं० १।११, ७।१०)। 'आपो वै धेनवः' (शत० ब्रा० २।२।१।२१) एवं (शत० ब्रा० ५।३।१।१४)। 'आपो वाप धेनवस्ता हीदं सर्वं धिन्वन्ति' (ऐत० आ० १।३।५)। 'दोग्ध्री धेनुः' (तैत्ति० सं० ७।५।१८।१)। 'पयस्या वै धेनुः' (जैमि० ब्रा० २।२०३)। 'मातेव वा इयं (पृथ्वी) मनुष्याणां च पशूनां च मातेव धेनुः' (शत० ब्रा० १।२।१।१२)। 'वाग् वै धेनुः' (तां० ब्रा० १८।९।२१) एवं (मैत्रा० सं० ४।४।८)। 'वाचमेव तद् देवा धेनुमकुर्वत' (शत० ब्रा० ९।१।२।१७)। 'धेनुः आपो वै धेनवः, आपो हीदं सर्वं हिन्वन्ति' (कौषी० ब्रा० १२।१)। 'माता धेनुः' (शत० ब्रा० ५।३।१।१४, २।२।१।२१)। द्यावापृथिव्या खलु वाव धेनुर्देवतया (काठ० सं० ३४।१)। 'प्रथमा ह व्युवास सा धेनुरभवत् यमे' (मैत्रा० सं० २।१३।१०)। 'धेनू भौमी' (काठ० सं० ५०।१)। 'पयस्या वै धेनुः। पयस्या भाजसौ मित्रावरुणौ' (जैमि० ब्रा० २।२०३)। 'धेनुर्धयतेर्वा धिनोतेर्वा। वागेषा माध्यमिका, धर्मधुगिति याज्ञिकाः' (निरु० ११।४३)।

ध्वजः पुं०। **इत्यत्र 'ध्वज-गज-मुञ्ज-पुञ्जाः' (लि० सू० ११०) इति पुंल्लिङ्गता।** ध्वजति गच्छति गमयति वा इति ध्वजः। ध्वज गतौ (भ्वा० प०) 'नन्दिग्रहि-पचादिभ्यो०' (पा० अ० ३।१।१३४) इति अच्-प्रत्ययः। चकारानुबन्धलोपः। 'पताका वैजयन्ती स्यात् केतनं ध्वजमस्त्रियाम्' इत्यमरः। 'ध्वजः पूर्वदिशो गृहे। शिश्ने चिह्ने पताकायां खट्वाङ्गे शौण्डिकेऽपि च' इति हैमः।

ध्वनिः पुं०। **इत्यत्र 'ऋषि-राशि-दृति-ग्रन्थि-क्रिमि-ध्वनि-बलि-कौलि-मौलि-रवि-कवि-कपि-मुनयः' (लि० सू० १०९) इति पुंल्लिङ्गता।** ध्वन्यते शब्द्यते

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by S3 Foundation USA

इति ध्वनिः **अथवा** ध्वननं ध्वनिः। ध्वन शब्दे (भ्वा० प०) 'खनि-कष्यज्यसि-वसि-वनि-सनि-ध्वनि-ग्रन्थि-चलिभ्यश्च' (उ० ४। १४१) इति इ-प्रत्ययः। **अथवा** ध्वनयति ध्वानयति वा इति ध्वनिः। ध्वन शब्दे (भ्वा० प०) 'सर्वधातुभ्य इन्' (उ० ४। ११९) इति इन्-प्रत्ययः। नकारानुबन्धलोपः। 'शब्दे निनाद-निनद-ध्वनि-ध्वान-रव-स्वनाः' इत्यमरः।

नखः पुं०। इत्यत्र **'देवासुरात्म-स्वर्ग-गिरि-समुद्र-नख-केश-दन्त-स्तन-भुज-कण्ठ-खड्ग-शर-पङ्काभिधानानि' (लि० सू० ४३) इति पुँल्लिङ्गता।** नह्यति बध्नाति रक्तादिकम् इति नखः अथवा नह्यते बध्यते रक्तादिकं येन सः नखः। णह बन्धने (दि० प०) 'नहेर्हलोपश्च' (उ० ५। २३) इति ख-प्रत्ययः धातोः हकारस्य लोपश्च। **अथवा** न खनति खन्यते वा यः सः नखः। खनु अवदारणे (भ्वा० उ०) 'अन्येष्वपि दृश्यते' (पा० अ० ३। २। १०१) इति ड-प्रत्ययः। **अथवा** 'खनेर्डडरेकेकवका वाच्याः' (वा० पा० अ० ३। ३। १२५) इति ड-प्रत्ययः। डित्त्वात् तस्मिन् परे 'टेः' (पा० अ० ६। ४। १४३) इति धातोः अन् इत्यस्य टेर्लोपः। **अथवा** न खम् आकाशं यस्य यस्मिन् वा सः नखः। 'न भ्राण्नपान्नवेदानासत्या-नमुचि-नकुल-नख-नपुंसक-नक्षत्र-नक्र-नाकेषु प्रकृत्या' (पा० अ० ६। ३। ७५) इति नञ्-ख-पदयोः नञ्-समासे 'नलोपो नञः' (पा० अ० ६। ३। ७३) इति प्राप्तस्य नकार-लोपस्य निषेधरूपः प्रकृतिभावः। 'खं पुनः खनतेः' (निरु० ३। १३)। 'पुनर्भवः कररुहो नखोऽस्त्री नखरोऽस्त्रियाम्' इत्यमरः। 'शुक्तिः शङ्खः खुरः कोलदलं नखम्' इति चामरः। 'नखं पुनर्गन्धद्रव्ये नखः करज-षण्डयोः' इति हैमः। 'नखी स्त्रीक्लीबयोः शुक्तौ नखने पुन्नपुंसकम्' इति मेदिनी।

नटम्, नटः नपुं०, पुं०। इत्यत्र **'कुट-कूट-कपट-कवाट-कर्पट-नट-निकट-कीट-कटानि नपुंसके च' (लि० सू० ६६) इति नपुंसकलिङ्गता पुँल्लिङ्गता च।** नमति इति नटः। णम प्रह्वत्वे शब्दे च (भ्वा० प०) 'जनि-दा-च्यु-सृ-वृ-मदि-वमि-नमि-भृञ्भ्य इत्वन्-त्वन्-त्नण्-क्रिन्-शक्-स्य-ढ-डटाऽटचः' (उ० ४। १०५) इति डट-प्रत्ययः। डकारानुबन्धलोपः। प्रत्ययस्य डित्त्वात् तस्मिन् परे 'टेः' (पा० अ० ६। ४। १४३) इति धातोः अम् इत्यस्य टेर्लोपः। **अथवा** नटयति नाटयति वा इति नटः। नट अवस्पन्दने अवस्पन्दनं नाट्यम् (चु० उ०) **अथवा** नटति इति नटः। णट नृत्तौ (भ्वा० प०) 'नन्दि-ग्रहि-पचदिभ्यो ल्युणिन्यचः' (पा० अ० ३। १। १३४) इति अच्-प्रत्ययः। चकारानुबन्धलोपः। 'शैलालिनस्तु शैलूषा जायाजीवाः कृशाश्विनः। भरता इत्यपि नटाः' इत्यमरः। 'मण्डूकपर्ण-पत्त्रोर्ण-नट-कट्वङ्ग-चुण्टुकाः' इति चामरः। 'रङ्गावतारी शैलूषो नटो भरत-भारतौ' इति वाचस्पतिः।

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by S3 Foundation USA

ननान्दा स्त्री०। इत्यत्र **'ऋकारान्ता मातृ-दुहितृ-स्वसृ-पोतृ-ननान्दरः' (लि० सू० ३) इति स्त्रीलिङ्गता।** न नन्दति सन्तुष्यति सेवायां कृतायाम् अपि अथवा न नन्दयति सन्तोषयति भ्रातृजायां या सा ननांन्दा। न + टुनदि समृद्धौ (भ्वा० प०) 'इदितो नुम् धातोः' (पा० अ० ७। १। ५८) इति नुम्-आगमः। उकार-मकारानुबन्धलोपः। न + नन्द् इत्यवस्थायां 'नञि च नन्देः' (उ० २। १००) इति ऋन्-प्रत्ययः तथा अस्मिन् सूत्रे 'यतेर्वृद्धिश्च' (उ० २। ९९) इति पूर्वसूत्रात् वृद्धि-शब्दानुवृत्त्या वृद्धिः च। नकारानुबन्ध-लोपः। एवं ननान्दृ-शब्दः व्युत्पद्यते। तस्य प्रथमैकवचने ननान्दा। वृद्ध्यभावे तु ननन्दा इत्येव भवति। 'ननन्दा तु स्वसा पत्युः' इत्यमरः। 'ननन्दा तु स्वसा पत्युर्ननान्दा नन्दिनी च सा' इति रभसः। 'उषाप्यूषा ननान्दा च ननन्दा च प्रकीर्तिता' इति द्विरूपकोषः।

नयनम् नपुं०। इत्यत्र **'मुख-नयन-लोह-वन-मांस-रुधिर-कार्मुक-विवर-जल-हल-धनान्नाभिधानानि' (लि० सू० १३७) इति नपुंसकलिङ्गता।** नीयते प्राप्यते रूपम् अनेन इति नयनम्। णीञ् प्रापणे (भ्वा० प०) 'करणाधिकरणयोश्च' (पा० अ० ३। ३। ११७) इति ल्युट्-प्रत्ययः। लकार-टकारानुबन्धलोपः। 'सार्वधातुकार्धधातुकयोः' (पा० अ० ७। ३। ८४) इति धातोः ईकारस्य ए-गुणः। 'युवोरनाकौ' (पा० अ० ७। १। १) इति यु-स्थाने अनादेशः। 'एचोऽयवायावः' (पा० अ० ६। १। ७८) इति एकारस्य अय्-आदेशः। 'लोचनं नयनं नेत्रमीक्षणं चक्षुरक्षिणी' इत्यमरः।

नरः पुं०। इत्यत्र **'क्रतु-पुरुष-कपोल-गुल्फ-मेघाभिधानानि' (लि० सू० ४९) इति पुँल्लिङ्गता।** नरति अर्थात् नयति नृणाति वा इति नरः। नॄ नये (भ्वा० प०, क्रया० प०) 'नन्दि-ग्रहि-पचादिभ्यो०' (पा० अ० ३। १। १३४) इति अच्-प्रत्ययः। चकारानु-बन्धलोपः। 'उरण् रपरः' (पा० अ० १। १। ५१) इति सहकारेण 'सार्वधातुकार्ध-धातुकयोः' (पा० अ० ७। ३। ८४) इति धातोः ॠकारस्य अर्-गुणः। 'मनुष्या मानुषा मर्त्या मनुजा मानवा नराः' इत्यमरः। 'नरोऽजे मनुजेऽर्जुने। क्लीबं तु रामकर्पूरे' इति मेदिनी। 'नरः मनुष्यनाम' (निघं० २। ३)। 'नरः अश्वनाम' (निघं० १। १४)। 'नरा मनुष्याः। नृत्यन्ति कर्मसु' (निरु० ५। १)। 'प्रजा वै नरः' (ऐत० ब्रा० २। ४)। 'मनुष्या वै नरः' (शत० ब्रा० ७। ५। २। ३९)। 'नरो वै देवानां ग्रामः' (तां० ब्रा० ६। ९। ३)।

नलिनम्, नलिनः नपुं०, पुं०। इत्यत्र **'मान-यानाभिधान-नलिन-पुलिनोद्यान-शयनासन-स्थान-चन्दनालान-समान-भवन-वसन-सम्भावन-विभावन-विमानानि नपुंसके च' (लि० सू० ७६) इति नपुंसकलिङ्गता पुँल्लिङ्गता च।** नलति दुर्गन्धयति बध्नाति वा इति नलिनम्। णल गन्धे (भ्वा० प०), णल बन्धने

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by S3 Foundation USA

(भ्वा० प०) **अथवा** णल गहने (भ्वा० प०) 'बहुलमन्यत्रापि' (उ० २।५०) इति इनच्-प्रत्ययः। चकारानुबन्धलोपः। 'वा पुंसि नलिनमरविन्दं महोत्पलम्' इत्यमरः। 'नलिनं नलिकातोयाम्बुजेषु च' इति हैमः।

नवतिः स्त्री०। **इत्यत्र 'विंशत्यादिरानवतेः' (लि० सू० १३) इति स्त्रीलिङ्गता।** नवदशतः परिमाणमस्य सङ्घस्य नवतिः। 'पङ्क्ति-विंशति-त्रिंशच्चत्वारिंशत्-पञ्चाशत्-षष्टि-सप्तत्यशीति-नवति-शतम्' (पा० अ० ५।१।५९) इति ति-प्रत्ययः प्रकृतेः नवादेशश्च।

नवनीतम् नपुं०। **इत्यत्र 'नवनीतावतानानृतामृत-निमित्त-वित्त-चित्त-पित्त-व्रत-रजत-वृत्त-पलितानि' (लि० सू० १६५) इति नपुंसकलिङ्गता।** नवं च तन्नीतं च इति नवनीतम्। 'विशेषणं विशेषेण बहुलम्' (पा० अ० २।१।५७) इति नवशब्दस्य नीतशब्देन सह समासः। 'नवनीतं नवोद्धृतम्' इत्यमरः।

नाकः पुं०। **इत्यत्र 'देवासुरात्म-स्वर्ग-गिरि-समुद्र-नख-केश-दन्त-स्तन-भुज-कण्ठ-खड्ग-शर-पङ्काभिधानानि' (लि० सू० ४३) इति पुँल्लिङ्गता।** कं सुखं तद्विपरीतम् अकं दुःखं यत्र न विद्यते सः नाकः। अत्र 'नभ्राण्नपान्न-वेदानासत्यानमुचि-नकुलनखनपुंसकनक्षत्रनक्रनाकेषु प्रकृत्या' (पा० अ० ६।३।७५) इति निषेधात् 'नलोपो नञः' (पा० अ० ६।३।७३) इति नकारस्य लोपः न भवति। 'स्वरव्ययं स्वर्ग-नाक-त्रिदिव-त्रिदशालयाः' इत्यमरः। 'नाकस्तु त्रिदिवेऽम्बरे' इति मेदिनी। 'आकाशे त्रिदिवे नाकः' इति चामरः। 'नाकः साधारणनाम' (निघं० १।४)। 'कं सुखनाम' (निघं० ३।६)। 'नाक आदित्यो भवति नेता रसानां नेता भासां ज्योतिषां प्रणयः। अथ द्यौः कमिति सुखनाम, तत्प्रतिषिद्धं प्रतिषिध्येत' (निरु० २।१४)। 'स्वर्गो वै लोको नाकः' (शत० ब्रा० ६।३।३।१४, तैत्ति० सं० ५।३।७।१)। 'सुवर्गो वै लोको नाकः' (तैत्ति० सं० ५।३।५।५)। 'स नाको नाम दिवि रक्षोहाग्निः' (मैत्रा० सं० ४।१।९, काठ० सं० ३१।७)। 'नाकः षट्त्रिंशः' (स्तोमः) (मैत्रा० सं० २।८।४, तैत्ति० सं० ४।३।८।१)। 'संवत्सरो वाव नाकः' (शत० ब्रा० ८।४।१।२४)।

नाडिः स्त्री०। **इत्यत्र 'तिथि-नाडि-रुचि-वीचि-वालि-धूलि-किकि-केलिच्छवि-रात्र्यादयः' (लि० सू० २५) इति स्त्रीलिङ्गता।** या नालयति नाल्यते वा अनया सा नाडिः। 'नल भ्रंशे' (चु० प०) 'णल बन्धने' (भ्वा० उ०) **अथवा** नलति नल्यते वा अनया सा नाडिः। 'उणादयो बहुलम्' (पा० अ० ३।३।१) इति उणादीनां बाहुलकत्वात् 'वसि-वपि-यजि-राजि-व्रजि-सदि-हनि-वाशि-वादि-वारिभ्य इञ्' (उ० ४।१२६)

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by S3 Foundation USA

इति इञ्-प्रत्ययः। ञकारानुबन्धलोपः। 'अत उपधायाः' (पा० अ० ७।२।११६) इति धातोः उपधायाः अकारस्य आ-वृद्धिः। डलयोः एकत्व-स्मरणात् नाडि-शब्दः व्युत्पद्यते। ततः 'कृदिकारादक्तिनः' (वा० पा० अ० ४।१।४५) इति वैकलिकः ङीष्-प्रत्ययः। णकार-षकारानुबन्धलोपः। 'यस्येति च' (पा० अ० ६।४।४५) इति इकारस्य लोपः। एवं नाडी इत्यपि व्युत्पद्यते। 'नाडी नालं च काण्डोऽस्य' एवं 'नाडी तु धमनिः सिरा' तथा 'नाडी कालेऽपि षट्क्षणे' इत्यमरः। 'नाडी नाले व्रणान्तरे। शिराणां गण्डदूर्वायां चर्चायां कुहनस्य च। तथा षट्क्षणकालेऽपि' इति मेदिनी। 'नाडी कुहनचर्यायां घटिकागण्डदूर्वयोः। नाले गुणान्तरे स्नायौ' इति हैमः। 'नालं काण्डे मृणाले च नाली शाककलम्बके' इति च हैमः।

नाडीव्रणः पुं०। इत्यत्र **'नाड्यपजनोपपदानि व्रणाङ्गपदानि'** **(लि० सू० १०७) इति पुँल्लिङ्गता।** नाडी-शब्दः पूर्वं व्याख्यातः। व्रणति इति व्रणः। व्रण शब्दे (भ्वा० प०) **अथवा** व्रणयति इति व्रणः। व्रण गात्रविचूर्णने (चु० उ०) 'नन्दि-ग्रहि-पचादिभ्यो०' (पा० अ० ३।१।१३४) इति अच्-प्रत्ययः। चकारानुबन्धलोपः। 'व्रणोऽस्त्रियामीर्ममरुः क्लीबे' इत्यमरः। पुनः नाड्यां व्रणः इति नाडीव्रणः, सप्तमीतत्पुरुषसमासः। 'नाडीव्रणः पुमान्' इत्यमरः।

नाभिः पुरुषावयवे स्त्री० क्षत्रियार्थे तु पुं०। **इत्यत्र 'नाभिरक्षत्रिये' (लि० सू० १५) इति क्षत्रियभिन्नार्थे पुरुषावयवे स्त्रीलिङ्गता तथा क्षत्रियार्थे 'उभावन्यत्र पुंसि' (लि० सू० १६) इति पुँल्लिङ्गता।** नह्यति बध्नाति नाडीः इति नाभिः **अथवा** नह्यते बध्यते यया सा नाभिः। णह बन्धने (दि० उ०) 'नहो भश्च' (उ० ४।१२७) इति इञ्-प्रत्ययः धातोः हकारस्य भकारादेशश्च। प्रत्यये ञकारानुबन्धलोपः। ञित्त्वात् तस्मिन् परे 'अत उपधायाः' (पा० अ० ७।२।११६) इति धातोः उपधायाः अकारस्य आ-वृद्धिः। **अथवा** नभ्यते अक्षेण अथवा नभ्यते अनया अस्यां वा इति नाभिः। णभ हिंसायां (भ्वा० आ०) 'इणजादिभ्यः' (वा० पा० अ० ३।३।१०८) इति इण्-प्रत्ययः। णकारानुबन्धलोपः। णित्त्वात् तस्मिन् परे 'अत उपधायाः' (पा० अ० ७।२।११६) इति धातोः उपधायाः अकारस्य आ-वृद्धिः। **अथवा** नाभयति इति नाभिः। स्वार्थिकात् 'सत्याप-पाश०' (पा० अ० ३।१।२५) इति णिच्-प्रत्यान्तात् णभ हिंसायां (भ्वा० आ०) धातोः 'अच इः' (उ० ४।१४८) इति इ-प्रत्ययः। 'णेरनिटि' (पा० अ० ६।४।५१) इति णिचः इकारस्य लोपः। 'पिण्डिका नाभिः' एवं 'क्षत्रियेऽपि नाभिर्ना' तथा 'नाभी राजसभापि च' एवम् 'आत्मक्षत्रिये नाभिः' इत्यमरः। 'नाभि-

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by S3 Foundation USA

'मुख्यनृपे चक्रमध्यक्षत्रिययोः पुमान्। द्वयोः प्राणिप्रतीकं स्यात् स्त्रियां कस्तूरिकामदे' इति मेदिनी। 'नाभिः प्राणो वा अयं सन्नाभेरिति तस्मान्नाभिस्तन्नाभेर्नाभित्वम्' (ऐत० ब्रा० १। २०)। 'मध्यं वै नाभिर्मध्यमभयम्' (शत० ब्रा० १। १। २। २३)। 'नाभिर्वै हिङ्कारः' (जैमि० ब्रा० १। ३६)

नाम नपुं०। इत्यत्र 'नाम-रोमणी नपुंसके' (लि० सू० १५१) इति नपुंसकलिङ्गता। म्नायते अभ्यस्यते येन तद् नाम। म्ना अभ्यासे (भ्वा० प०) 'नामन्-सीमन्-व्योमन्-रोमन्-लोमन्-पाप्मन्-ध्मामन्' (उ० ४। १५२) इति मनिन्-प्रत्ययः। धातोः 'ना' भावः आदेर्मकारस्य लोपो वा निपात्यते। प्रत्यये इकार-नकारानुबन्धलोपः। एवं नामन्' व्युत्पद्यते। तस्य प्रथमा-द्वितीयैकवचने 'नाम' भवति। **अथवा** नमयति नम्यते वा इति नामः। ण्यन्तात् णम प्रह्वत्वे शब्दे च (भ्वा० प०) 'अन्येष्वपि दृश्यते' (पा० अ० ३। २। १०१) इति ड-प्रत्ययः। डकारानुबन्धलोपः। 'टेः' (पा० अ० ६। ४। १४३) इति धातोः णिच्प्रत्ययस्य इकारस्य टेर्लोपः। एवम् नाम इति अकारान्तः पुँल्लिङ्गे व्युत्पद्यते। **अथवा** नामयति कार्यं प्रति नामवन्तं जनम् इति नाम। णम प्रह्वत्वे शब्दे च (भ्वा० प०) 'नामन्-सीमन्०' (उ० ४। १५२) इति पूर्वसूत्रेण एव मनिन्-प्रत्ययः, धातोः 'ना' भावश्च। तेन 'नामन्' इति व्युत्पद्यते। तस्य प्रथमा-द्वितीयैकवचने 'नाम' भवति। 'नाम प्राकाश्य-सम्भाव्य-क्रोधोपगम-कुत्सने' इत्यमरः। 'आख्याह्वे अभिधानं च नामधेयं च नाम च' इति चामरः। 'नाम कोपेऽभ्युपगमे विस्मये विस्मरणेऽपि च। सम्भाव्य-कुत्सा-प्राकाश्य-विकल्पेष्वपि दृश्यते' इति मेदिनी। 'नाम इत्युदकनामसु पठितम्' (निघं० १। १२, १। ३१)। 'इदमपीतरन्नामैतस्मादेव अभिसन्नामात्' (निरु० ४। २७)।

नारम् नपुं०। इत्यत्र 'द्वाराग्र-स्फार-तक्र-वक्र-वप्र-क्षिप्र०' (लि० सू० ९०) इति नपुंसकलिङ्गता। नर-शब्दः पूर्वं व्याख्यातः नराणां समूहः नारम्। 'तस्य समूहः' (पा० अ० ४। २। ३७) इति नर-शब्दात् अण्-प्रत्ययः। णकारानुबन्धलोपः। 'यस्येति च' (पा० अ० ६। ४। १४८) इति रेफोत्तरवर्त्तिनः अकारस्य लोपः। 'तद्धितेष्वचामादेः' (पा० अ० ७। २। ११७) इति नकारोत्तर-वर्त्तिनः अकारस्य आ-वृद्धिः। एवं नार-शब्दः व्युत्पद्यते।

नालिः स्त्री०। इत्यत्र 'तिथि-नाडि-रुचि-वीचि-नालि-धूलि-किकि-केलिच्छवि-रात्र्यादयः' (लि० सू० २५) इति स्त्रीलिङ्गता। नलति बध्नाति नल्यते बध्यते वा यया सा नालिः। णल बन्धने (भ्वा० प०) 'उणादयो बहुलम्' (पा० अ० ३। ३। १) इति उणादीनां बाहुलकत्वात् 'वसि-वपि-यजि-राजि-व्रजि-सदि-हनि-वाशि-वादि-

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by S3 Foundation USA

वारिभ्य इञ्' (उ० ४।१२६) इति इञ्-प्रत्ययः। ञकारानुबन्धलोपः। 'अत उपधायाः' (पा० अ० ७।२।११६) इति धातोः उपधायाः अकारस्य आ-वृद्धिः। एवं 'नालिः' व्युत्पद्यते। अथवा नल-नाम्नः राज्ञः अपत्यम् इति नालिः। नल-शब्दात् 'अत इञ्' (पा० अ० ४।१।९५) इति इञ्-प्रत्ययः। ञकारानुबन्धलोपः। 'यस्येति च' (पा० अ० ६।४।१४८) इति लकारोत्तर-वर्त्तिनः अकारस्य लोपः। 'तद्धितेष्वचामादेः' (पा० अ० ७।२।११७) इति नकारोत्तर-वर्त्तिनः अकारस्य आ-वृद्धिः। एवम् अपि 'नालिः' व्युत्पद्यते।

निकटम्, निकटः नपुं०, पुं०। इत्यत्र **'कुट-कूट-कपट-कवाट-कर्पट-नट-निकट-कीट-कटानि नपुंसके च' (लि० सू० ६६) इति नपुंसकलिङ्गता पुँल्लिङ्गता च**। नि = निबन्धनम् इति निकटम्। नि इत्युपसर्गात् 'सम्प्रोदश्च कटच्' (पा० अ० ५।२।२९) इति सूत्रे 'च' पठनात् कटच्-प्रत्ययः। चकारानुबन्धलोपः। **अथवा** निकटति आवृणोति इति निकटम्। नि + कटे वर्षावरणयोः (भ्वा० प०) 'नन्दि-ग्रहि-पचादिभ्यो०' (पा० अ० ३।१।१३४) इति अच्-प्रत्ययः। चकारानुबन्धलोपः। 'समीपे निकटासन्नसंनिकृष्ट सनीडवत्' इत्यमरः।

निगलः, निगलम् पुं०, नपुं०। इत्यत्र **'शील-मूल-मङ्गल-साल-कमल-तल-मूसल-कुण्डल-पलल-मृणाल-वाल-निगल-पलाल-बिडाल-खिल-शूलाः पुंसि च' (लि० सू० १४३) इति पुँल्लिङ्गता नपुंसकलिङ्गता च**। निगलति अत्ति इति निगलः निगलं वा। नि + गल अदने (भ्वा० प०) 'नन्दि-ग्रहि-पचादिभ्यो०' (पा० अ० ३।१।१३४) इति अच्-प्रत्ययः। चकारानुबन्धलोपः। निगलति निगल्यते वा अनेन अस्मिन् अर्थे तु 'हलश्च' (पा० अ० ३।३।१२१) इति घञ्-प्रत्ययः। घकार-ञकारानुबन्धलोपः। 'अत उपधायाः' (पा० अ० ७।२।११६) इति गकारोत्तरवर्त्तिनः अकारस्य आ-वृद्धिः। तदा 'निगाल' शब्दः व्युत्पद्यते। **अथवा** निगिरति निगीर्यते वा अनेन अस्मिन् अर्थे नि + गॄ निगरणे (तु० प०) 'उन्योर्ग्रः' (पा० अ० ३।३।२९) इति घञ्-प्रत्ययः। घकार-ञकारानुबन्धलोपः। 'अचो ञ्णिति' (पा० अ० ७।२।११५) इति धातोः ॠकारस्य 'उरण् रपरः' (पा० अ० १।१।५१) इति सहकारेण आर्-वृद्धिः। 'अचि विभाषा' (पा० अ० ८।२।२१) इति विकल्पेन रस्य लः। एवम् अपि 'निगालः' इत्येव व्युत्पद्यते। **अथवा** निगरणम् निगलः नि + गॄ निगरणे (तु० प०) 'ॠदोरप्' (पा० अ० ३।३।५७) इति अप्-प्रत्ययः। पकारानुबन्धलोपः। 'सार्वधातुकार्यधातुकयोः' (पा० अ० ७।३।८४) इति धातोः ॠकारस्य 'उरण् रपरः' (पा० अ० १।१।५१) इति सहकारेण अर्-गुणः। 'अचि विभाषा' (पा० अ० ८।२।२१) इति

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by S3 Foundation USA

विकल्पेन रस्य लः। अस्य निगलशब्दस्य निगालशब्दस्य पुँल्लिङ्गता 'घञबन्तः' (लि० सू० ३६) इत्यनेन भवति। **अथवा** निगिरति इति निगलः। नि + गॄ निगरणे (तु० प०) 'नन्दि-ग्रहि-पचादिभ्यो०' (पा० अ० ३।१।१३४) इति अच्-प्रत्ययः। चकारानुबन्ध-लोपः। धातोः ॠकारस्य 'उरण् रपरः' (पा० अ० १।१।५१) इति सहकारेण 'सार्वधातु-कार्धधातुकयोः' (पा० अ० ७।३।८४) इति अर्-गुणः। 'अचि विभाषा' (पा० अ० ८।२।२१) इति विकल्पेन रस्य लः। एवम् अपि 'निगल' शब्दः व्युत्पद्यते। 'निगालस्तु गलोद्देशे' इत्यमरः।

नितम्बः पुं०। इत्यत्र **'अर्ध-पथि-मथ्यृभुक्षि-स्तम्ब-नितम्ब-पूगाः' (लि० सू० ११५) इति पुँल्लिङ्गता।** नि = निभृतं तम्यते काङ्क्ष्यते कामुकैः यः सः नितम्बः अथवा ताम्यति ग्लायति यः सः नितम्बः। तमु काङ्क्षायां (दि० प०), तमु ग्लानौ (दि० प०) 'उणादयो बहुलम्' (पा० अ० ३। ३। १) इति उणादीनां बाहुलकत्वात् 'कृ-कदि-कडि-कटिभ्योऽम्बच्' (उ० ४।८३) इति अम्बच्-प्रत्ययः। चकारानुबन्धलोपः। **अथवा** 'उल्बादयश्च' (उ० ४।९६) इति बन्-प्रत्ययः। नकारानुबन्धलोपः। 'पश्चान्नितम्बः स्त्रीकट्याः' इत्यमरः।

निदाघः, निदाघम् पुं०, नपुं०। इत्यत्र **'शृङ्गार्घ-निदाघोद्यम-शल्य-दृढाः' (लि० सू० १७८) इति पुँल्लिङ्गता नपुंसकलिङ्गता च।** नि = नितरां दह्यते अनेन अस्मिन् वा इति निदाघः। नि + दह भस्मीकरणे (भ्वा० प०) 'हलश्च' (पा० अ० ३।३।१२१) इति घञ्-प्रत्ययः। घकार-ञकारानुबन्धलोपः। 'न्यङ्क्वादीनां च' (पा० अ० ७। ३। ५३) इति हस्य घकारः। 'अत उपधायाः' (पा० अ० ७। २। ११६) इति धातोः उपधायाः अकारस्य आ-वृद्धिः। 'निदाघ उष्णोपगम उष्ण ऊष्मागमस्तपः। एवं घर्मो निदाघः स्वेदः स्यात्' इत्यमरः। 'निदाघो ग्रीष्मकाले स्यादुष्णस्वेदाम्बुनोरपि' इति मेदिनी।

निधिः पुं०। इत्यत्र **'क्यन्तो घुः' (लि० सू० ४१) इति पुँल्लिङ्गता।** नि = नितरां धीयते इति निधिः। डुधाञ् धारणपोषणयोः (उ० प०) 'उपसर्गे घोः किः' (पा० अ० ३। ३। ९२) इति कि-प्रत्ययः। ककारानुबन्धलोपः। 'आतो लोप इटि च' (पा० अ० ६। ४। ६४) इति धातोः आकारस्य लोपः। **अथवा** नि = नितरां दधाति धारयति पोषयति अनेन, निधीयते धार्यते पोष्यते वा अनेन इति निधिः। नि + धि धारणे (तु० प०) 'सम्पदादिभ्यः क्विप्' (वा० पा० अ० ३। ३। ९४) इति क्विप्-प्रत्ययः। तस्य सर्वापहारिलोपः। आगम-शास्त्रस्य अनित्यत्वात् इह 'ह्रस्वस्य पिति कृति तुक्' (पा० अ० ६। १। ७१) इति तुक् न भवति। 'निधिर्ना शेवधिः' इत्यमरः। 'निधिः शेवधिः' (निरु० २।४)।

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by S3 Foundation USA

निमित्तम् नपुं०। इत्यत्र '**नवनीतावतानानृतामृत-निमित्त-वित्त-चित्त-पित्त-व्रत-रजत-वृत्त-पलितानि' (लि० सू० १६५) इति नपुंसकलिङ्गता।** नि = नितरां मेद्यति स्निह्यति इति निमित्तम्। नि + ञिमिदा स्नेहने (दि० प०) 'ञीतः क्तः' (पा० अ० ३। २। १८७) इति क्त-प्रत्ययः। ककारानुबन्धलोपः। 'खरि च' (पा० अ० ८। ४। ५५) इति धातोः दस्य तः। 'स्नुक्रमोरनात्मनेपदनिमित्ते' (पा० अ० ७। २। ३६) इति निर्देशात् अथवा संज्ञापूर्वकत्वात् 'रदाभ्यां निष्ठातो नः पूर्वस्य च दः' (पा० अ० ८। २। ४२) इति नत्वं न भवति। 'निमित्तं हेतुलक्ष्मणोः' इत्यमरः।

निम्नम् नपुं०। इत्यत्र '**जघनाजिन-तुहिन-कानन-वन-वृजिन-विपिन-वेतन-शासन-सोपान-मिथुन-श्मशान-रत्न-निम्न-चिह्नानि नपुंसके' (लि० सू० ७५) इति नपुंसकलिङ्गता।** निमनति इति निम्नम्। नि + म्ना अभ्यासे (भ्वा० प०) 'आतश्चोपसर्गे कः' (पा० अ० ३। १। १३६) इति क-प्रत्ययः। ककारानुबन्धलोपः। 'आतो लोप इटि च' (पा० अ० ६। ४। ६४) इति धातोः आकारस्य लोपः। 'निम्नं गभीरं गम्भीरम्' इत्यमरः।

निम्नगा स्त्री०। इत्यत्र '**भूमि-विद्युत्-सरिल्लता-वनिताभिधानानि' (लि० सू० १८) इति स्त्रीलिङ्गता।** निम्नम् अधः गच्छति या सा निम्नगा। निम्न + गम्लृ गतौ (भ्वा० प०) 'अन्येष्वपि दृश्यते' (पा० अ० ३। २। १०१) इति ड-प्रत्ययः। डकारानुबन्धलोपः। 'टेः' (पा० अ० ६। ४। १४३) इति धातोः अम् इत्यस्य टेर्लोपः। 'अजाद्यतष्टाप्' (पा० अ० ४। १। ४) इति टाप्-प्रत्ययः। टकार-पकारानुबन्धलोपः। 'अकः सवर्णे दीर्घः' (पा० अ० ६। १। १०१) इति अकारस्य आकारस्य च आ-दीर्घः। 'गङ्गा विष्णुपदी जह्नुतनया सुर-निम्नगा' इत्यमरः।

निर्यासम्, निर्यासः नपुं०, पुं०। इत्यत्र '**चमसांस-रस-निर्यासोपवास-कार्पास-वास-मास-कास-कांस-मांसानि नपुंसके च' (लि० सू० ९८) इति नपुंसकलिङ्गता पुँल्लिङ्गता च।** निर्यासनं निर्यासं निर्यासः वा। निर् + यसु प्रयत्ने (दि० प०) 'हलश्च' (पा० अ० ३। ३। १२१) इति घञ्-प्रत्ययः। घकार-ञकारानुबन्धलोपः। 'अत उपधायाः' (पा० अ० ७। २। ११६) इति धातोः उपधायाः अकारस्य आ-वृद्धिः।

निर्व्यूहः पुं०। इत्यत्र '**पल्लव-पल्वल-कफ-रेफ-कटाह-निर्व्यूह-मठ-मणि-तरङ्ग-तुरङ्ग-गन्ध-मृदङ्ग-सङ्ग-समुद-पुङ्खाः' (लि० सू० ११६) इति पुँल्लिङ्गता।** निर्व्यूह्यते इति निर्व्यूहः। निर् + वि + ऊह वितर्के (भ्वा० आ०) 'भावे' (पा० अ० ३। ३। १८)

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by S3 Foundation USA

इति घञ्-प्रत्ययः। घकार-ञकारानुबन्धलोपः। 'इको यणचि' (पा० अ० ६। १। ७७) इति वकारोत्तरवर्त्तिनः इकारस्य य्-आदेशः।

निष्कम्, निष्कः नपुं०, पुं०। इत्यत्र **'कण्टकानीक-सरक-मोदक-चषक-मस्तक-पुस्तक-तडाक-निष्क-शुष्क-वर्चस्क-पिनाक-भाण्डक-पिण्डक-कर्कट-शण्डक-पिटक-तालक-फलक-पुलाकानि नपुंसके च' (लि० सू० ६३) इति नपुंसकलिङ्गता पुँल्लिङ्गता च।** निषीदति इति निष्कः। नि + षद्लृ विशरण-गत्यवसादनेषु (भ्वा० प०, तु० प०) 'धात्वादेः षः सः' (पा० अ० ६। १। ६४) इति धातोः षस्य सः, 'नौ सदेर्डिच्च' (उ० ३। ४५) इति कन्-प्रत्ययः, स च डित्। नकारानुबन्धलोपः। प्रत्ययस्य डित्त्वात् तस्मिन् परे 'टेः' (पा० अ० ६। ४। १४३) इति धातोः अद् इत्यस्य टेर्लोपः। 'सदिरप्रतेः' (पा० अ० ८। ३। ६६) इति धातोः सस्य षः। **अथवा** निः निश्चितं वा कायति शब्दयति इति निष्कः। निस् + कै शब्दे (भ्वा० प०) 'आदेच उपदेशेऽशिति' (पा० अ० ६। १। ४५) इति धातोः ऐकारस्य आकारादेशः। 'आतोऽनुपसर्गे कः' (पा० अ० ३। २। ३) इति क-प्रत्ययः। ककारानुबन्धलोपः। 'आतो लोप इटि च' (पा० अ० ६। ४। ६४) इति धातोः आकारस्य लोपः। 'स-सजुषो रुः' (पा० अ० ८। २। ६६) इति निस् इत्यस्य सकारस्य रुत्वम्। उकारानुबन्धलोपः। 'खरवसानयोर्विसर्जनीयः' (पा० अ० ८। ३। १५) इति रेफस्य विसर्गः। 'इदुदुपधस्य चाप्रत्ययस्य' (पा० अ० ८। ३। ४१) इति विसर्गस्य षः। **अथवा** निष्कयते इति निष्कः। निष्क परिमाणे (चु० आ०) 'नन्दि-ग्रहि-पचादिभ्यो०' (पा० अ० ३। १। १३४) इति अच्-प्रत्ययः। चकारानुबन्धलोपः। 'साष्टे शते सुवर्णानां हेम्न्युरो-भूषणे पले। दीनारेऽपि च निष्कोऽस्त्री' इत्यमरः। 'निष्कमस्त्री साष्टहेमशते दीनार-कर्षयोः। वक्षोऽलङ्करणे हेममात्रे हेमपलेऽपि च' इति मेदिनी। 'निष्कोऽस्त्री हेम्नि उत्पले' इति सिद्धान्तकौमुद्याम् उणादौ।

नीरम् नपुं०। **इत्यत्र 'द्वाराग्र-स्फार-तक्र-वक्र०' (लि० सू० ९०) इति नपुंसकलिङ्गता।** नयति प्रापयति नीयते प्राप्यते वा यत् तद् नीरम्। णीञ् प्रापणे (भ्वा० उ०) 'स्फायि-तञ्चि-वञ्चि-शकि-क्षिपि-क्षुदि-सृपि-तृपि-दृपि-वन्द्युन्दि-श्विति-वृत्यजि-नी-पदि-मदि-खिदि-छिदि-भिदि-मन्दि-चन्दि-दहि-दसि-दम्भि-वसि-वाशि-शीङ्-हसि-सिधि-क्षुभिभ्यो रक्' (उ० २। १३) इति रक्-प्रत्ययः। ककारानुबन्धलोपः। कित्त्वात् धातोः ईकारस्य 'सार्वधातुकार्धधातुकयोः' (पा० अ० ७। ३। ८४) इति प्राप्तः ए-गुणः 'क्ङिति च' (पा० अ० १। १। ५) इति निषेधात् न भवति। **अथवा** निर् निर्गतं

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by S3 Foundation USA

रात् अग्रे: यत् तद् नीरम्। निर् + रम् इत्यवस्थायां 'रो रि' (पा० अ० ८। ३। १४) इति निर् इत्यस्य रेफस्य लोपः। 'ढ्रलोपे पूर्वस्य दीर्घोऽणः' (पा० अ० ६। ३। १११) इति नि इत्यस्य इकारस्य ई-दीर्घः। अत्र 'निरादयः क्रान्ताद्यर्थे पञ्चम्या:' (वा० पा० अ० २। २। १८) इति समासः भवति। 'अग्नेराप:' इति तैत्तिरीयश्रुतिः अत्र प्रमाणम्। **अथवा** निर् निष्क्रान्तः रः अग्निः अस्मात् यद् तद् इति नीरम्। अत्र 'प्रादिभ्यो धातुजस्य वाच्यो वा चोत्तरपदलोपः' (वा० पा० अ० २। २। २४) इति बहुव्रीहि-समासः। निर् + रम् इत्यवयस्थायां पूर्ववत् रेफ-लोपः इकारस्य ई-दीर्घश्च। 'अद्भ्योऽग्निः' इति मनुस्मृतिः इह प्रमाणम्। **अथवा** निस् निश्चयेन राति ददाति जीवनं यत् तद् नीरम्। निस् + रा दाने (अ० प०) 'आतश्चोपसर्गे' (पा० अ० ३। १। १३६) इति क-प्रत्ययः। ककारानुबन्ध-लोपः। 'आतो लोप इटि च' (पा० अ० ६। ४। ६४) इति धातोः आकारस्य लोपः। निस् + र् + अ इति स्थितौ 'ससजुषो रुः' (पा० अ० ८। २। ६६) इति सस्य रुत्वम्। उकारानुबन्धलोपः। पुनः निर् + र् + अ इत्यवस्थायां पूर्ववत् निर् इत्यस्य र-लोपः इकारस्य ई-दीर्घश्च। 'अम्भोऽर्णस्तोय-पानीय-नीर-क्षीराम्बु-शम्बरम्' इत्यमरः।

नीरदः पुं०। इत्यत्र 'क्रतु-पुरुष-कपोल-गुल्फ-मेघाभिधानानि' (लि० सू० ४९) इति पुँल्लिङ्गता। नीर-शब्दः पूर्वं व्याख्यातः। नीरं जलं ददाति इति नीरदः। नीर+डुदाञ् दाने (जु० उ०) 'आतोऽनुपसर्गे कः' (पा० अ० ३। २। ३) इति क-प्रत्ययः। ककारा-नुबन्धलोपः। 'आतो लोप इटि च' (पा० अ० ६। ४। ६४) इति धातोः आकारस्य लोपः।

नेत्रम्, नेत्रः नपुं०, पुं०। इत्यत्र 'द्वाराग्र-स्फार-तक्र-वक्र०' (लि० सू० ९०) इति नपुंसकता तथा 'वक्त्र-नेत्रारण्य-गाण्डीवानि पुँसि च' (लि० सू० १३९) इति पुँल्लिङ्गता च। नीयते अनेन इति नेत्रम्। णीञ् प्रापणे (भ्वा० उ०) 'दाम्नी-शस-यु-युज-स्तु-तुद-सि-सिच-मिह-पत-दश-नहः करणे' (पा० अ० ३। २। १८२) इति ष्ट्रन्-प्रत्ययः। षकार-नकारानुबन्धलोपः। 'निमित्तापाये नैमित्तिकस्याप्यपायः' इति रीत्या 'ट्र' इति 'त्र' सम्पद्यते। 'सार्वधातुकार्धधातुकयोः' (पा० अ० ७। ३। ८४) इति धातोः ईकारस्य ए-गुणः। 'लोचनं नयनं नेत्रमीक्षणं चक्षुरक्षिणी' इत्यमरः। 'स्याज्जटां-शुकयोर्नेत्रम्' इति चामरः। 'नेत्रं मथिगुणे वस्त्रभेदे मूले द्रुमस्य च। रथे चक्षुषि नद्यां च नेत्री नाड्यां च योषिति' इति मेदिनी। 'नेत्रं मथिगुणे वस्त्रे तरुमूले विलोचने। नेत्रं रथे च नाड्यां च नेत्रो नेतरि मेद्यवत्' इति विश्वः।

नौः स्त्री०। इत्यत्र 'स्रक्-त्वग्-ज्योग्-वाग्-यवागू-नौ-स्फिचः' (लि० सू० ३०) इति स्त्रीलिङ्गता। नुदति प्रेरयति नुद्यते प्रेर्यते जनैः वायुना वा सा नौः। णुद् प्रेरणे

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by S3 Foundation USA

(तु० प०) 'ग्ला-नुदिभ्यां डौः' (उ० २।६५) इति डौ-प्रत्ययः। डकारानुबन्धलोपः। डित्त्वात् परे 'टेः' (पा० अ० ६।४।१४३) इति धातोः उद् इत्यस्य तस्मिन् टेर्लोपः। **अथवा** नयति प्रापयति इति नः। णीञ् प्रापणे (भ्वा० उ०) 'उणादयो बहुलम्' (पा० अ० ३।३।१) इति उणादीनां बहुलवचनात् 'ऊर्णोतेर्डः' (उ० ५।४७) इति ड-प्रत्ययः। डकारानुबन्धलोपः। डित्त्वात् तस्मिन् परे 'टेः' (पा० अ० ६।४।१४३) इति धातोः ईकारस्य टेर्लोपः। एवं 'न' शब्दः व्युत्पद्यते। ततः नम् अवति इति नौः। न + अव 'रक्षण-गति-कान्ति-प्रीति-तृप्त्यवगम-प्रवेश-श्रवण-स्वाम्यर्थ-याचन-क्रियेच्छा-दीप्त्यवाप्त्यालिङ्गन-हिंसादानभाव-वृद्धिषु' (भ्वा० प०) 'क्विप् च' (पा० अ० ३।२।७६) इति क्विप्-प्रत्ययः। तस्य सर्वापहारिलोपः। 'ज्वर-त्वर-श्रि-व्यविमवामुपधायाश्च' (पा० अ० ६।४।२०) इति धातोः वकारस्य तस्य उपधायाः अकारस्य च ऊठ् आदेशः। ठकारानुबन्धलोपः। न + ऊ अस्यां स्थितौ 'एत्येधत्यूठ्सु' (पा० अ० ६।१।८९) इति अकारस्य ऊकारस्य च औ-वृद्धिः। एवम् अपि 'नौ' शब्दः व्युत्पद्यते। 'स्त्रियां नौस्तरणिस्तरिः' इत्यमरः। 'प्रणोतव्या भवति नमतेवां' (नि० ५।२३)

पक्तव्यः, पक्तव्या, पक्ताव्यम् पुँ०, स्त्री०, नपुं०। इत्यत्र **'कृत्याश्च' (लि० सू० १८७) इति विशेष्यानुसारं पुँल्लिङ्गता, स्त्रीलिङ्गता, नपुंसकलिङ्गता च।** डुपचष् पाके (भ्वा० उ०) 'तव्यत्-तव्यानीयरः' (पा० अ० ३।१।९६) इति तव्यत्-प्रत्ययः तव्य-प्रत्ययः वा। तव्यत्प्रत्यये तकारानुबन्धलोपः। 'चोः कुः' (पा० अ० ८।२।३०) इति चस्य कः।

पङ्कः पुं०। इत्यत्र **'देवासुरात्म-स्वर्ग-गिरि-समुद्र-नख-केश-दन्त-स्तन-भुज-कण्ठ-खड्ग-शर-पङ्काभिधानानि' (लि० सू० ४३) इति पुँल्लिङ्गता।** पच्यते इति पङ्कः, पच्यते वा दुःखम् अनेन इति पङ्कः। आद्ये पचि व्यक्तीकरणे (भ्वा० आ०) कर्मणि 'अकर्त्तरि च कारके संज्ञायाम्' (पा० अ० ३।३।१९) इति अन्त्ये च करणे 'हलश्च' (पा० अ० ३।३।१२१) इति घञ्-प्रत्ययः। घकार-ञकारानुबन्धलोपः। धातोः इदित्त्वात् 'इदितो नुम् धातोः' (पा० अ० ७।१।५८) इति नुम् आगमः। उकार-मकारानुबन्धलोपः। 'नश्चापदान्तस्य झलि' (पा० अ० ८।३।२४) इति नकारस्य अनुस्वारः। 'अनुस्वारस्य ययि परसवर्णः' (पा० अ० ८।४।५८) इति अनुस्वारस्य परसवर्णः ञकारः। एवं पञ्च् अ इति स्थितौ 'न्यङ्क्वादीनां च' (पा० अ० ७।३।५२) इति धातोः चकारस्य ककारः। 'निमित्तापाये नैमित्तिकस्याप्यपायः' इति रीत्या चकारस्य ककारत्वात् चकारे निवृत्ते तन्निमित्तिकः अनुस्वारस्य स्थाने जातः ञकारः परसवर्णः

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by S3 Foundation USA

अपि निवर्तते। अतः पंक् अ इति स्थितौ 'अनुस्वारस्य ययि परसवर्णः' (पा० अ० ८। ४। ५८) इति अनुस्वारस्य परसवर्णः ङकारः सम्पद्यते, तेन 'पङ्कः' इति व्युत्पद्यते। 'अस्त्री पङ्कं पुमान् पाप्मा' तथा 'निषद्वरस्तु जम्बालः पङ्कोऽस्त्री शादकर्दमौ' इत्यमरः। 'पङ्कोऽस्त्री कर्दमे पापे' इति मेदिनी। 'पङ्कोऽघे कर्दमे' इति हैमः।

पङ्क्तिः स्त्री०। **इत्यत्र 'शष्कुलि-राजि-कुट्यशनि-वर्ति-भृकुटि-त्रुटि-वलि-पङ्क्तयः' (लि० सू० २६) इति स्त्रीलिङ्गता।** पञ्चते इति पङ्क्तिः। पचि व्यक्तीकरणे (भ्वा० आ०) 'क्तिच्-क्तौ च संज्ञायाम्' (पा० अ० ३। ३। १७४) इति क्तिच्-प्रत्ययः। ककार-चकारानुबन्धलोपः। धातोः इदित्त्वात् 'इदितो नुम् धातोः' (पा० अ० ७। १। ५८) इति नुम्-आगमः। उकार-मकारानुबन्धलोपः। 'चोः कुः' (पा० अ० ८। २। ३०) इति धातोः चकारस्य ककारः 'नश्चापदान्तस्य झलि' (पा० अ० ८। ३। २४) इति नकारस्य अनुस्वारः। 'अनुस्वारस्य ययि परसवर्णः' (पा० अ० ८। ४। ५८) इति अनुस्वारस्य परसवर्णः ङकारः। 'वीथ्यालिरावलिः पङ्क्तिः श्रेणी' तथा 'पङ्क्तिश्छन्दोऽपि दशमम्' इत्यमरः। 'पङ्क्तिश्छन्दः-श्रेण्योः' इति हैमः। 'पङ्क्तिर्दशाक्षरच्छन्दो दशसंख्यादिषु स्त्रियाम्' इति मेदिनी। 'पङ्क्तिर्वै तन्त्रं छन्दः' (शत० ब्रा० ८। २। ४। ३)। 'पङ्क्तिरूर्ध्वा दिक्' (शत० ब्रा० ८। ३। १। २२) 'पक्षौ पङ्क्तयः' (शत० ब्रा० ८। ६। २। ३)। 'श्रोत्रं पङ्क्तिः' (शत० ब्रा० १०। ३। १। १)। 'पृथुरिव वै पङ्क्तिः' (शत० ब्रा० १२। २। ४। ६)। 'पञ्चपदा पङ्क्तिः' (ऐत० ब्रा० ५। १८)। 'पङ्क्तिर्वा अन्नम्' (ऐत० ब्रा० ६। २०)। 'अन्नं वै पङ्क्तिः' (ऐत० ब्रा० १। १। ३, गोप० ब्रा० २। ६। २)। 'पञ्चाक्षरा पङ्क्तिः' (तैत्ति० ब्रा० २। ७। १०। २)। 'यजमानो वै पङ्क्तिः' (मैत्रा० सं० ३। ३। ९)। 'यज्ञस्य पङ्क्तिः' (पत्नी) (तैत्ति० आ० ३। ९। ३)। 'पङ्क्तिर्विष्णोः पत्नी' (गोप० ब्रा० उ० २। २। ९)। 'चत्वारिंशदक्षरा पङ्क्तिः' (कौषी० ब्रा० १७। ३)। 'पङ्क्तिः पञ्चपदा' (निरु० ७। १२)।

पञ्च त्रि-लि०। **इत्यत्र 'ष्णान्ता संख्या' (लि० सू० १८५) इति त्रिलिङ्गता।** पञ्चते व्यक्तीकरोति इति पञ्चन्। पचि व्यक्तीकरणे (भ्वा० आ०) अथवा पञ्चति विस्तारयति इति पञ्चन्। पचि विस्तार-वचने (चु० उ०) उभयत्र 'उणादयो बहुलम्' (पा० अ० ३। ३। १) इति उणादीनां बाहुलकत्वात् 'सप्यशूभ्यां तुट् च' (उ० १। १५७) इति कनिन्-प्रत्ययः। ककारेकार-नकारानुबन्धलोपः। धातोः इदित्त्वात् 'इदितो नुम् धातोः' (पा० अ० ७। १। ५८) इति नुम्-आगमः। उकार-मकारानुबन्धलोपः। 'नश्चापदान्तस्य झलि' (पा० अ० ८। ३। २४) इति नकारस्य अनुस्वारः। 'अनुस्वारस्य ययि परसवर्णः' (पा० अ० ८। ४। ५८) इति अनुस्वारस्य ञकारः परसवर्णः। 'पञ्च पृक्ता संख्या स्त्री पुंनपुंसकेष्वविशिष्टा' (निरु० ३। ८)।

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by S3 Foundation USA

पञ्चमूली, पञ्चमूलम् स्त्री०, नपुं०। इत्यत्र **'द्विगुः स्त्रियां च' (लि० सू० १३३) इति स्त्रीलिङ्गता नपुंसकलिङ्गता च।** पञ्चन् अयं शब्दः पूर्वं व्याख्यातः। मूलति इति मूलम्। मूल प्रतिष्ठायाम् (भ्वा० प०) 'इगुपध-ज्ञा-प्री-किरः कः' (पा० अ० ३। १। १३५) इति क-प्रत्ययः। ककारानुबन्धलोपः। पञ्चानां मूलानां समाहारः पञ्चमूली पञ्चमूलं वा। पञ्चन् अस्य शब्दस्य मूल-शब्देन सह समाहारार्थे 'तद्धितार्थोत्तरपद-समाहारे च' (पा० अ० २। १। ५१) इति समासः। 'सुपो धातु-प्रतिपदिकयोः' (पा० अ० २। ४। ७१) इति इति पञ्चन् इत्यस्मात् तथा मूल इत्यस्मात् उत्तरयोः आम् इत्यनयोः लुक् 'संख्यापूर्वो द्विगुः' (पा० अ० २। १। ५२) इति पञ्चमूल-शब्दस्य द्विगु-संज्ञा। 'द्विगुरेकवचनम्' (पा० अ० २। ४। १) इति पञ्चमूलशब्दस्य एकवचनता। 'अकारान्तोत्तरपदो द्विगुः स्त्रियामिष्टः' (वा० पा० अ० २। ४। ७) इति **अथवा** 'द्विगुः स्त्रियां च' (लि० सू० १३३) इति स्त्रीलिङ्गता। ततः 'द्विगोः' (पा० अ० ४। १। २१) इति ङीप्-प्रत्ययः। ङकार-पकारानुबन्धलोपः। 'यस्येति च' (पा० अ० ६। ४। १४८) इति लकारोत्तरवर्त्तिनः अकारस्य लोपः। एवं पञ्चमूली निष्पद्यते। 'द्विगुः स्त्रियां च' (लि० सू० १३३) इति नपुंसकलिङ्गतायां तु पञ्चमूलं प्रथमा-द्वितीयैकवचने रूपम्।

पञ्चाशत् स्त्री०। **इत्यत्र 'विंशत्यादिरानवतेः' (लि० सू० १३) इति स्त्रीलिङ्गता।** पञ्च दशतः परिमाणम् अस्य संघस्य इति पञ्चाशत्। इति पञ्चन् इत्यस्मात् शब्दात् 'पङ्क्ति-विंशति०' (पा० अ० ५। १। ५९) इति शत्-प्रत्ययः तथा पञ्चन् अस्य शब्दस्य पञ्चा इति आदेशश्च।

पञ्जरम् नपुं०। **इत्यत्र 'द्वाराग्र-स्फार-तक्र-वक्र-वप्र०' (लि० सू० ९०) इति नपुंसकलिङ्गता।** पिञ्जे इति पञ्जरम्। पिजि वर्णे, सम्पर्चने इत्येके, उभयत्र इत्यन्ये, अवयवे इत्यपरे, अव्यक्ते शब्दे इतीतरे (भ्वा० आ०) 'उणादयो बहुलम्' (पा० अ० ३। ३। १) इति उणादीनां बाहुलकत्वात् 'कोररन्' (उ० ४। १५६) इति अरन्-प्रत्ययः। नकारानुबन्धलोपः। धातोः इदित्त्वात् 'इदितो नुम् धातोः' (पा० अ० ७। १। ५८) इति नुम्-आगमः। उकार-मकारानुबन्धलोपः। नकारस्य 'नश्चापदान्तस्य झलि' (पा० अ० ८। ३। २४) इति अनुस्वारः। अनुस्वारस्य 'अनुस्वारस्य ययि परसवर्णः' (पा० अ० ८। ४। ५८) इति परसवर्णः ञकारः। 'पृषोदरादीनि यथोपदिष्टम्' (पा० अ० ६। ३। १०९) इति धातोः पकारपरवर्त्तिनः इकारस्य अकारः आदेशः। 'पिञ्जरोऽश्वान्तरे क्लीबं स्वर्णे पीते च वाच्यवत्' इति मेदिनी।

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by S3 Foundation USA

पटः पुं०। इत्यत्र **'टोपधः' (लि० सू० ६४) इति पुँल्लिङ्गता।** पटति पाटयति वा इति पटः। पट गतौ (भ्वा० प०), पट भाषार्थे, पट ग्रन्थे (चु० उ०) 'नन्दि-ग्रहि-पचादिभ्यो०' (पा० अ० ३।१।१३४) इति अच्-प्रत्ययः। चकारानुबन्धलोपः। **अथवा** पट्यते अनेन इति पटः। पट् धातोः 'हलश्च' (पा० अ० ३। ३। १२१) इति घञ्-प्रत्ययः। घकार-ञकारानुबन्धलोपः। संज्ञापूर्वकनिधेरनित्यत्वात् 'अत उपधायाः' (पा० अ० ७। २। ११६) इति वृद्धिः न। 'सुचेलकः पटोऽस्त्री' इत्यमरः। 'पटश्चित्रपटे वस्त्रेऽस्त्री पियालद्रुमे पुमान्' इति मेदिनी।

पटहः, पटहम् पुं०, नं०। इत्यत्र **'गृह-मेह-देह-पट्ट-पटहाष्टापदाम्बुद-ककुदाश्च' (लि० सू० १८२) इति पुँल्लिङ्गता नपुंसकलिङ्गता च।** पट शब्दः पूर्वं व्याख्यातः। पटं शत्रोः यशः हन्ति नाशयति इति पटहः पटहं वा। पट + हन् हिंसा-गत्योः (अ० प०) 'अन्येष्वपि दृश्यते' (पा० अ० ३। २। १०१) इति ड-प्रत्ययः। डकारानुबन्धलोपः। डित्त्वात् तस्मिन् परे 'टेः' (पा० अ० ६। ४। १४३) इति धातोः अन् इत्यस्य टेर्लोपः। 'पटहाडम्बरौ समौ' इति चामरः। 'पटहो ना समारम्भे आनके पुंनपुंसकम्' इति मेदिनी।

पटुः, पटु पुं०, नपुं०, स्त्री०। इत्यत्र **'गुणवचनमुकारान्तं नपुंसकं च' (लि० सू० १७४) इति पुँल्लिङ्गता नपुंसकलिङ्गता स्त्रीलिङ्गता च।** पटति गच्छति पाटयति विगमयति विभनक्ति विभाजयति वा इति पटुः पटु वा। पट गतौ (भ्वा० प०) पट भाषार्थे, पट ग्रन्थे (चु० उ०) भ्वादिगणीय-पटधातोः 'हेतुमति च' (पा० अ० ३। १। २६) इति णिच्-प्रत्ययः। णकार-चकारानुबन्धलोपः। णित्त्वात् तस्मिन् परे 'अत उपधायाः' (पा० अ० ७। २। ११६) इति धातोः उपधायाः अकारस्य आ-वृद्धिः। 'फलि-पाटि-नमि-मनि-जनां गुक्-पटि-नाकि-ध-तश्च' (उ० १। १८) इति उ-प्रत्ययः, ण्यन्तस्य पाटि इत्यस्य पट इत्यादेशश्च। **अथवा** 'मृगय्वादयश्च' (उ० १। ३७) इति मृगय्वादिगणस्य आकृतिगणत्वात् अण्यन्तात् केवलात् पट् धातोः अपि कु-प्रत्ययः। ककारानुबन्धलोपः। अथवा 'अणश्च' (उ० १। ८) इति सूत्रे चकारात् बाहुलकात् वा उ-प्रत्ययः। 'अथ कुलकं पटोलस्तिक्तकः पटुः' इत्यमरः। 'दक्षे तु चतुर-पेशल-पटवः सूत्थान उष्णश्च' इति चामरः। 'दक्षामन्दागदेषु तु पटुः' इत्यपि वा अमरः। 'पटुस्तीक्ष्णे स्फुटे दक्षे निष्ठुरे निर्दयेऽपि च' इति रुद्रः। 'पटुर्दक्षे च नीरोगे चतुरेऽप्यभिधेयवत्। पटोले तु पुमान् क्लीबे छत्रालवणयोरपि' इति मेदिनी।

पट्टः, पट्टम् पुं०, नपुं०। इत्यत्र **'गृह-मेह-देह-पट्ट-पटहाष्टापदाम्बुद-ककुदाश्च' (लि० सू० १८२) इति पुँल्लिङ्गता नपुंसकलिङ्गता च।** पटति इति पट्टः पट्टं वा।

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by S3 Foundation USA

पट गतौ (भ्वा० प०) 'पृषोदरादीनि यथोपदिष्टम्' (पा० अ० ६।३।१०९) इति त-प्रत्ययः। 'ष्टुना ष्टुः' (पा० अ० ८।४।४१) इति तकारस्य टकारः। 'पट्टः पेषणपाषाणे व्रणादीनां च बन्धने। चतुष्पथे च राजादिशासनान्तरपीठयोः' इति मेदिनी।

पट्वी स्त्री०। इत्यत्र **'गुणवचनमुकारान्तं नपुंसके च' (लि० सू० १७४) इति अथवा 'ईकारान्तश्च' (लि० सू० १०) इति स्त्रीलिङ्गता।** पटु-शब्दः पूर्वं व्याख्यातः। ततः स्त्रियां 'वोतो गुणवचनात्' (पा० अ० ४।१।४४) इति विभाषया ङीष्-प्रत्ययः। ङकार-षकारानुबन्धलोपः। 'इको यणचि' (पा० अ० ६।१।७७) इति टकारोत्तर-वर्त्तिनः उकारस्य व्-आदेशः। एवं पट्वी व्युत्पद्यते। ङीष्-अभावे तु पटुः इत्येव स्त्रियाम् अपि भवति।

पण्यम् नपुं०। इत्यत्र **'धान्याज्य-सस्य-रूप्य-पण्य-वर्ण्य-धृष्य-हव्य-कव्य-काव्य-सत्यापत्य-मूल्य-शिक्य-कुड्य-मद्य-हर्म्य-तूर्य-सैन्यानि' (लि० सू० [illegible]) इति नपुंसकलिङ्गता।** यत् पण्यते व्यवह्रियते तत् पण्यम्। पण व्यवहारे (भ्वा० आ०) 'अवद्य-पण्य-वर्या गर्ह्य-पणितव्यानिरोधेषु' (पा० अ० ३।१।१०१) इति यत् प्रत्ययः। तकारानुबन्धलोपः। 'विक्रये पणितव्यं च पण्यम्' इत्यमरः।

पत्तनम् नपुं०। इत्यत्र **'नल-कुसुम-शुल्ब-पत्तन-रणाभिधानानि' (लि० सू० १५८) इति नपुंसकलिङ्गता।** पतन्ति गच्छन्ति जनाः पत्यते गम्यते वा जनैः यत्र तत् पत्तनम्, नगरं वा। पत्लृ गतौ (भ्वा० प०) 'वी-पतिभ्यां तनन्' (उ० ३।१५०) इति तनन्-प्रत्ययः। नकारानुबन्धलोपः। 'पत्तनं पुटभेदनम्' इत्यमरः।

पत्रः, पत्रम् पुं०, नपुं०। इत्यत्र **'पत्र-पात्र-पवित्र-सूत्रच्छत्राः पुंसि च' (लि० सू० १५७) इति पुँल्लिङ्गता तथा 'त्रान्तः' (लि० सू० १५४) इति अथवा 'द्वाराग्र-स्फार-तक्र०' इति वा नपुंसकलिङ्गता।** यत् पतति गच्छति तत् पत्रम्, पत्यते गम्यते वा येन तद् अपि पत्रम्। अथवा यत् पत्रते गच्छति तत् पत्रम्, पद्यते गम्यते येन तत् पत्रम्। पत्लृ गतौ (भ्वा० प०), पद गतौ (दि० आ०) 'सर्व-धातुभ्यः ष्ट्रन्' (उ० ४।१६०) इति कर्त्तरि ष्ट्रन्-प्रत्ययः। **अथवा** केवलं पत्लृ-धातोः 'दाम्-नी-शस-यु-युज-स्तु-तुद-सि-सिच-मिह-पत-दश-नहः करणे' (पा० अ० ३।२।१८२) इति करणे ष्ट्रन्-प्रत्ययः। षकार-नकारानुबन्धलोपः। तेन षकार-लोपे ट्रकार-स्थाने त्रकारः व्यवस्थितौ आयाति। 'खरि च' (पा० अ० ८।४।५५) इति पद्धातोः दकारस्य तकारः। 'पत्रं पलाशं छदनं दलं पूर्णं छदः पुमान्' तथा 'गरुत्-पक्षच्छदाः पत्रं पतत्रं च तनूरुहम्' एवं 'सर्वं स्याद् वाहनं यानं युग्यं पत्रं च धोरणम्' इत्यमरः। 'पत्रं वाहन-पक्षयोः' इति

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by S3 Foundation USA

चामरः। 'पत्रं स्याद् वाहने पर्णे पक्षे च शर-पक्षिणाम्' इति विश्वः। 'पत्रं तु वाहने पर्णे स्यात् पक्षे शर-पक्षिणोः' इति मेदिनी।

पदम् नपुं०। इत्यत्र 'भय-लिङ्ग-भग-पदानि नपुंसके' (लि० सू० ३८) इति नपुंसकलिङ्गता। पद्यते पदयते वा इति पदम्। पद गतौ (दि० आ०), पद गतौ (चु० आ०) 'नन्दि-ग्रहि-पचादिभ्यो०' (पा० अ० ३। १। १३४) इति अच्-प्रत्ययः। चकारानुबन्धलोपः। पद्यते अनेन इति पदम्। पद गतौ करणे 'हलश्च' (पा० अ० ३। ३। १२) इति घञ्-प्रत्ययः। घकारानुबन्धलोपः। संज्ञापूर्वकविधेरनित्यत्वात् 'अत उपधायाः' (पा० अ० ७। २। ११६) इति वृद्धिर्न। 'पदं व्यवसित-त्राण-स्थान-लक्ष्माङ्घ्रि-वस्तुषु' इत्यमरः। 'श्लोक-पादेऽपि च क्लीबं पुंलिङ्गः किरणे पुनः' इति मेदिनी। 'पदं शब्दे च वाक्ये च व्यवसायापदेशयोः। पादतच्चिह्नयोः स्थानत्राणयोरङ्कवस्तुनोः' इति विश्वः।

पद्मः, पद्मम् पुं०, नपुं०। इत्यत्र 'पद्म-कमलोत्पलानि पुंसि च' (लि० सू० १५१) इति पुँल्लिङ्गता नपुंसकलिङ्गता च। यत् पद्यते गम्यते प्राप्यते अथवा यत् प्राप्नोति जनः तत् पद्मम्। पद गतौ (दि० आ०) 'अर्ति-स्तु-सु-हु-सृ-धृ-क्षि-क्षु-भा-या-वा-पदि-यक्षि-नीभ्यो मन्' (उ० १। १४०) इति मन्-प्रत्ययः। नकारानुबन्धलोपः। 'वा पुंसि पद्मं नलिनमरविन्दं महोत्पलम्' इत्यमरः। 'भेदाः शङ्खादयो निधेः। महापद्मश्च पद्मश्च शङ्खो मकर-कच्छपौ। मुकुन्द-कुन्द-नीलाश्च खर्वश्च निधयो नव' इति चामरः। 'पद्मोऽस्त्री पद्मके व्यूह-निधि-सङ्ख्यान्तरेऽम्बुजे। ना नागे स्त्री पञ्जिका श्रीवार्वाटीपन्नगीषु च' इति मेदिनी।

पनसम् नपुं०। इत्यत्र 'पनस-बिस-बुस-साहसानि नपुंसके' (लि० सू० ९७) इति नपुंसकलिङ्गता। पनायते स्तूयते इति पनसम्। 'पन स्तुतौ व्यवहारे च' (भ्वा० आ०) 'अत्यवि-चमि-तमि-नमि-रभि-लभि-नभि-तनि-पति-पनि-पणि-महिभ्योऽसच्' (उ० ३। ११७) इति असच्-प्रत्ययः। चकारानुबन्धलोपः। 'पनसः कण्टकिफलः' इत्यमरः। 'पनसः कण्टकिफले कण्टके वानरान्तरे। स्त्रियां रोगप्रभेदे स्यात्' इति मेदिनी।

पन्थाः पुं०। इत्यत्र 'अर्घ-पथि-मथ्यृभुक्षि-स्तम्भ-नितम्ब-पूगाः' (लि० सू० ११५) इति पुँल्लिङ्गता। पत्यते गम्यते प्राणिभिः पतन्ति गच्छन्ति वा प्राणिनः यत्र सः पन्थाः। पत्लृ गतौ (भ्वा० प०) 'पतस्थ च' (उ० ४। १२) इति इनि-प्रत्ययः, धातोः तकारस्य थकारादेशश्च। इत्थं पथिन् अयं शब्दः निष्पद्यते। अस्य प्रथमैकवचने पन्थाः भवति। 'अयनं वर्त्म मार्गाध्व-पन्थानः पदवी सृतिः' इत्यमरः।

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by S3 Foundation USA

परिषद् स्त्री०। इत्यत्र **'प्रतिपदापद्-विपद्-सम्पच्छरत्-संसद्-परिषदुषः-संवित्-क्षुत्- पुन्मुत्-समिधः' (लि० सू० २७) इति स्त्रीलिङ्गता।** परि = परितः सीदन्ति अस्याम् इति परिषद्। परि + षद्लृ विशरणगत्यवसादनेषु (भ्वा०, तु० प०) 'सम्पदादिभ्यः क्विप्' (वा० पा० अ० ३।३।९४) इति क्विप्-प्रत्ययः। तस्य सर्वापहारि-लोपः। 'धात्वादेः षः सः' (पा० अ० ६।१।६४) इति धातोः षस्य सः। पुनः सस्य 'सदिरप्रतेः' (पा० अ० ८। ३। ६६) इति षकारः। 'समज्या परिषद् गोष्ठी सभा-समिति-संसदः' इत्यमरः।

पर्णम् नपुं०। इत्यत्र **'ऋण-लवण-पर्ण-तोरण-रणोष्णानि नपुंसके' (लि० सू० ६८) इति नपुंसकलिङ्गता।** पिपर्त्ति पृणाति पालयति पूरयति वा यत् तत् पर्णम्। पृ पालन-पूरणयोः (जु० प०, क्र्या० प०) 'धा-पृ-वस्यज्यतिभ्यो नः' (उ० ३।६) इति न-प्रत्ययः। 'आर्धधातुकं शेषः' (पा० अ० ३।४।११४) इति न-प्रत्ययस्य आर्धधातुक-संज्ञा। तस्मिन् प्रत्यये परे 'सार्वधातुकार्धधातुकयोः' (पा० अ० ७।३।८४) इति धातोः ऋकारस्य 'उरण् रपरः' (पा० अ० १।१।५१) इति सहकारेण अर्-गुणः। 'रषाभ्यां नो णः समानपदे' (पा० अ० ८।४।१) इति प्रत्यय-नकारस्य णकारः। **अथवा** पृणति पृणाति इति पर्णम्। पृण प्रीणने (तु० प०) 'नन्दि-ग्रहि-पचादिभ्यो०' (पा० अ० ३। १।१३४) इति अच्-प्रत्ययः। चकारानुबन्धलोपः। प्रत्ययस्य पूर्ववत् आर्धधातुकसंज्ञा। 'पुगन्तलघूपधस्य च' (पा० अ० ७। ३। ८६) इति धातोः ऋकारस्य 'उरण् रपरः' (पा० अ० १।१।५१) इति सहकारेण अर्-गुणः। **अथवा** पर्णयति इति पर्णम्। पर्ण हरितभावे (चु० उ०) पूर्ववत् 'नन्दि-ग्रहि-पचादिभ्यो०' (पा० अ० ३।१।१३४) इति अच्-प्रत्ययः। चकारानुबन्धलोपः। 'पत्त्रं पलाशं छदनं दलं पर्णं छदः पुमान्' इत्यमरः। 'पर्णस्त्रिपर्णे पर्णं तु पत्त्रे' इति हैमः। 'राष्ट्रं वै पर्णः' (शत० ब्रा० ६।५।१।१)। 'गायत्रो वै पर्णः' (तै० ब्रा० ३।२।१।१)। 'ब्रह्म वै पर्णः' (तै० ब्रा० १।७।१९।३)। 'सोमो वै पर्णः' (शत० ब्रा० ६।५।५।१)।

पर्वतः पुं०। इत्यत्र **'देवासुरात्म-स्वर्ग-गिरि-समुख-मुख-केश-दन्त-स्तन-भुज-कण्ठ-खड्ग-शर-पङ्काभिधानानि' (लि० सू० ४३) इति पुँल्लिङ्गता।** पर्वति पूरयति पूर्णः भवति पूर्यते वा इति पर्वतः। पर्व पूरणे (भ्वा० प०) 'भृ-मृ-दृशि-यजि-पर्वि-पच्यमि-तमि-नमि-हर्यिभ्योऽतच्' (उ० ३।११०) इति अतच्-प्रत्ययः। चकारानुबन्ध-लोपः। **अथवा** पर्वाणि सन्ति इह इति पर्वतः। पर्वन् इति शब्दात् 'तप् पर्व-मरुद्भ्यां वक्तव्यः' (वा० पा० अ० ५।२।१२२) इति तप्-प्रत्ययः। पकारानुबन्धलोपः। 'नलोपः

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by S3 Foundation USA

प्रातिपदिकान्तस्य' (पा० अ० ८। २। ७) इति पर्वन् इत्यस्य नकारस्य लोपः। 'महीध्रे शिखरिक्ष्माभृदहार्य-धर-पर्वताः' इत्यमरः। 'पर्वतः पादपे पुंसि शाकमत्स्यप्रभेदयोः। देवमुन्यन्तरे शैले' इति मेदिनी। 'पर्वत इति मेघनाम' (निघं० १। १०)। 'पर्ववान् पर्वतः, पर्व पुनः पृणातेः प्रीणातेर्वा' (निरु० १। २०)।

पललः, पललम् पुं०, नपुं०। **इत्यत्र 'शील-मूल-मङ्गल-साल-कमल-तल-मुसल-कुण्डल-पलल-मृणाल-वाल-निगल-पलाल-बिडाल-खिल-शूलाः पुंसि च' (लि० सू० १४३) इति पुँल्लिङ्गता नपुंसकलिङ्गता च।** पलति गच्छति पल्यते गम्यते प्राप्यते यत् स पललः यत् तत् पललं वा। पल गतौ (भ्वा० प०) 'वृषादिभ्यश्चित्' (उ० १। १०६) इति कल-प्रत्ययः स चित्। चित्त्वं स्वरार्थम्। प्रत्यये ककारानुबन्धलोपः। **अथवा** पलं मांसम् उन्मानं वा लाति लुनाति अलति वा इति पललः पललं वा पल + ला आदाने (अ० प०) 'आतोऽनुपसर्गे कः' (पा० अ० ३। २। ३) इति क-प्रत्ययः। ककारानुबन्धलोपः। 'आतो लोप इटि च' (पा० अ० ६। ४। ६४) इति धातोः आकारस्य लोपः। **अथवा** पल + लूञ् छेदने (क्र्या० उ०) 'अन्येष्वपि दृश्यते' (पा० अ० ३। २। १०१) इति ड-प्रत्ययः। डकारानुबन्धलोपः। डित्त्वात् तस्मिन् परे 'टेः' (पा० अ० ६। ४। १४३) इति धातोः ऊकारस्य टेर्लोपः। **अथवा** पल + अल भूषण-पर्याप्ति-वारणेषु (भ्वा० प०) 'नन्दि-ग्रहि-पचादिभ्यो०' (पा० अ० ३। १। १३४) इति अच्-प्रत्ययः। चकारानुबन्धलोपः। 'शकन्ध्वादिषु पररूपं वाच्यम्' (वा० पा० अ० ६। १। ९४) इति पल-शब्दस्य लकार-परवर्त्तिनः अकारस्य पररूपम्। 'पलमुन्मानमांसयोः' इति हैमः। 'पललं तिलचूर्णे च पिके मांसे नपुंसकम्। ना राक्षसे' इति मेदिनी। 'पललं तिल-मिश्रे स्यात् पललं पिशितेऽपि च' इति शाश्वतः। 'पललं पङ्क-मांसयोः। तिलचूर्णे पललस्तु राक्षसे' इति हैमः।

पलालः, पलालम् पुं०, नपुं०। **इत्यत्र 'शील-मूल-मङ्गल-साल-कमल-तल-पलाल-बिडाल-खिल-शूलाः पुंसि च' (लि० सू० १४३) इति पुँल्लिङ्गता नपुंसकलिङ्गता च।** पलति गच्छति पल्यते गम्यते प्राप्यते वा इति पलालः पलालं वा। पल गतौ (भ्वा० प०) 'तमि-विशि-विडि-मृणि-कुलि-कवि-पलि-पञ्चिभ्यः कालन्' (उ० १। ११८) इति कालन्-प्रत्ययः। ककार-नकारानुबन्धलोपः। **अथवा** पलम् अलति इति पलालः पलालं वा। पल + अल भूषण-पर्याप्ति-वारणेषु 'कर्मण्यण्' (पा० अ० ३। २। १) इति अण्-प्रत्ययः। णकारानुबन्धलोपः। 'अत उपधायाः' (पा० अ० ७। २। ११६) इति धातोः उपधायाः अकारस्य आ-वृद्धिः। 'अकः सवर्णे दीर्घः'

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by S3 Foundation USA

(पा० अ० ६।१।१०१) इति अकारस्य आकारस्य च आ-दीर्घः। **अथवा** पलति इति पल्। पल गतौ (भ्वा० प०) 'क्विप् च' (पा० अ० ३।२।७६) इति क्विप्-प्रत्ययः। तस्य सर्वापहारिलोपः। आ = समन्तात् अलति इति आलः। आ + अल भूषण-पर्याप्ति-वारणेषु (भ्वा० प०) 'नन्दि-ग्रहि-पचादिभ्यो०' (पा० अ० ३।१।१३४) इति अच्-प्रत्ययः। चकारानुबन्धलोपः। 'अकः सवर्णे दीर्घः' (पा० अ० ६।१।१०१) इति आकारस्य अकारस्य च आ-दीर्घः। पुनः पल् चासौ अलः आलं वा इति पलालः पलालं वा। **अथवा** पलम् आ = समन्तात् लाति इति पलालः पलालं वा। पल + आ + ला आदाने (अ० प०) 'आतोऽनुपसर्गे कः' (पा० अ० ३।२।३) इति क-प्रत्ययः। ककारानुबन्धलोपः। 'आतो लोप इटि च' (पा० अ० ६।४।६४) इति धातोः आकारस्य लोपः। 'अकः सवर्णे दीर्घः' (पा० अ० ६।१।१०१) इति अकारस्य आकारस्य च आ-दीर्घः। **अथवा** पलम् आ = समन्तात् लुनाति इति पलालः पलालं वा। पल + आ + लूञ् छेदने (क्र्या० उ०) 'अन्येष्वपि दृश्यते' (पा० अ० ३।२।१०१) इति ड-प्रत्ययः। डकारानुबन्धलोपः। डित्त्वात् तस्मिन् परे 'टेः' (पा० अ० ६।४।१४३) इति धातोः ऊकारस्य टेर्लोपः। 'अकः सवर्णे दीर्घः' (पा० अ० ६।१।१०१) इति अकारस्य आकारस्य च आ-दीर्घः। 'पलालोऽस्त्री स निष्फलः' इत्यमरः।

पलितम् नपुं०। इत्यत्र **'नवनीतावतानानृतामृत-निमित्त-वित्त-चित्त-पित्त-व्रत-रजत-वृत्त-पलितानि' (लि० सू० १६५) इति नपुंसकलिङ्गता।** पलति निष्पन्नं भवति पल्यते निष्पद्यते अधिगम्यते वा यत् तत् पलितम्। पल निष्पत्तौ (काशकृत्स्नीय-धातुपाठे भ्वा० प०), पल गतौ (भ्वा० प०) 'लोष्ट-पलितौ' (उ० ३।९२) इति क्त-प्रत्ययः। ककारानुबन्धलोपः। प्रत्ययस्य 'आर्धधातुकं शेषः' (पा० अ० ३।४।११४) इति आर्धधातुक-संज्ञा 'आर्धधातुकस्येड् वलादेः' (पा० अ० ७।२।३५) इति इडागमः। टकारानुबन्धलोपः। **अथवा** पलति स्म इति पलितम्। उक्त-पल-धातुद्वयतः 'गत्यर्था-कर्मक-श्लिष्-शीङ्-स्थास-वस-जन-रुह-जीर्यतिभ्यश्च' (पा० अ० ३।४।७२) इति क्त-प्रत्ययः। ककारानुबन्धलोपः। प्रत्ययस्य पूर्ववत् आर्धधातुकसंज्ञकत्वात् इडागमः। आगमे टकारानुबन्धलोपः। **अथवा** पलनं पलितम्। उक्त-पल-धातुतः 'नपुंसके भावे क्तः' (पा० अ० ३।३।११४) इति क्त-प्रत्ययः। पूर्ववत् इडागमः। आगमे टकारानुबन्ध-लोपः, प्रत्यये च ककारानुबन्धलोपः। **अथवा** पलति इति पलः। उक्त-पल-धातुद्वयात् 'नन्दि-ग्रहि-पचादिभ्यो०' (पा० अ० ३।१।१३४) इति अच्-प्रत्ययः। चकारानुबन्ध-लोपः। पलः सञ्जातः अस्य इति पलितम्। पलशब्दात् 'तदस्य सञ्जातं तारकादिभ्य

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by S3 Foundation USA

इतच्' (पा० अ० ५। २। ३६) इति इतच्-प्रत्ययः। चकारानुबन्धलोपः। 'यस्येति च' (पा० अ० ६। ४। १४८) इति लकारोत्तरवर्त्तिनः अकारस्य लोपः। **अथवा** फलति निष्पद्यते पक्वम् इव जायते इति पलितम्। फल निष्पत्तौ (भ्वा० प०) 'फलेरितजादेश्च पः' (उ० ५। ३४) इति इतच्-प्रत्ययः धातोः आदेः फकारस्य पकारः। 'पलितं जरसा शौक्ल्यं केशादौ' इत्यमरः। 'पलितं शैलजे तापे केशपाके च कर्दमे' इति मेदिनी।

पल्लवः पुं०। इत्यत्र **'पल्लव-पल्वल-कफ-रेफ-कटाह-निर्व्यूह-मठ-मणि-तरङ्ग-तुरङ्ग-गन्ध-मृदङ्ग-सङ्ग-समुद्र-पुङ्खाः' (लि० सू० ११६) इति पुँल्लिङ्गता।** पल्यते गम्यते प्राप्यते यः सः पल्। पल गतौ (भ्वा० प०) 'सम्पदादिभ्यः क्विप्' (वा० पा० अ० ३। ३। ९४) इति क्विप्-प्रत्ययः। तस्य सर्वापहारिलोपः। लूयते छिद्यते इति लवः। लूञ् छेदने (क्र्या० उ०) 'ऋदोरप्' (पा० अ० ३। ३। ५७) इति अप्-प्रत्ययः। णकारानुबन्धलोपः। 'सार्वधातुकार्धधातुकयोः' (पा० अ० ७। ३। ८४) इति धातोः ऊकारस्य ओ-गुणः। 'एचोऽयवायावः' (पा० अ० ६। १। ७८) इति ओकारस्य अव्-आदेशः। ततः पल् चासौ लवश्च इति पल्लवः। पल्शब्दस्य लवशब्देन सह समासः। **अथवा** पद्भ्याम् अर्थात् पादाभ्या यः लूयते सः पल्लवः। लवः पूर्वं व्याख्यातः पद् + लव इत्यव स्थायां 'तोर्लि' (पा० अ० ८। ४। ६०) इति दकारस्य लकारः परसवर्णः। 'पल्लवोऽस्त्री किसलयम्' इत्यमरः। 'पल्लवः किसलये बले। विटपे विस्तरेऽलक्तरागे शृङ्गार-पिङ्गयोः' इति मेदिनी। 'पुंसि क्लीबे च पल्लवः' इति व्याडिः।

पल्वलः पुं०। इत्यत्र **'पल्लव-पल्वल-कफ-रेफ-कटाह-निर्व्यूह-मठ-मणि-तरङ्ग-तुरङ्ग-गन्ध-मृदङ्ग-सङ्ग-समुद्र-पुङ्खाः' (लि० सू० ११६) इति पुँल्लिङ्गता।** यत्र गच्छति स पल्वलः, **अथवा** पल्यते रक्ष्यते यः स पल्वलः। पल गतौ (भ्वा० प०) पल रक्षणे (काशकृत्स्नीय-धातुपाठे भ्वा० प०) 'सानसि-वर्णसि-पर्णसि-तण्डुलाङ्कुश-चषालेल्वल-पल्वल-धिष्ण्य-शल्याः' (उ० ४। १०८) इति वलच्-प्रत्ययः। चकारानुबन्धलोपः। **अथवा** पिबन्ति जलम् अस्मिन् प्राणिनः इति पल्वलः। पा पाने (भ्वा० प०) उक्त 'सानसि-वर्णसि०' (उ० ४। १०८) सूत्रेण एव वलच्-प्रत्ययः लुगागमः धातोः आकारस्य अकारः ह्रस्वश्च निपात्यते। प्रत्यये चकारानुबन्धलोपः। आगमे उकार-ककारानुबन्धलोपः। 'वेशन्तः पल्वलः चाल्पसरः' इत्यमरः। 'वेशन्तः पल्वलोऽस्त्री' इति वाचस्पतिः।

पवित्रः, पवित्रम् पुं०। नपुं०। इत्यत्र **'पत्र-पवित्र-सूत्र-च्छत्राः पुंसि च' (लि० सू० १५७) इति पुँल्लिङ्गता नपुंसकलिङ्गता च।** पूयते शोध्यते अनेन इति पवित्रः

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by S3 Foundation USA

पवित्रं वा। पूञ् पवने (क्र्या० उ०) 'पुवः संज्ञायाम्' (पा० अ० ३। २। १८५) इति अथवा 'कर्त्तरि चर्षिदेवतयोः' (पा० अ० ३। २। १८६) इति इत्र-प्रत्ययः। धातोः ऊकारस्य 'सार्वधातुकार्धधातुकयोः' (पा० अ० ७। ३। ८४) इति ओ-गुणः। 'एचोऽयवायावः' (पा० अ० ६। १। ७८) इति ओकारस्य अव्-आदेशः। **अथवा** पुनाति इति पवित्रम् पवित्रं वा। पूञ् पवने (क्र्या० उ०), अथवा पवते इति पवित्रः पवित्रं वा। पूङ् पवने (भ्वा० आ०) 'अशित्रादिभ्य इत्रोत्रौ' (उ० ४। १७४) इति इत्र-प्रत्ययः। धातोः ऊकारस्य ओकारः ओकारस्य च अव्-आदेशः पूर्ववत् एव। 'अस्त्री कुशं कुथो दर्भः पवित्रम्' एवं 'पवित्रः प्रयतः पूतः' तथा 'पूतं पवित्रं मेध्यं च' इत्यमरः। 'पवित्रं तु मेध्ये ताम्रे कुशे जले। अर्धोपकरणे चापि पवित्रा तु नदीभिदि' इति हैमः। 'पवित्रं वर्षणे कुशे। ताम्रे पयसि च क्लीबं मेध्ये स्यादभिधेयवत्' इति मेदिनी। 'पवित्रम् उदकनाम' (निघं० १। १२)। 'अयं वै पवित्रं योऽयं (वायुः) पवते' (शत० ब्रा० १। १। ३। २)। 'पवित्रं वै दर्भाः' (शतः ब्रा० ३। १। ३। १८)। 'पवित्रं वा आपः' (शत० ब्रा० १। १। १। ३)। 'अन्तरिक्षं वै पवित्रम्' (काठ० सं० २६। १०)। 'पवित्रं पोत्राभ्याम्' (तैत्ति० सं० ५।७। १५। १)। 'वसूनां वा एतद् भागधेयं यत् पवित्रम्' (कपिष्ठलकठ सं० ४६। ८)। 'अग्निर्वाव पवित्रम्' (तैत्ति० ब्रा० ३। ३। ७। १०)। 'पवित्रं वै वायुः' (तै० ब्रा० ३। २। ५। ११)। 'प्राणापानौ पवित्रे' (तै० ब्रा० ३। ३। ४। ४)। 'प्राणोदानौ पवित्रे' (शत० ब्रा० १। ८। १। ४४)। 'पवित्रं पुनातेः। मन्त्रः पवित्रमुच्यते'। 'रश्मयः पवित्रमुच्यन्ते' आपः पवित्रमुच्यन्ते। अग्निः पवित्रमुच्यते। 'वायुः पवित्रमुच्यते। क्षोमः पवित्रमुच्यते। सूर्यः पवित्रमुच्यते। इन्द्रः पवित्रमुच्यते' (निरु० ५। ६) 'पवित्रवन्तः रश्मिवन्तः' (निरु० १२। ३२)।

पाकः पुं०। **इत्यत्र 'घञबन्तः' (लि० सू० ३६) इति पुँल्लिङ्गता।** पिबति पाति वा इति पाकः। पा पाने (भ्वा० प०), पा रक्षणे (अ० प०) 'इण्-भी-का-पा-शल्यति-मर्चिभ्यः कन्' (उ० ३। ४३) इति कन्-प्रत्ययः। नकारानुबन्धलोपः। **अथवा** 'अर्भक-पृथुक-पाका वयसि' (उ० ५। ५३) इति कन्-प्रत्ययः। नकारानुबन्धलोपः। **अथवा** पचनं पाकः। डुपचष् पाके (भ्वा० उ०) 'भावे' (पा० अ० ३। ३। १८) इति घञ्-प्रत्ययः। घकार-ञकारानुबन्धलोपः। 'अत उपधायाः' (पा० अ० ७। २। ११६) इति धातोः उपधायाः अकारस्य आ-वृद्ध्यादेशः। 'चोः कुः' (पा० अ० ८। २। ३०) इति चकारस्य ककारः। 'पोतः पाकोऽर्भको डिम्भः पृथुकः शावकः शिशुः' इत्यमरः। 'पाकः परिणतौ शिशौ। केशस्य जरसा शौक्ल्ये स्थाल्यादौ पवनेऽपि च' इति मेदिनी। 'पचा पाके' इत्यमरः। 'पाकौ पक्तिशिशू' इति चामरः। 'यो मा पाकेन मनसाचरन्तम्'

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by S3 Foundation USA

(अथर्ववेदः ८।४।८) एवम् (ऋ० वे० ७।१०४।८)। इत्यत्र तु पाक-शब्दः पवित्र-वाची वर्त्तते। पारसीक-भाषायाम् अपि पवित्रार्थे एव पाक-शब्दः सम्प्रति अपि प्रचलति एव। 'पाकः पक्तव्यो भवति, विपक्वप्रज्ञ आत्मेत्यात्मगतिमाचष्टे' (निरु० ३।१२)।

पाटलिः स्त्री०, पुं०। **इत्यत्र 'गो-मणि-यष्टि-मुष्टि-पाटलि-वस्ति-शाल्मलि-त्रुटि-मसि-मरीचयः' (लि० सू० १७२) इति स्त्रीलिङ्गता पुँल्लिङ्गता च।** पिबति पाति रक्षति वा इति पा। पा पाने (भ्वा० प०), पा रक्षणे (अ० प०) 'क्विप् च' (पा० अ० ३।२।१७८) इति क्विप्-प्रत्ययः। तस्य सर्वापहारिलोपः। टलति इति टलिः। टल वैक्लव्ये (भ्वा० प०) 'सर्वधातुभ्य इन्' (उ० ४।११९) इति इन्-प्रत्ययः। नकारानुबन्धलोपः। पाश्चासौ टलिश्च इति पाटलिः। पा-शब्दस्य टलि-शब्देन सह समासः। अथवा पटनं पाटः। पट गतौ (भ्वा० प०) 'भावे' (पा० अ० ३।३।१८) इति घञ्-प्रत्ययः। घकार-ञकारानुबन्धलोपः। 'अत उपधायाः' (पा० अ० ७।२।११६) इति धातोः उपधायाः अकारस्य आ-वृद्धिः। पाटं लाति इति पाटलिः। पाट + ला आदाने (अ० प०) 'पृषोदरादीनि यथोपदिष्टम्' (पा० अ० ६।३।१०९) इति डि-प्रत्ययः। डकारानुबन्धलोपः। डित्त्वात् तस्मिन् परे 'टेः' (पा० अ० ६।४।१४३) इति धातोः आकारस्य टेर्लोपः। 'पाटलिः पाटलाऽमोघा काचस्थाली फलेरुहा' इत्यमरः। 'गोलीढो झाटलो घण्टा पाटलिर्मोक्षमुष्ककौ' इति चामरः।

पाणिः पुं०। **इत्यत्र 'सारथ्यतिथि-कुक्षि-बस्ति-पाण्यञ्जलयः' (लि० सू० ११७) इति पुँल्लिङ्गता।** पणते व्यवहारं करोति येन सः पाणिः **अथवा** येन पणायति स्तौति सः पाणिः। पण व्यवहारे स्तुतौ च (भ्वा० आ०) 'गुपू-धूप-विच्छि-पणि-पनिभ्य आयः' (पा० अ० ३।१।२८) इति आय-प्रत्ययः। पणाय इत्यवस्थायाम् 'अशि-पणाय्योरुडाय-लुकौ च' (उ० ४।१३४) इति इण्-प्रत्ययः, आय्-प्रत्ययस्य लुक् च। प्रत्यये णकारानुबन्धलोपः। प्रत्ययस्य णित्त्वात् तस्मिन् परे 'अत उपधायाः' (पा० अ० ७।२।११६) इति धातोः उपधायाः अकारस्य आ-वृद्धिः। **अथवा** पणायन्ति व्यवहरन्ति स्तुवन्ति अनेन, पण्यते व्यवह्रियते स्तूयते वा अनेन इति पाणिः। पण व्यवहारे स्तुतौ च (भ्वा० आ०) 'इणजादिभ्यः' 'इञजादिभ्यः' वा (वा० पा० अ० ३।३।१०८) इति इण्-प्रत्ययः इञ्-प्रत्ययः वा। इण्-प्रत्यये णकारानबुन्धलोपः, इञ्-प्रत्यये च ञकारानुबन्धलोपः। 'अत उपधायाः' (पा० अ० ७।२।११६) इति धातोः उपधायाः अकारस्य आ-वृद्धिः। 'पाणिः करः' इति सिद्धान्तकौमुद्याम् उणादौ। 'पाणौ चपेट-प्रतल-प्रहस्ता विस्तृताङ्गुलौ' इत्यमरः। 'पाणिः पणायतेः पूजाकर्मणः प्रगृह्य पाणी देवान् पूजयन्ति' (निरु० २।२६)। 'पाणी वै गभस्ती' (शत० ब्रा० ४।१।१।९)।

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by S3 Foundation USA

पाणिपादम् नपुं०। इत्यत्र **'द्वन्द्वैकत्वम्' (लि० सू० १२४) इति नपुंसकलिङ्गता।** पाणि-शब्दः पूर्वं व्याख्यातः। पद्यते अनेन इति पादः। पद गतौ (दि० उ०) 'हलश्च' (पा० अ० ३।३।१२१) इति घञ्-प्रत्ययः। घकार-ञकारानुबन्धलोपः। 'अत उपधायाः' (पा० अ० ७।२।११६) इति धातोः उपधायाः अकारस्य आ-वृद्धिः। **अथवा** पद्यते असौ इति पादः। अत्र पद गतौ (दि० आ०) 'पद-रुज-विश-स्पृशो घञ्' (पा० अ० ३।३।१६) इति इति घञ्-प्रत्ययः। घकार-ञकारानुबन्धलोपः। 'अत उपधायाः' (पा० अ० ७।२।११६) इति धातोः उपधायाः अकारस्य आ-वृद्धिः। ततः पाणी च पादौ च इति पाणिपादौ इत्यत्र 'चार्थे द्वन्द्वः' (पा० अ० २।२।२९) इति द्वन्द्वसमासः। सुपो लुक्। 'द्वन्द्वश्च प्राणि-तूर्य-सेनाङ्गानाम्' (पा० अ० २।४।२) इति प्राण्यङ्गत्वात् एकवद्भावः। 'स नपुंसकम्' (पा० अ० २।४।१७) इति अथवा 'द्वन्द्वैकत्वम्' (लि० सू० १२४) इति नपुंसकलिङ्गता, ततः प्रथमा-द्वितीयैकवचने पाणिपादं भवति।

पात्रः, पात्रम् पुं०, नपुं०। इत्यत्र **'पत्र-पात्र-पवित्र-सूत्रच्छत्राः पुंसि च' (लि० सू० १५७) इति पुँल्लिङ्गता 'द्वाराग्रस्फारतक्रवक्र०' (लि० सू० ९०) इति नपुंसकलिङ्गता च।** पिबन्ति येन, पीयते वा येन अथवा पान्ति रक्षन्ति येन सः पात्रः तत् पात्रं वा। पा पाने (भ्वा० प०), पा रक्षणे (अ० प०) 'सर्वधातुभ्यः ष्ट्रन्' (उ० ४। १६०) इति ष्ट्रन्-प्रत्ययः। षकार-नकारानुबन्धलोपः। एवं षकारे लुप्ते तत्सन्नियोगेन सञ्जातः टकारः अपि स्वीयं पूर्वरूपं तकारम् आपद्यते, तेन ट्र-स्थाने 'त्र' इति अवशिष्यते। 'पारावारे परार्वाचि तीरे पात्रं तदन्तरम्' तथा 'पात्रं स्रुवादिकम्' एवं 'सर्वमावपनं भाण्डं पात्रामत्रं च भाजनम्' इत्यमरः। 'योग्य-भाजनयोः पात्रम्' इति चामरः। 'पात्रं तु भाजने योग्ये पात्रं तीरद्वयान्तरे। पात्रं स्रुवादौ पर्णे च राजमन्त्रिणि चेष्यते' इति विश्वः। 'पात्रं तु भाजने योग्ये स्रुवादौ राजमन्त्रिणि तीरद्वयान्तरे च' इति मेदिनी। 'पात्रं तु कूलयोर्मध्ये पर्णे नृपतिमन्त्रिणि। योग्यभाजनयोर्यज्ञभाण्डे नाद्यानुकर्त्तरि' इति हैमः।

पापम् नपुं०। इत्यत्र **'पाप-रूपोडुप-तल्प-शिल्प-पुष्प-शष्प-समीपान्तरीपाणि नपुंसके' (लि० सू० ७८) इति नपुंसकलिङ्गता।** पान्ति रक्षन्ति यस्मात् आत्मानं जनाः तत् पापम् **अथवा** पिबति भक्षयति कर्त्तारम् इति पापम्। पा रक्षणे (अ० प०), पा पाने (भ्वा० प०) 'पा-नी-विषिभ्यः पः' (उ० ३। २३) इति प-प्रत्ययः। 'अस्त्री पङ्कं पुमान् पाप्मा पापं किल्विष-कल्मषम्' इत्यमरः।

पारम्, पारः नपुं०, पुं०। इत्यत्र **'चक्र-वज्रान्धकार-सारावारपार-क्षीर-तोमर-शृङ्गार-भृङ्गार-मन्दारोशीर-तिमिर-शिशिराणि नपुंसके च' (लि० सू० ९२) इति**

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by S3 Foundation USA

नपुंसकलिङ्गता पुँल्लिङ्गता च। पारयति इति पारं पारः वा। पार कर्मसमासौ (चु० उ०) 'नन्दि-ग्रहि-पचादिभ्यो०' (पा० अ० ३।१।१३४) इति अच्-प्रत्ययः। चकारानुबन्ध-लोपः। 'पारं परं भवति' (नि० २।२४)।

पार्श्वः, पार्श्वम् पुं०, नपुं०। इत्यत्र **'दण्ड-मण्ड-खण्ड-शव-सैन्धव-पार्श्वाकाश-कुश-काशाङ्कुश-कुलिशाः' (लि० सू० १८१) इति पुँल्लिङ्गता नपुंसकलिङ्गता च।** स्पृशति स्पृश्यते वा येन सः पार्श्वः तत् पार्श्वं वा। स्पृश संस्पर्शे (तु० प०) 'स्पृशेः श्वण् शुनौ पृ च' (उ० ५। २७) इति श्वण्-प्रत्ययः, धातोः पृ इति आदेशः च। णकारानुबन्धलोपः। णित्त्वात् तस्मिन् परे 'अचो ञ्णिति' (पा० अ० ७।२।११५) इति पृ इत्यस्य ऋकारस्य 'उरण् रपरः' (पा० अ० १।१।५१) इति सहकारेण आर्-वृद्धिः। **अथवा** पर्शूनां समूहः अस्मिन् अर्थे 'पर्श्वा णस् वक्तव्यः' (वा० पा० अ० ४।२।४३) इति णस् प्रत्ययः। णकार-सकारानुबन्धलोपः। पर्शुअ इत्यवस्थायां सित्त्वात् 'सिति च' (पा० अ० १।४।१६) इति पर्शुशब्दस्य पद-संज्ञा। तस्मात् 'यचि भम्' (पा० अ० १।४।१८) इति भ-संज्ञायाः अभावात् 'ओर्गुणः' (पा० अ० ६।४।१४६) इति पर्शु-शब्दस्य उकारस्य ओ-गुणः न। किन्तु 'तद्धितेष्वचामादेः' (पा० अ० ७।२।११७) इति पर्शुशब्दे आद्यचः पकार-परवर्त्तिनः अकारस्य आ-वृद्धिः। 'इको यणचि' (पा० अ० ६।१।७७) इति र्शकारोत्तर-वर्त्तिनः उकारस्य व्-आदेशः। 'बाहुमूले कक्षौ पार्श्वमस्त्री तयोरधः' इत्यमरः। 'द्वे पर्शुकानां पृष्ठानां पार्श्वं पृष्ठ्यमिति क्रमात्' इति चामरः। 'पार्श्वं कक्षधरे चक्रोपान्ते पर्शुगणेऽपि च' इति विश्व-मेदिन्यौ। 'पार्श्वो द्यावापृथिवीनाम' (निघं० ३। ३०)। 'पार्श्वं पर्शुमयमङ्गं भवति। पर्शुः स्पृशतेः' (निरु० ४।३)।

पाषण्डः पुं०। **इत्यत्र 'षण्ड-मण्ड-करण्ड-भरण्ड-वरण्ड-तुण्ड-गण्ड-मुण्ड-पाषण्ड-शिखण्डाः' (लि० सू० ११२) इति पुँल्लिङ्गता।** पापं सनोति ददाति इति पाषण्डः **अथवा** पापं सनति सम्भजति इति पाषण्डः। पाप + षणु दाने (त० उ०), षण् संभक्तौ (भ्वा० प०) 'धात्वादेः षः सः' (पा० अ० ६।१।६४) इति धातोः षस्य सकारः तु बाहुलकत्वात् न भवति। 'ञमन्ताड्डः' (उ० १।११४) इति ड-प्रत्ययः। 'पृषोदरादीनि यथोपदिष्टम्' (पा० अ० ६।३।१०९) इति पापशब्दस्य पकारस्य लोपः। एवं पाषण्ड-शब्दः व्युत्पद्यते। 'पाषण्डाः सर्वलिङ्गिनः' इत्यमरः।

पाषाणः पुं०। **इत्यत्र 'णोपधः' (लि० सू० ६७) इति पुँल्लिङ्गता।** पषति बाधते स्पृशति वा इति पाषाणः। पषा बाधनस्पर्शनयोः (काशकृत्स्नधातुपाठे भ्वा० प०), पषति

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by S3 Foundation USA

धर्षयति इति पाषाणः। पषु धर्षणे (काशकृत्स्नधातुपाठे भ्वा० प०), पाषयति बध्नाति इति पाषाणः। पष बन्धे (काशकृत्स्नधातुपाठे चु० प०), पषयति गच्छति इति पाषाणः। पष गतौ अनुपसर्गात् (चु० प०) 'उणादयो बहुलम्' (पा० अ० ३। ३। १) इति उणादीनां बहुलवचनात् 'युधि-बुधि-दृशः किच्च' (उ० २।९१) इति आनच्-प्रत्ययः, बाहुलकात् एव सः च णित्। णित्त्वात् 'अत उपधायाः' (पा० अ० ७। २। ११६) इति धातोः उपधायाः आकारस्य आ-वृद्धिः। प्रत्यये चकारानुबन्धलोपः। 'अट्-कुप्वाङ्-नुम्-व्यवायेऽपि' (पा० अ० ८। ४। २) इति नस्य णः। **अथवा** पषति बाधितः भवति अनेन इति पाषः। पषा बाधन-स्पर्शनयोः (काशकृत्स्नधातुपाठे भ्वा० प०) 'हलश्च' (पा० अ० ३। ३। १२१) इति घञ्-प्रत्ययः। घकार-ञकारानुबन्धलोपः। प्रत्ययस्य ञित्त्वात् तस्मिन् परे 'अत उपधायाः' (पा० अ० ७। २। ११६) इति धातोः उपधायाः अकारस्य आ-वृद्धिः। एवं पाष-शब्दः निष्पद्यते। अणति शब्दायते इति अणः। अण शब्दे (भ्वा० प०) 'नन्दि-ग्रहि-पचादिभ्यो०' (पा० अ० ३। १। १३४) इति अच्-प्रत्ययः। चकारानुबन्धलोपः। एवम् अण-शब्दः निष्पद्यते। ततः पाषश्चासौ अणश्च इति पाषाणः। 'अकः सवर्णे दीर्घः' (पा० अ० ६। १। १०१) इति अकारस्य अकारस्य च आ-दीर्घः। **अथवा** पिनष्टि इति पाषाणः, **अथवा** पिष्यते येन सः पाषाणः। पिष्लृ संचूर्णने (स० प०) 'बाहुलकात् आनच्-प्रत्ययः पृषोदरादिः' (पा० अ० ६।३।१०९) इति अमरकोषे भानुजिदीक्षितः। 'पाषाण-प्रस्तर-ग्रावोपलाश्मानः शिला दृषत्' इत्यमरः।

पिच्छम् नपुं०। इत्यत्र **'द्वन्द्व-बर्ह-दुःख-बडिश-पिच्छ-बिम्ब-कुटुम्ब-कवच-वर-शर-वृन्दारकाणि' (लि० सू० १६९) इति नपुंसकलिङ्गता।** पिच्छयति इति पिच्छम्। पिच्छ कुट्टने (चु० प०) 'नन्दि-ग्रहि-पचादिभ्यो०' (पा० अ० ३।१।१३४) इति अच्प्रत्ययः। चकारानुबन्धलोपः। अथवा पिच्छ्यते यत् तत् पिच्छम्। 'अकर्त्तरि च कारके संज्ञायाम्' (पा० अ० ३।३।१९) इति घञ्-प्रत्ययः। घकार-ञकारानुबन्धलोपः। 'शिखण्डश्च पिच्छबर्हे नपुंसके' इत्यमरः। 'पिच्छा पूगच्छटाकोषमोचा-शाल्मालेवेष्टके। भक्तसम्भूतमण्डे च पङ्क्तावश्वपदामये। स्त्रियां, पुंसि तु लाङ्गूले न द्वयोर्बर्हचूडयोः' इति मेदिनी।

पिटकम्, पिटकः नपुं०, पुं०। इत्यत्र **'कण्टकानीक-सरक-मोदक-चषक-मस्तक-पुस्तक-तडाक-निष्क-शुष्क-वर्चस्क-पिनाक-भाण्डक-पिण्डक-कर्मक-शण्डक-पिटक-तालक-फलक-पुलाकानि नपुंसके च' (लि० सू० ६३) इति नपुंसकलिङ्गता पुँल्लिङ्गता च।** पेटति इति पिटकं पिटकः वा। पिट शब्दसंघातयोः (भ्वा० प०) 'क्वुन् शिल्पिसंज्ञयोरपूर्वस्यापि' (उ० २। ३३) इति क्वुन्

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by S3 Foundation USA

प्रत्ययः। ककार-नकारानुबन्धलोपः। 'युवोरनाकौ' (पा० अ० ७। १। १) इति वु-स्थाने अक इत्यादेशः। प्रत्ययस्य कित्त्वात् तस्मिन् परे 'पुगन्तलघूपधस्य च' (पा० अ० ७। ३। ८६) इति धातोः इकारस्य प्राप्तः ए-गुणः 'क्ङिति च' (पा० अ० १। १। ५) इति निषेधात् न भवति। 'विस्फोटः पिटकस्त्रिषु' इत्यमरः। 'पिटकः पेटकः पेटा मञ्जूषा' इति चामरः। 'पिटकस्त्रिषु विस्फोटे मञ्जूषायां पुनः पुमान्' इति मेदिनी। 'पिटकः स्यात्तु विस्फोटे मञ्जूषायामपीष्यते' इति हैमः।

पिण्डकम्, पिण्डकः नपुं०, पुं०। इत्यत्र **'कण्टकानीक-सरक-मोदक-चषक-मस्तक-पुस्तक-तडाक-निष्क-शुष्क-वर्चस्क-पिनाक-भाण्डक-पिण्डक-कर्टक-शण्डक-पिटक-तालक-पालक-पुलाकानि नपुंसके च' (लि० सू० ६३) इति नपुंसकलिङ्गता पुँल्लिङ्गता च।** पिण्डते इति पिण्डः। पिडि संघाते (भ्वा० आ०) धातोः इदित्त्वात् 'इदितो नुम् धातोः' (पा० अ० ७। १। ५८) इति नुम्-आगमः। उकार-मकारानुबन्धलोपः। 'ष्टुना ष्टुः' (पा० अ० ८। ४। ४१) इति नस्य णः। 'नन्दि-ग्रहि-पचादिभ्यो०' (पा० अ० ३। १। १३४) इति अच्-प्रत्ययः। एवं पिण्ड-शब्दः निष्पद्यते। ततः पिण्डम् एव पिण्डकं, पिण्ड एव पिण्डकः वा। पिण्डशब्दात् स्वार्थे कन्-प्रत्ययः। नकारानुबन्धलोपः। 'तुरुष्कः पिण्डकः सिल्हो यावनोऽपि' इत्यमरः। 'पिण्डो बोले बले सान्द्रे देहागारैकदेशयोः। देहमात्रे निवापे च गोलसिल्हकयोरपि। ओड्रपुष्पे च पुंसि स्यात् क्लीबमाजीवनायसोः। पिण्डी तु पिण्डनगरेऽलाबूखर्जूरभेदयोः' इति मेदिनी।

पितापुत्रकम् नपुं०। इत्यत्र **'यद्यढग्यगञण्वुञ्छाश्च भावकर्मणि' (लि० सू० १२३ (क)) इति नपुंसकलिङ्गता।** पिता च पुत्रः च इति पितापुत्रकम्। अत्र पितापुत्र-शब्दात् 'द्वन्द्वमनोज्ञादिभ्यश्च' (पा० अ० ५। १। १३३) इति वुञ्-प्रत्ययः। ञकारानुबन्ध-लोपः। 'युवोरनाकौ' (पा० अ० ७। १। १) इति वु-स्थाने अकादेशः। पितापुत्र अक इत्यवस्थायाम् 'शकन्ध्वादिषु पररूपं वाच्यम्' (वा० पा० अं० ६। १। ९४) इति त्रकार-परवर्त्तिनः अकारस्य पररूपम्।

पित्तम् नपुं०। इत्यत्र **'नवनीतावतानानृतामृत-निमित्त-वित्त-चित्त-पित्त-व्रत-रजत-वृत्त-पलितानि' (लि० सू० १६५) इति नपुंसकलिङ्गता।** अपि दीयते स्म इति पित्तम्। अपि + दो अवखण्डने (दि० प०) अथवा देङ् पालने (भ्वा० प०) 'निष्ठा' (पा० अ० ३। २। १०२) इति क्त-प्रत्ययः। ककारानुबन्धलोपः। 'आदेच उपदेशेऽशिति' (पा० अ० ६। १। ४५) इति धातोः एकारस्य आ इत्यादेशः। 'दा-धाघ्वदाप्' (पा० अ० १। १। २०) इति दा इत्यस्य घु-संज्ञा। 'अच उपसर्गात्तः' (पा० अ० ७। ४। ४७)

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by S3 Foundation USA

इति दा इत्यस्य आकारस्य त्-इत्यादेशः, अपि द् त् त इति स्थितौ 'खरि च' (पा० अ० ८।४।५५) इति दकारस्य तकारः। ततः 'संयोगान्तस्य लोपः' (पा० अ० ८।२।२३) इति अन्तिमस्य तकारस्य लोपः। अपि त् त इति स्थितौ भागुरिमते अपि-शब्दस्य अकारस्य लोपेन पित्त-शब्दः निष्पद्यते।

पिनाकम्, पिनाकः नपुं०, पुं०। इत्यत्र **'कण्टकानीक-सरक-मोदक-चषक-मस्तक-पुस्तक-तडाक-निष्क-शुष्क-वर्चस्क-पिनाक-भाण्डक-पिण्डक-कटक-शण्डक-पिटक-तालक-फलक-पुलाकानि नपुंसके च' (लि० सू० ६३) इति नपुंसकलिङ्गता पुँल्लिङ्गता च।** पाति रक्षति इति पिनाकः। पा रक्षणे (अ० प०) 'पिनाकादयश्च' (उ० ४। १६) इति आक-प्रत्ययः, धातोः आकारस्य इकारः नुम्-आगमश्च। उकार-मकारानुबन्धलोपः। 'पिनाकोऽजगवं धनुः' इत्यमरः। 'पिनाकोऽस्त्री शूल-शङ्करधन्वनोः' इति चामरः। 'पिनाकोऽस्त्री रुद्रचापे पांशुवर्षत्रिशूलयोः' इति मेदिनी। 'पिनाकः शिवकोदण्डे पांशुवृष्टि-त्रिशूलयोः' इति हैमः। 'पिनाकं प्रतिपिनष्ट्यनेन' (निरु० ३।२१)।

पीठम् नपुं०। इत्यत्र **'श्राद्ध-कुलिश-दैव-पीठ-कुण्डाङ्काङ्ग-दधि-सक्थ्यक्ष्यास्यास्पदाकाश-कण्व-बीजानि' (लि० सू० १६६) इति नपुंसकलिङ्गता।** पेठन्ति उपविशन्ति अत्र इति पीठम्। पिठ हिंसासंक्लेशनयोः (भ्वा० प०) 'हलश्च' (पा० अ० ३।३।१२१) इति घञ्-प्रत्ययः। घकार-ञकारानुबन्धलोपः। 'पृषोदरादीनि यथोपदिष्टम्' (पा० अ० ६।३।१०९) इति धातोः इकारस्य ई-दीर्घः। अथवा पीयते अत्र उपविश्य इति पीठम्। पीङ् पाने (दि० आ०) 'उणादयो बहुलम्' (पा० अ० ३।३।१) इति उणादीनां बाहुलकत्वात् 'कणेष्ठः' (उ० १।१०३) इति ठ-प्रत्ययः। 'पीठमासनम्' इत्यमरः।

पीयूषम् नपुं०। इत्यत्र **'शिरीषर्जीषाम्बरीय-पीयूष-पुरीष-किल्विष-कल्माषाणि नपुंसके' (लि० सू० ९४) इति नपुंसकलिङ्गता।** पीयति तर्पयति पीयते वा यत् तत् पीयूषम्। पीयु तृप्तौ सौत्रो धातुः। ततः 'पीयेरूषन्' (उ० ४। ७७) इति ऊषन्-प्रत्ययः। नकारानुबन्धलोपः। 'पीयूषममृतं सुधा' तथा 'पीयूषोऽभिनवं पयः' इत्यमरः। 'पीयूषं सप्तदिवसावधिक्षीरे तथाऽमृते' इति मेदिनी।

पुङ्खः पुं०। इत्यत्र **'पल्लव-पल्वल-कफ-रेफ-कटाह-निर्व्यूह-मठ-मणि-तरङ्ग-तुरङ्ग-गन्ध-मृदङ्ग-सङ्ग-समुद्र-पुङ्खाः' (लि० सू० ११६) इति पुँल्लिङ्गता।** पुमांसं खनति, पुंसा वा खन्यते इति पुङ्खः। पुम् + खनु अवदारणे (भ्वा० प०) धातोः

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by S3 Foundation USA

उकारानुबन्धलोपः। 'अन्येष्वपि दृश्यते' (पा० अ० ३। २। १०१) इति ड-प्रत्ययः। डकारानुबन्धलोपः। डित्त्वात् तस्मिन् परे 'टेः' (पा० अ० ६। ४। १४३) इति धातोः अन् इत्यस्य टेर्लोपः। पुम् + ख् + अ इति स्थितौ 'नश्चापदान्तस्य झलि' (पा० अ० ८। ३। २४) इति मकारस्य अनुस्वारः। 'अनुस्वारस्य ययि परसवर्णः' (पा० अ० ८।४। ५८) इति अनुस्वारस्य परसवर्णः ङकारः। पुङ्खः काण्डमूलम् इति अमरकोषे भानुजिदीक्षितः।

पुच्छः, पुच्छम् पुं०, नपुं०। **इत्यत्र 'वज्र-कुञ्ज-कुथ-कूर्च-प्रस्थ-दर्पार्भार्धर्च-दर्भ-पुच्छाः' (लि० सू० १७९) इति पुँल्लिङ्गता नपुंसकलिङ्गता च।** पुच्छति इति पुच्छः पुच्छं वा। पुच्छ प्रमादे (अमरकोषे भानुजिदीक्षितः) 'नन्दि-ग्रहि-पचादिभ्यो०' (पा० अ० ३। १। १३४) इति अच्-प्रत्ययः। चकारानुबन्धलोपः। **अथवा** पिच्छयति इति पुच्छः पुच्छं वा। पिच्छ कुट्टने (चु० प०) पूर्ववत् अच्-प्रत्ययः। चकारानुबन्धलोपः। 'पृषोदरादीनि यथोपदिष्टम्' (पा० अ० ६। ३। १०९) इति धातोः इकारस्य उकारः आदेशः। 'पुच्छोऽस्त्री लूमलाङ्गूले पुच्छमिष्यते' इति मेदिनी। 'यज्ञाऽयज्ञीयं पुच्छम्' (तैत्ति० सं० ४।१।१०।५, मैत्रा० सं० २।७।८)। 'शरत्पुच्छम्' (मैत्रा० सं० ४।९। १८, तैत्ति० ब्रा० ३।११।१०।३)।

पुञ्जः पुं०। **इत्यत्र 'ध्वज-गज-मुञ्ज-पुञ्जाः' (लि० सू० ११०) इति पुँल्लिङ्गता।** पिञ्जयति इति पुञ्जः। पिजि हिंसाबलादाननिकेतनेषु (चु० प०) 'नन्दि-ग्रहि-पचादिभ्यो०' (पा० अ० ३। १। १३४) इति अच्-प्रत्ययः। चकारानुबन्धलोपः। अथवा पिञ्जते इति पुञ्जः। अत्र 'अकर्त्तरि च कारके संज्ञायाम्' (पा० अ० ३। ३। १९) इति घञ्-प्रत्ययः। घकार-ञकारानुबन्धलोपः। उभयत्र 'पृषोदरादीनि यथोपदिष्टम्' (पा० अ० ६। ३। १०९) इति धातोः इकारस्य उकारः। **अथवा** पुमांसं जयति इति पुञ्जः। पुं + जि जये 'अन्येष्वपि दृश्यते' (पा० अ० ३। २। १०१) इति ड-प्रत्ययः। डकारानुबन्धलोपः। 'टेः' (पा० अ० ६। ४। १४३) इति धातोः इकारस्य लोपः। 'अनुस्वारस्य ययि परसवर्णः' (पा० अ० ८।४।५८) इति अनुस्वारस्य परसवर्णः ञकारः। 'पुञ्जराशी तूत्करः कूटमस्त्रियाम्' इत्यमरः।

पुण्याहम् नपुं०। **इत्यत्र 'अपथ-पुण्याहे नपुंसके' (लि० सू० १३१) इति अथवा 'पुण्य-सुदिनाभ्यामह्नः क्लीबतेष्टा' (वा० पा० अ० २।४।१७) नपुंसकलिङ्गता।** पुण्यम् अहः इति विग्रहे 'विशेषणं विशेष्येण बहुलम्' (पा० अ० २। १। ५७) इति विशेषण-समासः। 'राजाहःसखिभ्यष्टच्' (पा० अ० ५। ४। ९१) इति टच्-प्रत्ययः।

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by S3 Foundation USA

टकार-चकारानुबन्धलोपः। पुण्य + अहन् + अ इति स्थितौ 'टेः' (पा० अ० ६।४।१४३) इति अन् इत्यस्य टेर्लोपः। 'अकः सवर्णे दीर्घः' (पा० अ० ६।१।१०१) इति अकारस्य अकारस्य च आ-दीर्घः। एवं पुण्याह-शब्दः निष्पद्यते।

पुत् स्त्री०। इत्यत्र 'प्रतिपद्-आपद्-विपत्-सम्पच्छरत्-संसत्-परिषद्-उषः-संवित्-क्षुत्-पुन्मुत्-समिधः' (लि० सू० २७) इति पुँल्लिङ्गता। पतति इति पुत्। पत्लृ पतने (भ्वा० प०) 'क्विप् च' (पा० अ० ३।२।७६) इति क्विप्-प्रत्ययः। तस्य सर्वापहारिलोपः। 'पृषोदरादीनि यथोपदिष्टम्' (पा० अ० ६।३।१०९) इति धातोः अकारस्य उकारः।

पुरीषम् नपुं०। इत्यत्र 'शिरीषर्जीषाम्बरीष-पीयूष-पुरीष-किल्बिष-कल्माषाणि नपुंसके' (लि० सू० ९४) इति नपुंसकलिङ्गता। पिपर्त्ति पालयति पूरयति वा शरीरम् इति पुरीषम्। पृ पालन-पूरणयोः (जु० प०) 'शॄ पृभ्यां किच्च' (उ० ४।२८) इति ईषन्-प्रत्ययः स च कित्। 'उदोष्ठ्यपूर्वस्य' (पा० अ० ७।१।१०२) इति 'उरण् रपरः' (पा० अ० १।१।५१) इति सहकारेण धातोः ऋकारस्य उर्-आदेशः। **अथवा** पुरं शरीरम् ईषते गच्छति व्याप्नोति हिनस्ति वा इति पुरीषम्। पुर् + ईष गतिहिंसादानेषु (भ्वा० आ०) 'इगुपध-ज्ञा-प्री-किरः कः' (पा० अ० ३।१।१३५) इति क-प्रत्ययः। ककारानुबन्धलोपः। 'गूथं पुरीषं वर्चस्कमस्त्री विष्ठाविष्ठौ स्त्रियाम्' इत्यमरः। 'पुरीतत् पुरीषम्' (शत० ब्रा० ८।५।४।६)। 'पशवः पुरीषम्' (शत० ब्रा० ८।७।४।१२)। 'अन्नं पुरीषम्' (शत० ब्रा ८।१।४।५)। 'अथ यत् पुरीषं स इन्द्रः' (शत० ब्रा० १०।४।१।७)। 'वयांसि पुरीषम्' (शत० ब्रा० ८।७।४।१३)। 'गोष्ठः पुरीषम्' (ता० ब्रा० १३।४।१३)। 'देवाः पुरीषम्' (शत० ब्रा० ८।७।४।१७)। 'प्रजा पुरीषम्' (शत० ब्रा० ८।७।४।१६)। 'नक्षत्राणि पुरीषम्' (शत० ब्रा० ८।७।४।१४)। 'पुरीषं वा इयं (पृथिवी)' (शत० ब्रा० १२।५।२।१५)। 'स एष प्राण एव यत् पुरीषम्' (शत० ब्रा० ८।७।३।६)। 'ऐन्द्रं हि पुरीषम्' (शत० ब्रा० ८।७।३।७)। 'मांसं पुरीषम्' (शत० ब्रा० ८।७।४।१९)। 'दक्षिणाः पुरीषम्' (शत० ब्रा० ८।७।४।१५)। 'पुरीषम् उदकनाम' (निघं० १।१२)।

पुरुषः पुं०। इत्यत्र 'ऋतु-पुरुष-कपोल-गुल्फ-मेघाभिधानानि' (लि० सू० ४९) इति पुँल्लिङ्गता। पुरति अग्रे गच्छति पूर्यते वा इति पुरुषः। पुर अग्रगमने (तु० प०) पुरी आप्यायने (दि० आ०) 'पुरः कुषन्' (उ० ४।७५) इति कुषन्-प्रत्ययः। ककार-नकारानुबन्धलोपः। 'क्षेत्रज्ञ आत्मा पुरुषः' तथा 'पुंनागे पुरुषस्तुङ्गकेसरो देववल्लभः'

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by S3 Foundation USA

इत्यमरः। 'स्यात् पुमांसः पञ्चजनाः पुरुषाः पूरुषा नराः' इति चामरः। 'पुरुषावात्ममानवौ' इत्यपि अमरः। 'पुरुषः पूरुषे सांख्ययज्ञे च पुंनागपादपे' इति मेदिनी। 'पुरुषस्त्वात्मनि नरे पुंनागे च' इति हैमः। 'पुरुषः पुरिषादः पुरिक्षयः पूरयतेर्वा। पूरयत्यन्तरित्यन्तर-पुरुषमभिप्रेत्य। यस्मात् परं नापरमस्ति किञ्चिद् यस्मान्नाणीयो न ज्यायोऽस्ति किञ्चित्। वृक्ष इव स्तब्धो दिवि तिष्ठत्येकस्तेनेदं पूर्णं पुरुषेण सर्वम् इत्यपि निगमो भवति' (निरु० २।४)। 'पुरुषः स वाऽयं पुरुषः सर्वासु पूर्षु पुरिशयः' (शत० ब्रा० १४।५।५। १८)। 'पुरुषो वा अक्षितिः' (शत० ब्रा० १४।४।३।७)। 'प्राण एष स पुरि शेते स पुरि शेत इति पुरिशयं सन्तं प्राणं पुरुष इत्याचक्षते' (गोप० पू० १। ३९)। 'पुरुषो वै सहस्रस्य प्रतिमा' (शत० ब्रा० ७।५।२।१७)। 'स यत् पूर्वोऽस्मात् सर्वस्मात् सर्वान् पाप्मन औषत् तस्मात् पुरुषः' (शत० ब्रा० १४।४।२।२)। 'पशवः पुरुषः' (तैत्ति० ब्रा० ३।३।८।२)। 'पुरुषः प्रजापतिः' (शत० ब्रा० ६।२।१।२३)। 'पुरुषो वै यज्ञः' (जै० उ० ४।२।१)। 'पुरुषः पशूनाम् अधिपतिः' (तां० ब्रा० ९।२।७)। 'प्राजापत्यो वै पुरुषः' (तैत्ति० ब्रा० २।२।५।३)। 'पुरुषो वै समुद्रः' (जै० उ० ४। २७। १७)। 'पुरुषः सुपर्णः' (शत० ब्रा० ७।४।२।५)। 'अस्यां गर्भः पुरुषः स यज्ञः' (गो० पू० १।३९)। 'पुरुषोऽग्निः' (शत० ब्रा० १०।४।६)। 'पुरुष उद्गीथः' (जै० उ० १।३३। ९)। 'पुरुषो वाव संवत्सरः' (शत० ब्रा० १२।२।४।१)। 'पुरुषो वाव होता' (गोप० उ० ६।६)। 'अथैष एव पुरुषो योऽयं चक्षुषि' (जैमि० उ० १। २७। २)। 'पुरुष एव सविता' (जैमि० उ० ४। २७। १७)। 'पुरुष एव षष्ठमहः' (कौषी० ब्रा० २३।४)। 'सप्तदशो वै पुरुषो दश प्राणाश्चत्वार्यङ्गान्यात्मा पञ्चदश ग्रीवाः षोडश्यः शिरः सप्तदशम्' (शत० ब्रा० ६। २। २। ९)। 'षोडशकलो वै पुरुषः' (तैत्ति० ब्रा० १।७।५।५)। 'शतायुर्वै पुरुषः शतवीर्यः शतेन्द्रियः' (ऐत० ब्रा० २।१७)। 'पुरुषं पुरिशय इत्याचक्षीरन्' (निरु० १।१३)।

पुरोडाशः पुं०। इत्यत्र 'वंशांश-पुरोडाशाः' (लि० सू० ११३) इति पुँल्लिङ्गता। पुरः प्रथमं दाशन्ति एनम् अथवा पुरः दाश्यते इति पुरोडाशः। पुरो + दाशृ दाने (भ्वा० उ०) 'अकर्त्तरि च कारके संज्ञायाम्' (पा० अ० ३। ३। १९) इति घञ्-प्रत्ययः। घकार-ञकारानुबन्धलोपः। 'पृषोदरादीनि यथोपदिष्टम्' (पा० अ० ६। ३। १०९) इति धातोः दकारस्य डकारः। अथवा 'व्रीहेश्च पुरोडाशे' (पा० अ० ४। ३। १४८) इति निर्देशाद् वा धातोः दकारस्य डकारः 'पुरोडाशो हविर्भेदे चमस्यां पिष्टकस्य च। रसे सोमलतायां च हुतशेषे च कीर्त्तितः' इति विश्वः। 'शिरोह वा एतद् यज्ञस्य यत् पुरोडाशः' (शत० ब्रा० १।२।१।२)। 'स (पुरोडाशः) एभ्यः (मनुष्येभ्यः) तत्पुरोऽदशयत्।

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by S3 Foundation USA

य एभ्यो यज्ञं प्रारोचयत् तस्मात् पुरोदाशः, पुरोदाशो ह वै नामैतद् यत् पुरोडाश इति' (शत० ब्रा० १।६।२।५)। 'पुरो वा एतान् देवा अक्रत यत्पुरोडाशस्तत्पुरोडाशानां पुरोडाशत्वम्' (ऐत० ब्रा० २।२३)। 'आग्नेयः पुरोडाशः भवति' (शत० ब्रा० २।४।४।१२)। 'अर्धो वा एष यज्ञस्य यत्पुरोडाशः' (शत० ब्रा० २।२।१।४)। 'आत्मा वै यजमानस्य पुरोडाशः' (कौषी० १३।५।६)। 'पशोर्वै प्रतिमा पुरोडाशः' (तै० ब्रा० ३।२।८।८)। 'ततिर्वै यज्ञस्य पुरोडाशः' (कौषी० ब्रा० १०।५)। 'विडुत्तरः पुरोडाशः' (शत० ब्रा० ११।२।७।१६)। 'मस्तिष्को वै पुरोडाशः' (तै० ब्रा० ३।२।८।७)। 'अन्नं वै पुरोडाशः' (तै० सं० ७।१।९।१)। 'पशवो वै पुरोडाशाः' (तै० सं० ७।१।९।१)। 'यजमानो वै पुरोडाशः' (तै० सं० १।५।२।३)। 'तस्य (यज्ञस्य) एतच्छिरः यत्पुरोडाशः' (तै० ब्रा० ३।२।८।३)। 'मेघो वा एष पशूनां यत्पुरोडाशः' (कौषी० ब्रा० १०।५)। 'यथा मस्तिष्क एवं पुरोडाशः' (मैत्रा० सं० ४।१।९)। 'ब्रह्मवर्चसं पुरोडाशः' (काठ० सं० २२।१३)। 'यत्पुरोडाशस्तेन पौर्णमासम्' (जैमि० उ० २।३८)।

पुलाकम्, पुलाकः नपुं०, पुं०। इत्यत्र '**कण्टका-नीक-सरक-मोदक-चषक-मस्तक-पुस्तक-तडाक-निष्क-शुष्क-वर्चस्क-पिनाक-भाण्डक-पिण्डक-कटक-शण्डक-पिटक-तालक-फलक-पुलाकानि नपुंसके च' (लि० सू० ६३) इति नपुंसकलिङ्गता पुँल्लिङ्गता च**। पुलम् अकति इति पुलाकं पुलाकः वा। पुल + अक कुटिलायां गतौ (भ्वा० प०) 'कर्मण्यण्' (पा० अ० ३।२।१) इति अण्-प्रत्ययः। णकारानुबन्धलोपः। 'अकः सवर्णे दीर्घः' (पा० अ० ६।१।१०१) इति दीर्घः। अथवा पोलति इति पुलाकं पुलाकः वा। पुल महत्त्वे (भ्वा० प०) 'बलाकादयश्च' (उ० ४।१४) इति आक-प्रत्ययः। 'स्यात्पुलाकस्तुच्छधान्ये संक्षेपे भक्तपिण्डके' इत्यमरः।

पुलिनं, पुलिनः नपुं०, पुं०। **इत्यत्र 'मान-यानाभिधान-नलिन-पुलिनोद्यान-शयनासन-स्थान-चन्दनालान-समान-भवन-वसन-संभावन-विभावन-विमानानि नपुंसके च' (लि० सू० ७६) इति नपुंसकलिङ्गता पुँल्लिङ्गता च**। पोलति पोलयति वा महद् भवति इति पुलिनम्। पुल महत्त्वे (भ्वा० प०), पुल संघाते (चु० उ०) 'तलि-पुलिभ्यां च' (उ० २।५४) इति इनन्-प्रत्ययः। नकारानुबन्धलोपः। 'द्वीपोऽस्त्रियामन्तरीपं यदन्तर्वारिणस्तटम्। तोयोत्थितं तत्पुलिनं सैकतं सिकतामयम्' इत्यमरः।

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by S3 Foundation USA

पुष्करम् नपुं०। **इत्यत्र 'द्वाराग्र-स्फार-तक्र-वक्र०' (लि० सू० ९०) इति नपुंसकलिङ्गता।** पोषति पुष पुष्टौ (भ्वा० प०), पुष्यति पुष पुष्टौ (दि० प०), पुष्णाति पुष पुष्टौ (क्र्या० प०), पोषयति (चु० उ०) वा इति पुष्करम्। 'पुषः कित्' (उ० ४। ४) इति करन्-प्रत्ययः। स च कित्। कित्त्वात् 'क्ङिति च' (पा० अ० १।१।५) इति निषेधात् 'पुगन्तलघूपधस्य च' (पा० अ० ७।२।८६) इति धातोः उपधायाः उकारस्य प्राप्तः ओ-गुणः न भवति। प्रत्यये नकारानुबन्धलोपः। अथवा पोषणं पुष्। पुष् धातोः 'सम्पदादिभ्यः क्विप्' (वा० पा० अ० ३।३।९४) इति क्विप्-प्रत्ययः। तस्य सर्वापहारि-लोपः। 'सर्वप्रातिपदिकेभ्यः स्वार्थे कन्' इति कन्-प्रत्ययः। नकारानुबन्धलोपः। पुष्कं पोषणं राति ददाति इति पुष्करम्। पुष्क + रा दाने (अ० प०), 'आतोऽनुपसर्गे कः' (पा० अ० ३। २। ३) इति क-प्रत्ययः। ककारानुबन्धलोपः। 'आतो लोप इटि च' (पा० अ० ६।४।६४) इति धातोः आकारस्य लोपः। 'व्योम पुष्करमम्बरम्', 'कबन्धमुदकं पाथः पुष्करं सर्वतो मुखम्', 'बिस-प्रसून-राजीव-पुष्कराम्भो-रुहाणि च', 'मूले पुष्कर-काश्मीर-पद्म-पत्राणि पौष्करे', 'पुष्करं करिहस्ताग्रे वाद्य-भाण्ड-मुंखे जले। व्योम्नि खड्गफले पद्मे तीर्थौषधि-विशेषयोः' इत्यमरः। 'पुष्करं पङ्कजे व्योम्नि पयः करि-कराग्रयोः। ओषधि-द्वीप-विहग-तीर्थ-रागोरगान्तरे। पुष्करं तूर्यवक्त्रे च काण्डे खड्गफले-ऽपि च' इति विश्वः। 'पुष्करं द्वीपतीर्थाहिखगराजौषधान्तरे। तूर्याग्न्यसिफले काण्डे शुण्डाग्रे खे जलेऽम्बुजे' इति हैमः। 'पुष्करं खेऽम्बुपद्मयोः। तूर्यवक्त्रे खड्गफले हस्तिहस्ताग्रकाण्डयोः। कुष्ठौषधि-द्वीपतीर्थ-भेदयोश्च नपुंसकम्। ना राग नाग-विहगनृप-भेदेषु वारुणौ' इति मेदिनी। 'पुष्करम् अन्तरिक्षनाम' (निघं० १।३)। 'पुष्करमन्तरिक्षं, पोषति भूतानि। उदकं पुष्करं पूजाकरं पूजयितव्यमिदमपीतरत्पुष्करमेतस्मादेव पुष्करं वपुष्करं वा' (निरु० ५।१४)।

पुष्पम् नपुं०। **इत्यत्र 'पाप-रूपोडुप-तल्प-शिल्प-पुष्प-शष्प-समीपान्तरीपाणि नपुंसके' (लि० सू० ७८) इति नपुंसकलिङ्गता।** पुष्यति इति पुष्पम्। पुष्प विकसने (दि० प०) 'नन्दिग्रहि-पचादिभ्यो०' (पा० अ० ३। १। १३४) इति अच्-प्रत्ययः। चकारानुबन्धलोपः। **अथवा** पुष्प्यते इति पुष्पम्। पुष्प विकसने (दि० प०) 'अकर्त्तरि च कारके संज्ञायाम्' (पा० अ० ३।३।१९) इति घञ्-प्रत्ययः। घकार-ञकारानुबन्धलोपः। 'स्त्रियः सुमनसः पुष्पं प्रसूनं कुसुमं सुमम्' 'स्याद् रजः पुष्पमार्त्तवम्' इति चामरः। 'पुष्पं विकसितकुसुमस्त्रीरजःसु नपुंसकम्' इति मेदिनी। 'पुष्पं विकासे आर्त्तवे। धनदस्य विमाने च कुसुमे नेत्ररुज्यपि' इति हैमः। 'पुष्पं पुष्पतेः' (निरु० ५।१४)।

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by S3 Foundation USA

पुस्तकम्, पुस्तकः नपुं०, पुं०। इत्यत्र **'कण्टकानीक-सरक-मोदक-चषक-मस्तक-पुस्तक-तडाक-निष्क-शुष्क-वर्चस्क-पिनाक-भाण्डक-पिण्डक-कटक-शण्डक-पिटक-तालक-फलक-कल्क-पुलाकानि नपुंसके च' (लि० सू० ६३) इति नपुंसकलिङ्गता पुँल्लिङ्गता च अथवा 'घृत-भूत-मुस्त-क्ष्वेलितैरावत-पुस्तक-बुस्त-लोहिताः' (लि० सू० १७७) इति पुँल्लिङ्गता नपुंसकलिङ्गता च।** पुस्त्यते इति पुस्तम्। पुस्त आदरादौ (चु० प०) 'सत्यापपाश' (पा० अ० ३। १। २५) इति णिच्-प्रत्ययः। णकार-चकारानुबन्धलोपः। 'एरच्' (पा० अ० ३। ३। ५६) इति अच्-प्रत्ययः। चकारानुबन्धलोपः। 'णेरनिटि' (पा० अ० ६। ४। ५१) इति णिच्-प्रत्ययस्य इकारस्य लोपः। पुस्तम् एव पुस्तकम्। स्वार्थे 'सर्वप्रातिकेभ्यः स्वार्थे कन्' इति कन्-प्रत्ययः। नकारानुबन्धलोपः। **अथवा** पुस्तं करोति पुस्तं कायति वा इति पुस्तकम्। पुस्त + डुकृञ् करणे (त० उ०), पुस्त + कै शब्दे (भ्वा० प०) 'आदेच उपदेशेऽशिति' (पा० अ० ६। १। ४५) इति कै धातोः ऐकारस्य आकारः। 'अन्येष्वपि दृश्यते' (पा० अ० ३। २। १०१) इति ड-प्रत्ययः। डकारानुबन्धलोपः। 'टेः' (पा० अ० ६। ४। १४३) इति कृ धातोः ऋकारस्य तथा कै धातोः आकारस्य च टेर्लोपः। 'पुस्तं लेप्यादिकर्मणि' इत्यमरः।

पूगः पुं०। **इत्यत्र 'अर्घ-पथि-मथ्यृभुक्षि-स्तम्ब-नितम्ब-पूगाः' (लि० सू० ११५) इति पुँल्लिङ्गता।** पुनाति पवते शोधयति मुखं यः सः अथवा पूयते शोध्यते मुखं येन सः पूगः। पूञ् पवने (क्र्या० उ०) पूङ् पवने (भ्वा० आ०) 'छा-पू-खडिभ्यः कित्' (उ० १। १२४) इति गन्-प्रत्ययः स च कित्। नकारानुबन्धलोपः। प्रत्ययस्य कित्त्वात् तस्मिन् परे 'सार्वधातुकार्धधातुकयोः' (पा० अ० ७। ३। ८४) इति धातोः ऊकारस्य ओ-गुणः 'क्ङिति च' (पा० अ० १। १। ५) इति निषेधात् न भवति। 'पूगः क्रमुक-वृन्दयोः' इत्यमरः। 'घोण्टा तु पूगः क्रमुको गुवाकः खपुरः' इति चामरः। 'पूगस्तु क्रमुके वृन्दे' इति मेदिनी। 'पूगः क्रमुक-सङ्घयोः' इति हैमः।

पूः स्त्री०। **इत्यत्र 'आशीर्धूःपूर्गीर्द्वारः' (लि० सू० २८) इति स्त्रीलिङ्गता।** पिपर्त्ति इति पूः। पृ पालन-पूरणयोः (जु० प०) 'भ्राज-भास-धुर्विद्युतोर्जि-पृ-जु-ग्रावस्तुवः क्विप्' (पा० अ० ३। २। १७७) इति क्विप्-प्रत्ययः। तस्य सर्वापहारिलोपः। 'उदोष्ठ्यपूर्वस्य' (पा० अ० ७। १। १०२) इति धातोः ॠकारस्य 'उरण् रपरः' (पा० अ० १। १। १) इति सहकारेण उर्-आदेशः। एवं पुर्-शब्दः निष्पद्यते। **अथवा** पूर्यते अनेन इति पूः। पुर अग्रगमने (तु० प०) 'सम्पदादिभ्यः क्विप्' (पा० अ० ३। ३। ९४)

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by S3 Foundation USA

इति क्विप्। तस्य सर्वापहारिलोपः। एवम् अपि पुर्-शब्दः निष्पद्यते। अस्य प्रथमैकवचने पूः भवति। 'पूः स्त्री पुरी-नगर्यौ वा पत्तनं-पुटभेदनम्' इत्यमरः।

पृषत् नपुं०। इत्यत्र **'वियज्जगत्-सकृत्-शकन्-पृषच्-छकृद्-यकृद्-उदश्वितः' (लि० सू० १६४) इति नपुंसकलिङ्गता।** पर्षति सिञ्चति इति पृषत्। पृषु सेचने (भ्वा० प०) 'वर्त्तमाने पृषद्-बृहन्-महज्-जगच्छतृवच्च' (उ० २। ८५) इति अति-प्रत्ययः, धातोः ऋकारस्य 'उरण् रपरः' (पा० अ० १। १। ५१) इति सहकारेण 'पुगन्त-लघूपधस्य च' (पा० अ० ७। ३। ८६) इति प्राप्तस्य अर्-गुणस्य अभावश्च। अति-प्रत्यये इकारानुबन्धलोपः। 'पृषन्ति बिन्दु-पृषताः पुमांसो विप्रुषः स्त्रियः' इत्यमरः। 'पृषन्मृगे पुमान् बिन्दौ न द्वयोः पृषतोऽपि ना। अनयोश्च त्रिषु श्वेतबिन्दुयुक्तेऽप्युभाविमौ' इति मेदिनी।

पृष्ठम् नपुं०। इत्यत्र **'काष्ठ-पृष्ठ-सिक्थोक्थानि' (लि० सू० ७१) इति नपुंसक-लिङ्गता।** पर्षति सिञ्चति पृष्यते सिच्यते वा इति पृष्ठम्। पृषु सेचने (भ्वा० प०) 'तिथ-पृष्ठ-गूथ-यूथ-प्रोथाः' (उ० २। १२) इति थक्-प्रत्ययः। ककारानुबन्धलोपः। प्रत्ययस्य कित्त्वात् तस्मिन् परे 'उरण् रपरः' (पा० अ० १। १। ५१) इति सहकारेण 'पुगन्तलघूपधस्य च' (पा० अ० ७। ३। ८६) इति धातोः ऋकारस्य प्राप्तः अर्-गुणः 'क्ङिति च' (पा० अ० १। १। ५) इति निषेधात् न भवति। 'ष्टुना ष्टुः' (पा० अ० ८। ४। ४१) इति थकारस्य ठकारः। **अथवा** स्पृशति स्पृश्यते वा इति पृष्ठम्। स्पृश संस्पर्शे (तु० प०) 'तिथ-पृष्ठ-गूथ-यूथ-प्रोथाः' (उ० २। १२) इति थक्-प्रत्ययः धातोः सकारस्य लोपः। **अथवा** पृच्छति पृच्छ्यते वा इति पृष्ठम्। प्रच्छ ज्ञीप्सायां (तु० प०) उक्त (उणादि २। १) सूत्रेण एव थक्-प्रत्ययः। ककारानुबन्धलोपः। 'च्छ्वोः शूड-नुनासिके च' (पा० अ० ६। ४। १९) इति प्रच्छ् धातोः च्छकारस्य शकारादेशः। 'ग्रहि-ज्या-वयि-व्यधि-वष्टि-विचति-वृश्चति-पृच्छति-भृज्जतीनां ङिति च' (पा० अ० ६। १। १६) इति धातोः रेफस्य ऋकारः सम्प्रसारणम्। 'सम्प्रसारणाच्च' (पा० अ० ६। १। १०८) इति अकारस्य पूर्वरूपम्। 'व्रश्च-भ्रस्ज-सृज-मृज-यज-राज-भ्राज-च्छशां च' (पा० अ० ८। २। ३६) इति स्पृश् धातोः तथा प्रच्छ् धातोः च्छकार-स्थानीयस्य शकारस्य ष्-आदेशः। 'ष्टुना ष्टुः' (पा० अ० ८। ४। ४१) इति थक्-प्रत्ययस्य थकारस्य ठकारादेशः। 'पृष्ठं तु चरमं तनोः' इत्यमरः। 'पृष्ठं चरममात्रे स्यात् देहस्यावयवान्तरे' इति मेदिनी। 'पृष्ठैर्वै देवाः स्वर्गं लोकमस्पृशन्' (कौषी० ब्रा० २४। ८)। 'स्वर्गो लोकः पृष्ठानि' (तां० ब्रा० १९। १५। ६)। एतानि खलु वै सामानि यत्

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by S3 Foundation USA

पृष्ठानि' (तैत्ति० ब्रा० १।८।८।३)। 'स्वराणि पृष्ठानि भवन्ति' (कौषी० ब्रा० २४। ८)। 'तदाहुर्नाना लोकानि पृष्ठानि' (तां० ब्रा० १६।१५।९)। 'पिता वै वामदेव्यं पुत्राः पृष्ठानि' (तां० ब्रा० ७।९।१)। 'सर्वाणि हि पृष्ठानीन्द्रस्य निष्केवल्यानि' (तां० ब्रा० ७। ८।५)। 'सप्त पृष्ठानि' (शत० ब्रा० ९।५।२।८)। 'ऋतवो वै पृष्ठानि' (शत० ब्रा० १३।३।२।१)। 'आत्मा वै पृष्ठानि' (कौषी० ब्रा० २५।१२)। 'अन्नं पशवः पृष्ठानि' (तां० ब्रा० १६।१५।८)। 'ऐन्द्राणि पृष्ठानि' (काठ० सं० ३४।१६)। 'तेजो ब्रह्मवर्चसं श्रीर्वै पृष्ठानि' (ऐत० ब्रा० ६।५)। 'वीर्यं वै पृष्ठानि' (तां० ब्रा० ४।८।७)। 'एषा ह वा. उत्तरावती श्रीर्यत् पृष्ठानि' (जैमि० ब्रा० २।४२५)। 'चक्रिणौ पृष्ठानि' (मैत्रा० सं० ४। ७।३) 'ओज एव वीर्यं पृष्ठानि' (तै० सं० ७।३।५।३)। 'यज्ञो वै पृष्ठानि' (काठ० सं० ३२।६)। 'पृष्ठानि वै यज्ञस्य दोहः' (काठ० सं० ३३।८)।

पोता स्त्री०। **इत्यत्र 'ऋकारान्ता मातृ-दुहितृ-स्वसृ-पोतृ-ननान्दरः' (लि० सू० ३) इति स्त्रीलिङ्गता।** पवते पुनाति वा इति पोता। पूङ् पवने (भ्वा० आ०), पूञ् पवने (क्र्या० उ०) 'नप्तृ-नेष्टृ-त्वष्टृ-होतृ-पोतृ-भ्रातृ-जामातृ-मातृ-पितृ-दुहितृ' (उ० २।९७) इति तृन्-प्रत्ययः अथवा तृच्-प्रत्ययः। तृन्-प्रत्यये नकारानुबन्धलोपः। तृच्-प्रत्यये चकारानुबन्धलोपः।. 'सार्वधातुकार्धधातुकयोः' (पा० अ० ७।३।८४) इति धातोः ऊकारस्य ओ-गुणः। एवं पोतृ-शब्दः व्युत्पद्यते। तस्य प्रथमैकवचने पोता भवति। 'पोता ऋत्विग्भेदः' इति सिद्धान्तकौमुद्याम् उणादौ।

प्रतिपद् स्त्री०। **इत्यत्र 'प्रतिपद्-आपद्-विपत्-सम्पच्छरत्-संसत्-परिषद्-उषः-संवित्-क्षुत्-पुन्-मुत्-समिधः' (लि० सू० २७) इति स्त्रीलिङ्गता।** प्रतिपद्यते उपक्रम्यते अनया मासादिः अथवा प्रतिपदनम् इति प्रतिपद्। प्रति + पद गतौ (दि० आ०) 'सम्पदादिभ्यः क्विप्' (वा० पा० अ० ३।३।९४) इति क्विप्-प्रत्ययः। तस्य सर्वापहारिलोपः। 'प्रतिपद् द्वे इमे स्त्रीत्वे' इत्यमरः। 'प्रेक्षोपलब्धिश्चित्संवित्प्रतिपज्ज्ञप्ति-चेतनाः' इति चामरः।

प्रपदः पुं०। **इत्यत्र 'क्रतु-पुरुष-कपोल-गुल्फ-मेघाभिधानानि' (लि० सू० ४९) इति गुल्फाभिधानत्वात् पुँल्लिङ्गता।** प्रपदनं प्रपद्यते वा इति प्रपदः। प + पद गतौ (दि० आ०) 'भावे' (पा० अ० ३।३।१८) इति भावे अथवा 'अकर्त्तरि च कारके संज्ञायाम्' (पा० अ० ३।३।१९) इति कर्मकरणयोः घञ्-प्रत्ययः। घकार-ञकारानु-बन्धलोपः। संज्ञा-पूर्वकविधेः अनित्यत्वात् 'अत उपधायाः' (पा० अ० ७।२।११६) इति धातोः उपधायाः अकारस्य प्राप्तः आ-वृद्ध्यादेशः न। 'नन्दि-ग्रहि-पचादिभ्यो०'

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by S3 Foundation USA

(पा० अ० ३।१।१३४) इति अच्-प्रत्ययः। चकारानुबन्धलोपः। 'पादाग्रे प्रपदम्' इत्यमरः। प्र प्रकृष्टं प्रारब्धं प्रगतं वा पदम् इति प्रपदम्। प्र इत्यस्य 'प्रादयो गताद्यर्थे प्रथमया' (वा० पा० अ० २।२।१८) इति समासः। 'पदं व्यवसिति-त्राण-स्थान-लक्ष्माङ्घ्रि-वस्तुषु' इत्यमरः। 'श्लोकपादे पदं क्लीबं पुँल्लिङ्गः किरणे पुनः' इति मेदिनी। 'पदं शब्दे च वाक्ये च व्यवसायापदेशयोः। पादतच्चिह्नयोः स्थानत्राणयोरङ्कवस्तुषु' इति विश्वः।

प्रभुः पुं०। **इत्यत्र 'उकारान्तः' (लि० सू० ५१) इति पुँल्लिङ्गता।** प्रभवति इति प्रभुः। प्र + भू सत्तायां (भ्वा० प०) 'वि-प्र-सम्भ्यो ड्वसंज्ञायाम्' (पा० अ० ३।२।१८०) इति डु-प्रत्ययः। डकारानुबन्धलोपः। डित्त्वात् तस्मिन् परे 'टेः' (पा० अ० ६।४।४३) इति धातोः ऊकारस्य टेर्लोपः। 'अधिभूर्नायको नेता प्रभुः परिवृढोऽधिपः' इत्यमरः। 'यज्ञ इव प्रभुर्भूयासम्' (ऐत० आ० ५।१।१)

प्रयुतः, प्रयुतम् पुं०, नपुं०। **इत्यत्र 'शतायुतप्रयुताः पुंसि च' (लि० सू० १४५) इति पुँल्लिङ्गता नपुंसकलिङ्गता च।** प्रयौति स्म इति प्रयुतः प्रयुतं वा। प्र + यु मिश्रणामिश्रणयोः (दि० प०) 'निष्ठा' (पा० अ० २।२।३६) इति क्त-प्रत्ययः। ककारानुबन्धलोपः। 'अयुतं नियुतं प्रयुतं तत्तदभ्यस्तम्' (निरु० ३।१०)।

प्रस्थः, प्रस्थम् पुं०, नपुं०। **इत्यत्र 'मानाभिधानानि' (लि० सू० १०३) इति पुँल्लिङ्गता एवं 'व्रज-कुञ्ज-कुच-कूर्च-प्रस्थ-दर्पार्भार्धर्च-दर्भ-पुच्छाः' (लि० सू० १७९) इति पुँल्लिङ्गता नपुंसकलिङ्गता च।** प्रतिष्ठते अस्मिन् अनेन वा इति प्रस्थः प्रस्थं वा। प्र + ष्ठा गतिनिवृत्तौ (भ्वा० प०) 'घञर्थे क-विधानम्' (वा० ३।३।५८) इति क-प्रत्ययः। ककारानुबन्धलोपः। 'आतो लोप इटि च' (पा० अ० ६।४।६४) इति धातोः आकारस्य लोपः। 'स्नुः प्रस्थः सानुरस्त्रियौ' इत्यमरः। 'प्रस्थोऽस्त्री सानुमानयोः' इति चामरः। 'प्रस्थोऽस्त्रियां मानभेदे सानावुन्मितवस्तुनि' इति मेदिनी। 'अस्त्रियामाढकद्रोणौ खारी वाहो निकुञ्चकः। कुडवः प्रस्थ इत्याद्याः परिमाणार्थकाः पृथक्' इत्यमरः।

प्रातिपदिकम् नपुं०। **इत्यत्र 'चिबुक-शालूक-प्रातिपदिकांशुकोल्मुकानि नपुंसके' (लि० सू० ६२) इति नपुंसकलिङ्गता।** प्रतिपदया निर्वृत्तम् इति प्रातिपदिकम् प्रतिपदा शब्दात् 'तेन निर्वृत्तम्' (पा० अ० ५।१।७९) इति ठञ्-प्रत्ययः। ञकारानुबन्धलोपः। 'ठस्येकः' (पा० अ० ७।३।५०) इति ठस्य इकादेशः। 'तद्धितेष्वचामादेः' (पा० अ० ७।२।११७) इति आद्यचः वृद्धिः। 'यस्येति च' (पा० अ० ६।४।१४८) इति आकारस्य लोपः।

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by S3 Foundation USA

प्रावृट् स्त्री०। इत्यत्र **'प्रावृड्-विप्रुड्-रुड्-विट्-त्विषः' (लि० सू० २३) इति स्त्रीलिङ्गता।** वर्षणं वृट्। वृषु सेचने (भ्वा० प०) 'सम्पदादिभ्यः क्विप्' (वा० पा० अ० ३। ३। ९४) इति क्विप्-प्रत्ययः। तस्य सर्वापहारिलोपः। प्र = प्रकृष्टा वृट् अत्र इति प्रावृट्। प्र + वृष् इति स्थितौ 'नहि-वृति-वृषि-व्यधि-रुचि-सहि-तनिषु क्वौ' (पा० अ० ६। ३। ११६) इति प्र इत्यस्य अकारस्य आ-दीर्घः। **अथवा** प्र = प्रकर्षेण आ समन्तात् वर्षन्ति मेघाः यस्मिन् ऋतौ सः ऋतुः प्रावृट्। प्र + आ + वृषु सेचने (भ्वा० प०) 'क्विप् च' (पा० अ० ३। २। ७६) इति क्विप्-प्रत्ययः। तस्य सर्वापहारिलोपः। 'अकः सवर्णे दीर्घः' (पा० अ० ६। १। १०१) इति अकारस्य आकारस्य च आ-दीर्घः। एवम् अपि प्रावृष् अयं शब्दः व्युत्पद्यते। अस्य प्रथमैकवचने प्रावृट् भवति। 'स्त्रियां प्रावृट् स्त्रियां भूम्नि वर्षाः' इत्यमरः।

प्रियङ्गुः स्त्री०। **इत्यत्र 'धनु-रज्जु-कुहू-सरयु-तलु-रेणु-प्रियङ्गवः स्त्रियाम्' (लि० सू० ५२) इति स्त्रीलिङ्गता।** प्रियं गच्छति इति प्रियङ्गुः। प्रियम् + गम्लृ गतौ (भ्वा० प०) 'उणादयो बहुलम्' (पा० अ० ३। ३। १) इति उणादीनां बाहुलकत्वात् 'श्मनि श्रयतेर्डुन्' (उ० ५। २८) इति डुन्-प्रत्ययः। डकार-नकारानुबन्धलोपः। डित्त्वात् तस्मिन् परे 'टेः' (पा० अ० ६। ४। १४३) इति धातोः अम् इत्यस्य टेर्लोपः। प्रियम् इत्यस्य मकारस्य 'मोऽनुस्वारः' (पा० अ० ८। ३। २३) इति अनुस्वारः। 'वा पदान्तस्य' (पा० अ० ८। ४। ५९) इति अनुस्वारस्य विकल्पेन परसवर्णः ङकारः। एवं प्रियङ्गु तथा प्रियंगु इति निष्पद्यते। तस्य प्रथमैकवचने प्रियङ्गुः तथा प्रियंगुः भवति। 'स्त्रियौ कङ्गुप्रियङ्गू द्वे' इत्यमरः। 'लता गोवन्दनी गुन्द्रा प्रियङ्गु फलिनी फली' इति चामरः। 'प्रियङ्गुः स्त्री राजिका-कणयोरपि। फलिन्यां कङ्गुसस्ये च' इति मेदिनी।

प्रोथम्, प्रोथः नपुं०, पुं०। **इत्यत्र 'तीर्थ-प्रोथ-यूथ-गाथानि नपुंसके च' (लि० सू० ७३) इति नपुंसकलिङ्गता पुँल्लिङ्गता च।** यत् यो वा प्रवते येन वा प्रवते गच्छति तत् प्रोथं सः प्रोथः वा। प्रुङ् गतौ (भ्वा० आ०) 'तिथ-पृष्ठ-गूथ-यूथ-प्रोथाः' (उ० २। १२) इति थक्-प्रत्ययः। ककारानुबन्धलोपः। प्रत्ययस्य कित्त्वे अपि निपातनात् एव अनेन सूत्रेण धातोः उकारस्य ओ-गुणः अपि भवति। अन्यथा 'क्ङिति च' (पा० अ० १। १। ५) इति निषेधात् गुणः न सम्भवति। **अथवा** प्रोथति प्रोथते वा इति प्रोथं प्रोथः वा। प्रोथृ पर्याप्तौ (भ्वा० उ०) 'नन्दि-ग्रहि-पचादिभ्यो०' (पा० अ० ३। १। १३४) इति अच्-प्रत्ययः। चकारानुबन्धलोपः। 'प्रोथमस्त्री तुरङ्गास्ये प्रोथः प्रस्थित उच्यते' इति सिद्धान्तकौमुद्याम् उणादौ। 'घोणा तु प्रोथमस्त्रियाम्' इत्यमरः। 'प्रोथोऽस्त्री हय-घोणायां ना कट्यामध्वगे त्रिषु' इति मेदिनी।

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by S3 Foundation USA

फलकम्, फलकः नपुं०, पुं०। इत्यत्र **'कण्टकानीक-सरक-मोदक-चषक-मस्तक-पुस्तक-तडाक-निष्क-शुष्क-वर्चस्क-पिनाक-भाण्डक-पिण्डक-कटक-शण्डक-पिटक-तालक-फलक-पुलाकानि नपुंसके च' (लि० सू० ६३) इति नपुंसकलिङ्गता पुँल्लिङ्गता च।** फलति इति फलकं फलकः वा। ञिफला विशरणे (भ्वा० प०), फल निष्पत्तौ (भ्वा० प०) 'कृञादिभ्यः संज्ञायां वुन्' (उ० ५। ३५) इति वुन्-प्रत्ययः। नकारानुबन्धलोपः। 'युवोरनाकौ' (पा० अ० ७। १। १) इति वु-स्थाने अकादेशः। 'फलकोऽस्त्री फलं चर्म' इत्यमरः।

फेनः पुं०। इत्यत्र **'नोपधः' (लि० सू० ७४) इति पुँल्लिङ्गता।** स्फायते वर्धते इति फेनः। स्फायी वृद्धौ (भ्वा० आ०) 'फेन-मीनौ' (उ० ३। ३) इति नक्-प्रत्ययः एवं धातोः फे इति आदेशः। ककारानुबन्धलोपः। 'हिण्डिरोऽब्धिकफः फेनः' इत्यमरः।

बडिशम् नपुं०। इत्यत्र **'द्वन्द्व-बर्ह-दुःख-बडिश-पिच्छ-बिम्ब-कुटुम्ब-कवच-वर-शर-वृन्दारकाणि' (लि० सू० १६९) इति नपुंसकलिङ्गता।** बलिनः मत्स्यान् श्यति तनूकरोति इति बलिशं बडिशं वा। बलिन् + शो तनूकरणे (दि० प०) 'आदेच उपदेशेऽशिति' (पा० अ० ६। १। ४५) इति धातोः ओकारस्य आकारः। 'आतोऽनुपसर्गे कः' (पा० अ० ३। २। ३) इति क-प्रत्ययः। ककारानुबन्धलोपः। 'आतो लोप इटि च' (पा० अ० ६। ४। ६४) इति धातोः आकारस्य लोपः। 'नलोपः प्रातिपदिकान्तस्य' (पा० अ० ८। २। ७) इति बलिन् इत्यस्य नकारस्य लोपः। एवं बलिश-शब्दः व्युत्पद्यते। ड-लयोः अभेद-स्मरणात् बडिश इत्यपि भवति। 'बलिशं मत्स्यभेदनम्' इत्यमरः।

बर्हम् नपुं०। इत्यत्र **'द्वन्द्व-बर्ह-दुःख-बडिश-पिच्छ-बिम्ब-कुटुम्ब-कवच-वर-शर-वृन्दारकाणि' (लि० सू० १६९) इति नपुंसकलिङ्गता।** बर्हति वर्धते इति बर्हम्। बृह वृद्धौ (भ्वा० प०) 'नन्दि-ग्रहि-पचादिभ्यो०' (पा० अ० ३। १। १३४) इति अच्-प्रत्ययः। चकारानुबन्धलोपः। 'पुगन्तलघूपधस्य च' (पा० अ० ७। ३। ८६) इति धातोः उपधायाः ऋकारस्य 'उरण् रपरः' (पा० अ० १। १। ५१) इति सहकारेण अर्-गुणः। एवं बर्ह-शब्दः निष्पद्यते। **अथवा** बर्हते हिनस्ति इति बर्हम्। बर्ह हिंसायाम् (भ्वा० आ०) अत्र अपि पूर्ववत् अच् प्रत्ययः **अथवा** बर्ह्यते हिंस्यते अनेन इति बर्हम् बर्ह् हिंसायाम् (भ्वा० आ०) 'अकर्त्तरि च कारके संज्ञायाम्' (पा० अ० ३। ३। १९) इति करणे घञ्-प्रत्ययः। घकार-ञकारानुबन्धलोपः। 'शिखण्डश्च पिच्छबर्हे नपुंसके' इत्यमरः। 'दलेऽपि बर्हम्' इति चामरः। 'बर्हं पिच्छे दलेऽपि [illegible]म्' इति मेदिनी।

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by S3 Foundation USA

बलम् नपुं०। इत्यत्र **'बल-कुसुम-शुल्ब-पत्तन-रणाभिधानानि' (लि० सू० १५८) इति नपुंसकलिङ्गता।** बलति वलते वल्यते वा अनेन इति बलम्। बल प्राणने (भ्वा० प०), वल संचरणे (भ्वा० आ०) 'नन्दि-ग्रहि-पचादिभ्यो०' (पा० अ० ३। १। १३४) इति अच्-प्रत्ययः। चकारानुबन्धलोपः। **अथवा** 'अकर्त्तरि च कारके संज्ञायाम्' (पा० अ० ३। १। १९) इति घञ्-प्रत्ययः। घकार-ञकारानुबन्धलोपः। संज्ञापूर्वकविधेरनित्यवात् 'अत उपधायाः' (पा० अ० ७। २। ११६) इति धातोः उपधायाः अकारस्य आ-वृद्धिर्न। **अथवा** 'पुंसि संज्ञायां घः प्रायेण' (पा० अ० ३। ३। ११८) इति घ-प्रत्ययः। घकारानुबन्धलोपः। व-बयोः अभेदात् वलधातोः बलं भवति। 'स्थौल्य-सामर्थ्य-सैन्येषु बलं ना काकसीरिणोः' एवं 'द्रविणं तरः सहोबलशौर्याणि स्थाम शुष्मं च' तथा 'वरूथिनी बलं सैन्यम्' इत्यमरः। 'बलं गन्धरसे रूपे स्थामनि स्थौल्य-सैन्ययोः। पुमान् हलायुधे दैत्यप्रभेदे वायसेऽपि च। बलयुक्तेऽन्यलिङ्गः स्याद्वाट्यालके तु योषिति' इति मेदिनी। 'बलं गन्धरसे रूपे स्थामनि स्थौल्यसैन्ययोः। बलो हलायुधे दैत्यभेदे बलिनि वायसे' इति विश्वः।

बलिः पुं०। इत्यत्र **'ऋषि-राशि-दृति-ग्रन्थि-क्रिमि-ध्वनि-बलि-कौलि-मौलि-रवि-कवि-कपि-मुनयः' (लि० सू० १०९) इति पुँल्लिङ्गता।** बलति प्राणिति, वलते संवृणोति संचरति वा इति बलिः। बल प्राणने (भ्वा० प०), वल संवरणे संचरणे च (भ्वा० आ०) 'सर्वधातुभ्य इन्' (उ० ४। ११९) इति इन्-प्रत्ययः। नकारानुबन्धलोपः। वबयोरभेदात् वलधातोरपि बलिः इत्येव भवति। 'पाठो होमश्चातिथीनां सपर्या तर्पणं बलिः' इत्यमरः। 'करोपहारयोः पुंसि बलिः प्राण्यङ्गजे स्त्रियाम्' इति चामरः। 'उपहारे पुमानस्त्री जरया श्लथ-चर्मणि। गृहदारुप्रभेदे च जठरावयवेऽपि च' इति मेदिनी। 'अर्थागमे भवेदायो भागधेयो बलिः करः' इति हलायुधः। 'बलिर्दैत्योपहारयोः। करे चामरदण्डे च गृहदारुशरांशयोः। त्वक्सङ्कोचे गन्धके च' इति हैमः। **अथवा** वर्णयति वर्ण्यते वा यः सः बलिः। वर्णिः सौत्रः धातुः। ततः 'वर्णेर्बलिश्चाहिरण्ये' (उ० ४। १२५) इति इन्-प्रत्ययः स च कित्, धातोः बलिरादेशः। प्रत्यये नकारानुबन्धलोपः। धातोः इदित्त्वात् 'इदितो नुम् धातोः' (पा० अ० ७। १। ५८) इति नुम्-आगमः। उकार-मकारानुबन्धलोपः। इन्-प्रत्ययस्य कित्त्वात् तस्मिन् परे 'अनिदितां हल उपधायाः क्ङिति' (पा० अ० ६। ४। २४) इति नुम्-आगमस्य नकारस्य लोपः। व-बयोः ऐक्यात् वलिः एव बलिः अपि जायते। हिरण्यार्थे तु वर्णिः इत्येव भवति। 'वर्णिः सुवर्णम्' इति सिद्धान्तकौमुद्याम् उणादौ।

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by S3 Foundation USA

बस्तिः पुं०। इत्यत्र **'सारथ्यतिथि-कुक्षि-बस्ति-पाण्यञ्जलयः' (लि० सू० ११७) इति पुँल्लिङ्गता**। वसति मूत्रं यत्र वस्ते आच्छादयति या, वस्यते वा यया सा वस्तिः। वस निवासे (भ्वा० प०) वस आच्छादने (अ० आ०) 'वसेस्तिः' (उ० ४। १८) इति ति-प्रत्ययः। व-बयोः ऐक्यात् वस्तिः एव बस्तिः जायते। 'बस्तिनाभेरधो द्वयोः' 'वस्तयः स्युर्दशासूत्रे' इति सिद्धान्तकौमुद्याम् उणादौ। 'वस्तिर्द्वयोर्निरूहे नाभ्यधो-भूमिदशासु च' इति मेदिनी।

बाणम्, बाणः नपुं०, पुं०। इत्यत्र **'बाण-काण्डौ नपुंसके च' (लि० सू० ४७) इति नपुंसकलिङ्गता पुँल्लिङ्गता च**। बणनं बाणः। बाणः अस्ति अस्य इति बाणं बाणः वा। बण शब्दे (भ्वा० प०) 'भावे' (पा० अ० ३। ३। १८) इति घञ्-प्रत्ययः। घकार-ञकारानुबन्धलोपः। 'अत उपधायाः' (पा० अ० ७। २। ११६) इति धातोः उपधायाः अकारस्य आ-वृद्धिः। एवं बाण-शब्दः व्युत्पद्यते। बाणः शब्दः अस्ति अस्य अस्मिन् अर्थे बाण-शब्दात् 'अर्श आदिभ्योऽच्' (पा० अ० ५। २। १२७) इति अच्-प्रत्ययः। चकारानुबन्धलोपः। 'शकन्ध्वादिषु पररूपं वाच्यम्' (वा० पा० अ० १। १। ९४) इति णकारोत्तर-वर्त्तिनः अकारस्य पररूपम्। **अथवा** यद् बणति शब्दायते तद् बाणं, यः बंणति शब्दायते सः बाणः वा। बण शब्दे (भ्वा० प०) 'नन्दि-ग्रहि-पचादिभ्यो०' (पां० अ० ३। १। १३४) इति अच्-प्रत्ययः। चकारानुबन्धलोपः। एवं बण-शब्दः व्युत्पद्यते। बणः एव बाणः। बण-शब्दात् 'प्रज्ञादिभ्यश्च' (पा० अ० ५। ४। ३८) इति स्वार्थे अण्-प्रत्ययः। णकारानुबन्धलोपः। 'यस्येति च' (पा० अ० ६। ४। १४८) इति णकारोत्तर-वर्त्तिनः अकारस्य लोपः। 'तद्धितेष्वचामादेः' (पा० अ० ७। २। ११७) इति बकारोत्तर-वर्त्तिनः अकारस्य आ-वृद्धिः। एवं बाण-शब्दः निष्पद्यते। 'पृषत्क-बाण-विशिखा अजिह्मग-खगाशुगाः' इत्यमरः। 'बाणो बलिसुते शरे' इति चामरः। 'बाणः स्याद् गोस्तने दैत्य-भेदे केवल-काण्डयोः। बाणा तु बाणमूले स्त्री नील-झिण्ट्यां पुनर्द्वयोः' इति मेदिनी।

बाहुः स्त्री०, पुं०। इत्यत्र **'इषु-बाहू स्त्रियां च' (लि० सू० ४६) इति स्त्रीलिङ्गता पुँल्लिङ्गता च**। बाधते इति बाहुः। बाधृ विलोडने (भ्वा० प०) 'अर्जि-दृशि-कम्यमि-पंसि-बाधा-मृजि-पशि-तुग्-धुग्-दीर्घ-हकाराश्च' (उ० १। २७) इति कु-प्रत्ययः, धातोः धकारस्य हकारादेशश्च। प्रत्यये उकारानुबन्धलोपः। **अथवा** बाहते प्रयतते येन याभ्यां वा इति बाहुः। बाह प्रयतने (भ्वा० आ०) 'मृगय्वादयश्च' (उ० १। ३७) इति कु-प्रत्ययः। ककारानुबन्धलोपः। **अथवा** उह्यते प्राप्यते येन याभ्यां वा इति बाहुः। वह

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by S3 Foundation USA

प्रापणे (भ्वा० आ०) 'उणादयो बहुलम्' (पा० अ० ३।३।१) इति उणादीनां बाहुलकत्वात् 'कृ-वा-पा-जि-मि-स्वदि-साध्यशूभ्य उण्' (उ० १।१) इति उण्-प्रत्ययः। णकारानुबन्धलोपः। 'अत उपधायाः' (पा० अ० ७।३।११६) इति धातोः उपधायाः अकारस्य आ-वृद्धिः। एवं वाहु-शब्दः व्युत्पद्यते। व-बयोः अभेद-स्मरणात् वाहुः एव बाहुः भवति। 'भुज-बाहू प्रवेष्टो दोः स्यात्' इत्यमरः। 'बाहुवैं बलम्, बाहुवैं वीर्यम्' (शत० ब्रा० ५।४।१।१)। 'पञ्चदशौ हि बाहू' (शत० ब्रा० ८।४।४।६)। 'वीर्यं वा एतद् राजन्यस्य यद् बाहू' (शत० ब्रा० ५।४।१।१७)। 'तस्माद् बाहुवीर्यो (राजन्यः) बाहुभ्यां हि सृष्टः' (तां० ब्रा० ६।१।८)। 'तस्माद् राजा बाहुबली भावुकः' (शत० ब्रा० १३।२।२।५)। 'बाहू वै स्रुचौ' (शत० ब्रा० ७।४।१।३६)। 'बाहू वै मित्रावरुणौ' (शत० ब्रा० ५।४।१।१५)। 'बाहू बाहुनाम' (निघं० २।४)। 'बाहू कस्मात् ? प्रबाधते आभ्यां कर्माणि' (निरु० ३।८)।

बिडालः, बिडालम् पुं०, नपुं०। इत्यत्र **'शील-मूल-मङ्गल-साल-कमल-तल-मुसल-कुण्डल-पलल-मृणाल-वाल-निगल-पलाल-बिडाल-खिल-शूलाः पुंसि च' (लि० सू० १४३) इति पुँल्लिङ्गता नपुंसकलिङ्गता च।** वेडति आक्रोशति इति बिडालः। विड आक्रोशे (भ्वा० प० मैत्रेय धातुपाठे) 'तमि-विशि-विडि-मृणि-कुलि-कपि-पलि-पञ्चिभ्यः कालन्' (उ० १।११८) इति कालन्-प्रत्ययः। ककार-नकारानुबन्धलोपः। कित्त्वात् 'क्ङिति च' (पा० अ० १।१।५) इति निषेधात् 'पुगन्त-लघूपधस्य च' (पा० अ० ७।३।८३) इति धातोः उपधायाः इकारस्य प्राप्तः ए-गुणः न भवति। **अथवा** वेडनं विड् आक्रोशः। विड आक्रोशे 'क्विप् च' (पा० अ० ३।२।७६) इति क्विप्-प्रत्ययः। तस्य सर्वापहारिलोपः। विडम् आ=समन्तात् लाति इति विडालः। विड् + आ + ला आदाने (अ० प०) 'आतश्चोपसर्गे' (पा० अ० ३।१।१३६) इति क-प्रत्ययः। ककारानुबन्धलोपः। 'आतो लोप इटि च' (पा० अ० ६।४।६४) इति धातोः आकारस्य लोपः। **अथवा** वेडनं विड् आक्रोशः। विडा आक्रोशेन आ=समन्तात् अलति भूषितः भवति दूरे वा करोति इति विडालः। विड् + आ + अल भूषण-पर्याप्ति-वारणेषु (भ्वा० प०) 'नन्दि-ग्रहि-पचादिभ्यो०' (पा० अ० ३।१।१३४) इति अच्-प्रत्ययः। चकारानुबन्धलोपः। 'अकः सवर्णे दीर्घः' (पा० अ० ६।१।१०१) इति आकारस्य अकारस्य च आ-दीर्घः। वकार-बकारयोः अभेदात् विडालः एव बिडालः अपि भवति। 'ओतुर्विडालो मार्जारो वृषदंशक आखुभुक्' इत्यमरः। 'विडालो नेत्रपिण्डे स्यात् वृषदंशके पुमान्' इति मेदिनी।

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by S3 Foundation USA

बिम्बम् नपुं०। इत्यत्र **'द्वन्द्व-बर्ह-दुःख-बडिश-पिच्छ-बिम्ब-कुटुम्ब-कवच-वर-शर-वृन्दारकाणि' (लि० सू० १६९) इति नपुंसकलिङ्गता।** वेति वीयते वा इति बिम्बम्। 'वी गति-प्रजन-कान्त्यसन-खादनेषु' (उ० ४। ९६) इति बन्-प्रत्ययः, धातोः नुम्-आगमः ईकारस्य ह्रस्व इकारः वकारस्य बकारादेशश्च। बन्-प्रत्यये नकारानुबन्धलोपः। नुम्-आगमे उकार-ञकारानुबन्धलोपः। 'नश्चापदान्तस्य झलि' (पा० अ० ८। ३। २४) इति नुम्-आगमस्य नकारस्य अनुस्वारः। 'अनुस्वारस्य ययि परसवर्णः' (पा० अ० ८।४।५८) इति अनुस्वारस्य परसवर्णः मकारः। एवं बिम्बशब्दः निष्पद्यते। **अथवा** बिम्बति इति बिम्बम्। बिबि मर्दने निवासे (काशकृत्स्न-धातुपाठे भ्वा० प०) 'नन्दि-ग्रहि-पचादिभ्यो०' (पा० अ० ३। ३। १३४) इति अच्-प्रत्ययः। चकारानुबन्धलोपः। धातोः इदित्त्वात् 'इदितो नुम् धातोः' (पा० अ० ७। १। ५८) इति नुम्-आगमः उकार-मकारानुबन्धलोपः। पूर्ववत् नकारस्य अनुस्वारः, अनुस्वारस्य च परसवर्णः मकारः। 'बिम्बोऽस्त्री मण्डले त्रिषु' इत्यमरः। 'बिम्बोऽस्त्री मण्डले चाकृतौ फले' इति चामरः। 'बिम्बं तु प्रतिबिम्बं स्यान्मण्डले बिम्बिकाफले' इति हैमः। 'बिम्बं तु प्रतिबिम्बेऽपि मण्डले पुंनपुंसकम्' इति मेदिनी।

बिसम् नपुं०। इत्यत्र **'पनस-बिस-बुस-साहसानि नपुंसके' (लि० सू० ९७) इति नपुंसकलिङ्गता।** विस्यति प्रेरयति इति विसम्। विस प्रेरणे (दि० प०) 'इगुपध-ज्ञा-प्री-किरः कः' (पा० अ० ३। १। १३६) इति क-प्रत्ययः। ककारानुबन्धलोपः। कित्त्वात् 'क्ङिति च' (पा० अ० १। १। ५) इति निषेधात् 'पुगन्तलघूपधस्य च' (पा० अ० ७। ३। ८६) इति धातोः उपधायाः इकारस्य प्राप्तः ए-गुणः न भवति। व-बयोः अभेद-स्मरणात् विसम् एव बिसम् अपि भवति। 'मृणालं बिसम्' इत्यमरः।

बीजम् नपुं०। इत्यत्र **'श्राद्ध-कुलिश-दैव-पीठ-कुण्डाङ्काङ्ग-दधि-सक्थ्यक्ष्या-स्पदाकाश-कण्ठ-बीजानि' (लि० सू० १६६) इति नपुंसकलिङ्गता।** वि=विशेषेण ईजते=गच्छति इति बीजम्। वि + ईज गति-कुत्सनयोः (भ्वा० आ०) 'नन्दि-ग्रहि-पचादिभ्यो०' (पा० अ० ३। १। १३४) इति अच्-प्रत्ययः। चकारानुबन्धलोपः। 'अकः सवर्णे दीर्घः' (पा० अ० ६। १। १०१) इति इकारस्य ईकारस्य च ई-दीर्घः। **अथवा** वीज्यते अनेन इति वीजम्। वि + ईज गति-कुत्सनयोः (भ्वा० आ०) 'अकर्त्तरि च कारके संज्ञायाम्' (पा० अ० ३। ३। १९) इति घञ्-प्रत्ययः। घकार-ञकारानुबन्धलोपः। पूर्ववत् इकारस्य ईकारस्य च ई-दीर्घः। 'चजोः कु घिण्ण्यतोः' (पा० अ० ७। ३। ५२) इति धातोः जकारस्य गकारः कुत्वं तु न (निष्ठायामनिट इति वक्तव्यम्) (पा० अ० ७। ३। ५२) इति वार्त्तिकानुसारेण निष्ठायां यः धातुः अनिट् भवति तस्मिन् एव धातौ चजोः

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by S3 Foundation USA

कुत्वविधानेन अत्र तथा न सत्त्वात् ईज धातुः निष्ठायां सेट् भवति अनिट् न भवति। **अथवा** वजति गच्छति इति वीजम्। वज गतौ 'नन्दि-ग्रहि-पचादिभ्यो०' (पा० अ० १। ३। १३४) इति अच्-प्रत्ययः। चकारानुबन्धलोपः। 'पृषोदरादीनि यथोपदिष्टम्' (पा० अ० ६। ३। १०९) इति धातो वकारोत्तरवर्त्तिन अकारस्य ईकारः। **अथवा** वि विशेषण जायते येन तद् वीजम्। वि + जनी प्रादुर्भावे (दि० आ०) 'उपसर्गे च संज्ञायाम्' (पा० अ० ३। २। ९९) इति ड-प्रत्ययः। डकारानुबन्धलोपः। 'टेः' (पा० अ० ६। ४। १४३) इति धातोः अन् इत्यस्य टेर्लोपः। 'अन्येषामपि दृश्यते' (पा० अ० ६। ३। १३७) इति वि इत्यस्य उपसर्गस्य इकारस्य ई-दीर्घः। **अथवा** वीयते इति वीजम्। 'व्येञ् संवरणे' (भ्वा० उ०) 'सम्पदादिभ्यः क्विप्' (वा० पा० अ० ३। ३। ९४) इति क्विप्-प्रत्ययः। तस्य सर्वापहारिलोपः। वियं संवृतं जायते जनयति वा इति बीजम्। 'अन्येष्वपि दृश्यते' (पा० अ० ३। २। १०१) इति ड-प्रत्ययः। डकारानुबन्ध-लोपः। पूर्ववत् धातोः अन् इत्यस्य टेर्लोपः। **अथवा** वि विशिष्टा ईः लक्ष्मीः जायते यस्मात् तद् बीजम्। वि + ई + जनी प्रादुर्भावे (दि० आ०) पूर्ववत् ड-प्रत्ययः। डकारानुबन्धलोपः। धातोः अन् इकारस्य टेर्लोपः। 'अकः सवर्णे दीर्घः' (पा० अ० ६। १। १०१) इति इकारस्य ईकारस्य च ई-दीर्घः। **अथवा** वि विशेषेण एः कामात् इना वा जायते इति वीजम्। वि + इ + जनी प्रादुर्भावे (दि० आ०) पूर्ववत् ड-प्रत्ययः। डकारानुबन्धलोपः। धातोः अन् इत्यस्य टेर्लोपः। इकारस्य इकारस्य च ई-दीर्घः। एवं वीज-शब्दः निष्पद्यते। व-बयोः अभेदात् वीजम् एव बीजम् अपि भवति। 'हेतुर्ना कारणं बीजम्' तथा 'शुक्रं तेजोरेतसी च बीज-वीर्येन्द्रियाणि च' इत्यमरः। 'बीजं तु रेतसि स्यादाधाने च तत्त्वे च हेतावङ्कुरकारणे' इति हैमः। 'बीजमित्यपत्यनाम' (निघं० २। २)।

बुद्बुदः पुं०। **इत्यत्र 'ह्रद-कन्द-कुन्द-बुद्बुद-शब्दाः' (लि० सू० ११४) इति पुँल्लिङ्गता।** बुद् इमम् अव्यक्तं ध्वनिं बुन्दति करोति इति बुद्बुदः। बुद् + उ बुन्दिर् निशामने (भ्वा० उ०) 'क-प्रकरणे मूलविभुजादिभ्य उपसंख्यानम्' (वा० पा० अ० ३। २। २) इति क-प्रत्ययः। ककारानुबन्धलोपः। 'अनिदितां हल उपधायाः क्ङिति' (पा० अ० ६। ४। २४) इति धातोः उपधायाः नकारस्य लोपः। बुद्बुदः जलविकारः इति अमरकोषे भानुजिदीक्षितः।

बुसम् नपुं०। **इत्यत्र 'पनस-बिस-बुस-साहसानि नपुंसके' (लि० सू० ९७) इति नपुंसकलिङ्गता।** बुस्यति इति बुसम्। बुस उत्सर्गे (दि० प०) 'इगुपध-ज्ञा-प्री-

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by S3 Foundation USA

किर: क:' (पा० अ० ३ । १ । १३५) इति क-प्रत्यय:। ककारानुबन्धलोप:। कित्त्वात् 'पुगन्तलघूपधस्य च' (पा० अ० ७ । ३ । ८६) इति धातो: उपधाया: उकारस्य प्राप्त: ओ-गुण: 'क्ङिति च' (पा० अ० १ । १ । ५) इति निषेधात् न भवति। 'कडङ्गरो बुसं क्लीबे' इत्यमर:। 'बुसमित्युदक नाम, ब्रवीते: शब्दकर्मण: भ्रंसतेर्वा यद्वर्षन् पातयत्युदकं रश्मिभिस्तत्प्रत्यादत्ते' (नि० ५ । १९)।

बुस्त:, बुस्तम् पुं०, नपुं०। इत्यत्र **'घृत-भूत-मुस्त-क्ष्वेलितैरावत-पुस्तक-बुस्त-लोहिता:' (लि० सू० १७७) इति पुँल्लिङ्गता नपुंसकलिङ्गता च।** बुस्यति स्म इति बुस्त: बुस्तं वा। बुस उत्सर्गे (दि० प०) 'निष्ठा' (पा० अ० ३ । २ । १०२) इति क्त-प्रत्यय:। ककारानुबन्धलोप:। कित्त्वात् तस्मिन् परे 'क्ङिति च' (पा० अ० १ । १ । ५) इति निषेधात् 'पुगन्त-लघूपधस्य च' (पा० अ० ७ । ३ । ८६) इति धातो: उपधाया: उकारस्य प्राप्त: गुण: न भवति। 'बुस्तं मांसशष्कुली, भृष्टमांसं पनसादिफलासार-भागश्चेति अमरकोषे भानुजिदीक्षित:।

ब्रह्मा, ब्रह्म पुं०, नपुं०। इत्यत्र **'ब्रह्मन् पुंसि च' (लि० सू० १५०) इति पुँल्लिङ्गता नपुंसकलिङ्गता च।** बृंहति वर्धते वर्धयति वा प्रजाम् इति ब्रह्मा ब्रह्म वा। बृहि वृद्धौ (भ्वा० प०) धातो: इदित्त्वात् 'इदितो नुम् धातो:' (पा० अ० ७ । १ । ५८) इति नुम्-आगम:। उकार-मकारानुबन्धलोप:। बृन्ह् इत्यवस्थायां 'बृंहेर्नोऽच्च' (उ० ४ । १४७) इति मनिन्-प्रत्यय:, नुम्-आगमस्य नकारस्य अकार आदेश:। प्रत्यये इकार-नकारानु-बन्धलोप:। 'इको यणचि' (पा० अ० ६ । १ । ७७) इति धातो: ऋकारस्य र्-आदेश:। एवं ब्रह्मन् इत्ययं शब्द: निष्पद्यते। तस्य प्रथमैकवचने पुँल्लिङ्गे ब्रह्मा नपुंसकलिङ्गे च ब्रह्म भवति। **अथवा** बर्हति वर्धते वर्धयति वा प्रजाम् इति ब्रह्मा ब्रह्म वा। बृहति उद्यच्छति वा इति ब्रह्मा ब्रह्म वा। बर्हति शब्दयति वर्धते वर्धयति वा इति ब्रह्मा ब्रह्म वा। बृहिर् वृद्धौ (भ्वा० प०), बृहू उद्यमने (तु० प०), बृहिर् ध्वनौ वृद्धौ वा (काशकृत्स्न-धातुपाठे भ्वा० प०) सर्वत्र 'बहेरुरो मनि:' इति चन्नवीरकविकृतटीकानुसारेण मन्-प्रत्यय:। तस्मिन् परे धातो: ऋकारस्य र्-आदेशश्च। नकारानुबन्धलोप:। एवमपि ब्रह्म निष्पद्यते। 'ब्रह्मात्मभू: सुरज्येष्ठ: परमेष्ठी पितामह:' इत्यमर:। 'वेदास्तत्त्वं तपो ब्रह्म ब्रह्मा विप्र: प्रजापति:' इति चामर:। 'ब्रह्म तत्त्वतपोवेदे न द्वयो: पुंसि वेधसि' ऋत्विग्योग-भिदोर्विप्रे इति मेदिनी। 'ब्रह्म उदकनाम' (निघं० १ । १२)। 'ब्रह्म अन्न नाम' (निघं० २ । ७)। 'ब्रह्म धननाम' (निघं० २ । १०)। 'ब्रह्मा सर्वविद्य: सर्वं वेदितुमर्हति। ब्रह्मा परिवृढ: श्रुततो ब्रह्म परिवृढं सर्वत:' (निरु० १ । ८)। 'ब्रह्माणि कर्माणि' (निरु० १२ ।

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by S3 Foundation USA

३४) 'वाग् ब्रह्म' (गोप० पू० २। १०)। 'वागिति एतदेषां नाम्नां ब्रह्मैतद्धि सर्वाणि नामानि बिभर्त्ति' (शत० ब्रा० १४।४।४।१)। 'ब्रह्म वै वाचः परमं व्योम' (तै० ब्रा० ३।९।५।५)। 'सत्यं ब्रह्म' (शत० ब्रा० १४।८।५।१)। 'तस्यै वाचः सत्यमेव ब्रह्म' (शत० ब्रा० २।१।४।१०)। 'ब्रह्म वै ब्रह्मणस्पतिः' (कौषी० ब्रा० ८।५)। 'चन्द्रमा वै ब्रह्म' (ऐत० ब्रा० २। ४१)। 'ब्रह्म ब्रह्माभवत् स्वयम्' (तै० ब्रा० ३। १२। ९। ३)। 'अयम् अग्निर्ब्रह्म' (शत० ब्रा० ९। २। १। १५)। 'असौ वा आदित्यो ब्रह्म' (७। ४। १। १४)। 'मुखं ह्येतदग्नेर्यद् ब्रह्म' (शत० ब्रा० ६। १। १। १०)। 'प्राणो वै सम्राट् परमं ब्रह्म' (शत० ब्रा० १४। ६। १०। ३)। 'अयं वै ब्रह्म योऽयं वायुः पवते' (ऐत० ब्रा० ८। २८)। 'ब्रह्म हि पूर्व्यं क्षत्रात्' (तां० ब्रा० ११। १। २)। 'प्राणापानौ ब्रह्म' (गोप० पू० २। १०)। 'विद्युद् ह्येव ब्रह्म' (शत० ब्रा० १४।८।७।१)। 'सैषा क्षत्रस्य योनिर्यद् ब्रह्म' (शत० ब्रा० १४। ४। २। २३)। 'अभिगन्तैव ब्रह्म कर्ता क्षत्रियः' (शत० ब्रा० ४। १। ४। १)। 'यदमृतं तद् ब्रह्म' (गोप० पू० ३। ४)। 'अभयं वै ब्रह्म' (शत० ब्रा० १४। ७। २। ३१)। 'ब्रह्म वै त्रिवृत्' (तां० ब्रा० २। १६। ४)। 'कतम एको देव इति स ब्रह्म इत्याचक्षते' (शत० ब्रा० १४। ६। ९। १०)। 'ब्रह्म वै भूतानां ज्येष्ठम्' (तै० ब्रा० २। ८। ८। १०)। 'तद् ब्रह्म इदमन्तरिक्षम्' (जैमि० उ० २। ९। ६)। 'अथ केन ब्रह्मत्वं क्रियते इति त्रय्या विद्ययेति' (ऐत० ब्रा० ५। ३३)। 'शरद् ब्रह्म तस्माद् यदा सस्यं पच्यते ब्रह्मण्वत्यः प्रजा इत्याहुः' (शत० ब्रा ११। २। ७। ३२)। 'मनो वै यज्ञस्य ब्रह्म' (शत० ब्रा० १४। ६। १। ७)। 'चन्द्रमा ब्रह्म आसीत्' (गोप० पू० ४। २)। 'चक्षुर्ब्रह्मा' (तैत्ति० ब्रा० १२। १। ५। ९)। 'हृदयं वै यज्ञस्य ब्रह्मा' (शत० ब्रा० १२। ८। २। २३)। 'बलं वै ब्रह्म' (तैत्ति० ब्रा० ३। ८। ५। २)। 'प्राणदेवत्यो वै ब्रह्म' (षड्विंश-ब्रा० २। ९)। 'ब्रह्माऽभवत् स्वयम्' (तैत्ति० ब्रा० ३। १२। ९। ३)। 'प्रजापतिर्वै ब्रह्म' (गोप० पू० ५। ८)।

ब्राह्मणता स्त्री०। इत्यत्र 'तलन्तः' (लि० सू० १७) इति स्त्रीलिङ्गता। ब्राह्मणस्य भावः ब्राह्मणता। 'तस्य भावस्त्वतलौ' (पा० अ० ५। १। ११९) इति तल्-प्रत्ययः। लकारानुबन्धलोपः। 'अजाद्यतष्टाप्' (पा० अ० ४। १। ४) इति टाप्-प्रत्ययः। टकार-पकारानुबन्धलोपः। 'अकः सवर्णे दीर्घः' (पा० अ० ६। १। १०१) इति अकारस्य आकारस्य च आ-दीर्घः।

ब्राह्मणसेना, ब्राह्मणसेनम् स्त्री०, नपुं०। इत्यत्र 'सुरा-सेनाच्छाया-शाला-निशा स्त्रियां च' (लि० सू० १२९) इति स्त्रीलिङ्गता नपुंसकलिङ्गता च। ब्राह्मणानां

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by S3 Foundation USA

सेना ब्राह्मणसेना ब्राह्मणसेनं वा। ब्राह्मणशब्दस्य 'षष्ठी' (पा० अ० २। २। ८) इत्यनेन सेनाशब्देन सह समासे सति स्त्रीलिङ्गे ब्राह्मणसेना भवति। नपुंसकलिङ्गे तु 'ह्रस्वो नपुंसके प्रातिपदिकस्य' (पा० अ० १। २। ४७) इति ह्रस्वविधानेन ब्राह्मणसेनाशब्दः ब्राह्मणसेन-शब्दरूपे परिवर्त्तते। तस्य एव प्रथमैकवचने ब्राह्मणसेनं भवति।

ब्राह्मण्यम् नपुं०। इत्यत्र **'कर्मणि च ब्राह्मणादि-गुणवचनेभ्यः' (लि० सू० १२२) इति नपुंसकलिङ्गता।** ब्राह्मणस्य कर्म भावः वा इति ब्राह्मण्यम्। ब्राह्मणशब्दात् 'गुणवचनब्राह्मणादिभ्यः कर्मणि च' (पा० अ० ५। १। १२४) इति ष्यञ्-प्रत्ययः। षकार-ञकारानुबन्धलोपः। 'यस्येति च' (पा० अ० ६। ४। १४८) इति णकारोत्तर-वर्त्तिनः अकारस्य लोपः। 'तद्धितेष्वचामादेः' (पा० अ० ७। २। ११७) इति ब्रकार-परवर्त्तिनः आकारस्य आ-वृद्धिः। एवं ब्राह्मण्य-शब्दः निष्पद्यते। अस्य प्रथमैक-वचने ब्राह्मण्यं भवति। **अथवा** ब्राह्मणानां समूहः ब्राह्मण्यम्। अत्र ब्राह्मण-शब्दात् 'ब्राह्मण-माणव-वाडवाद्यत्' (पा० अ० ४। २। ४२) इति यत् प्रत्ययः। तकारानुबन्धलोपः। 'यस्येति च' (पा० अ० ६। ४। १४८) इति णकारपरवर्त्तिनः अकारस्य लोपः। एवम् अपि ब्राह्मण्य-शब्दः व्युत्पद्यते।

भगम् नपुं०। इत्यत्र **'भय-लिङ्ग-भग-पदानि नपुंसके' (लि० सू० ३८) इति नपुंसकलिङ्गता।** भज्यते अनेन यत् तद् भगम्। भज सेवायां (भ्वा० उ०) 'पुंसि संज्ञायां घः प्रायेण' (पा० अ० ३। ३। ११८) इति घ-प्रत्ययः। **अथवा** 'खनो घ च' (पा० अ० ३। ३। १२५) इति घ-प्रत्ययः। घकारानुबन्धलोपः। 'घित्करणमन्यतोऽप्ययमिति ज्ञापनार्थम्, तेन भजेः भगः पदम्। करणे घः' इति सिद्धान्तकौमुद्याम् 'खनो घ च' (पा० अ० ३। ३। १२५) भट्टोजिदीक्षितः। 'चजोः कु घिण्ण्यतोः' (पा० अ० ७। ३। ५२) इति धातोः जकारस्य गकारः। 'भगं योनिद्वयोः' इत्यमरः। 'भगं श्रीकाममाहात्म्यवीर्य-यत्नार्क-कीर्तिषु' इति चामरः। 'भगं श्रीयोनिवीर्येच्छाज्ञानवैराग्यकीर्त्तिषु। माहात्म्यैश्वर्ययत्नेषु धर्मे मोक्षे च ना रवौ' इति विश्व-मेदिन्यौ। 'भगः धननाम' (निघं० २। १०)। 'भगः पदनाम' (निघं० ५। ६)। 'यज्ञो भगः' (शत० ब्रा० ६। ३। १। १९)। 'तस्य (भगस्य) चक्षुः' परापतत्, तस्मादाहुरन्धो वै भग इति (शत० ब्रा० १। ७। ४। ६), (गोप० २। १। २)। 'भगो भजतेः' (निरु० १। ६)। 'भगस्य भागधेयस्य' (निरु० ९। ३१)। 'स्त्रीभगस्तथा स्याद् भजतेः' (निरु० ३। १६)। 'भगो व्याख्यातः। तस्य कालः प्रागुत्सर्पणात्' (निरु० १२। १३)।

भयम् नपुं०। इत्यत्र **'भय-लिङ्ग-भग-पदानि नपुंसके' (लि० सू० ३८) इति नपुंसकलिङ्गता।** ञिभी भये (जु० प०) 'अज्विधौ भयादीनामुपसंख्यानम्' (वा० पा०

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by S3 Foundation USA

अ० ३।३।५६) इति अच्-प्रत्ययः। 'सार्वधातुकार्धधातुकयो' (पा० अ० ७।३।८४) इति धातोः ईकारस्य ए-गुणः। 'एचोऽयवायावः' (पा० अ० ६।१।७८) इति एकरस्य अय्-आदेशः। 'दरत्रासौ भीतिर्भीः साध्वसं भयम्' इत्यमरः। 'भयं भीतौ भयङ्करे। कुब्जकपुष्पे' इति हैमः।

भरणिः स्त्री०, पुं०। **इत्यत्र 'अशनि-भरण्यरणयः पुंसि च' (लि० सू० ५) इति स्त्रीलिङ्गता पुँल्लिङ्गता च।** भरति इति भरणिः। भृञ् भरणे (भ्वा० प०) 'उणादयो बहुलम्' (पा० अ० ३। ३। १) इति उणादीनां बाहुलकत्वात् 'अर्त्ति-सृ-धृ-धम्यम्यश्यवि-तृभ्योऽनिः' (उ० २। १०४) इति अनि-प्रत्ययः। 'उरण् रपरः' (पा० अ० १।१।५१) इति सहकारेण 'सार्वधातुकार्धधातुकयोः' (पा० अ० ७।३।८४) इति धातोः ऋकारस्य अर्-गुणः। 'अट्-कुप्वाङ्नुम्व्यवायेऽपि' (पा० अ० ८।४।२) इति नस्य णः। एवं भरणि-शब्दः निष्पद्यते।

भरण्डः पुं०। **इत्यत्र 'षण्ड-मण्ड-करण्ड-भरण्ड-वरण्ड-तुण्ड-गण्ड-मुण्ड-पाषण्ड-शिखण्डाः' (लि० सू० ११२) इति पुँल्लिङ्गता।** बिभर्त्ति धारयति पोपयति वा इति भरण्डः। डुभृञ् धारण-पोषणयोः (जु० उ०), भृञ् भरणे (भ्वा० उ०) 'अण्डन् कृ-सृ-भृ-वृञः' (उ० १। १२९) इति अण्डन्-प्रत्ययः। नकारानुबन्धलोपः। 'सार्वधातुकार्धधातुकयोः' (पा० अ० ७।३।८४) इति धातोः ऋकारस्य 'उरण् रपरः' (पा० अ० १।१।५१) इति सहकारेण अर्-गुणः। 'भरण्डः स्वामी' इति सिद्धान्तकौमुद्याम् उणादौ।

भलत्रम् नपुं०। **इत्यत्र 'द्वाराग्र-स्फार-तक्र-वक्र०' (लि० सू० ९०) इति नपुंसकलिङ्गता।** भलते परिभाषते हिनस्ति वा इति भलत्रम्। भल परिभापण-हिंसा-दानेपु (भ्वा० आ०) भालयते वा इति भलत्रम्। भल आभण्डने (चु० आ०) 'उणादयो बहुलम्' (पा० अ० ३। ३। १) इति उणादीनां बाहुलकत्वात् 'अमि-नक्षि-यजि-वधि-पतिभ्योऽत्रन्' (उ० ३। १०५) इति अत्रन्-प्रत्ययः। नकारानुबन्धलोपः।

भवनम्, भवनः नपुं०, पुं०। **इत्यत्र 'मान-यानाभिधान-नलिन-पुलिनोद्यान-शयनासन-स्थान-चन्दनालान-समान-भवन-वसन-संभावन-विभावन-विमानानि नपुंसके च' (लि० सू० ७६) इति नपुंसकलिङ्गता पुँल्लिङ्गता च।** भवति अस्मिन् इति भवनं भवनः वा। भू सत्तायाम् (भ्वा० प०) 'करणाधिकरणयोश्च' (पा० अ० ३।३।११७) इति ल्युट्-प्रत्ययः। लकार-टकारानुबन्धलोपः। 'युवोरनाकौ' (पा० अ० ७। १। १) इति यु-स्थाने अनादेशः। 'सार्वधातुकार्धधातुकयोः' (पा० अ०

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by S3 Foundation USA

७।३।८४) इति धातोः ऊकारस्य ओ-गुणः। 'एचोऽयवायावः' (पा० अ० ६।१।७८) इति ओकारस्य अवादेशः। **अथवा** भवनं सत्ता अस्ति अत्र इति भवनम्। भवन-शब्दात् 'अर्श आदिभ्योऽच्' (पा० अ० ५।२।१२७) इति अच्-प्रत्ययः। चकारानुबन्ध-लोपः। 'शकन्ध्वादिषु पररूपं वाच्यम्' (वा० पा० अ० ६।१।९४) इति नकार-परवर्त्तिनः अकारस्य पररूपम्। 'निशान्तवस्त्यसदनं भवनागारमन्दिरम्' इत्यमरः।

भस्त्रा स्त्री०। **इत्यत्र 'यात्रा-मात्रा-भस्त्रा-दंष्ट्रा-वरत्राः स्त्रियामेव' (लि० सू० १५५) इति स्त्रीलिङ्गता** भस्यते दीप्यते अग्निः यया सा भस्त्रा। 'भस भर्त्सन-दीप्त्योः' (जु० प०) 'हु-या-मा-श्रु-भसिभ्यस्त्रन्' (उ० ४।१६९) इति त्रन्-प्रत्ययः। नकारानुबन्धलोपः। ततः स्त्रियाम् 'अजाद्यतष्टाप्' (पा० अ० ४।१।४) इति टाप्-प्रत्ययः। टकार-पकारानु-बन्धलोपः। 'अकः सवर्णे दीर्घः' (पा० अ० ६।१।१०१) इति अकारस्य आकारस्य च आ-दीर्घः। 'भस्त्रा चर्मप्रसेविका' इत्यमरः।

भाः स्त्री०। **इत्यत्र 'भाः-स्रुक्-स्रग्-दिगुष्णिगुपानहः' (लि० सू० २०) इति स्त्रीलिङ्गता।** भासनं भाः। भास दीप्तौ (भ्वा० आ०) 'भ्राज-भास-धुर्-विद्युतोर्जि-पृ-जु-ग्रावस्तुवः क्विप्' (पा० अ० ३।२।१७७) इति क्विप्-प्रत्ययः। तस्य सर्वापहारिलोपः। एवं भास् अयं शब्दः निष्पद्यते। तस्य प्रथमैकवचने भाः भवति। 'स्युः प्रभा रुग्-रुचिस्त्विड्भाभाश्छवि द्युतिदीप्तयः' इत्यमरः।

भाण्डकम्, भाण्डकः नपुं०, पुं०। **इत्यत्र 'कण्टकानीक-सरक-मोदक-चषक-मस्तक-पुस्तक-तडाक-निष्क-शुष्क-वर्चस्क-पिनाक-भाण्डक-पिण्डक-कटक-शण्डक-पिटक-तालक-फलक-पुलाकानि नपुंसके च' (लि० सू० ६३) इति नपुंसकलिङ्गता पुंल्लिङ्गता च।** भणति शब्दं करोति इति भाण्डकं भाण्डकः वा। भण शब्दे (भ्वा० प०) 'ञमन्ताड्डः' (उ० १।११४) इति ड-प्रत्ययः। एवं भण्ड-शब्दः निष्पद्यते। भण्डः एव भाण्डः। 'प्रज्ञादिभ्यश्च' (पा० अ० ४।४।३८) इति अण्-प्रत्ययः। णकारानुबन्धलोपः। 'यस्येति च' (पा० अ० ६।४।१४८) इति डकार-परवर्त्तिनः अकारस्य लोपः। 'तद्धितेष्वचामादेः' (पा० अ० ७।२।११७) इति मकार-परवर्त्तिनः अकारस्य आ-वृद्धिः। एवं भाण्डशब्दः व्युत्पद्यते। पुनः भाण्डः एव भाण्डकः। भाण्डशब्दात् 'सर्वप्रातिपदिकेभ्यः स्वार्थे कन्' इति कन्-प्रत्ययः। नकारानुबन्धलोपः। एवं भाण्डकशब्दः निष्पद्यते। **अथवा** भण्डते परिभाषते, इति भाण्डकः। भडि परिभाषणे (भ्वा० प०) 'सनिन्दोपालम्भं परिहासः परिभाषणम् इति सिद्धान्तकौमुद्यां भट्टोजिदीक्षितः।' भण्डयति वा इति भाण्डकः। भडि कल्याणे (चु० प०) धातोः इदित्त्वात् 'इदितो नुम्

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by S3 Foundation USA

धातोः' (पा० अ० ७। १। ५८) इति नुम्-आगमः। उकार-मकारानुबन्धलोपः। 'नश्चापदान्तस्य झलि' (पा० अ० ८। ३। २४) इति नकारस्य अनुस्वारः। 'अनुस्वारस्य ययि परसवर्णः' (पा० अ० ८।४।५८) इति अनुस्वारस्य परसवर्णः णकारः। 'ण्वुल्तृचौ' (पा० अ० ३। १। १३३) इति ण्वुल्-प्रत्ययः। णकार-लकारानुबन्धलोपः। 'युवोरनाकौ' (पा० अ० ७। १। १) इति वु-स्थाने अकादेशः। एवं भण्डक-शब्दः निष्पद्यते। ततः भण्डकः एव भाण्डकः। भण्डकशब्दात् 'प्रज्ञादिभ्यश्च' (पा० अ० ४। ४। ३८) इति अण्-प्रत्ययः। णकारानुबन्धलोपः। 'यस्येति च' (पा० अ० ६। ४। १४८) इति ककार-परवर्त्तिनः अकारस्य लोपः। 'तद्धितेष्वचामादेः' (पा० अ० ७। २। ११७) इति भकारोत्तर-वर्त्तिनः अकारस्य आ-वृद्धिः। **अथवा** भण्डनं भण्डः, भण्ड एव भाण्डः भाण्डं शब्दं करोति इति भाण्डकः। भाण्ड + डुकृञ् करणे (त० उ०) 'अन्येष्वपि दृश्यते' (पा० अ० ३। २। १०१) इति ड-प्रत्ययः। डकारानुबन्धलोपः। 'टेः' (पा० अ० ६। ४। १४३) इति धातोः ऋकारस्य टेर्लोपः। 'सर्वमावपनं भाण्डं पात्रामत्रं च भाजनम्' तथा 'स्याद् भाण्डमश्वाभरणेऽमत्रे मूलवणिग्धने' इत्यमरः 'भाण्डं भूषणमात्रे स्यात्' इति धरणिः। 'भाण्डं पात्रे वणिग्मूलधने भूषाश्वभूषयोः' इति मेदिनी। 'भाण्डं मूलवणिग्वित्ते तुरङ्गाणां च मण्डले। नदीकूलद्वयोर्मध्ये भूषणे भाजनेऽपि च' इति हैमः।

भीमः पुं०। **इत्यत्र 'मोपधः' (लि० सू० ८३) इति पुँल्लिङ्गता।** यः बिभेति यस्माद् वा बिभेति स भीमः। ञिभी भये (जु० प०) 'भियः षुग् वा' (उ० १। १४८) इति मक्-प्रत्ययः, षुगागमाभावपक्षे च इदं रूपम्। प्रत्यये ककारानुबन्धलोपः। प्रत्ययस्य कित्त्वात् तस्मिन् परे 'सार्वधातुकार्धधातुकयोः' (पा० अ० ७। ३। ८४) इति धातोः ईकारस्य प्राप्तः ए-गुणः 'क्ङिति च' (पा० अ० १। १। ५) इति निषेधात् न भवति। **अथवा** 'भीमादयोऽपादाने' (पा० अ० ३। ४। ७४) इति भी-धातोः अयं भीम-शब्दः अपादाने मक्-प्रत्ययेन निपात्यते। 'व्योम-केशो भवो भीमः स्थाणू रुद्र उमापतिः' इत्यमरः। 'दारुणं भीषणं भीष्मं घोरं भीमं भयानकम्' इति चामरः। 'भीमो वृकोदरे घोरे शङ्करेऽप्यम्लवेतसे' इति हैमः। 'भीमोऽम्लवेतसे घोरे शम्भौ मध्यमपाण्डवे' इति मेदिनी। 'भीमो बिभेत्यस्मात्' (निरु० १। २०)।

भीरम् नपुं०। **इत्यत्र 'द्वाराग्र-स्फार-तक्र-वक्र-वप्र०' (लि० सू० ९०) इति नपुंसकलिङ्गता।** बिभेति यत् तत् भीरम्। ञिभी भये (जु० प०) 'उणादयो बहुलम्' (पा० अ० ३। ३। १) इति उणादीनां बाहुलकत्वात् 'कृ-शृ-पृ-कटि-पटि-शौटिभ्य ईरन्' (उ० ४। ३१) इति ईरन्-प्रत्ययः। नकारानुबन्धलोपः। **अथवा** भीः भयं तां राति ददाति इति भीरम्। भी + रा दाने (अ० प०) 'आतोऽनुपसर्गे कः' (पा० अ० ३। २।

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by S3 Foundation USA

३) इति क-प्रत्ययः। ककारानुबन्धलोपः। 'आतो लोप इटि च' (पा० अ० ६।४।६४) इति धातोः आकारस्य लोपः।

भुजः पुं०। इत्यत्र **'देवासुरात्म-स्वर्ग-गिरि-समुद्र-नख-केश-दन्त-स्तन-भुज-कण्ठ-खड्ग-शर-पङ्काभिधानानि' (लि० सू० ४३) इति पुँल्लिङ्गता।** भुज्यते अनेन इति भुजः पाणिः। भुज पालनाभ्यवहारयोः (रु० प०) 'हलश्च' (पा० अ० ३।३।१२१) इति घञ्-प्रत्ययः। घकार-ञकारानुबन्धलोपः। 'भुज्य-न्युब्जौ पाण्युपतापयोः' (पा० अ० ७।३।६१) इति धातोः उपधायाः उकारस्य 'पुगन्त-लघूपधस्य च' (पा० अ० ७।३।८६) इत्यनेन प्राप्तस्य ओ-गुणस्य अभावः तथा 'चजोः कु घिण्यतोः' (पा० अ० ७।३।५२) इत्यनेन धातोः जकारस्य स्थाने प्राप्तस्य गकारस्य अभावः निपात्यते। एवं भुजशब्दः निष्पद्यते। अथवा भुजति इति भुजः। भुज कौटिल्ये (तु० प०) 'इगुपध-ज्ञा-प्री-किरः कः' (पा० अ० ३।१।१३५) इति क-प्रत्ययः। ककारानुबन्धलोपः। प्रत्ययस्य कित्त्वात् तस्मिन् परे 'पुगन्तलघूपधस्य च' (पा० अ० ७।३।८६) इति धातोः उपधायाः उकारस्य प्राप्तः ओ-गुणः 'क्ङिति च' (पा० अ० १।१।५) इति निषेधात् न भवति। **अथवा** भवति इति भुः। भू सत्तायाम् (भ्वा० प०) 'उणादयो बहुलम्' (पा० अ० ३।३।१) इति उणादीनां बाहुलकत्वात् 'श्मनि श्रयतेर्डुन्' (उ० ५।२८) इति डुन्-प्रत्ययः। डकार-नकारानुबन्धलोपः। 'टेः' (पा० अ० ६।४।१४३) इति धातोः ऊकारस्य टेर्लोपः। एवं भु-शब्दः व्युत्पद्यते। भुं भुवं जयति इति भुजः। भु + जि जये (भ्वा० प०) 'अन्येष्वपि दृश्यते' (पा० अ० ३।२।१०१) इति ड-प्रत्ययः। डकारानुबन्धलोपः। 'टेः' (पा० अ० ६।४।१४३) इति धातोः इकारस्य टेर्लोपः। एवम् अपि भुज-शब्दः निष्पद्यते। 'भुज-बाहू प्रवेष्टो: दोः' इत्यमरः। 'अधो भुजो द्वयोर्बाहौ करे' इति मेदिनी।

भूः स्त्री०। इत्यत्र **'य्वन्तमेकाक्षरम्' (लि० सू० १२) इति तथा 'भूमि-विद्युत्-सरिल्लता-वनिताभिधानानि' (लि० सू० १८) इति स्त्रीलिङ्गता।** भवति इति भूः। भू सत्तायां (भ्वा० प०) 'अन्येभ्योऽपि दृश्यते' (पा० अ० ३।२।१७८) इति कर्त्तरि क्विप्। तस्य सर्वापहारिलोपः। 'भूर्भूमिरचलानन्ता०' इत्यमरः। 'भूरिति वै प्रजापतिरिमाम-जनयत' (शत० ब्रा० २।१।४।११)। 'भूर्हीयं (पृथ्वी)' (शत० ब्रा० ७।४।२।७)। 'भूरिति पृथिवीनाम' (निघं० १।१) 'भूरिति अन्तरिक्षनाम' (निघं० १।३)।

भूतः, भूतम् पुं०, नपुं०। इत्यत्र **'घृत-भूत-मुस्त-क्ष्वेलितैरावत-पुस्तक-बुस्त-लोहिताः' (लि० सू० १७७) इति पुँल्लिङ्गता नपुंसकलिङ्गता च।** भूतिः ऐश्वर्यम्

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by S3 Foundation USA

अस्ति अस्य इति भूतः। भूतिशब्दात् 'अर्श आदिभ्योऽच्' (पा० अ० ५। २। १२७) इति अच्-प्रत्ययः। चकारानुबन्धलोपः। 'शकन्ध्वादिषु पररूपं वाच्यम्' (पा० अ० ६। १। ९४) इति तकार-परवर्त्तिनः इकारस्य पररूपम्। **अथवा** भाव्यते स्म भूयते स्म वा भूतम्। भू प्राप्तौ (चु० आ०) 'निष्ठा' (पा० अ० ३। २। १०२) इति क्त-प्रत्ययः। ककारानुबन्धलोपः। 'णेरनिटि' (पा० अ० ६। ४। ५१) इति 'सत्यापपाश०' (पा० अ० २। १। २५) इति भू धातोः विहितस्य स्वार्थ-णिच्प्रत्ययस्य इकारस्य लोपः। प्रत्ययस्य कित्त्वात् तस्मिन् परे 'सार्वधातुकार्धधातुकयोः' (पा० अ० ७। ३। ८४) इति धातोः ऊकारस्य प्राप्तः ओ-गुणः 'क्ङिति च' (पा० अ० १। १। ५) इति निषेधात् न भवति। **अथवा** यद् अभवत् तद् भूतम्। भू सत्तायाम् (भ्वा० प०) इति अकर्मक-धातोः 'गत्यर्थाकर्मक-श्लिष्-शीङ्-स्थाऽऽस-वस-जन-रुह-जीर्यतिभ्यश्च' (पा० अ० ३। ४। ७२) इति कर्त्तरि क्त-प्रत्ययः। भवति स्म इति भूतार्थे तु 'निष्ठा' (पा० अ० ३। २। १०३) इत्यनेन एव क्त-प्रत्ययः। ककारानुबन्धलोपः। 'सार्वधातुकार्धधातुकयोः' (पा० अ० ७। ३। ८४) इति धातोः ऊकारस्य प्राप्तः ओ-गुणः 'क्ङिति च' (पा० अ० १। १। ५) इति निषेधात् न भवति। 'विद्याधरोऽप्सरो-यक्ष-रक्षो-गन्धर्व-किन्नराः। पिशाचो गुह्यकः सिद्धोऽभूतोऽमी देवयोनयः' तथा 'लब्धं प्राप्तं विन्नं भावितमासादितं च भूतं च' एवं 'युक्तं क्ष्मादावृते भूतं प्राण्यतीते समे त्रिषु' इत्यमरः। 'भूतं क्ष्मादौ पिशाचादौ जन्तौ क्लीबं त्रिपूंचिते। प्राप्ते वृत्ते समे सत्ये देवयोन्यन्तरे तु ना। कुमारेऽपि' इति मेदिनी। 'प्रजा वै भूतानि' (शत० ब्रा० २। ४। २। १)। 'तद् यानि तानि भूतानि ऋतवस्ते' (शत० ब्रा० ६। १। ३। ८)। 'अयं वै (पृथिवी) लोको भूतम्' (तै० ब्रा० ३। ८। १८। ५)। 'भूतं ह प्रस्तोतैषां' (विश्वसृजाम् आसीत्) (तै० ब्रा० ३। १२। ९। ३)। 'देवा वै भूताः' (मैत्रा० सं० ३। ८। ५)। 'भूतं वाव रथान्तरम्' (तैत्ति० सं० ३। १। ७। २)। 'परिमितं वै भूतमपरिमितं भव्यम्' (ऐत० ब्रा० ४। ६)। 'भूतम् उदकनाम' (निघं० १। १२)।

भूमिः स्त्री०। इत्यत्र 'मि-न्यन्तः' (लि० सू० ६) तथा 'भूमि-विद्युत्-सरिल्लता-वनिताभिधानानि' (लि० सू० १८) इति स्त्रीलिङ्गता। भवति सर्वं यस्यां यतः वा इति भूमिः। भू सत्तायाम् (भ्वा० प०) 'भुवः कित्' (उ० ४। ४६) इति मि-प्रत्ययः स च कित्। कित्त्वात् तस्मिन् परे 'सार्वधातुकार्धधातुकयोः' (पा० अ० ७। ३। ८४) इति धातोः ऊकारस्य प्राप्तः ओ-गुणः 'क्ङिति च' (पा० अ० १। १। ५) इति निषेधात् न भवति। 'भूर्भूमिरचलानन्ता रसा विश्वम्भरा स्थिरा' इत्यमरः। 'भूमिर्वसुन्धरायां स्यात्

CC-0. Prof Satya Vrat Shastri Collection, New Delhi. Digitized by S3 Foundation USA

स्थानमात्रेऽपि च स्त्रियाम्' इति मेदिनी। 'अभूद्वा इयं प्रतिष्ठेति तद् भूमिरभवत्' (शत० ब्रा० ६।१।१।१५)। 'कर्णिनी वै भूमिरिति' (जैमि० ब्रा० १।१२६)। 'अभूद् इव वा इदमिति तद् भूमेर्भूमित्वम्' (तां० ब्रा० २०।१४।२)। 'यदभवत् तद् भूमिः' (काठ० सं० ८।२)। 'भूमिः पृथिवीनाम' (निघं० १।१)।

भृङ्गारम्, भृङ्गारः नपुं०, पुं०। इत्यत्र **'चक्र-वज्रान्धकार-सारावारपार-क्षीर-तोमर-शृङ्गार-भृङ्गार-मन्दारोशीर-तिमिर-शिशिराणि नपुंसके च' (लि० सू० ९२) इति नपुंसकलिङ्गता पुँल्लिङ्गता च।** भरति बिभर्त्ति धारयति पोषयति वा इति भृङ्गारम् भृङ्गारः वा। भृञ् भरणे (भ्वा० उ०), डुभृञ् धारण-पोषणयोः (जु० उ०) 'शृङ्गार-भृङ्गारौ' (उ० ३। १३६) इति आरन्-प्रत्ययः, धातोर्नुम्, गुग्-आगमश्च। प्रत्यये नकारानुबन्धलोपः। गुकि उकार-ककारानुबन्धलोपः। नुमः नकारस्य 'नश्चापदान्तस्य' (पा० अ० ८।३।२४) इति अनुस्वारः। 'अनुस्वारस्य ययि परसवर्णः' (पा० अ० ८। ४।५८) इति अनुस्वारस्य परसवर्णः ङकारः। एवं भृङ्गार-शब्दः निष्पद्यते। **अथवा** भरति बिभर्त्ति धारयति पोषयति वा इति भृङ्गः। भृञ् भरणे (भ्वा० उ०), डुभृञ् धारण-पोषणयोः (जु० उ०) 'भृञः किन्नुट् च' (उ० १।१२५) इति गन्-प्रत्ययः सः च कित् नुडागमश्च। प्रत्यये नकारानुबन्धलोपः। नुडागमे उकार-टकारानुबन्धलोपः। नुडागमस्य नकारस्य 'नश्चापदान्तस्य झलि' (पा० अ० ८।३।२४) इति अनुस्वारः। 'अनुस्वारस्य ययि परसवर्णः' (पा० अ० ८।४।५८) इति अनुस्वारस्य ङकारः परसवर्णः। एवं भृङ्ग-शब्दः व्युत्पद्यते। पुनः भृङ्गं भृङ्गरूपं वा आराति इति भृङ्गारः। भृङ्ग + आ + रा दाने (अ० प०) 'मूलविभुजादिभ्यः कः' (वा० पा० अ० ३।२।५) इत्यनेन अथवा 'सुपि स्थः' (पा० अ० ३।२।४) इत्यत्र 'सुपि' इति योगविभागात् स्था-धातोः अतिरिक्तात् अपि आकारान्त-धातोः विधानात् क-प्रत्ययः। ककारानुबन्धलोपः। 'आतो लोप इटि च' (पा० अ० ६।४।६४) इति धातोः आकारस्य लोपः। **अथवा** रूपेण भृङ्गम् ऋच्छति इयर्त्ति गच्छति प्राप्नोति वा इति भृङ्गारं भृङ्गारः वा। भृङ्ग + ऋ गति-प्रापणयोः (भ्वा० प०), ऋ गतौ (जु० प०) 'कर्मण्यण्' (पा० अ० ३।२।१) इति अण्-प्रत्ययः। णकारानुबन्धलोपः। 'अचो ञ्णिति' (पा० अ० ७।२।११५) इति 'उरण् रपरः' (पा० अ० १।१।५१) इति सहकारेण धातोः ऋकारस्य आर्-वृद्धिः। 'अकः सवर्णे दीर्घः' (पा० अ० ६।१।१०१) इति अकारस्य आकारस्य च आ-दीर्घः। 'भृङ्गारः कनकालुका' इत्यमरः। 'भृङ्गारः कनकालुके' इति विश्वः।

भृत्रः पुं०। इत्यत्र **'भृत्रामित्र-छात्र-पुत्र-मन्त्र-वृत्र-मेढ्रोष्ट्राः पुंसि' (लि० सू० ९६) इति पुँल्लिङ्गता।** भरति बिभर्त्ति धारयति पोषयति वा इति भृत्रः। भृञ् भरणे (भ्वा०

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by S3 Foundation USA

उ०), डुभृञ् धारण-पोषणयोः (जु० उ०) 'उणादयो बहुलम्' (पा० अ० ३। ३। १) इति उणादीनां बाहुलकत्वात् 'गु-धृ-वी-पचि-वचि-यमि-सदि-क्षदिभ्यस्त्रः' (उ० ४। १६८) इति त्र-प्रत्ययः **अथवा** 'हु-या-मा-श्रु-भसिभ्यस्त्रन्' (उ० ४। १६९) इति त्रन्-प्रत्ययः। नकारानुबन्धलोपः। एवं भृत्र-शब्दः निष्पद्यते। **अथवा** भरणं भृत्, भरति बिभर्त्ति वा इति भृत्। भृञ् भरणे (भ्वा० उ०), डुभृञ् धारण-पोषणयोः 'सम्पदादिभ्यः क्विप्' (वा० पा० अ० ३। २। ९४) इति क्विप् अथवा 'क्विप् च' (पा० अ० ३। २। ७६) इति क्विप्। तस्य सर्वापहारिलोपः। 'ह्रस्वस्य पिति कृति तुक्' (पा० अ० ६। २। ७१) इति तुग्-आगमः। उकार-ककारानुबन्धलोपः। एवं 'भृत्' निष्पद्यते। भृतं भरणं धारणं पोषणं वा त्रायते इति भृत्त्रः। भृत् + त्रैङ् पालने (भ्वा० आ०) 'आदेच उपदेशेऽशिति' (पा० अ० ६। १। ४५) इति धातोः ऐकारस्य आकारः। 'आतोऽनुपसर्गे कः' (पा० अ० ३। २। ३) इति क-प्रत्ययः। ककारानुबन्धलोपः। 'आतो लोप इटि च' (पा० अ० ६। ४। ६४) इति धातोः आकारस्य लोपः। एवं भृत्त्र-शब्दः निष्पद्यते। **अथवा** भरति बिभर्त्ति धारयति पोषयति वा इति भृत्। भृत् अयं शब्दः पूर्वं व्याख्यातः। त्रायते इति त्रः। त्रैङ् पालने (भ्वा० आ०) 'आदेच उपदेशेऽशिति' (पा० अ० ६। १। ४५) इति धातोः ऐकारस्य आकारः। 'अन्येष्वपि दृश्यते' (पा० अ० ३। २। १०१) इति ड-प्रत्ययः। डकारानुबन्धलोपः। 'टेः' (पा० अ० ६। ४। १४३) इति धातोः आकारस्य टेर्लोपः। एवं त्र-शब्दः निष्पद्यते। ततः भृत् चासौ त्रः इति भृत्त्रः। अथवा भृत् च त्रश्च इति भृत्त्रः भृत् अस्य शब्दस्य त्रशब्देन सह समासः।

भ्रुकुटिः स्त्री०। इत्यत्र **'शष्कुलि-राजि-कुट्यशनि-वर्त्ति-भ्रुकुटि-त्रुटि-वलि-पङ्क्तयः' (लि० सू० २६) इति स्त्रीलिङ्गता।** भ्रुवोः कुटिः इति भ्रुकुटिः। भ्रू + कुट कौटिल्ये (तु० प०) 'इगुपधात् कित्' (उ० ४। १२१) इति इन्-प्रत्ययः। स च कित्। प्रत्यये नकारानुबन्धलोपः। प्रत्ययस्य कित्त्वात् तस्मिन् परे 'पुगन्त-लघूपधस्य च' (पा० अ० ७। ३। ८६) इति धातोः उपधायाः उकारस्य प्राप्तः ओ-गुणः 'क्ङिति च' (पा० अ० १। १। ५) इति निषेधात् न भवति। भ्रूकुटि इत्यवस्थायाम् 'इको ह्रस्वोऽङ्यो गालवस्य' (पा० अ० ६। ३। ६१) इति विकल्पेन भ्रू इत्यस्य ऊकारस्य ह्रस्व-विधानेन भ्रुकुटि-शब्दः निष्पद्यते। ह्रस्वाभावे तु भ्रूकुटिः इत्येव भवति। 'पृषोदरादीनि यथोपदिष्टम्' (पा० अ० ६। ३। १०९) इति भ्रू इत्यस्य ऊकारस्य अ-विधानेन भ्रकुटिः तथा भ्रू इत्यस्य भृ इति विधानेन भृकुटिः इत्यपि भवति। 'भ्रकुटिर्भ्रुकुटिर्भ्रूकुटिः स्त्रियाम्' इत्यमरः।

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by S3 Foundation USA

मङ्गलः, मङ्गलम् पुं०, नपुं०। इत्यत्र **'शील-मूल-मङ्गल-साल-कमल-तल-मुसल-कुण्डल-पलल-मृणाल-वाल-निगल-पलाल-बिडाल-खिल-शूलाः पुंसि च' (लि० सू० १४३) इति पुँल्लिङ्गता नपुंसकलिङ्गता च।** मङ्गति गच्छति प्राप्नोति कल्याणं येन सः मङ्गलः तद् मङ्गलं वा। मङ्गयते प्राप्यते वा यः मङ्गलः यद् मङ्गलं वा। मगि गतौ (भ्वा० प०) 'इदितो नुम् धातोः' (पा० अ० ७। १। ५८) इति नुम्-आगमः। उकार-मकारानुबन्धलोपः। 'नश्चापदान्तस्य झलि' (पा० अ० ८। ३। २४) इति नकारस्य अनुस्वारः। 'अनुस्वारस्य ययि परसवर्णः' (पा० अ० ८। ४। ५८) इति अनुस्वारस्य परसवर्णः ङकारः। एवं मङ्ग् निष्पद्यते। 'मङ्गेरलच्' (उ० ५। ७०) इति अलच्-प्रत्ययः। चकारानुबन्धलोपः। 'श्वः श्रेयसं शिवं भद्रं कल्याणं मङ्गलं शुभम्' इत्यमरः। 'मङ्गला सितदूर्वायामुमायां पुंसि भूमिजे। नपुंसकं तु कल्याणे सर्वार्थे रक्षणेऽपि च' इति मेदिनी। 'मङ्गलं पुनः। कल्याणे, मङ्गलो भौमे, मङ्गला श्वेतदूर्विका' इति हैमः। 'मङ्गले गिरतेर्गृणात्यर्थे, गिरत्यनर्थानिति वा। अङ्गलमङ्गवत्। मज्जयति पापकम् इति नैरुक्ताः। मां गच्छत्विति वा' (निरु० ९। ३)।

मठः पुं०। इत्यत्र **'पल्लव-पल्वल-कफ-रेफ-कटाह-निर्व्यूह-मठ-मणि-तरङ्ग-तुरङ्ग-गन्ध-मृदङ्ग-सङ्ग-समुद्र-पुङ्खाः' (लि० सू० ११६) इति पुँल्लिङ्गता।** मठन्ति माद्यन्ति निवसन्ति वा अस्मिन् इति मठः। मठ मद-निवासयोः (भ्वा० प०) 'हलश्च' (पा० अ० ३। ३। १२१) इति अधिकरणे घञ्-प्रत्ययः। घकार-ञकारानुबन्धलोपः। 'अत उपधायाः' (पा० अ० ७। २। ११६) इति धातोः उपधायाः अकारस्य तु आ-वृद्धिः संज्ञापूर्वकत्वात् न भवति। **अथवा** मठति निवासयति इति मठः। अन्तर्भावितण्यर्थात् मठ धातोः 'नन्दि-ग्रहि-पचादिभ्यो०' (पा० अ० ३। १। १३४) इति अच्प्रत्ययः। चकारानुबन्धलोपः। 'मठश्छात्रादिनिलयः' इत्यमरः।

मणिः पुं०, स्त्री०। इत्यत्र **'पल्लव-पल्वल-कफ-रेफ-कटाह-निर्व्यूह-मठ-मणि-तरङ्ग-तुरङ्ग-गन्ध-मृदङ्ग-सङ्ग-समुद्र-पुङ्खाः' (लि० सू० ११६) इति पुँल्लिङ्गता तथा 'गो-मणि-यष्टि-मुष्टि-पाटलि-बस्ति-शाल्मलि-त्रुटि-मसि-मरीचयः' (लि० सू० १७२) इति स्त्रीलिङ्गता च।** मणति शब्दं करोति इति मणिः। मण शब्दे (भ्वा० प०) 'सर्वधातुभ्य इन्' (उ० ४। ११९) इति इन्-प्रत्ययः। नकारानुबन्धलोपः। 'रत्नं मणिर्द्वयोरश्मजातौ मुक्तादिकेऽपि च' इत्यमरः। 'मणिर्गोले मेहनाग्रे रत्ने चाजागले स्तने' इति विश्वः। 'मणिः स्त्रीपुंसयोरश्मजातौ मुक्तादिकेऽपि च। कण्ठदेशस्तनेऽजाया लिङ्गाग्रे-ऽलिञ्जरेऽपि च' इति मेदिनी।

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by S3 Foundation USA

मण्डः, मण्डम् पुं०, नपुं०। इत्यत्र **'षण्ड-मण्ड-करण्ड-भरण्ड-वरण्ड-तुण्ड-गण्ड-मुण्ड-पाषण्ड-शिखण्डाः' (लि० सू० ११२) इति पुँल्लिङ्गता तथा 'दण्ड-मण्ड-खण्ड-शव-सैन्धव-पार्श्वाकाश-कुश-काशाङ्कुश-कुलिशाः' (लि० सू० १८१) इति पुँल्लिङ्गता नपुंसकलिङ्गता च।** मन्यते अवबुध्यते इति मण्डः। मनु अवबोधने (दि० आ०) 'ञमन्ताड्डः' (उ० १।११४) इति ड-प्रत्ययः। 'नश्चापदान्तस्य झलि' (पा० अ० ८। ३। २४) इति धातोः नकारस्य अनुस्वारः। 'अनुस्वारस्य ययि परसवर्णः' (पा० अ० ८। ४। ५८) इति अनुस्वारस्य परसवर्णः णकारः। **अथवा** मण्डति इति मण्डः। मडि भूषायाम् (भ्वा० प०) धातोः इदित्त्वात् 'इदितो नुम् धातोः' (पा० अ० ७।१।५८) इति नुम्-आगमः। उकार-मकारानुबन्धलोपः। पूर्ववत् नकारस्य अनुस्वारः, अनुस्वारस्य च परसवर्णः णकारः। 'नन्दि-ग्रहि-पचादिभ्यो०' (पा० अ० ३। १। १३४) इति अच्-प्रत्ययः। चकारानुबन्ध-लोपः। 'चञ्चुः पञ्चाङ्गुलो मण्डवर्धमानव्यडम्बकाः' इत्यमरः। 'सर्वरसाग्रे मण्डमस्त्रियाम्। मासराचामनिस्रावा मण्डे भक्तसमुद्भवे' इति चामरः। 'मण्डः पञ्चाङ्गुले शाके पुंसि' इति मेदिनी। 'मण्डः पञ्चाङ्गुले शाकभेदे क्लीबं तु मस्तुनि। आमलक्यां स्त्रियां मण्डाथास्त्रियां सारपिच्छयोः' इति विश्वः। मण्डं पक्वौदने प्रसिद्धमेव।

मद्गु, मद्गुः नपुं०, पुं०। इत्यत्र **'मद्गु-मधु-सीधु-शीधु-सानु-कमण्डलूनि नपुंसके च' (लि० सू० ५६) इति नपुंसकलिङ्गता पुँल्लिङ्गता च।** मज्जति शुध्यति जले निमज्ज्य इति मद्गु मद्गुः वा। टुमस्जो शुद्धौ (तु० प०) 'भृ-मृ-शीङ्-तृ-चरि-त्सरि-तनि-धनि-मि-मस्जिभ्य उः' (उ० १।७) इति उ-प्रत्ययः। 'न्यङ्क्वादीनां च' (पा० अ० ७।३।५३) इति जकारस्य गकारः। 'झलां जश् झशि' (पा० अ० ८।४।५३) इति सस्य दः। मद्गुः पक्षिविशेषः तथाहि 'तेषां विशेषा हारीतो मद्गुः कारण्डवः प्लवः' इत्यमरः। 'मद्गुः पानीयकाकिका' इति रभसः।

मद्यम् नपुं०। इत्यत्र **'धान्याज्य-सस्य-रूप्य-पण्य-वर्ण्य-धृष्य-हव्य-कव्य-काव्य-सत्यापत्य-मूल्य-शिक्य-कुड्य-मद्य-हर्म्य-तूर्य-सैन्यानि' (लि० सू० १६८) इति नपुंसकलिङ्गता।** माद्यन्ति अनेन इति मद्यम्। मदी हर्षे (दि० प०) 'गद-मद-चर-यमश्चानुपसर्गे' (पा० अ० ३।१।१००) इति यत्-प्रत्ययः। तकारानुबन्धलोपः। 'मदिरा कश्यमद्येऽपि' इत्यमरः।

मधु, मधुः नपुं०, पुं०। इत्यत्र **'मद्गु-मधु-सीधु-शीधु-सानु-कमण्डलूनि नपुंसके च' (लि० सू० ५६) इति नपुंसकलिङ्गता पुँल्लिङ्गता च।** मन्यते मनुते वा इति मधु

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by S3 Foundation USA

मधुः वा। मनु ज्ञाने (दि० आ०), मनु अवबोधने (त० आ०) 'फलि-पाटि-नमि-मनि-जनां गुक्-पटि-नाकि-ध-तश्च' (उ० १। १८) इति उ-प्रत्ययः धातोः नकारस्य धकारादेशश्च। **अथवा** उक्त-धातुतः एव 'मनेर्धश्छन्दसि' (उ० २। १८) इति उसि-प्रत्ययः धातोः नकारस्य धकारादेशश्च। उसि-प्रत्यये इकारानुबन्धलोपेन निष्पन्नः मधुस् अयं शब्दः सकारान्तः। 'स्याच्चैत्रिको मधुः' एवं 'जीवन्ती जीवनी जीवा जीवनीया मधुः स्रवा' तथा 'मधु क्षौद्रं माक्षिकादि' एवं 'मध्वासवो माधवको मधु मार्द्वीकमद्वयोः' इत्यमरः। 'मधु पुष्परसे क्षौद्रे मद्ये, ना तु मधुद्रुमे। वसन्ते दैत्यभिच्चित्रे स्याज्जीवन्त्यां तु योषिति' इति मेदिनी। 'क्षौद्रे जले क्षीरे मद्ये पुष्परसे मधुः। दैत्ये चैत्रे वसन्ते च जीवाशाके मधुद्रुमे' इति विश्वः। 'मधुश्चैत्रे च दैत्ये च मद्ये पुष्परसे मधु' इति हट्टचन्द्रः। 'मकरन्दस्य मद्यस्य माक्षिकस्यापि वाचकः। अर्धर्चादिगणे पाठात् पुंनपुसकयोर्मधुः' इति शाश्वतः। 'मधु पवित्रद्रव्यम्' इति सिद्धान्तकौमुद्याम् उणादौ तत्त्वबोधिनीकारः। 'मधु उदकनाम' (निघं० १। १२)। 'मधु सोममित्यौपमिकं माद्यतेः। इदमपीतरन्मध्वे तस्मादेव' (निरु० ४। ८)। 'मधुनोदकेन-----मधु क्षमतेर्विपरीतस्य' (निरु० १०। ३१)। 'सर्वं वा इदं मधु यदिदं किञ्च' (शत० ब्रा० ३। ७। १। ११)। 'एतावेव (मधु-माधवौ) वासन्तिकौ (मासौ)' (शत० ब्रा० ४। ३। १। १४)। 'यज्ञो ह वै मधु सारघम्' (शत० ब्रा० ६। ४। ३। २)। 'प्राणो वै मधु' (शत० ब्रा० ६। ४। ३। २)। 'ओषधीनां वा एष परमो रसो यन्मधु' (शत० ब्रा० ११। ५। ४। १८)। 'एतद्वै प्रत्यक्षात् सोमरूपं यन्मधु' (शत० ब्रा० १२। ८। २। १५)। 'अन्तो वै रसानां मधु' (जैमि० ब्रा० १। २२४)। 'परमो वै मधुनि रसः' (जैमि० ब्रा० २। ४०५)। 'प्रजा वै मधु' (जैमि० ब्रा० १। ८८)। 'अन्नं वै मधु' (तां० ब्रा० ११। १०। ३)। 'परमं वा एतदन्नाद्यं यन्मधु' (तां० ब्रा० १३। ११। १७)। 'आत्मा वै पुरुषस्य मधु' (तैत्ति० सं० २। ३। २। ९)। 'मिथुनं वै मधु प्रजा मधु' (ऐत० आर० १। ३। ४)। 'सौम्यं वै मधु' (काठ० सं० ११। २)। 'परमं वा एतद् देवतायै रूपं यन्मधु' (तैत्ति० ब्रा० ३। ८। १४। २)। 'एतद्वै देवानां मधु यद् घृतम्' (मैत्रा० सं० ३। ९। ३)।

मनः नपुं०। **इत्यत्र 'असन्तो द्व्यच्कः' (लि० सू० १५२) इति नपुंसकलिङ्गता।** मन्यते येन तद् मनः। मनु ज्ञाने (दि० आ०), मनु अवबोधने (त० आ०) 'सर्वधातुभ्योऽसुन्' (उ० ४। १९०) इति असुन्-प्रत्ययः। उकार-नकारानुबन्धलोपः। एवं मनस् इत्ययं शब्दः निष्पद्यते। अस्य प्रथमा-द्वितीयैकवचने मनः इति भवति। 'चित्तं तु चेतो हृदयं स्वान्तं हृन्मानसं मनः' इत्यमरः। 'मनो ह वायुर्भूत्वा दक्षिणतस्तस्थौ' (शत० ब्रा० ८। १। १। ७)। 'कामः संकल्पो विचिकित्सा, श्रद्धाऽश्रद्धा

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by S3 Foundation USA

धृतिरधृतिर्ह्रीर्धीर्भीरित्येतत् सर्वं मन एव' (शत० ब्रा० १४।४।३।९)।'नैव हि सन्मनो नैवासत्' (शत० ब्रा० १०।५।३।२)।'वृषा हि मनः' (शत० ब्रा० १।४।४।३)। 'अनन्तं वै मनः' (शत० ब्रा० १४।६।१।११)।'अनिरुक्तं हि मनो अनिरुक्तं ह्येतद् यत् तूष्णीम्' (शत० ब्रा० १।४।४।५)।'न ह्युक्तेर्न मनसा किञ्चन सम्प्रति शक्नोति कर्त्तुम्' (शत० ब्रा० ६।३।१।१४)।'मनो ह वै देववाहनं मनो हीदं मनस्विनं भूयिष्ठं वनीवाह्यते' (शत० ब्रा० १।४।३।६)।'अन्यत्र मना अभूवं नादर्शमन्यत्रमना अभूवं नाश्रौषमिति मनसा ह्येव पश्यति मनसा शृणोति' (शत० ब्रा० १४।४।३।८)।'मनसि हृदयमात्मा प्रतिष्ठितः' (शत० ब्रा० ६।७।१।२१)।'मनो ह वाऽस्य सविता' (शत० ब्रा० ४।४।१।७)।'मनश्चन्द्रमाः' (जै० उ० ३।२।६)।'मनो वाऽव साम्नश्श्रीः' (जै० उ० १।३९।२)।'तयोः (सदसतोः) यत् सत् तत् साम तन्मनस्स प्राणः' (जै० उ० १।५।३।२)।'तस्य मनस एषा कुल्या यद् वाक्' (जै० उ० १।५८।३)।'वाचो मनो देवता मनसः पशवः' (जै० उ० १।५९।१४)।'वागिति मनः' (जै० उ० ४।२२। ११)।'मनः प्रगाथः' (जै० उ० ३।४।३)।'मनः सावित्रम्' (कौषी० ब्रा० १६।४)। 'वाक् वै मनश्च हविर्धाने' (कौषी० ब्रा० ९।३)।'चन्द्रमा मनसि स्थितः' (तै० ब्रा० ३। १०।८।५)।'मनो हृदये (श्रितम्)' (तै० ब्रा० ३।१०।८।६)।'असम्प्रेषितं वा इदं मनः' (ऐत० ब्रा० ६।२)।'यन्मनः स इन्द्रः' (गो० उ० ४।११)।'य एप हृदः कामानां पूर्णो यन्मनः' (जै० उ० १।५८)।'वाग्वै समुद्रो मनः समुद्रस्य चक्षुः' (तां० ब्रा० ६।४।७)।'मनो देवः' (गो० पू० २।१०)।'वाक् च वै मनश्च देवानां मिथुनम्' (ऐत० ब्रा० ५।२३)।'मनो हि पूर्वं वाचो यद्धि मनसाभिगच्छति तद्वाचा वदति' (तां० ब्रा० १।११।३)।'वाग्वै मनसो ह्रसीयसी' (शत० ब्रा० १।४।४।७)।'मनो वाऽध्वर्युः' (शत० ब्रा० १।५।१।२१)।'अर्द्धभाग् वै मनः प्राणानाम्' (षड्० ब्रा० १।५)।'मनो मनोतेः' (निरु० ४।५)।

मन्थाः पुँ०। इत्यत्र **'अर्ध-पथि-मथ्यृभुक्षि-स्तम्ब-नितम्ब-पूगाः' (लि० सू० ११५) इति पुँल्लिङ्गता।** मन्थति मथ्यते वा येन स मन्थाः। मन्थ विलोडने (भ्वा० प०) 'मन्थः' (उ० ४।११) इति इनि-प्रत्ययः, स च कित्। प्रत्यये नकारोत्तर-वर्त्तिनः इकारस्य अनुबन्धस्य लोपः। कित्त्वात् 'अनिदितां हल उपधायाः। क्ङित्यनङि' (पा० अ० ६।४।२४) इति धातोः नकारस्य लोपः। एवं मथिन् अयं शब्दः व्युत्पद्यते। अस्य प्रथमैकवचने मन्थाः भवति।'वैशाखमन्थमन्थान-मन्थानो मन्थदण्डके' इत्यमरः।'मन्था मन्थनदण्डे च वज्रे चापि च स्मृतः' इति सिद्धान्तकौमुद्याम् उणादौ तत्त्वबोधिनी-कारः।

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by S3 Foundation USA

मन्दारम्, मन्दारः नपुं०, पुं०। इत्यत्र **'द्वाराग्रस्फार०' इति नपुंसकलिङ्गता तथा 'चक्र-वज्रान्धकार-सारावारपार-क्षीर-तोयद-शृङ्गार-भृङ्गार-मन्दारोशीर-तिमिर-शिशिराणि नपुंसके च' (लि० सू० १२) इति नपुंसकलिङ्गता पुँल्लिङ्गता च।** मन्द्यते स्तूयते यत् तद् मन्दारम् यः स मन्दारः वा। 'मदि स्तुति-मोद-मद-स्वप्र-कान्ति-गतिपु' (भ्वा० आ०) 'अङ्गि-मदि-मन्दिभ्य आरन्' (उ० ३। १३४) इति आरन्-प्रत्ययः। नकारानुबन्धलोपः। धातोः इदित्त्वात् 'इदितो नुम् धातोः' (पा० अ० ७। १। ५८) इति नुम्-आगमः। उकार-मकारानुबन्धलोपः। **अथवा** मन्दाः आराः धाराः सरलत्वात् यस्य तत् मन्दारं स मन्दारः वा। **अथवा** मन्दम् ऋच्छति गच्छति इति मन्दारं मन्दारः वा। मन्द + ऋ गतौ 'कर्मण्यण्' (पा० अ० ३। २। १) इति अण्-प्रत्ययः। णकारानुबन्धलोपः। 'अचो ञ्णिति' (पा० अ० ७। २। ११५) इति धातोः ऋकारस्य 'उरण् रपरः' (पा० अ० १। १। ५) इति सहकारेण आर्-वृद्धिः। 'अकः सवर्णे दीर्घः' (पा० अ० ६। १। १०१) इति अकारस्य आकारस्य च आ-वृद्धिः। 'पञ्चैते देवतरवः मन्दारः पारिजातकः। सन्तानः कल्पवृक्षश्च पुंसि वा हरिचन्दनम्' इत्यमरः। 'मन्दारः स्यात् सुरद्रुमे। पारिभद्रेऽर्कपर्णे च मन्दारो हस्ति-धूर्तयोः' इति मेदिनी।

मरीचिः स्त्री०, पुं०। इत्यत्र **'गो-मणि-यष्टि-मुष्टि-पाटलि-बस्ति-शाल्मलि-त्रुटि-मसि-मरीचयः' (लि० सू० १७२) इति स्त्रीलिङ्गता च।** म्रियते अन्धकारः यया येन यत्र वा इति मरीचिः। मृङ् प्राणपरित्यागे (तु० आ०) 'मृ-कणिभ्यामीचिः' (उ० ४। ७१) इति ईचि-प्रत्ययः। 'सार्वधातुकार्धधातुकयोः' (पा० अ० ७। ३। ८४) इति धातोः ऋकारस्य 'उरण् रपरः' (पा० अ० १। १। ५१) इति सहकारेण अर्-गुणः। 'सप्तर्षयो मरीच्यत्रिमुखाश्चित्रशिखण्डिनः' इत्यमरः। 'भानुः करो मरीचिः स्त्रीपुंसयोर्दीधितिः स्त्रियाम्' इति चामरः। 'द्वयोर्मरीचिः किरणो भानुरुस्रः करः पदम्' इति शब्दार्णवः। 'मरीचिर्मुनिभेदेऽपि चौरवह्नी मलिम्लुचौ' इति नानार्थकोषः। 'सूर्यस्य मरीचिः (पत्नी)' (तैत्ति० आ० ३। ९। २)। 'मरीचिः एता वा आपः स्वराजो यन्मरीचयः' (शत० ब्रा० ५।३।४।२१)।

मरुत् पुं०। इत्यत्र **'मरुद्-गरुत्-तरद्-ऋत्विजः' (लि० सू० १०८) इति पुँल्लिङ्गता।** म्रियन्ते यं विना मार्यन्ते वा येन वृद्धेन सः मरुत्। मृङ् प्राण-परित्यागे (तु० आ०) 'मृ-ग्रोरुतिः' (उ० १। ९४) इति उति-प्रत्ययः। इकारानुबन्धलोपः। 'उरण् रपरः' (पा० अ० १।१।५१) इति सहकारेण धातोः ऋकारस्य 'सार्वधातुकार्धधातुकयोः' (पा० अ० ७। ३। ८४) इति अर्-गुणः। 'समीर-मारुत-मरुज्-जगत्प्राण-समीरणाः' इत्यमरः।

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by S3 Foundation USA

'इन्द्रो वह्निः पितृपतिर्नैर्ऋतो वरुणो मरुत्। कुबेर ईशः पतयः पूर्वादीनां दिशां क्रमात्' इति चामरः। 'मरुतौ पवनामरौ' इत्यपि अमरः। 'मरुद् देवे समीरे ना ग्रन्थिपर्णे नपुंसकम्' इति मेदिनी। 'मरुतः स्पर्शनः प्राणः समीरो मारुतो मरुत्' इति विक्रमादित्यकोषः। 'मारुः श्वसनः प्राणः समीरो मारुतेः मरुत्' इति संसारावर्त्तः। 'मरुत इति पदनामसु पठितम्' (निघं० ५।५)। 'मरुतः ऋत्विङ्नाम' (निघं० ३।१८)। 'मरुत् हिरण्य-नाम' (निघं० १।२)। 'मरुत् रूपनाम' (निघं० ३।७)। 'मरुतो रश्मयः' (तां० ब्रा० १४।१२।९)। 'गणेशो हि मरुतः' (तां० ब्रा० १९।१४।२)। 'मरुतो ह वै देवविशो ऽन्तरिक्षभाजना ईश्वराः' (कौषी० ब्रा० ७।८)। 'मरुतो गणानां पतयः' (तैत्ति० ब्रा० ३। ११।१४।२)। 'मरुतो वै देवानामपराजितमायतनम्' (तैत्ति० ब्रा० १।४।६।२)। 'मरुतो वै देवानां भूयिष्ठाः' (तां० ब्रा० १४।१२।१) 'आपो वै मरुतः' (ऐत० ब्रा० ६। ३०)। 'ओजो वै वीर्यं मरुतः' (जैमि० ब्रा० ३।३०९)। 'अप्सु वै मरुतः श्रितः' (गो० उ० १।२२) 'पङ्क्तिश्छन्दो मरुतो देवताष्ठीववन्तः' (शत० ब्रा० १०।३।२।१०)। 'मरुत् स्तोमो वा एष (षोडशस्तोमः)' (तां० ब्रा० १७।१।३)। 'वीर्यं मरुतः' (जै० ब्रा० १।३०३)। 'चत्वारिशन्मरुतो देवाः' (जैमि० ब्रा० १।३४) कीनाशः (कृपौ कर्मकराः) आसन् मरुतः सुदानवः' (तैत्ति० ब्रा० २।४।८।७)। 'युञ्जन्तु त्वा मरुतो विश्ववेदस इति युञ्जन्तु त्वा देवा इत्येवैतदाह' (शत० ब्रा० ५।१।४।९)। 'अहुतादो वै मरुतो विट्' (शत० ब्रा० ४।५।२।१६)। 'मरुतो मितराविणो वा मितरोचिनो वा महद् द्रवन्ति इति वा' (निरु० ११।१४)।

मलयम्, मलयः नपुं०, पुं०। **इत्यत्र 'गोमय-कषाय-मलयान्वयाव्ययानि नपुंसके च' (लि० सू० ८८) इति नपुंसकलिङ्गता पुँल्लिङ्गता च।** मलते धरते इति मलयः। मल धारणे (भ्वा० आ०) 'बलि-मलि-तनिभ्यः कयन्' (उ० ४।१००) इति कयन्-प्रत्ययः। ककारानुबन्धलोपः। **अथवा** यद् मृज्यते शोध्यते तद् मलम्। मृजूष् शुद्धौ (अ० प०) 'मृजेष्टिलोपश्च' (उ० १।११०) इति कल-प्रत्ययः, धातोः ऋज् इत्यस्य टेर्लोपश्च। कल-प्रत्यये ककारानुबन्धलोपः। **अथवा** मलते मल्यते धार्यते वा यत् तत् मलम्। मल धारणे (भ्वा० आ०) 'नन्दि-ग्रहि-पचादिभ्यो०' (पा० अ० ३।१।१३४) इति अच्-प्रत्ययः। चकारानुबन्धलोपः। 'किट्टं मलोऽस्त्रियाम्' इत्यमरः। 'मलोऽस्त्री पाप-विट्-किट्टानि' इति चामरः। 'मलोऽस्त्री पापविट्-किट्टे कृपणे त्वभिधेयवत्' इति मेदिनी। मलं याति प्राप्नोति इति मलयः। मल + या गति-प्रापणयोः (अ० प०) 'आतोऽनुपसर्गे कः' (पा० अ० ३।२।३) इति क-प्रत्ययः। ककारानुबन्धलोपः।

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by S3 Foundation USA

'आतो लोप इटि च' (पा० अ० ६।४।६४) इति धातोः आकारस्य लोपः। एवमपि मलय-शब्दः व्युत्पद्यते।

मसिः स्त्री०, पुं०। इत्यत्र **'गो-मणि-यष्टि-पुष्टि-पाटलि-वस्ति-शाल्मलि-त्रुटि-मसि-मरीचयः' (लि० सू० १७२) इति स्त्रीलिङ्गिता पुँल्लिङ्गता च।** मस्यति परिणमति इति मसिः। मसी परिणामे (दि० प०) 'सर्वधातुभ्य इन्' (उ० ४।११९) इति इन्-प्रत्ययः। नकारानुबन्धलोपः। 'मसिजलं तु मेला स्यात् पत्राञ्जनं मसिर्द्वयोः' इति त्रिकाण्डशेषः।

मस्तकम्, मस्तकः नपुं०, पुं०। इत्यत्र **'कण्टकानीक-सरक-मोदक-चषक-मस्तक-पुस्तक-तडाक-निष्क-शुष्क-वर्चस्क-पिनाक-भाण्डक-पिण्डक-कटक-शण्डक-पिटक-तालक-फलक-पुलाकानि नपुंसके च' (लि० सू० ६३) इति नपुंसकलिङ्गता पुँल्लिङ्गता च।** मस्यति परिणमति इति मस्तकम्। मसी परिणामे (दि० प०) 'उणादयो बहुलम्' (पा० अ० ३।३।१) इति उणादीनां बहुल-वचनात् 'इष्यशिभ्यां तकन्' (उ० ३।१४८) इति तकन्-प्रत्ययः। नकारानुबन्धलोपः। अथवा मस्यते स्म इति मस्तम्। उक्त-मसी-धातोः 'निष्ठा' (पा० अ० ३।२।१०२) इति क्त-प्रत्ययः। ककारानुबन्धलोपः। 'न सामिवचने' (पा० अ० ५।४।५) इति ज्ञापितः कन्-प्रत्ययः अथवा 'संज्ञायां कन्' (पा० अ० ५।३।७५) इति कन्-प्रत्ययः। नकारानुबन्धलोपः। **अथवा** मस्तयति धारयति सहते वा इति मस्तकम्। मस्तु धारणे (काशकृत्स्नधातुपाठे चु० प०) 'नन्दि-ग्रहि-पचादिभ्यो०' (पा० अ० ३।१।१३४) इति अच्-प्रत्ययः। चकारानुबन्धलोपः। पूर्ववत् कन्-प्रत्ययः, नकारानुबन्धलोपः। **अथवा** उक्त-मस्त-धातोः 'ण्वुल्-तृचौ' (पा० अ० ३।१।१३३) इति ण्वुल्-प्रत्ययः। णकार-लकारानुबन्धलोपः। 'युवोरनाकौ' (पा० अ० ७।१।१) इति वु-स्थाने अकादेशः। 'मूर्धा ना मस्तकोऽस्त्रियाम्' इत्यमरः।

मस्तु नपुं०। इत्यत्र **'दारु-कशेरु-जतु-वस्तु-मस्तूनि नपुंसके' (लि० सू० ५८) इति नपुंसकलिङ्गता।** मस्यति परिणमति इति मस्तु। मसी परिणामे (दि० प०) 'सि-तनि-गमि-मसि-सच्यवि-धाञ्-क्रुशिभ्यस्तुन्' (उ० १।६९) इति तुन्-प्रत्ययः। नकारानुबन्धलोपः। 'मण्डं दधिभवं मस्तु' इत्यमरः।

महानसः पुं०। इत्यत्र **'सोपधः' (लि० सू० ९६) इति पुँल्लिङ्गता।** अन्यते जीव्यते येन तत् अनः। 'सर्वधातुभ्योऽसुन्' (उ० ४।१९०) इति असुन्-प्रत्ययः। उकार-नकारानुबन्धलोपः। एवम् अनस् अयं शब्दः निष्पद्यते। ततः महत् विपुलम् अनः

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by S3 Foundation USA

पक्वान्नं निष्पाद्यते यस्मिन् सः महानसः अस्मिन् अर्थे महत् + अनस् इत्यवस्थायाम् 'आन्महतः समानाधिकरण-जातीययोः' (पा० अ० ६।३।४६) इति महतः तकारस्य आकारादेशः। 'अकः सवर्णे दीर्घः' (पा० अ० ६।१।१०१) इति अकारस्य आकारस्य च आ-दीर्घः। 'अनोश्मायस्सरसां जातिसंज्ञयोः' (पा० अ० ५।४।९४) इति टच्-प्रत्ययः। टकार-चकारानुबन्धलोपः। एवं महानस इति अकारान्तः शब्दः निष्पद्यते। भट्टो जिदीक्षितः 'अनोश्मायस्सरसां जातिसंज्ञयोः' (पा० अ० ५।४।९४) अस्मिन् सूत्रे यत्र महानसम् इति विलिख्य अस्य नपुंसकलिङ्गतां सूचयति, तत्र 'सोपधः' (लि० सू० ९६) इत्यत्र महानसः इति विलिख्य पुँल्लिङ्गताम् अपि संकेतयते। 'रसवत्यो तु पाकस्थान-महानसे' इति उल्लेखात् अस्य शब्दस्य नपुंसकलिङ्गता एव सूच्यते।

माता स्त्री०। **इत्यत्र 'ऋकारान्ता मातृ-दुहितृ-स्वसृ-पोतृ-ननान्दरः' (लि० सू० ३) इति स्त्रीलिङ्गता।** मान्यते पूज्यते सा या माता। **अथवा** माति गर्भः यस्यां, गर्भे वा यस्याः शिशुः सा माता। 'मान पूजायां' (भ्वा० आ०) मा माने (अ० प०) 'नप्तृ-पितृ-त्वष्टृ-होतृ-पोतृ-भ्रातृ-जामातृ-मातृ-पितृ-दुहितृ' (उ० २।९७) इति तृन्-प्रत्ययः **अथवा** तृच्-प्रत्ययः। तृनि नकारानुबन्धलोपः। तृचि तु चकारानुबन्धलोपः। मान-धातोः नकारास्य लोपः अपि उक्त-तृन्-तृच्-सम्पादक-सूत्रेण एव भवति। एवं मातृ-शब्दः निष्पद्यते। अस्य प्रथमैकवचने माता भवति। 'ब्राह्मी माहेश्वरी चैव कौमारी वैष्णवी तथा। वाराही च तथेन्द्राणि चामुण्डा लोकमातरः' इत्यमरः। 'अम्बा माता' तथा 'जनयित्री प्रसूर्माता जननी' इत्यपि चामरः। 'माहेयी सौरभेयी गौरुस्रा माता च शृङ्गिणी' इत्यपि अमरः एव। 'मातरौ गोजनन्यौ द्वे' इति रुद्रः। 'माता गौर्दुर्गा जननी मही मातरश्च ब्रह्माण्याद्याः' इति हैमः। 'माता गौर्यादिजननी गोब्रह्माण्यादिभूमिपु' इति मेदिनी। 'माता कात्याप्रसूगोपु ब्रह्माण्याद्यास्तु मातरः' इति विश्वः। 'मातरः नदीनाम' (निघं० १।१३)। 'माता अन्तरिक्षम्, निर्मीयतेऽस्मिन् भूतानि' (निरु० २।८)।

मात्रा स्त्री०। **इत्यत्र 'यात्रा-मात्रा-भस्त्रा-दंष्ट्रा-वरत्राः स्त्रियामेव' (लि० सू० १५५) इति स्त्रीलिङ्गता।** मीयते अनया इति मात्रा। **अथवा** माति मिमीते इति मात्रा। मा माने (अ० प०), माङ् माने (जु० आ०) 'हु-या-मा-श्रु-भसिभ्यस्त्रन्' (उ० ४।१६९) इति त्रन्-प्रत्ययः। नकारानुबन्धलोपः। **अथवा** 'सर्वधातुभ्यः ष्ट्रन्' (उ० ४।१६०) इति ष्ट्रन्-प्रत्ययः। षकार-नकारानुबन्धलोपः। प्रत्ययात् एवं षकारे निवृत्ते ट्र इति 'त्र' रूपे भवति। ततः स्त्रियाम् 'अजाद्यतष्टाप्' (पा० अ० ४।१।४) इति टाप्-प्रत्ययः। टकार-पकारानुबन्धलोपः। 'अकः सवर्णे दीर्घः' (पा० अ० ६।१।१०१) इति अकारस्य

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by S3 Foundation USA

आकारस्य च आ-दीर्घः। **अथवा** मां लक्ष्मीं त्रायते या सा मात्रा। मा + त्रैङ् पालने (भ्वा० आ०) 'आदेच उपदेशेऽशिति' (पा० अ० ६।१।४५) इति धातोः ऐकारस्य आकारदेशः। 'आतोऽनुपसर्गे कः' (पा० अ० ३।२।३) इति क-प्रत्ययः। ककारानुबन्ध-लोपः। 'आतो लोप इटि च' (पा० अ० ६।४।६४) इति धातोः आकारस्य लोपः। ततः पूर्ववत् स्त्रियां टाप्-प्रत्ययः। टकार-पकारानुबन्धलोपः। अकारस्य आकारस्य च आ-दीर्घः। **अथवा** मां लक्ष्मीं त्रायते इति मात्रा। मा + त्रैङ् पालने (भ्वा० आ०) 'क्विप् च' (पा० अ० ३।२।७६) इति क्विप्-प्रत्ययः। तस्य सर्वापहारिलोपः। 'आदेच उपदेशेऽशिति' (पा० अ० ६।१।४५) इति धातोः ऐकारस्य आकारः। **अथवा** मातृ-शब्दः पूर्वं व्याख्यातः। तस्य तृतीयैकवचने 'मात्रा' भवति। 'स्त्रियां मात्रा त्रुटिः पुंसि लव-लेश-कणाणवः' इत्यमरः। 'मात्रा परिच्छदे' इति चामरः। 'मात्रा कर्ण-विभूपायां वित्ते माने परिच्छदे। अक्षरावयवे द्रव्ये मानेऽल्पे कर्णभूषणे। काले वृत्ते च' इति हैमः। 'मात्रा मानात्' (निरु० ४।२५)। 'यद्वेव मिमीते तस्मान्मात्रा' (शत० ब्रा० ३।९।४।८)।

मानम्, मानः नपुं०, पुं०। **इत्यत्र 'मान-यानाभिधान-नलिन-पुलिनोद्यान-शयनासन-स्थान-चन्दनालान-समान-भवन-वसन-सम्भावन-विभावन-विमानानि नपुंसके च' (लि० सू० ७६) इति नपुंसकलिङ्गता पुँल्लिङ्गता च।** मीयते अनेन इति मानं मानः वा। माङ् माने (दि० आ०) 'करणाधिकरणयोश्च' (पा० अ० ३।३।११७) इति ल्युट्-प्रत्ययः। लकार-टकारानुबन्धलोपः। 'युवोरनाकौ' (पा० अ० १।१।१) इति यु-स्थाने अनादेशः। **अथवा** मत्तुल्यः कश्चन न विद्यते, अहम् एव सर्वोपरि अस्मि ईदृशं मननं मानः। मनु अवबोधने (त० आ०) 'भावे' (पा० अ० ३। ३।१८) इति घञ्-प्रत्ययः। घकार-ञकारानुबन्धलोपः। 'अत उपधायाः' (पा० अ० ७।२।११६) इति धातोः अकारस्य आ-वृद्धिः। **अथवा** मानते मानयति वा इति मानः। मान पूजायाम् (भ्वा० आ०), मान पूजायाम् (चु० उ०) 'नन्दि-ग्रहि-पचादिभ्यो०' (पा० अ० ३।१।१३४) इति अच्-प्रत्ययः। चकारानुबन्धलोपः। **अथवा** माननं मानः। उक्त-पूजार्थक-मानधातुभ्याम् 'भावे' (पा० अ० ३।३।१८) इति घञ्-प्रत्ययः। घकार-ञकारानुबन्धलोपः। 'अत उपधायाः' (पा० अ० ७।२।११६) इति धातोः आकारस्य आकारः एव वृद्धिः। 'मानश्चित्तसमुन्नतिः' इत्यमरः। 'मानं प्रमाणे प्रस्थादौ मानश्चित्तोन्नते ग्रहे' इति हैमः।

मानिका स्त्री०। **इत्यत्र 'खारी-मानिके स्त्रियाम्' (लि० सू० १०५) इति स्त्रीलिङ्गता।** मानते मानयति वा इति मानिका। मान पूजायां (भ्वा० आ०), मान

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by S3 Foundation USA

पूजायाम् (चु० उ०) 'ण्वुल्-तृचौ' (पा० अ० ३। १। १३३) इति ण्वुल्-प्रत्ययः। णकार-लकारानुबन्धलोपः। 'युवोरनाकौ' (पा० अ० ७। १। १) इति वु-स्थाने अकादेशः। एवं मानक-शब्दः निष्पद्यते। ततः स्त्रियाम् 'अजाद्यतष्टाप्' (पा० अ० ४। १। ४) इति टाप्-प्रत्ययः। टकार-पकारानुबन्धलोपः। 'अकः सवर्णे दीर्घः' (पा० अ० ६। १। १०१) इति अकारस्य आकारस्य च आ-दीर्घः 'प्रत्ययस्थात् कात् पूर्वादिदाप्यसुपः' (पा० अ० ७। ३। ४४) इति नकार-परवर्त्तिनः अकारस्य इकारादेशः। एवं मानिका-शब्दः व्युत्पद्यते। **अथवा** मान-शब्दः पूर्व व्याख्यात मानः मानं वा अस्ति अस्य इति मानी। मान-शब्दात् 'अत इनिठनौ' (पा० अ० ५। २। ११५) इति इनि-प्रत्ययः। नकारस्य-वर्त्तिनः इकारस्य लोपः 'यस्येति च' (पा० अ० ६। ४। १४८) इति मान शब्दे नकार-परवर्त्तिनः अकारस्य लोपः। एवं मानिन् निष्पद्यते। मानिनं कायति शब्दयति इति मानिका। मानिन् + कै शब्दे (भ्वा० प०) 'आदेच उपदेशेऽशिति' (पा० अ० ६। १। ४५) इति धातोः ऐकारस्य आकारः। 'आतोऽनुपसर्गे कः' (पा० अ० ३। २। ३) इति क-प्रत्ययः। ककारानुबन्धलोपः। 'आतो लोप इटि च' (पा० अ० ६। ४। ६४) इति धातोः आकारस्य लोपः। 'नलोपः प्रातिपदिकान्तस्य' (पा० अ० ८। २। ७) इति इति मानिन् इत्यस्य नकारस्य लोपः। एवं मानिक-शब्दः निष्पद्यते। ततः स्त्रियाम् 'अजाद्यतष्टाप्' (पा० अ० ४। १। ४) इति टाप्-प्रत्ययः। टकार-पकारानुबन्धलोपः। 'अकः सवर्णे दीर्घः' (पा० अ० ६। १। १०१) इति अकारस्य आकारस्य च आ-दीर्घः। एवं मानिका-शब्दः व्युत्पद्यते। **अथवा** मानः अस्ति अस्याः इत्यर्थे मान-शब्दात् 'अत इनि-ठनौ' (पा० अ० ५। २। ११५) इति ठन्-प्रत्ययः। नकारानुबन्धलोपः। 'ठस्येकः' (पा० अ० ७। ३। ५०) इति ठस्य इकादेशः। 'यस्येति च' (पा० अ० ६। ४। १४८) इति नकारोत्तर-वर्त्तिनः अकारस्य लोपः। एवं मानिक-शब्दः निष्पद्यते। ततः पूर्ववत् टाप्-प्रत्ययः। टकार-पकारानुबन्धलोपः, अकारस्य आकारस्य च आ-दीर्घः। **अथवा** मां लक्ष्मीं नि नितरां कायति शब्दायते शब्दायति वा इति मानिका। मा + नि + कै शब्दे (भ्वा०) 'आदेच उपदेशेऽशिति' (पा० अ० ६। १। ४५) इति धातोः ऐकारस्य आकारः। 'आतोऽनुपसर्गे कः' (पा० अ० ३। २। ३) इति क-प्रत्ययः। ककारानुबन्धलोपः। 'आतो लोप इटि च' (पा० अ० ६। ४। ६४) इति धातोः आकारस्य लोपः। एवं मानिक-शब्दः निष्पद्यते। ततः स्त्रियाम् 'अजाद्यतष्टाप्' (पा० अ० ४। १। ४) इति टाप्-प्रत्ययः। टकार-पकारानुबन्धलोपः। 'अकः सवर्णे दीर्घः' (पा० अ० ६।

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by S3 Foundation USA

१। १०१) इति अकारस्य आकारस्य च आ-दीर्घः। एवम् अपि मानिका-शब्दः व्युत्पद्यते।

मार्गणः पुं०। इत्यत्र **'देवासुरात्म-स्वर्ग-गिरि-समुद्र-नख-केश-दन्त-स्तन-भुज-कण्ठ-खड्ग-शर-पङ्काभिधानानि' (लि० सू० ४३) इति पुँल्लिङ्गता।** मार्गयति इति मार्गणः। मार्ग अन्वेषणे (चु० उ०) 'बहुलमन्यत्रापि' (उ० २। ७९) इति युच्-प्रत्ययः। चकारानुबन्धलोपः। 'णेरणिटि' (पा० अ० ६। ४। ५१) इति 'सत्यापपाश०' (पा० अ० ३। १। २५) इति मार्गधातोः स्वार्थे विहितस्य णिच्-प्रत्ययस्य इकारस्य लोपः। 'युवोरनाकौ' (पा० अ० ७। १। १) इति यु-स्थाने अनादेशः। 'अट्-कुप्वाङ्-नुम्-व्यवायेऽपि' (पा० अ० ८। ४। २) इति नस्य णः। **अथवा** मार्ग्यते येन सः मार्गणः। मार्ग अन्वेषणे (चु० उ०) 'करणाधिकरणयोश्च' (पा० अ० ३। ३। ११७) इति ल्युट्-प्रत्ययः। लकार-टकारानुबन्धलोपः। 'युवोरनाकौ' (पा० अ० ७। १। १) इति यु-स्थाने अनादेशः। 'अट्-कुप्वाङ्-नुम्-व्यवायेऽपि' (पा० अ० ८। ४। २) इति नस्य णः। 'कलम्ब-मार्गण-शराः', 'वनीयको याचनको मार्गणो याचकार्थिनौ', 'संवीक्षणं विचयनं मार्गणं मृगणा मृगः' इति चामरः। 'मार्गणं याचनेऽन्वेषे मार्गणस्तु शरेऽर्थिनि' इति हैमः।

मासम्, मासः नपुं०, पुं०। इत्यत्र **'चमसांस-रस-निर्यासोपवास-कार्पास-वास-मास-कास-कांस-मांसानि नपुंसके च' (लि० सू० ९८) इति नपुंसकलिङ्गता पुँल्लिङ्गता च।** मस्यते परिमीयते यः येन वा इति मासः। मसी परिणामे (दि० प०) 'अकर्त्तरि च कारके संज्ञायाम्' (पा० अ० ३। ३। १९) इति कर्मणि घञ्-प्रत्ययः। **अथवा** 'हलश्च' (पा० अ० ३। ३। १२१) इति घञ्-प्रत्ययः। घकार-ञकारानुबन्धलोपः। 'अत उपधायाः' (पा० अ० ७। २। ११६) इति धातोः उपधायाः अकारस्य आ-वृद्धिः। **अथवा** मायते मिमीते वा इति मासः, मीयते वा अनेन इति मासः। माङ् माने (दि० आ०), माङ् माने शब्दे च (जु० उ०) 'उणादयो बहुलम्' (पा० अ० ३। ३। १) इति उणादीनां बहुलवचनात् 'वृ-तृ-वदि-वचि-वसि-हनि-कमि-कषिभ्यः सः' (उ० ३। ६२) इति स-प्रत्ययः। 'मासस्तु तावुभौ' इत्यमरः। 'यव्या मासाः' (शत० ब्रा० १।७। २। २६)। 'त्रिंशद्वै रात्रयो मासः' (काठ० सं० ३६। २, मैत्रा० सं० १। १०। ८)। 'त्रिंशिनो मासाः' (तै० सं० ७।५।२०।१) 'मासा वै देवा अभिद्यवः' (गोप० १।५। २।३) 'मासा वै वाजाः' (तै० सं० २।५।७।४)। 'मासास्त्वा श्रपयन्तु' (तै० आ० ४। २६।१)। 'त्रिशन्मासो रात्रयः' (काठ० सं० ३४।९)। 'मासाः सन्धानानि' (तै० सं० ७।

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by S3 Foundation USA

५।२५।१)। 'मासा वै रश्मयः' (तां० ब्रा० १४।१२।९)। 'मासा हवींषि' (शत० ब्रा० ११।२।७।३) 'दक्षिणावृतो मासाः' (तै० सं० ५।३।२।४)। 'मासा मानात्' (नि० ४।२७)।

मांसम्, मांसः नपुं०, पुं०। इत्यत्र **'चमसांस-रस-निर्यासोपवास-कार्पास-वास-मास-कास-कांस-मांसानि नपुंसके च' (लि० सू० ९८) इति नपुंसकलिङ्गता पुँल्लिङ्गता च।** मन्यते मनुते जानाति ज्ञायते वा अनेन इति मांसं मांसः वा। 'मन ज्ञाने' (दि० आ०), मनु अवबोधने (त० आ०) 'मनेर्दीर्घश्च' (उ० ३।६४) इति स-प्रत्ययः धातोः अकारस्य आ-दीर्घश्च। 'नश्चापदान्तस्य झलि' (पा० अ० ८।३।२४) इति धातोः नकारस्य अनुस्वारः। 'पिशितं तरसं मांसं पललं क्रव्यमामिषम्' इत्यमरः। 'मांसं स्यादामिषे क्लीबं कक्कोली-जटयोः स्त्रियाम्' इति मेदिनी। 'मांसं सादनम्' (शत० ब्रा० ८।१।४।५)। 'मांसं वै पुरीषम्' (शत० ब्रा० ८।६।२।१४) 'मांसं माननं वा मानसं वा मनोऽस्मिन् सीदतीति वा' (निरु० ४।३)।

मित्रम् नपुं०। इत्यत्र **'द्वाराग्र-स्फार-तक्र-वक्र-वप्र०' (लि० सू० ९०) इति नपुंसकलिङ्गता।** मिनोति प्रक्षिपति वर्षति स्वसर्वस्वम् इति मित्रम्। डुमिञ् प्रक्षेपणे (दि० उ०) 'अमि-चि-मि-शसिभ्यः क्त्रः' (उ० ४।१६५) इति क्त्र-प्रत्ययः। ककारानुबन्धलोपः। प्रत्ययस्य कित्त्वात् तस्मिन् परे 'सार्वधातुकार्धधातुकयोः' (पा० अ० ७।३।८४) इति धातोः इकारस्य प्राप्तः ए-गुणः 'क्ङिति च' (पा० अ० १।१।५) इति निषेधात् न भवति। उक्त-सूत्रे क्वचित् मि-स्थाने 'मिदि' एवम् अपि पाठ-दर्शनात् मेदते मेद्यति स्निह्यति वा इति मित्त्रम् इति भवति। तत्र ञिमिदा स्नेहने (भ्वा० आ०) (दि० प०) धातोः उक्त-रीत्या क्त्र-प्रत्ययः। ककारानुबन्धलोपः। 'खरि च' (पा० अ० ८।४।५५) इति धातोः दकारस्य तकारः विशेषः बोध्यः। 'द्युमणिस्तरणिर्मि-त्रश्चित्रभानुर्विरोचनः' इत्यमरः। 'मित्त्रमतः परम्' तथा 'अथ मित्त्रं सखा सुहृत्' एवं 'मित्रो रवावपि' इति चामरः। 'मित्रं सुहृदि न द्वयोः सूर्ये पुंसि' इति मेदिनी। 'मित्रः पदनाम' (निघं० ५।४)। 'मित्रः प्रमितेस्त्रायते मेदयतेर्वा' (निरु० १०।२१)। 'योऽर्धमासः अपक्षीयते स मित्रः' (शत० ब्रा० २।४।४।१८)। 'ब्रह्मैव मित्रः' (शत० ब्रा० ४।१।४।१)। 'सर्वस्य ह्येव मित्रो मित्रम्' (शत० ब्रा० ५।३।२।७)। 'मित्रः क्षत्रं क्षत्रपतिः' (शत० ब्रा० ११।४।३।११)। 'प्राणो वै मित्रः' (शत० ब्रा० ६।५।१।५)। 'अयं वै वायुर्मित्रो योऽयं पवते' (शत० ब्रा० ६।५।७।१४)। 'मित्र! सत्यानामधिपतये' (तैत्ति० ब्रा० ३।११।४।१)। 'अहर्मित्रः' (तां० ब्रा० २५।१०।१०)। 'सः (अर्धमासः)

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by S3 Foundation USA

आपूर्यते स मित्रः' (तां० ब्रा० २५।१०।१०)। 'मित्रेणैव यज्ञस्य स्विष्टं शमयति' (तै० ब्रा० १।२।२।३)। 'मित्रमहः' (मैत्रा० सं० १।८।९)। 'सत्यं वै मित्रः' (मैत्रा० सं० ४।३।९)। 'प्राणो मित्रम्' (जैमि० उ० ३।३।६) 'मित्रः क्षीरश्रीः (सोमः)' (तै० सं० ४।४।९।१)। 'मित्रो वै शिवो देवानाम्' (तैत्ति० सं० ५।१।६।१)। 'मित्रो वै यज्ञस्य शान्तिः' (काठ० सं० ३५।१९)।

मिथुनम् नपुं०। इत्यत्र **'जघनाजिन-तुहिन-कानन-वन-वृजिन-विपिन-वेतन-शासन-सोपान-मिथुन-श्मशान-रत्न-निम्न-चिह्नानि नपुंसके' (लि० सू० ७५) इति नपुंसकलिङ्गता।** मेथति जानाति हिनस्ति वा इति मिथुनम्। मिथृ मेधा-हिंसयोः (भ्वा० प०) क्षीरस्वाम्यभिमताद् धातोः 'क्षुधि-पिशि-मिथिभ्यः कित्' (उ० ३।५५) इति उनन्-प्रत्ययः, स च कित्। नकारानुबन्धलोपः। प्रत्ययस्य कित्त्वात् तस्मिन् परे 'पुगन्त-लघूपधस्य च' (पा० अ० ७।३।८६) इति धातोः उपधायाः इकारस्य प्राप्तः ए-गुणः 'क्ङिति च' (पा० अ० १।१।५) इति निषेधात् न भवति। 'सम्बन्धे सुरते युग्मे राशौ मिथुनमिष्यते' इति व्याडिः। 'स्त्रीपुंसौ मिथुनं द्वन्द्वम्' इत्यमरः। 'मिथुनं न द्वयो राशिभेदे स्त्रीपुंसयुग्मयोः' इति मेदिनी। 'मिथुनौ सरण्यू मध्यमं च माध्यमिका च वाचमिति नैरुक्ताः। यमं च यमीं चेत्यैतिहासिकाः' (निरु० १२।१०) 'मिथुनौ कस्मात्? मिनोति श्रयतिकर्मा, थु इति नामकरणस्थकारो वा नयतिः परो वनिर्वा, समाश्रितावन्योन्यं नयतो वनुतो वा। मनुष्य-मिथुनावप्येतस्मादेव, मेथन्तावन्योन्यं वनुत इति वा' (निरु० ७।२९)। 'मिथुनं चक्षुः (प्राणापानौ)' (काठ० सं० १०।१)। 'मिथुनं वा अग्नीच्च पत्नीश्च' (मैत्रा० सं० ४।७।४)। 'मिथुनं वा आपश्च पयश्च' (मैत्रा० सं० १।८।३)। 'मिथुनं वै घृतं च सोमश्च' (मैत्रा० सं० ४।७।४)। 'मिथुनं वै पशवः' (ऐत० आ० ४।२१)। 'द्वन्द्वं वै मिथुनम्' (ऐत० ब्रा० ३।५०)। 'मिथुनं वा आपश्च पयश्च' (मैत्रा० सं० १।८।३)।

मिषम्, मिषः नपुं०, पुं०। इत्यत्र **'यूष-करीष-मिष-विष-वर्षाणि नपुंसके च' (लि० सू० ९५) इति नपुंसकलिङ्गता पुँल्लिङ्गता च।** मेषति सिञ्चति, मिषति वर्षति वा इति मिषम्, मिषः वा। मिषु सेचने (भ्वा० प०), मिष स्पर्धायां (तु० प०) 'इगुपध-ज्ञा-प्री-किरः कः' (पा० अ० ३।१।१३५) इति क-प्रत्ययः। ककारानुबन्धलोपः। प्रत्ययस्य कित्त्वात् तस्मिन् परे 'पुगन्त-लघूपधस्य च' (पा० अ० ७।३।८६) इति धातोः उपधायाः इकारस्य प्राप्तः ए-गुणः 'क्ङिति च' (पा० अ० १।१।५) इति निषेधात् न भवति।

CC-0.Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by S3 Foundation USA

मुकुटम् नपुं०। इत्यत्र **'किरीट-मुकुट-ललाट-वट-वीट-शृङ्गाटक-राट-लोष्टानि नपुंसके' (लि० सू० ६५) इति नपुंसकलिङ्गता।** मङ्क्ते भूषयति इति मुकुटम्। मकि भूषणे (भ्वा० आ०) 'पृषोदरादीति यथोपदिष्टम्' (पा० अ० ६। ३। १०९) इति उट-प्रत्ययः धातोः मकारपर-वर्त्तिनः अकारस्य उकारादेशश्च। आगम-शास्त्रस्य अनित्यत्वात् अत्र धातोः इदित्त्वात् 'इदितो नुम् धातोः' (पा० अ० ७। १। ५८) इति प्राप्तः नुम्-आगमः न भवति। 'अथ मुकुटं किरीटं पुंनपुंसकम्' इत्यमरः।

मुखम् नपुं०। इत्यत्र **'मुख-नयन-लोह-वन-मांस-रुधिर-कार्मुक-जल-हल-धनान्नाभिधानानि' (लि० सू० १३७) इति नपुंसकलिङ्गता।** यत् खनति येन वा खन्यते तत् मुखम्। खनु अवदारणे (भ्वा० उ०) 'डित् खनेर्मुट् स चोदात्तः' (उ० ५। २०) इति अच्-प्रत्ययः। **अथवा** अल्-प्रत्ययः, स च डित्, धातोः मुडागमश्च। अचि चकारानुबन्धलोपः, अलि तु लकारानुबन्धलोपः। 'अजलोः स्वरे भेदः' इति सिद्धान्त-कौमुद्याम् उणादौ बालमनोरमाकारः। मुडागमे टकारानुबन्धलोपः। मुटः उदात्तत्त्वविधान-सामर्थ्यात् उकारलोपः न। अजलोः डित्त्व-विधानात् तत्परे 'टेः' (पा० अ० ६। ४। १४३) इति धातोः अन् इत्यस्य टेर्लोपः। 'मुखं निःसरणम्' इत्यमरः। 'वक्त्रास्ये वदनं तुण्डमाननं लपनं मुरवम्' इति चामरः। 'मुखमुपाये प्रारम्भोपाययोरपि। सन्ध्यन्तरे नाटकादेः शब्देऽपि च नपुंसकम्' इति मेदिनी। 'प्राक् खनो मुड्डदात्तश्च ततोऽच्च प्रत्ययो भवेत्। प्रजासृजा यतः खातं तस्मादाहुर्मुखं बुधाः' इति निरुक्तम् अपि अमरकोषे भानुजिदीक्षितः। 'मुखमुपाये प्रारम्भे श्रेष्ठे निःसरणास्ययोः' इति हैमः। 'मुखं प्रतीकम्' (शत० ब्रा० १४। ४। ३। ७) 'मुखं वै वायव्यम् (पात्रम्)' (मैत्रा० सं० ४। ५। ७)।

मुञ्जः पुं०। इत्यत्र **'ध्वज-गज-मुञ्ज-पुञ्जाः' (लि० सू० ११०) इति पुँल्लिङ्गता।** मुञ्जति शब्दयति शब्दायते वा इति मुञ्जः। मुजि शब्दे (भ्वा० प०) धातोः इदित्त्वात् 'इदितो नुम् धातोः' (पा० अ० ७। १। ५८) इति नुम्-आगमः। उकार-मकारानुबन्धलोपः। 'नश्चापदान्तस्य झलि' (पा० अ० ८। ३। २४) इति धातोः नकारस्य अनुस्वारः। 'अनुस्वारस्य ययि परसवर्णे' (पा० अ० ८। ४। ५८) इति अनुस्वारस्य परसवर्णः ञकारः। 'नन्दि-ग्रहि-पचादिभ्यो०' (पा० अ० ३। १। १३४) इति अच्-प्रत्ययः। चकारानुबन्धलोपः। 'यज्ञिया हि मुञ्जाः' (शत० ब्रा० १२। ८। ३। ६) 'योनिर्मुञ्जाः' (शत० ब्रा० ६। ६। २। १५)। 'मुञ्जो विमुच्यते इषीकया' (निरु० ९। ६)।

मुण्डः पुं०। इत्यत्र **'गण्ड-मण्ड-करण्ड-भरण्ड-वरण्ड-तुण्ड-गण्ड-मुण्ड-पाषण्ड-शिखण्डाः' (लि० सू० ११२) इति पुँल्लिङ्गता।** यः मुण्ड्यते खण्ड्यते

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by S3 Foundation USA

सः मुण्डः। मुडि खण्डने (भ्वा० प०) 'अकर्त्तरि च कारके संज्ञायाम्' (पा० अ० ३। ३। १९) इति घञ्-प्रत्ययः। घकार-ञकारानुबन्धलोपः। धातोः इदित्त्वात् 'इदितो नुम् धातोः' (पा० अ० ७। १। ५८) इति नुम्-आगमः। उकार-मकारानुबन्धलोपः। 'नश्चापदान्तस्य झलि' (पा० अ० ८। ३। २४) इति नकारस्य अनुस्वारः। 'अनुस्वारस्य ययि परसवर्णः' (पा० अ० ८। ४। ५८) इति अनुस्वारस्य परसवर्णः णकारः। एवं मुण्ड-शब्दः निष्पद्यते। **अथवा** यः मुण्डति सः अपि मुण्डः। अत्र अपि मुडिधातोः 'नन्दिग्रहिपचादिभ्यो०' (पा० अ० ३। १। १३४) इति अच्-प्रत्ययः। चकारानुबन्धलोपः। नकारस्य अनुस्वारः। अनुस्वारस्य परसवर्णः। एवम् अपि मुण्डः निष्पद्यते। 'मुण्डस्तु मुण्डिते' इत्यमरः। 'मुण्डो मुण्डित-शीर्षयोः। राहौ दैत्यान्तरे' इति हैमः।

मुद् स्त्री०। इत्यत्र **'प्रतिपदापद्-विपत्-सम्पच्छरत्-संसत्-परिषदुषः-संवित्-क्षुत्-पुन्मुत्-समिधः' (लि० सू० २७) इति स्त्रीलिङ्गता।** मोदनं मुद्। मुद हर्षे (भ्वा० आ०) 'सम्पदादिभ्यः क्विप्' (पा० अ० ३। ३। ९४) इति क्विप्-प्रत्ययः। तस्य सर्वापहारिलोपः। 'मुत्प्रीतिः प्रमदो हर्षः' इत्यमरः। 'ओषधयो वै मुदः ओषधिभिर्हीदं सर्वं मोदते' (शत० ब्रा० ९। ४। १। ७)

मुनिः पुं०। इत्यत्र **'ऋषि-राशि-दृति-ग्रन्थि-क्रिमि-ध्वनि-बलि-कौलि-मौलि-रवि-कवि-कपि-मुनयः'(लि० सू० १०९) इति पुँल्लिङ्गता।** मन्यते जानाति अथवा मनुते अवबुध्यते इति मुनिः। मन ज्ञाने (दि० आ०), मनु अवबोधने (त० आ०) 'मनेरुच्च' (उ० ४। १२४) इति इन्-प्रत्ययः, स च कित्, धातोः उपधायाः अकारस्य उकारादेशश्च। प्रत्यये नकारानुबन्धलोपः। प्रत्ययस्य कित्त्वात् तस्मिन् परे 'पुगन्त-लघूपधस्य च' (पा० अ० ७। ३। ८६) इति धातोः उपधायाः उकारस्य प्राप्तः ओ-गुणः 'क्ङिति च' (पा० अ० १। १। ५) इति निषेधात् न भवति। 'वाचंयमो मुनिः' इत्यमरः। 'मुनीन्द्रः श्रीघनः शास्ता' इति चामरः। 'मुनिः पुंसि वसिष्ठादौ वङ्गसेनतरौ जिने' इति मेदिनी। 'मुनिर्वाचंयमेऽर्हति प्रियालागस्तिपालाशे' इति हैमः।

मुष्टिः स्त्री०, पुं०। इत्यत्र **'गो-मणि-यष्टि-मुष्टि-पाटलि-बस्ति-शाल्मलि-त्रुटि-मसि-मरीचयः' (लि० सू० १७२) इति स्त्रीलिङ्गता पुँल्लिङ्गता च।** मोषणं मुष्टिः। मुष स्तेये (क्र्या० उ०) 'स्त्रियां क्तिन्' (पा० अ० ३। ३। ९४) इति क्तिन्-प्रत्ययः। ककार-नकारानुबन्धलोपः। 'ष्टुना ष्टुः' (पा० अ० ८। ४। ४८) इति प्रत्ययस्य तकारस्य टकारः। **अथवा** मुष्णातु इति मुष्टिः। मुष स्तेये (क्र्या० उ०) 'क्तिच्-क्तौ च संज्ञायाम्' (पा० अ० ३। ३। १७४) इति आशिषि क्तिच्-प्रत्ययः। ककार-चकारानुबन्धलोपः।

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by S3 Foundation USA

प्रत्ययस्य तकारस्य पूर्ववत् टकारः। 'मुष्टिर्मोचनाद्वा मोषणाद्वा मोहनाद्वा' (निरु० ६। १)। 'राष्ट्रं मुष्टिः' (तै० ब्रा० ३।९।७।५) एवं (शत० ब्रा० १३।२।९।७)।

मुसलः, मुसलम् पुं०, नपुं०। इत्यत्र 'शील-मूल-मङ्गल-साल-कलम-तल-मुसल-कुण्डल-पलल-मृणाल-वाल-निगल-पलल-विडाल-खिल-शूलाः पुंसि च' (लि० सू १४३) इति पुंल्लिङ्गता नपुंसकलिङ्गता च। मुस्यति खण्डयति इति मुसलः मुसलं वा। मुस खण्डने (दि० प०) 'वृषादिभ्यश्चित्' (उ० १। १०६) इति कल-प्रत्ययः, स च चित्। चित्त्वं स्वरार्थम्। प्रत्यये ककारानुबन्धलोपः। प्रत्ययस्य कित्त्वात् तस्मिन् परे 'पुगन्त-लघूपधस्य च' (पा० अ० ७। ३। ८६) इति धातोः उपधायाः उकारस्य प्राप्तः ओ-गुणः 'क्ङिति च' (पा० अ० १।१।५) इति निषेधात् न भवति। **अथवा** मुस्यति इति मुसः। मुस स्तेये (दि० प०) 'इगुपध-ज्ञा-प्री-किरः कः' (पा० अ० ३। १। १३५) इति क-प्रत्ययः। ककारानुबन्धलोपः। अत्र अपि धातोः उपधायाः उकारस्य 'पुगन्तलघूपधस्य च' (पा० अ० ७।३।८६) इति प्राप्तः ओ-गुणः 'क्ङिति च' (पा० अ० १।१।५) इति निषेधात् एव न भवति। पुनः मुसं लाति इति मुसलः मुसलं वा। मुस + ला आदाने (अ० प०) 'आतोऽनुपसर्गे कः' (पा० अ० ३। २। ३) इति क-प्रत्ययः। ककारानुबन्धलोपः। 'आतो लोप इटि च' (पा० अ० ६।४। ६४) इति धातोः आकारस्य लोपः। **अथवा** मुसं लुनाति इति मुसलः मुसलं वा। मुस + लूञ् छेदने (क्र्या० उ०) 'अन्येष्वपि दृश्यते' (पा० अ० ३। २। १०१) इति ड-प्रत्ययः। डकारस्य अनुबन्धलोपः। 'टेः' (पा० अ० ६।४।१४३) इति धातोः ऊकारस्य टेर्लोपः। 'अयोऽग्रो मुसलोऽस्त्री स्यात्' इत्यमरः। 'मुसलं स्यादयोऽग्रे च पुनपुंसकयोः स्त्रियाम्। तालुमूल्यामाखुपर्णीगृहगोधिकयोरपि' इति मेदिनी। 'मूर्धन्यमध्योऽप्ययमिति वर्णदेशना। मुस खण्डने इति धातोर्दन्त्यान्तेषु मूर्धन्यान्तेषु च बोपदेवादिभिः पठितत्वात्। उज्ज्वलदत्तादयस्तु तालव्यमध्यमप्याहुः। अत एव 'मुसलो मुषलोऽपि च' इति विश्वकोशे। 'मुशलोऽपि चेति पाठान्तरम्' इति सिद्धान्तकौमुद्याम् उणादौ तत्त्वबोधिनीकारः। 'योनिरुलूखलमुत्तरोखा भवत्यधरमुलूखलमुत्तरं ह्युदरमधरा योनिः शिश्नं मुसलम्' (शत० ब्रा० ७।५।१।३८)। 'मुषलो मुसलः प्रोक्तः' इति द्विरूपकोषः।

मुस्तः, मुस्तम् पुं०, नपुं०। इत्यत्र 'घृत-भूत-मुस्त-क्ष्वेलितैरावत-पुस्तक-बुस्त-लोहिताः' (लि० सू० १७७) इति पुँल्लिङ्गता नपुंसकलिङ्गता च। मुस्तयति इति मुस्तः मुस्तं वा। मुस्त संघाते (चु० उ०) 'नन्दि-ग्रहि-पचादिभ्यो०' (पा० अ० ३। १। १३४) इति अच्-प्रत्ययः। तस्मिन् परे 'णेरनिटि' (पा० अ० ६।४।५१) इति

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by S3 Foundation USA

'सत्यापपाश०' (पा० अ० ३।१।२५) इति स्वार्थे विहितस्य णिच् प्रत्ययस्य इकारस्य लोपः। अच्-प्रत्यये चकारानुबन्धलोपः। 'कुरुविन्दो मेघनामा मुस्ता मुस्तकमस्त्रियाम्' इत्यमरः।

मुहूर्त्तः पुं०। इत्यत्र **'हस्त-कुन्तान्त-व्रात-व्रात-दूत-धूर्त्त-सूत-चूत-मुहूर्त्ताः' (लि० सू० १११) इति पुँल्लिङ्गता।** हूर्च्छति कुटिलः भवति इति मुहूर्त्तः। हूर्छा कौटिल्ये (भ्वा० प०) 'उणादयो बहुलम्' (पा० अ० ३।१।१) इति उणादीनां बहुलवचनात् 'अञ्चि-घृ-सिभ्यः क्तः' (उ० ३।८९) इति क्त-प्रत्ययः, धातोः मुडागमश्च। प्रत्यये ककारानुबन्ध-लोपः। आगमे उकार-टकारानुबन्धलोपः। 'राल्लोपः' (पा० अ० ६।४।२१) इति धातोः छकारस्य लोपः। 'हलि च' (पा० अ० ८।२।७७) इति धातोः उकारस्य ऊ-दीर्घः। 'अञ्चि-घृ-सृभ्यः क्तः' (उ० ३।८९) इति विहितस्य क्त-प्रत्ययस्य अत्र 'क्त-क्तवतु निष्ठा' (पा० अ० १।१।२६) इति निष्ठा-संज्ञा तु न भवति, तथात्वे हि 'निष्ठा च द्व्यजनात्' (पा० अ० ६।१।२०५) इति आद्युदात्तत्वं प्रसज्येतेति 'क्त-क्तवतू निष्ठा' (पा० अ० १।१।२६) इति सूत्रे कैयटः। 'ते क्षणाः तु मुहूर्त्तो द्वादशास्त्रियाम्' इत्यमरः। 'चित्रं केतुर्दाता प्रदाता सविताभिशस्तानुमन्तेति एतेऽनुवाका मुहूर्तानां नामधेयानि' (तैत्ति० ब्रा० ३।१०।१०।३)। 'मुहूर्ताः स (प्रजापतिः) पञ्चदशाह्नो रूपाण्यपश्यदात्मनस्तन्वो मुहूर्ता लोकम्पृणाः पञ्चदशैव रात्रेस्तद् यन्मुहुः त्रायन्ते तस्मान्मुहूर्ताः' (शत० ब्रा० १०।४।२।१८)। 'मुहूर्तो मुहुर्ऋतुः' (निरु० २।२५)।

मूत्रम् नपुं०। इत्यत्र **'द्वाराग्र-स्फार-तक्र-वक्र०' (लि० सू० ९०) इति नपुंसकलिङ्गता।** यद् मुच्यते तद् मूत्रम्। मुच्लृ मोक्षणे (तु० उ०) 'सिवि-मुच्योष्टेरू च' (उ० ४।१६४) इति ष्ट्रन्-प्रत्ययः,स च कित्, धातोः टि-संज्ञकस्य उच् इत्यस्य ऊ इत्यादेशश्च। प्रत्यये षकार-नकारानुबन्धलोपः। प्रत्ययस्य कित्त्वात् तस्मिन् परे 'सार्वधातुकार्धधातुकयोः' (पा० अ० ७।३।८४) इति धातोः ऊकारस्य प्राप्तः ओ-गुणः 'क्ङिति च' (पा० अ० १।१।५) इति निषेधात् न भवति। **अथवा** यत् मूत्र्यते तत् मूत्रम्। मूत्र प्रस्रवणे (चु० उ०) 'अकर्त्तरि च कारके संज्ञायाम्' (पा० अ० ३।३।१९) इति घञ्-प्रत्ययः। घकार-ञकारानुबन्धलोपः। 'मूत्रं प्रस्रावः' इत्यमरः।

मूलः, मूलम् पुं०, नपुं०। इत्यत्र **'शील-मूल-मङ्गल-साल-कमल-तल-मुसल-कुण्डल-पलल-मृणाल-वाल-निगल-पलल-विडाल-खिल-शूलाः पुंसि च' (लि० सू० १४३) इति पुँल्लिङ्गता नपुंसकलिङ्गता च।** मवते बध्नाति इति मूलः मूलं वा। मूङ् बन्धने (भ्वा० आ०) 'मू-शक्यबिभ्यः क्लः' (उ० ४।१०९) इति क्ल-

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by S3 Foundation USA

प्रत्ययः। ककारानुबन्धलोपः। कित्त्वात् 'सार्वधातुकार्धधातुकयोः' (पा० अ० ७। ३। ८४) इति धातोः ऊकारस्य प्राप्तः ओ-गुणः 'क्ङिति च' (पा० अ० १। १। ५) इति निषिध्यते। **अथवा** मूलति प्रतिष्ठितः वा भवति प्रतिष्ठापयति प्रतिष्ठाप्यते वा इति मूलः मूलं वा। मूल प्रतिष्ठायां (भ्वा० प०) **अथवा** मूलयति रोहति इति मूलः मूलं वा। मूल रोहणे (चु० उ०) 'इगुपध-ज्ञा-प्री-किरः कः' (पा० अ० ३। १। १३५) इति क-प्रत्ययः। ककारानुबन्धलोपः। **अथवा** मवनं मूः। मूङ् बन्धने (भ्वा० आ०) 'सम्पदादिभ्यः क्विप्' इति क्विप्-प्रत्ययः। तस्य सर्वापहारिलोपः। मुवं बन्धनं लाति इति मूलः मूलं वा। मू + ला आदाने (अ० प०) 'आतोऽनुपसर्गे कः' (पा० अ० ३। २। ३) इति क-प्रत्ययः। ककारानुबन्धलोपः। 'आतो लोप इटि च' (पा० अ० ६। ४। ६४) इति धातोः आकारस्य लोपः। **अथवा** मुवं बन्धनं लुनाति छिनत्ति इति मूलः मूलं वा। मू + लूञ् छेदने (क्र्या० उ०) 'अन्येष्वपि दृश्यते' (पा० अ० ३। २। १०१) इति ड-प्रत्ययः। डकारानुबन्धलोपः। 'टेः' (पा० अ० ६। ४। १४३) इति धातोः ऊकारस्य टेर्लोपः। 'मूलमाद्ये शिफा-भयोः' तथा 'मूले बुध्नोऽङ्घ्रिनामकः' इत्यमरः। 'मूल शफाद्ययोः। मूलं वित्तेऽन्तिके ना भे' इति मेदिनी। 'मूलं नक्षत्रम्' (काठ० सं० ३९। १३)। 'मूलं नक्षत्रं निर्ऋतिर्देवता' (मै० सं० २। १३। २०)।

मूल्यम् नपुं०। इत्यत्र **'धान्याज्य-सस्य-रूप्य-पण्य-वर्ण्य-धृष्य-हव्य-कव्य-काव्य-सत्यापत्य-मूल्य-शिक्य-कुड्य-मद्य-हर्म्य-तूर्य-सैन्यानि' (लि० सू० १६८) इति नपुंसकलिङ्गता।** मूल-शब्दः पूर्वं व्याख्यातः। मूलेन आनाम्यम् इति मूल्यम्, आनाम्यम् अभिभवनीयम्। मूल-शब्दात् 'नौ-वयो-धर्म-विष-मूल-सीता-तुलाभ्यस्तार्य-तुल्य-प्राप्य-वध्यानाम्य-सम-समित-सम्मितेषु' (पा० अ० ४। ४। ९१) इति यत्-प्रत्ययः। तकारानुबन्धलोपः। 'यस्येति च' (पा० अ० ६। ४। १४८) इति लकारोत्तर-वर्त्तिनः अकारस्य लोपः। 'मूल्यं वस्नोऽप्यवक्रयः' इत्यमरः। 'भरण्यं भरणं मूल्यं निर्वेशपण इत्यपि' इति चामरः। 'मूल्यं स्याद् वेतने वस्ने' इति विश्वमेदिन्यौ।

मृणालः, मृणालम् पुं०, नपुं०। इत्यत्र **'शील-मूल-मङ्गल-साल-कमल-तल-मुसल-कुण्डल-पलल-मृणाल-वाल-निगल-पलल-विडाल-खिल-शूलाः पुंसि च' (लि० सू० १४३) इति पुँल्लिङ्गता नपुंसकलिङ्गता च।** मृणति हिंसति मृण्यते हिंस्यते वा यः स मृणालः यत् तद् मृणालं वा। मृण हिंसायाम् (तु० प०) 'तमि-विशि-विडि-मृणि-कुलि-कपि-पलि-पञ्चिभ्यः कालन्' (उ० १। ११८) इति कालन्-प्रत्ययः। ककारानुबन्धलोपः। प्रत्ययस्य कित्त्वात् तस्मिन् परे 'उरण् रपरः' (पा० अ० १। १।

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by S3 Foundation USA

५१) इति सहकारणे 'पुगन्त-लघूपधस्य च' (पा० अ० ७।३।८६) इति धातोः उपधायाः ऋकारस्य प्राप्तः अर्-गुणः 'क्ङिति च' (पा० अ० १।१।५) इति निषेधात् न भवति। 'मृणालं बिसम्' इत्यमरः। 'मृणालं नलदे क्लीबं पुंनपुंसकयोर्बिसे' इति मेदिनी।

मृत्युः स्त्री०, पुं०। इत्यत्र **'मृत्यु-सीधु-कर्कन्धु-किष्कु-कण्डु-रेणवः' (लि० सू० १७३) इति स्त्रीलिङ्गता पुँल्लिङ्गता च।** म्रियते मारयति मरणं वा इति मृत्युः। मृङ् प्राणपरित्यागे (तु० आ०) 'भुजि-मृङ्भ्यां युक्-त्युकौ' (उ० ३।२१) इति त्युक्-प्रत्ययः। ककारानुबन्धलोपः। प्रत्ययस्य कित्त्वात् तस्मिन् परे धातोः ऋकारस्य 'उरण् रपरः' (पा० अ० १।१।५१) इति सहकारेण 'सार्वधातुकार्धधातुकयोः' (पा० अ० ७।३।८४) इति प्राप्तः अर्-गुणः 'क्ङिति च' (पा० अ० १।१।५) इति निषेधात् न भवति। 'अन्तो नाशो द्वयोर्मृत्युर्मरणं निधनोऽस्त्रियाम्' इत्यमरः। 'मृत्युर्ना मरणे यमे' इति मेदिनी। 'एष एव मृत्युर्यत्-संवत्सरः' (शत० ब्रा० १०।४।३।१)। 'एष एव मृत्युर्य एव (सूर्यः) तपति' (शत० ब्रा० २।३।२।७)। 'मृत्युर्वै यमः' (मैत्रा० सं० २।५।६)। 'मृत्योर्वा एतद्रूपं यद्व्याघ्रः' (मैत्रा० सं० ४।४।४)। 'अपान्मृत्युः' (ऐत० आ० २।४।१)। 'मृत्युरग्निः' (काठ० सं० २१।७)।

मृदङ्गः पुं०। इत्यत्र **'पल्लव-पल्वल-कफ-रेफ-कटाह-निर्व्यूह-मठ-मणि-तरङ्ग-तुरङ्ग-गन्ध-मृदङ्ग-सङ्ग-समुद्र-पुङ्खाः' (लि० सू० ११७) इति पुँल्लिङ्गता।** मृद्यते इति मृदङ्गः। मर्दन्ते मृद्नन्ति वा यं जनाः स मृदङ्गः। मृद मर्दने (भ्वा० आ०), मृद क्षोदे (क्र्या० प०) 'विडादिभ्यः कित्' (उ० १।१२१) इति अङ्गच्-प्रत्ययः स च कित्। कित्त्वात् तस्मिन् परे 'उरण् रपरः' (पा० अ० १।१।५१) इति सहकारेण 'पुगन्त-लघूपधस्य च' (पा० अ० ७।३।८६) इति धातोः उपधायाः ऋकारस्य प्राप्तः अर्-गुणः 'क्ङिति च' (पा० अ० १।१।५) इति निषेधात् न भवति। प्रत्यये चकारानुबन्धलोपः। अथवा मृद् अङ्गं यस्य सः मृदङ्गः। **अथवा** मृदं गच्छति मर्दनं प्राप्नोति इति मृदङ्गः। मृद् + गम्लृ गतौ (भ्वा० प०) 'खच्प्रकरणे गमेः सुप्युपसंख्यानम्' (वा० पा० अ० ३।२।३८) इति खच्-प्रत्ययः। 'खच्च डिद्वा वक्तव्यः' (वा० पा० अ० ३।२।३८) इति खचः विकल्पेन डित्त्वम्। डित्त्वात् तस्मिन् परे 'टेः' (पा० अ० ६।४।१४३) इति धातोः अम्-इत्यस्य टेर्लोपः। खच्-प्रत्यये खकार-चकारानुबन्धलोपः। पुनः मृदः अमन्तत्वं च 'पृषोदरादीनि यथोपदिष्टम्' (पा० अ० ६।३।१०९) इति सूत्रेण निपात्यते। मृद् अम् ग् अ इत्यवस्थायाम् 'मोऽनुस्वारः' (पा० अ० ८।३।२३) इति अम् इत्यस्य मकारस्य अनुस्वारः। 'अनुस्वारस्य ययि परसवर्णः' (पा० अ० ८।

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by S3 Foundation USA

४।५८) इति अनुस्वारस्य ङ्-परसवर्णः। **अथवा** मर्दनं मृद् मृदम् अङ्गति इति मृदङ्गः। मृद् + अगि गत्यर्थात् (भ्वा० प०) धातोः इदित्त्वात् 'इदितो नुम् धातोः' (पा० अ० ७।१।५८) इति नुम्-आगमः। उकार-मकारानुबन्धलोपः। 'नश्चापदान्तस्य झलि' (पा० अ० ८।३।२४) इति नकारस्य अनुस्वारः। 'अनुस्वारस्य ययि परसवर्णः' (पा० अ० ८।४।५८) इति अनुस्वारस्य परसवर्णः ङकारः। 'मृदङ्गा मुरजाः' इत्यमरः। 'मृदङ्गो घोषवाद्ययोः' इति हैमः। 'मृदङ्गः पटहे घोषे' इति मेदिनी।

मेघः पुं०। इत्यत्र **'क्रतु-पुरुष-कपोल-गुल्फ-मेघाभिधानानि' (लि० सू० ४९) इति पुँल्लिङ्गता।** मेहति सिञ्चति भूमिं वर्षणेन इति मेघः। मिह सेचने (भ्वा० प०) 'नन्दि-ग्रहि-पचादिभ्यो०' (पा० अ० ३।१।१३४) इति अच्-प्रत्ययः। चकारानुबन्धलोपः। 'पुगन्तलघूपधस्य च' (पा० अ० ७।३।८६) इति धातोः उपधायाः इकारस्य ए-गुणः। 'न्यङ्क्वादीनां च' (पा० अ० ७।३।५३) इति धातोः हकारस्य घकारः। 'अभ्रं मेघो वारिवा०' इत्यमरः। 'मेघो मुस्ताजलदयोः पुमान्' इति मेदिनी। 'मेघः कस्मात्? मेहतीति सतः' (नि० २।२१)। 'अथाप्यन्तव्यापत्तिर्भवति ओघो मेघः' (निरु० २।१)। 'मेघः मेघनाम' (निघं० १।१०)। 'मेघो हविर्धानं यज्ञस्य' (तैत्ति० आर० २।१४।१)।

मेरुः पुं०। इत्यत्र **'रुत्वन्तः' (लि० सू० ५७) इति पुँल्लिङ्गता।** मिनोति प्रक्षिपति इति मेरुः। डुमिञ् प्रक्षेपणे (स्वा० उ०) 'मि-प्रीभ्यां रुः' (उ० ४।१०२) इति रु-प्रत्ययः। 'सार्वधातुकार्धधातुकयोः' (पा० अ० ७।३।८४) इति धातोः इकारस्य ए-गुणः। 'मेरुः सुमेरुर्हेमाद्री रत्नसानुः सुरालयः' इत्यमरः।

मेहः, मेहम् पुं०, नपुं०। इत्यत्र **'गृह-मेह-देह-पट्ट-पटहाष्टापदाम्बुद-ककुदाश्च' (लि० सू० १८२) इति पुँल्लिङ्गता नपुंसकलिङ्गता च।** मेहति सिञ्चति भूमिं वर्षणेन इति मेहः मेहम् वा। मिह सेचने (भ्वा० प०) 'नन्दि-ग्रहि-पचादिभ्यो०' (पा० अ० ३।१।१३४) इति अच्-प्रत्ययः। चकारानुबन्धलोपः। 'पुगन्तलघूपधस्य च' (पा० अ० ७।३।८६) इति धातोः उपधायाः इकारस्य ए-गुणः। एवं मेह-शब्दः निष्पद्यते। **अथवा** मिह्यते मेहनं वा इति मेहः मेहं वा। मिह-धातोः 'अकर्त्तरि च कारके संज्ञायाम्' (पा० अ० ३।३।१९) अथवा 'भावे' (पा० अ० ३।३।१८) इति घञ्-प्रत्ययः। घकार-ञकारानुबन्धलोपः। धातोः उपधायाः इकारस्य पूर्ववत् ए-गुणः।

मोदकम्, मोदकः नपुं०, पुं०। इत्यत्र **'कण्टकानीक-सरक-मोदक-चषक-मस्तक-पुस्तक-तडाक-निष्क-शुष्क-वर्चस्व-पिनाक-भाण्डक-पिण्डक-**

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by S3 Foundation USA

कटक-शण्डक-पिटक-तालक-फलक-पुलाकानि नपुंसके च' (लि० सू० ६३) इति नपुंसकलिङ्गता पुँल्लिङ्गता च। मोदते हृष्यति मोदयते हर्षयति वा इति मोदकम् मोदकः वा। मुद हर्षे (भ्वा० आ०) अन्तर्भावितण्यर्थात् वा 'ण्वुल्-तृचौ' (पा० अ० ३।१।१३३) इति ण्वुल्-प्रत्ययः। णकार-लकारानुबन्धलोपः। 'युवोरनाकौ' (पा० अ० ७।१।१) इति वु-स्थाने अकादेशः। 'पुगन्तलघूपधस्य च' (पा० अ० ७। ३। ८६) इति धातोः उपधायाः उकारस्य ओ-गुणः। **अथवा** मोदनं मोदः। मुद हर्षे (भ्वा० आ०) 'भावे' (पा० अ० ३।३।१८) इति घञ्-प्रत्ययः। घकार-ञकारानुबन्ध-लोपः। 'पुगन्तलघूपधस्य च' (पा० अ० ७।३।८६) इति धातोः उपधायाः उकारस्य ओ-गुणः। एवं मोद-शब्दः निष्पद्यते। मोदं कायति शब्दयति सूचयति इति मोदकं मोदकः वा। मोद + कै शब्दे (भ्वा० आ०) 'आदेच उपदेशेऽशिति' (पा० अ० ६।१। ४५) इति धातोः ऐकारस्य आकारः। 'आतोऽनुपसर्गे कः' (पा० अ० ३।२।३) इति क-प्रत्ययः। ककारानुबन्धलोपः। 'आतो लोप इटि च' (पा० अ० ६।४।६४) इति धातोः आकारस्य लोपः। **अथवा** मोदं करोति इति मोदकं मोदकः वा। मोद + डुकृञ् करणे (त० उ०) 'अन्येष्वपि दृश्यते' (पा० अ० ३।२।१०१) इति ड-प्रत्ययः। डकारानुबन्धलोपः। 'टेः' (पा० अ० ६।४।१४३) इति धातोः ऋकारस्य टेर्लोपः। एवमपि मोदक-शब्दः निष्पद्यते। 'मोदकः खाद्यभेदेऽस्त्री हर्षके पुनरन्यवत्' इति मेदिनी।

मौलिः पुं०। इत्यत्र **'ऋषि-राशि-दृति-ग्रन्थि-क्रिमि-ध्वनि-बलि-कौलि-मौलि-रवि-कवि-कपि-मुनयः' (लि० सू० १०९) इति पुँल्लिङ्गता।** मूल-शब्दः पूर्वं व्याख्यातः। मूलस्य अपत्यम् इति मौलिः। मूल-शब्दात् 'अत इञ्' (पा० अ० ४।१। ९५) इति इञ्-प्रत्ययः। ञकारानुबन्धलोपः। 'यस्येति च' (पा० अ० ६।४।१४८) इति लकारोत्तर-वर्त्तिनः अकारस्य लोपः। 'तद्धितेष्वचामादेः' (पा० अ० ७।२।११७) इति मकारोत्तर-वर्त्तिनः ऊकारस्य औ-वृद्धिः। 'चूडा किरीटं केशाश्च संयता मौलयस्त्रयः' इत्यमरः। 'किरीटे मौलिरक्लीबे चूडासंयतकेशयोः' इति रभसः।

यकृत् नपुं०। इत्यत्र **'वियज्जगत्-सकृच्छकन्-पृषच्छकृद्-यकृद्-उदश्वितः' (लि० सू० १६४) इति नपुंसकलिङ्गता।** यजति इति यकृत्। यज देवपूजा-सङ्गतिकरण-दानेषु (भ्वा० उ०) 'उणादयो बहुलम्' (पा० अ० ३।३।१) इति उणादीनां बहुलवचनात् 'शकेर्ऋतिन्' (उ० ४।५९) इति ऋतिन्-प्रत्ययः धातोः जकारस्य क्-आदेशश्च। प्रत्यये इकार-नकारानुबन्धलोपः। **अथवा** यमनं यः। यम उपरमे (भ्वा० प०) 'सम्पदा-दिभ्यः क्विप्' (वा० पा० अ० ३।३।९४) इति क्विप् प्रत्ययः। 'गमादीनां वक्तव्यम्'

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by S3 Foundation USA

(वा० पा० अ० ३।४।४०) इति क्विप्-प्रत्यये परे धातोः मकारस्य लोपः। आगम-शास्त्रस्य अनित्यत्वात् 'ह्रस्वस्य पिति कृति तुक्' (पा० अ० ६।१।७१) इति तुग्-आगमः न भवति। क्विप्-प्रत्ययस्य सर्वापहारिलोपः। पुनः यं संयमं करोति इति यकृत्। य + डुकृञ् करणे (त० उ०) 'क्विप् च' (पा० अ० ३।२।७६) इति क्विप्-प्रत्ययः। 'ह्रस्वस्य पिति कृति तुक्' (पा० अ० ६।१।७१) इति तुग्-आगमः। उकार-ककारानुबन्धलोपः। क्विप्-प्रत्ययस्य सर्वापहारि-लोपः। 'कालखण्ड-यकृती तु समे' इत्यमरः। 'यकृत् सविता' (शत० ब्रा० १२।९।१।१५)। 'यकृद् यथा कथा च कृत्यते' (निरु० ४।३)।

यज्ञः पुं०। इत्यत्र 'नङन्तः' (लि० सू०) इति तथा 'क्रतु-पुरुष-कपोल-गुल्फ-मेघाभिधानानि' (लि० सू० ४९) इति पुँल्लिङ्गता। इज्यते अनेन अस्मिन् वा इति यज्ञः। 'यज देवपूजा-सङ्गतिकरण-दानेषु' (भ्वा० उ०) 'यज-याच-यत-विच्छ-प्रच्छ-रक्षो नङ्' (पा० अ० ३।३।९०) इति नङ्-प्रत्ययः। ङकारनुबन्धलोपः। 'स्तोः श्चुना श्चुः' (पा० अ० ८।४।४६) इति नकारस्य ञकारः। जकार-ञकारयो संयोगेन ज्ञः भवति तेन यज्ञ-शब्दः निष्पद्यते। 'यज्ञः सवोऽध्वरो यागः' इत्यमरः। 'यज्ञः स्यादात्मनि मखे नारायण-हुताशयोः' इति हैमः। 'यज्ञः कस्मात् ? प्रख्यातं यजति कर्मेति नैरुक्ताः। याच्ञो भवतीति वा यजुरुन्नो भवतीति वा बहु-कृष्णाजिन इत्यौपमन्यवो यजूंष्येनं नयन्तीति वा' (निरु० ३।१९)। 'यज्ञः यज्ञोखा' (निरु० १०।४५) 'स (सोमः) तायमानो जायते स यञ् जायते तस्मा यज्ञो यज्ञो ह वै नामैतद् यद् यज्ञ इति' (शत० ब्रा० ३।९।४।२३)। 'यज्ञो हि सर्वाणि भूतानि भुनक्ति' (शत० ब्रा० ९।४।१।११)। 'यज्ञो ह वै मधुसारघम्' (शत० ब्रा० ३।४।३।१३)। 'यज्ञो वै महिमा' (शत० ब्रा० ६।३।१८) एवं (यजु० ११।६)। 'यज्ञो वै बृहन्विपश्चित्' (शत० ब्रा० ३।५।३।१२)। 'यज्ञो वै श्रेष्ठतमं कर्म' (शत० ब्रा० १।७।१।५, यजु० १।१)। 'यज्ञो वै विशो यज्ञे हि सर्वाणि भूतानि विष्टानि' (शत० ब्रा० ८।७।३।२१)। 'ब्रह्म हि यज्ञः' (शत० ब्रा० ५।३।२।४)। 'सैषा त्रयी विद्या यज्ञः' (शत० ब्रा० १।१।४।३)। 'यज्ञः प्रजापतिः' (शत० ब्रा० ११।६।३।९)। 'इन्द्रो यज्ञस्य देवता' (शत० ब्रा० २।१।२।११)। 'यज्ञो वै विष्णुः' (शत० ब्रा० ३।१।४।१)। 'यज्ञो वा अग्निः' (जैमि० ब्रा० २।२३०)। 'यज्ञेनैव यज्ञं सन्तनोति' (तैत्ति० सं० ३।२।६।४)। 'यज्ञस्सोमो राजा' (जैमि० ब्रा० १।२५९)। 'यज्ञो विष्णुः' (मैत्रा० सं० ४।१।१२)। 'यज्ञो वै सुम्रम्' (काठक० सं० २१।८)। 'वाग् वै यज्ञः' (ऐत० ब्रा० ५।२४)। 'वाचि वै यज्ञः श्रितः' (तैत्ति० सं० २।६।९।२)। 'संवत्सरो वै यज्ञः' (मैत्रा० सं० १।१०।५)। 'समुद्रयोनिर्वै यज्ञः' (काठ० सं०

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by S3 Foundation USA

२९।३)। 'सर्वेभ्यो हि कामेभ्यो यज्ञः प्रयुज्यते' (तैत्ति० सं० २।४।११।२)। 'स्वर्गो वै लोको यज्ञः' (कौषी० ब्रा० १४।१)।

यत्नः पुं०। इत्यत्र **'नङन्तः' (लि० सू० ३९) इति पुँल्लिङ्गता।** यतनं यत्नः। यती प्रयत्ने (भ्वा० आ०) 'यज-याच-यत-विच्छ-प्रच्छ-रक्षो नङ्' (पा० अ० ३।३।९०) इति नङ्-प्रत्ययः। ङकारानुबन्धलोपः।

यन्त्रम् नपुं०। **इत्यत्र 'द्वाराग्र-स्फार-तक्र-वक्र०' (लि० सू० ९०) इति नपुंसकलिङ्गता।** यन्त्र्यते उपरम्यते येन तद् यन्त्रम्। यच्छति उपरमयति येन वा तद् यन्त्रम्। यम उपरमे (भ्वा० प०) 'गु-धृ-वी-पचि-यमि-सदि-क्षदिभ्यस्त्रः' (उ० ४।१६८) इति त्र-प्रत्ययः। 'नश्चापदान्तस्य झलि' (पा० अ० ८।३।२४) इति धातोः मकारस्य अनुस्वारः 'अनुस्वारस्य ययि परसवर्णः' (पा० अ० ८।४।५८) इति अनुस्वारस्य परसवर्णः नकारः। **अथवा** यन्त्रयते यन्त्रयति वा येन तद् यन्त्रम्। यत्रि सङ्कोचे (चु० उ०) 'अकर्त्तरि च कारके संज्ञायाम्' (पा० अ० ३।३।१९) इति घञ्-प्रत्ययः। घकार-ञकारानुबन्धलोपः। धातोः इदित्त्वात् 'इदितो नुम् धातोः' (पा० अ० ७।१।५८) इति नुम्-आगमः। उकार-मकारानुबन्धलोपः। **अथवा** यन्त्रयति यन्त्रयते वा इति यन्त्रम्। उक्त-यत्रि सङ्कोचे (चु० उ०) धातोः 'नन्दि-ग्रहि-पचादिभ्यो०' (पा० अ० ३।१।१३४) इति अच्-प्रत्ययः। चकारानुबन्धलोपः। धातोः इदित्त्वात् पूर्ववत् नुम्-आगमः। उकार-मकारानुबन्धलोपः। 'यन्त्रमस्याशा दृँह, रूपं देहि बलं देहि' (काठक० सं० १।७)।

यवसुरा, यवसुरम् स्त्री०, नपुं०। **इत्यत्र 'सुरा-सेनाच्छाया-शाला-निशा स्त्रियां च' (लि० सू० १२९) इति स्त्रीलिङ्गता नपुंसकलिङ्गता च।** यवानां सुरा यवसुरा यवसुरं वा। यव-शब्दस्य सुरा-शब्देन सह 'षष्ठी' (पा० अ० २।२।८) इति समासे सति यवसुरा भवति स्त्रीलिङ्गे। नपुंसकलिङ्गे तु 'ह्रस्वो नपुंसके प्रातिपदिकस्य' (पा० अ० १।२।४७) इति ह्रस्व-विधानेन यवसुरा-शब्दः यवसुर-शब्दरूपे परिवर्त्तते। तस्य एव प्रथमैकवचने यवसुरम् भवति।

यवागूः स्त्री०। **इत्यत्र 'स्रक-त्वग्-ज्योग्-वाग्-यवागू-नौ-स्फिजः' (लि० सू० ३०) इति स्त्रीलिङ्गता।** यौति यूयते वा इति यवागूः। यु मिश्रणामिश्रणयोः (अ० प०) 'सृ-यु-वर्चिभ्योऽन्युजागूजक्नु चः' (उ० ३।८१) इति आगूच्-प्रत्ययः। चकारानुबन्धलोपः। 'सार्वधातुकार्धधातुकयोः' (पा० अ० ७।३।८४) इति धातोः उकारस्य ओ गुणः। 'एचोऽयवायावः' (पा० अ० ६।१।७८) इति ओकारस्य अव्-आदेशः।

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by S3 Foundation USA

'यवागूरुष्णिका श्राणा विलेपी तरला च सा' इत्यमरः। 'वायव्यां यवागूं (निर्वपेत्)' (काठ० सं० ११। २)। 'वायव्यां यवागूं निर्वपेत्' (कपिष्ठल कठ सं० ४८। १५)। 'यवाग्वैव सायंप्रातरग्निहोत्रं जुहुयात्' (कौषी० ब्रा० ४। १४)।

यशः नपुं०। इत्यत्र **'असन्तो द्व्यच्कः' (लि० सू० १५२) इति नपुंसकलिङ्गता।** अश्यते व्याप्यते भुज्यते वा यत् तद् यशः **अथवा** दीव्यते स्तूयते वा येन तद् यशः। अशू व्याप्तौ सङ्घाते च (स्वा० आ०), अश भोजने (क्र्या० उ०) 'अशेर्देवने युट् च' (उ० ४। १९२) इति असुन्-प्रत्ययः, धातोः युडागमश्च। असुन्-प्रत्यये उकार-नकारानुबन्धलोपः। युडागमे उकार-टकारानुबन्धलोपः। 'यशः कीर्त्तिः समज्ञा च' इत्यमरः। 'यश उदकनाम' (निघं० १। १२)। 'यशः अन्ननाम' (निघं० २। ७)। 'यश धननाम' (निघं० २। १०)। 'आदित्यो यशः' (शत० ब्रा० १२। ३। ४। ८)। 'चक्षुर्यशः' (शत० ब्रा० १२। ३। ४। १०)। 'प्राणा वै यशः' (शत० ब्रा० १४। ५। २। ५)। 'द्यौर्यशः' (शत० ब्रा०. १२। ३। ४। ७)। 'यशो वै सोमः' (शत० ब्रा० ४। २। ४। ९)। 'यशो देवाः' (शत० ब्रा० २। १। ४। ९)। 'तस्माद् (देवाः) यशः' (शत० ब्रा० ३। ४। २। ८)। 'पशव यशः' (शत० ब्रा० १२। ८। ३। १)। 'यशो हि सुराः' (शत० ब्रा० १२। ७। ३। १४) 'सामवेद एव यशः' (गोप० ब्रा० पू० ५। १५)। 'उद्गातैव यशः' (गोप० ब्रा० पू० ५। १५)। 'आदित्य एव यशः' (गोप० ब्रा० पू० ५। १५)। 'वर्षा एव यशः' (गोप० ब्रा० पू० ५। १५)। 'जगत्येव यशः' (गोप० ब्रा० पू० ५। १५)। 'सप्तदश (स्तोमः) एव यशः' (गोप० ब्रा० पू० ५। १५)। 'उदीच्येव यशः' (गोप० ब्रा० पू० ५। १५)। 'यशो वै सोमो राजा' (ऐत० ब्रा० ३। २५८)। 'सोमो वै यशः' (तैत्ति० ब्रा० २। २। ८। ८)। 'यश उ वै सोमो राजान्नाद्यम्' (कौषी० ब्रा० ९। ६)।

यष्टिः स्त्री०, पुं०। इत्यत्र **'गो-मणि-यष्टि-भृष्टि-पाटलि-बस्ति-शाल्मलि-त्रुटि-मसि-मरीचयः' (लि० सू० १७२) इति स्त्रीलिङ्गता पुँल्लिङ्गता च।** यजति इति **यष्टिः**। इज्यते वा येन यया वा इति इष्टिः। 'यज देवपूजा-सङ्गति करण-दानेषु' (भ्वा० उ०) 'उणादयो बहुलम्' (पा० अ० ३। ३। १) इति उणादीनां बहुलवचनात् 'वसेस्तिः' (उ० ४। १८१) इति ति-प्रत्ययः। 'व्रश्च-भ्रस्ज-सृज-मृज-यज-राज-भ्राजच्छशां षः' (पा० अ० ८। २। ३६) इति धातोः जकारस्य षकारः। 'ष्टुना ष्टुः' (पा० अ० ८। ४। ४१) इति ति-प्रत्ययस्य तकारस्य टकारः। **अथवा** यक्षयताम् इति यष्टिः। यक्ष पूजायाम् (चु० आ०) 'क्तिच्-क्तौ च संज्ञायाम्' (पा० अ० ३। ३। १७४) इति आशिषि क्तिच्-प्रत्ययः। ककार-चकारानुबन्धलोपः। 'स्कोः संयोगाद्योरन्त्ये च' (पा० अ० ८। २।

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by S3 Foundation USA

२९) इति धातौ आदौ क्ष-वर्त्तिनः ककारस्य लोपः। प्रत्ययस्य तकारस्य पूर्ववत् टकारः। **अथवा** यजनं यष्टिः। यज धातोः 'स्त्रियां क्तिन्' (पा० अ० ३। २। ९४) इति क्तिन्-प्रत्ययः। ककार-नकारानुबन्धलोपः। पूर्ववत् धातोः जकारस्य षकारः, प्रत्ययस्य तकारस्य च टकारः। 'बद्धपाणौ स्तरौ यष्टिः पुंसि स्याद् भुजदण्डयोः। द्वयोर्हारलताभाग्योः र्मधुकाशस्त्रभेदयोः' इति मेदिनी।

याच्ञा स्त्री०। **इत्यत्र 'याच्ञा स्त्रियाम्' (लि० सू० ४०) इति स्त्रीलिङ्गता।** याचनं याच्ञा। टुयाचृ याच्ञायां (भ्वा० उ०) 'यज-याच-यत-विच्छ-प्रच्छ-रक्षो नङ्' (पा० अ० ३। ३। ९०) इति नङ् प्रत्ययः। ङकारानुबन्धलोपः। 'स्तोः श्चुना श्चुः' (पा० अ० ८। ४। ४०) इति नस्य ञः। एवं याच्ञ-शब्दः निष्पद्यते। ततः स्त्रियाम् 'अ-प्रत्ययात्' (पा० अ० ३। ३। १०२) इति अ-प्रत्ययः। 'अतो लोपः' (पा० अ० ६। ४। ४८) इति ञ-परवर्त्तिनः अकारस्य लोपः। 'अजाद्यतष्टाप्' (पा० अ० ४। १। ४) इति टाप्-प्रत्ययः। टकार-पकारानुबन्धलोपः। 'अकः सवर्णे दीर्घः' (पा० अ० ६। १। १०१) इति अकारस्य आकारस्य च आ-दीर्घः। 'याच्ञाभिशस्तिर्याचनार्थना' इत्यमरः। 'याच्ञा भिक्षार्थनार्दना' इति चामरः।

यात्रा स्त्री०। **इत्यत्र 'यात्रा-मात्रा-भस्त्रा-दंष्ट्रा-वरत्राः स्त्रियामेव' (लि० सू० १५५) इति स्त्रीलिङ्गता।** यानम् इति यात्रा। या प्रापणे (अ० प०) 'हु-यां-मा-श्रु-भसिभ्यश्च' (उ० ४। १६९) इति त्रन्-प्रत्ययः। नकारानुबन्धलोपः। ततः स्त्रियाम् 'अजाद्यतष्टाप्' (पा० अ० ४। १। ४) इति टाप्-प्रत्ययः। टकार-पकारानुबन्धलोपः। 'अकः सवर्णे दीर्घः' (पा० अ० ६। १। १०१) इति अकारस्य आकारस्य च आ-दीर्घः। **अथवा** यतते इति यात्रा। यती प्रयत्ने (भ्वा० आ०) 'यतेर्वृद्धिश्च' (उ० २। ९९) इति ऋन्-प्रत्ययः। धातोः उपधायाः अकारस्य आ-वृद्धिश्च। प्रत्यये नकारानुबन्धलोपः। एवं यातृ-शब्दः निष्पद्यते। अस्य तृतीयैकवचने यात्रा रूपम् इदम्। **अथवा** याति इति या, त्रायते इति त्रा। या चासौ त्रा इति यात्रा। या गति-प्रापणयोः (अ० प०), त्रैङ् पालने (भ्वा० आ०) 'क्विप् च' (पा० अ० ३। २। ७६) इति क्विप्-प्रत्ययः। तस्य सर्वापहारिलोपः। 'आदेच उपदेशेऽशिति' (पा० अ० ६। १। ४५) इति त्रै-धातोः ऐकारस्य आकारः। एवं निष्पन्नयोः या-त्रा-शब्दयोः द्वन्द्व-समासे यात्रा-शब्दः व्युत्पद्यते। **अथवा** या गन्ता तस्य त्रा रक्षकः इति यात्रा। एवमपि यात्रा-शब्दः निष्पद्यते। 'यात्रा व्रज्याभिनिर्याणं यात्रा स्याद् यापने गतौ' इत्यमरः। 'यात्रा तु यापनेऽपि स्याद् गमनोत्सवयोः स्त्रियाम्' इति मेदिनी। 'यात्रा तु यापनोपाये गतौ देवार्चनोत्सवे' इति विश्वः।

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by S3 Foundation USA

यादः नपुं०। इत्यत्र **'यादो नपुंसकाम्' (लि० सू० १९)** इति नपुंसकलिङ्गता। याति वेगेन इति यादः। या गति-प्रापणयोः (अ० प०) 'सर्वधातुभ्योऽसुन्' (उ० ४। १९०) इति असुन्-प्रत्ययः। उकार-नकारानुबन्धलोपः। 'पृषोदरादीनि यथोपदिष्टम्' (पा० अ० ६। ३। १०९) इति दुगागमः। उकार-ककारानुबन्धलोपः। एवं यादस् निष्पद्यते। **अथवा** याति इति या। या गति-प्रापणयोः 'क्विप् च' (पा० अ० ३। २। ७६) इति अथवा 'अन्येभ्योऽपि दृश्यते' (पा० अ० ३। २। १७८) इति क्विप्-प्रत्ययः। तस्य सर्वापहारिलोपः। याम् अत्ति भक्षति इति यादः। या + अद् भक्षणे (अ० प०) 'सर्वधातुभ्योऽसुन्' (उ० ४। १९०) इति असुन्-प्रत्ययः। उकार-नकारानुबन्धलोपः। एवम् अपि यादस् निष्पद्यते। **अथवा** यां दस्यति इति यादः। या + दसु उपक्षये (दि० प०) 'क्विप् च' (पा० अ० ३। २। ७६) अथवा 'अन्येभ्योऽपि दृश्यते' (पा० अ० ३। २। १७८) इति क्विप्-प्रत्ययः। तस्य सर्वापहारिलोपः। एवम् अपि यादस् एव निष्पद्यते। अस्य प्रथमा-द्वितीयैकवचने यादः भवति। 'यादांसि जल-जन्तवः' इत्यमरः। यादः उदकनाम (निघं० १। १२)।

यानम्, यानः नपुं०, पुं०। इत्यत्र **'मान-यानाभिधान-नलिन-पुलिनोद्यान-शयनासन-स्थान-चन्दनालान-समान-भवन-वसन-सम्भावन-विभावन-विमानानि नपुंसके च' (लि० सू० ७६)** इति नपुंसकलिङ्गता पुँल्लिङ्गता च। यान्ति अस्मिन् अनेन वा इति यानम्। या गति-प्रापणयोः (अ० प०) 'करणाधिकरणयोश्च' (पा० अ० ३। ३। ११७) इति ल्युट्-प्रत्ययः। लकार-टकारानुबन्धलोपः। 'युवोरनाकौ' (पा० अ० ७। १। १।) इति यु-स्थाने अनादेशः। 'याने चक्रिणि युद्धार्थे शताङ्गः स्यन्दनो रथः' इत्यमरः। 'सन्धिर्ना विग्रहो यानमासनं द्वैधमाश्रयः' इति चामरः।

युग्मम् नपुं०। इत्यत्र **'रुक्म-सिध्म-युग्मेध्म-गुल्माध्यात्म-कुङ्कुमानि नपुंसके' (लि० सू० ८४)** इति नपुंसकलिङ्गता। युज्यते इति युग्मम्। युजिर् योगे (रु० उ०) 'युजि-रुजि-तिजां कुश्च' (उ० १। १४६) इति मक्-प्रत्ययः धातोः जकारस्य गकारश्च। प्रत्यये ककारानुबन्धलोपः। मकः कित्त्वात् तस्मिन् परे धातोः उपधायाः उकारस्य 'पुगन्तलघूपधस्य च' (पा० अ० ७। ३। ८६) इति प्राप्तः ओ-गुणः 'क्ङिति च' (पा० अ० १। १। ५) इति निषेधात् न भवति। 'युग्मं तु युगलं युगम्' इत्यमरः। 'युग्मं यमल-यामले' इति रभसः।

यूथम्, यूथः नपुं०, पुं०। इत्यत्र **'तीर्थ-प्रोथ-यूथ-गाथानि नपुंसके च' (लि० सू० ७३)** इति नपुंसकलिङ्गता पुँल्लिङ्गता। यौति यूयते वा इति यूथः। यु

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by S3 Foundation USA

मिश्रणामिश्रणयोः (अ० प०) 'तिथ-पृष्ठ-गूथ-यूथ-प्रोथाः' (उ० २।१२) इति थक्-प्रत्ययः धातोः उकारस्य ऊ-दीर्घः च। प्रत्यये ककारानुबन्धलोपः। 'यूथं तिरश्चां पुंनपुंसकम्' इत्यमरः। 'यूथं तिर्यक्समूहेऽस्त्री पुष्पभेदे च योषिति' इति मेदिनी। 'यूथी पुष्पप्रभेदे स्यान्मागध्यां च कुरण्टके। यूथं तिर्यक्-समूहेऽपि वृन्दमात्रेऽपि भाषितम्' इति विश्वः।

यूपः पुं०। इत्यत्र **'पोपधः' (लि० सू० ७७) इति पुँल्लिङ्गता।** यौति यूयते मिश्र्यते बध्यते वा यस्मिन् सः यूपः। यु मिश्रणामिश्रणयोः (अ० प०) 'कु-युभ्यां च' (उ० ३।२७) इति प-प्रत्यय। धातोः उकारस्य ऊ-दीर्घश्च। सूत्रे चकारात् प-प्रत्ययः आद्युदात्तत्वार्थं नित् च। 'नूदस्तु यूपः क्रमुको ब्रह्मण्यो ब्रह्मदारु च' इत्यमरः। 'यूपं यौतेः समायुतं भवति' (निरु० ४।२४) '(देवाः) यदेनेन (यूपेन यज्ञम्) अयोपयंस्तस्माद् यूपोनाम' (शत० ब्रा० १।६।२।१)। 'पशवो वै यूपमुच्छ्रयन्ति' (शत० ब्रा० ३।७।२।४)। 'तस्माद् यूप एव पशुमालभन्ते नर्ते यूयात् कदाचन' (शत० ब्रा० ३।७।३।२) 'अष्टाश्रिर्यूपो भवति' (शत० ब्रा० ५।२।१।५)। 'खादिरो यूपो भवति' (शत० ब्रा० ३।६।२।१२)। 'स्तूप एवास्य (यज्ञस्य) यूपः' (शत० ब्रा० ३।५।३।४) 'यूपः स्थाणुः' (शत० ब्रा० ३।६।२।५)। 'वैष्णवो हि यूपः' (शत० ब्रा० ३।६।४।१)। 'वज्रो यूपः' (शत० ब्रा० ३।६।४।१९)। 'वज्रो वै यूपशकलः' (शत० ब्रा० ३।८।१।५)। 'यजमानो वा एष निदानेन यद् यूपः' (शत० ब्रा० ३।७।१।११)। '(देवाः) तं वै (यं) यूपेनैवायोपयंस्तद् यूपस्य यूपत्वम्' (ऐत० ब्रा० २।१)। 'सप्तदशारत्निर् यूपो भवति' (तैत्ति० ब्रा० १।३।७।२)। 'खलेवाली यूपो भवत्येतया हि तं रसमुत्कृषन्ति' (तां० ब्रा० १६।१३।८)। 'असौ वा अस्य (अग्निहोत्रस्य कर्तुः) आदित्यो यूपः' (ऐत० ब्रा० ५।२८)। 'आदित्यो यूपः' (तैत्ति० ब्रा० २।१।५।२)। 'व्रजो वा एष यद् यूपः' (कौषी० ब्रा० १०।१, ऐत० ब्रा० २।१)। 'एष वै यजमानो यद् यूपः' (ऐत० ब्रा० २।३, शत० ब्रा० १३।२।६।९)। 'यजमानदेवत्यो वै यूपः' (तैत्ति० ब्रा० ३।९।५।२)। 'गर्तवान् यूपोऽतीक्ष्णाग्रो भवति' (शत० ब्रा० ५।२।१।७)।

यूषम्, यूषः नपुं०, पुं०। इत्यत्र **'यूष-करीष-मिष-विष-वर्षाणि नपुंसके च' (लि० सू० ९५) इति नपुंसकलिङ्गता पुँल्लिङ्गता च।** यूषति इति यूषं यूषः वा। यूष हिंसायां (भ्वा० प०) 'इगुपध-ज्ञा-प्री-किरः कः' (पा० अ० ३।१।१३५) इति क-प्रत्ययः। ककारानुबन्धलोपः। अथवा यूषणं यूषः यूष्यते वा इति उक्त-यूषधातोः 'अकर्त्तरि च कारके संज्ञायाम्' (पा० अ० ३।३।१९) इति घञ्-प्रत्ययः। घकार-ञकारानुबन्धलोपः।

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by S3 Foundation USA

योनिः स्त्री०, पुं०। इत्यत्र **'श्रेणि-योन्यूर्मयः पुंसि च'** (लि० सू० ८) इति **स्त्रीलिङ्गता पुँल्लिङ्गता च**। यूयते मिश्र्यते न मिश्र्यते वा यत्र स वा योनिः। यु मिश्रणामिश्रणयोः (अ० प०) 'वहि-श्रि-श्रु-सु-द्रु-ग्ला-हा-त्वरिभ्यो नित्' (उ० ४। ५२) इति नि-प्रत्ययः स च नित्। नित्त्वं स्वरार्थम्। 'सार्वधातुकार्धधातुकयोः' (पा० अ० ७। ३। ८४) इति धातोः उकारस्य ओ-गुणः। 'भगे योनिर्द्वयोः' इत्यमरः। 'योनिः स्त्रीपुंसयोश्च स्यादाकारे स्मरमन्दिरे' इति मेदिनी। 'योनिः कारणे भग-तोययोः' इति हैमः। 'योनिः उदकनाम' (निघं० १। १२)। 'योनिः गृहनाम' (निघं० ३। ४)। 'योनिर्वा उखा' (शत० ब्रा० ७। ५। २। २)। 'योनिर्वा उत्तरवेदिः' (शत० ब्रा० ७। ३। १। २८)। 'योनिर्वै गार्हपत्या चितिः' (शत० ब्रा० ७। १। १। ८)। 'योनिरेव वरुणः' (शत० ब्रा० १२। ९। १। १७)। 'योनिर्वै पुष्करपर्णम्' (शत० ब्रा० ६। ४। १। ७)। 'योनिर्मुञ्जाः' (शत० ब्रा० ६। ६। २। १५)। 'परिमण्डला हि योनिः' (शत० ब्रा० ७। १। १। ३७)। 'मां सं वा उदरं च योनिश्च संहते' (शत० ब्रा० ८। ६। २। १४)। 'योनिरुलूखलम्' (शत० ब्रा० ७। ५। १। ३८)। 'अन्धमिव वै तमो योनिः' (जैमि० उप० ३। १। २) 'योनिर्वै वामदेव्यम्' (जैमि० ब्रा० ३। ३०१)। 'योनिरन्तरिक्षं महानवयवः परिवीतो वायुना। अयमपीतरो योनिरेतस्मादेव परियुतो भवति' (निरु० २। २८)।

योषित् स्त्री०। इत्यत्र **'भूमि-विद्युत्-सरिल्लता-वनिताभिधानानि'** (लि० सू० १८) **इति स्त्रीलिङ्गता**। योषति प्रीणाति सेवते हिनस्ति वा इति योषित्, अथवा युष्यते सेव्यते हिंस्यते वा या सा योषित्। युष सेवार्थः सौत्रः धातुः। हिंसार्थकः तु भ्वा० ग० पठितः काशकृत्स्नीयः धातुः। ततः 'हृ-सृ-रुहि-युषिभ्य इतिः' (उ० १। ९७) इति इति-प्रत्ययः। तकार-परिवर्त्तिनः इकारस्य अनुबन्धस्य लोपः। 'पुगन्त-लघूपधस्य च' (पा० अ० ७। ३। ८६) इति धातोः उपधायाः इकारस्य ओ-गुणः। 'स्त्री योषिदबला' इत्यमरः। 'रक्षांसि योषितमनुसचन्ते तदुत रक्षांस्येव रेत आदधति' (शत० ब्रा० ३। २। १। ४०)। 'योषितः पश्वेव स्तनात् उपोत्सर्पतः' (जैमि० ब्रा० ३। ३२६)।

रङ्गः पुं०। इत्यत्र **'करणाधिकरणयोर्ल्युट् च'** (लि० सू० १८८) **इति पुँल्लिङ्गता**। रजति रज्यति वा अस्मिन् इति रङ्गः। रञ्ज रागे (भ्वा० उ०), रञ्ज रागे (दि० उ०) 'अकर्त्तरि च कारके संज्ञायाम्' (पा० अ० ३। ३। १९) इति अधिकरणे घञ्-प्रत्यय। घकार-ञकारानुबन्धलोपः। 'चजोः कु घिण्ण्यतोः' (पा० अ० ७। ३। ५२) इति धातोः जकारस्य गकारः। धातोः जकारस्य गकारे सञ्जाते धातुवर्त्ति-ञकारः अनुस्वारे परिवर्तते पुनः सः एव अनुस्वारः 'अनुस्वारस्य ययि परसवर्णः' (पा० अ० ८। ४। ५८) इति

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by S3 Foundation USA

परसवर्ण-ङकारे परिवर्त्तितः भवति। **अथवा** रङ्गति इति रङ्गः। रगि गतौ 'नन्दि-ग्रहि-पचादिभ्यो०' (पा० अ० ३।१।१३४) इति अच्-प्रत्ययः। चकारानुबन्धलोपः। धातोः इदित्त्वात् 'इदितो नुम् धातोः' (पा० अ० ७।१।५८) इति नुम्-आगमः। उकार-मकारानुबन्धलोपः। 'नश्चापदान्तस्य झलि' (पा० अ० ८।३।२४) इति नकारस्य अनुस्वारः। 'अनुस्वारस्य ययि परसवर्णः' (पा० अ० ८।४।५८) इति अनुस्वारस्य परसवर्णः ङकारः। 'रङ्गवङ्गे' इत्यमरः।

रजतम् नपुं०। इत्यत्र **'नवनीतावतानानृतामृत-निमित-वित्त-चित्त-पित्त-व्रत-रजत-व्रत्त-पलितानि' (लि० सू० १६५) इति नपुंसकलिङ्गता।** रजति रज्यति रञ्जयति वा इति रजतम्, **अथवा** रज्यते येन तद् रजतम्। रञ्ज रागे (भ्वा० उ०, दि० उ०) 'पृषि-रञ्जिभ्यां कित्' (उ० ३।१११) इति अतच्-प्रत्ययः, स च कित्। कित्त्वात् तस्मिन् परे 'अनिदितां हल उपधायाः क्ङिति' (पा० अ० ६।४।२४) इति धातोः ञरूप-नकारस्य लोपः। **अथवा** रञ्जनं रजः। रञ्जरागे (भ्वा० दि० उ०) 'घञर्थे क-विधानम्' (वा० पा० अ० ३।३।५८) इति क-प्रत्ययः। ककारानुबन्धलोपः। 'अनिदितां हल उपधायाः क्ङिति' (पा० अ० ६।४।२४) इति धातोः ञ-रूप-नकारस्य लोपः। एवं रज-शब्दः अकारान्तः निष्पद्यते। रजं रागं तनोति इति रजतम्। रज+तनु विस्तारे (त० उ०) 'अन्येष्वपि दृश्यते' (पा० अं० ३।२।१०१) इति ड-प्रत्ययः। डकारानुबन्ध-लोपः। 'टेः' (पा० अ० ६।४।१४३) इति धातोः अन् इत्यस्य टेर्लोपः। 'दुर्वर्णं रजतं रूप्यं खर्जूरं श्वेतमित्यपि' इत्यमरः। 'रजतं हेम्नि रूप्ये सिते त्रिषु' इति चामरः। 'रजतं त्रिपु शुक्ले स्यात् क्लीबं हारे च दुर्वर्णे' इति मेदिनी। 'रजतं रञ्जने रूप्ये शोणिते ह्रदहारयोः' इति अजयः। 'रजतं स्वाराज्यम्' (छन्दः) (शाङ्ख्य० आ० ११।७)। 'सुवर्णेन रजतम् (सन्दध्यात्)' (गोप० ब्रा० १।१।१४, जैमि० उ० ३।४।३।३)। 'एतत् (रजतम्) रात्रिरूपम्' (ऐत० ब्रा० ७।१२)। 'यद् (रुद्रस्य) अश्रवशीयत तद् रजतं हिरण्यमभवत्। तस्माद् रजतं हिरण्यमभवत्। तस्माद् रजतं हिरण्यमदक्षिण्यमश्रुजं हि' (तैत्ति सं० १।५।१-२)। 'सौर्यं चरुं निर्वपेद् गतश्रीस्तस्य हरितो रुक्मोऽपिधानस्स्याद् रजतोऽधस्तात्' (काठ० सं० ११।४)।

रज्जुः स्त्री०। इत्यत्र **'धेनु-रज्जु-कुहू-सरयू-तनु-रेणु-प्रियङ्गवः स्त्रियाम्' (लि० सू० ५२) इति स्त्रीलिङ्गता।** सृज्यते इति रज्जुः। सृज विसर्गे (तु० प०) 'सृजेरसुम् च' (उ० १।१५) इति उ-प्रत्ययः, असुम्-आगमः, धातोः आदेः सकारस्य लोपः। ऋ असुम् ज् उ इत्यवस्थायाम् 'इको यणचि' (पा० अ० ६।१।७७) इति ऋकारस्य र्-

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by S3 Foundation USA

यणादेशः। असुम्-आगमे उकार-मकारानुबन्धलोपः 'स्तोः श्चुना श्चुः' (पा० अ० ८।४।४०) इति सस्य शः। 'झलां जश् झशि' (पा० अ० ८।४।५३) इति शस्य जः। 'शुल्वं वराटकः स्त्री तु रज्जुस्त्रिपु वटीगुणः' इत्यमरः। 'रज्जुर्वेण्यां गुणेऽपि च' इति मेदिनी। 'रज्जुर्वेण्यां गुणे स्मृता' इति विश्वः। 'अथाप्याद्यन्त-विपर्ययो भवति' (निरु० २।२)। 'वरुण्या.रज्जुः' (शत० ब्रा० १।३।१।१४)। 'वरुण्या वा एपा यद् रज्जुः' (शत० ब्रा० ३।२।४।१८)। 'वरुण्या वै यज्ञे रज्जुः' (शत० ६।४।३।८)।

रणम् नपुं०। **इत्यत्र 'ऋण-लवण-पर्ण-तोरण-रणोष्णानि नपुंसके' (लि० सू० ६८) इति तथा 'बल-कुसुम-शुल्व-पत्तन-रणाभिधानानि' (लि० सू० १५८) इति नपुंसकलिङ्गता।** रणनं रणः। रण शब्दे (भ्वा० प०) 'वशि-रण्योरुपसंख्यातम्' (वा० पा० अ० ३।३।५८) इति अप्-प्रत्ययः। पकारानुबन्धलोपः। **अथवा** रणति इति रणः। 'नन्दिग्रहि-पचादिभ्यो०' (पा० अ० ३।१।३४) इति अच्-प्रत्ययः। चकारानुबन्धलोपः। 'अस्त्रियां समरानीकरणाः कलह-विग्रहौ', 'रणः क्वणे', 'रवे रणः' इति च अमरः। 'रणः कोणे क्वणे पुंसि समरे पुं-नपुंसकम्' इति मेदिनी। 'मरुत्वाँ इन्द्र वृषभो रणाय' (ऋक्सं० ३।३।११)। 'महे रणाय चक्षसे' (ऋ० सं० ७।६।५) 'महे यत्त्वा पुरूरवो रणायावर्धयन् दस्युहत्याय देवाः' (ऋ० सं० ८।५।२)।

रत्नम् नपुं०। **इत्यत्र 'जघनाजिन-तुहिन-कानन-वन-वृजिन-विपिन-वेतन-शासन-सोपान-मिथुन-श्मशान-रत्न-निम्न-चिह्नानि नपुंसके' (लि० सू० ७५) इति नपुंसकलिङ्गता।** यद् रमयति येन वा रमन्ते जनाः तद् रत्नम्। 'रमु क्रीडायाम्' (भ्वा० आ०) 'हेतुमति च' (पा० अ० ३।१।२६) इति णिच्-प्रत्ययः। णकार-चकारानुबन्ध-लोपः। 'अत उपधायाः' (पा० अ० ७।२।११६) इति धातोः उपधायाः अकारस्य आ-वृद्धिः। 'रमेस्त च' (उ० ३।१४) इति न-प्रत्ययः, धातोः मकारस्य तकारादेशश्च। 'णेरनिटि' (पा० अ० ६।४।५८) इति अथवा 'बहुलमन्यत्रापि संज्ञाछन्दसोः' (उ० २।२३) इति णिच्-प्रत्ययस्य इकारस्य लोपः। 'मितां ह्रस्वः' (पा० अ० ६।४।९२) इति धातोः आकारस्य ह्रस्वः **अथवा** 'उणादयो बहुलम्' (पा० अ० ३।३।१) इति बाहुलकात् क्रप्-प्रत्ययः। ककार-पकारानुबन्धलोपः। 'अनुदात्तोपदेश-वनति-तनोत्यादीनामनुनासिकलोपो झलि क्ङिति' (पा० अ० ६।१।७१) इति धातोः मकारस्य लोपः। 'ह्रस्वस्य पिति कृति तुक्' (पा० अ० ६।१।७१) इति तुग्-आगमः। उकार-ककारानुबन्धलोपः। 'रत्नं मणिर्द्वयोरश्मजातौ मुक्तादिकेऽपि च' इत्यमरः। 'रत्नं स्वजाति-श्रेष्ठेऽपि' इति चामरः। 'रत्नं स्वजातिश्रेष्ठे स्यान्मणौ' इति हैमः। 'रत्नं स्वजातिश्रेष्ठेऽपि मणावपि नपुंसकम्' इति मेदिनी। 'रत्नं धननाम' (निघ० २।१०)। 'सोमा सदा

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by S3 Foundation USA

धारयेथामसुर्यं प्र वामिष्टयोऽरमश्नुवन्तु दमे द्रमे..... सप्त रत्ना दधाना शं नो भूतं द्विपदे शं चतुष्पदे' (मैत्रा० सं० ४।११।२)।

रथः पुं०। **इत्यत्र 'थोपधः' (लि० सू० ७०) इति पुँल्लिङ्गता।** यः रमयति, रमन्ते येन यस्मिन् वा जनाः सः रथः। रमु क्रीडायाम् (भ्वा० आ०) 'हेतुमति च' (पा० अ० ३।१।२६) इति णिच्-प्रत्ययः। णकार-चकारानुबन्धलोपः। 'अत उपधायाः' (पा० अ० ७।२।११६) इति धातोः उपधाँयाः अकारस्य आ-वृद्धिः। 'हनि-कुषि-नी-रमि-काशिभ्यः क्थन्' (उ० २।२) इति क्थन्-प्रत्ययः। ककार-नकारानुबन्धलोपः। 'णेरनिटि' (पा० अ० ६।४।५८) अथवा 'बहुलमन्यत्रापि संज्ञाछन्दसोः' (उ० २।२३) इति णिच्-प्रत्ययस्य इकारस्य लोपः। 'मितां ह्रस्वः' (पा० अ० ६।४।९२) इति धातोः आकारस्य ह्रस्वः। रम्थ इत्यवस्थायाम् 'अनुदात्तोपदेश-वनति तनोत्यादीनामनुनासिक-लोपो झलि क्ङिति' (पा० अ० ६।४।३७) इति धातोः मकारस्य लोपः। 'रथाभ्रपुष्प-विदुलशीतलवानीरमञ्जुलाः' इत्यमरः। 'शताङ्गः स्यन्दनो रथः' इति चामरः। 'रथः पुमानवयवे स्यन्दने वेतसेऽपि च' इति मेदिनी। 'रथौ स्यन्दन-वानीरौ' इति अजयः। 'रथ इति पदनाम' (निघं० ५।३)। 'रथः रहतेर्गतिकर्मणः स्थिरतेर्वा स्यात् विपरीतस्य रममाणोऽस्मिंस्तिष्ठतीति वा, रमतेर्वा रसतेर्वा' (निरु० ९।११)। 'वज्रो वै रथः' (तैत्ति० ब्रा० ५।४।११।२)। 'वैश्वानरो वै देवतया रथः' (तैत्ति० ब्रा० २।२।५।४) 'तं वा एतं रसं सन्तं रथ इत्याचक्षते' (गोप० ब्रा० १।२।२१)। 'वज्रो वै रथः' (काठ० सं० २१।१२)।

रन्ध्रम् नपुं०। **इत्यत्र 'द्वाराग्र-स्फार-तक्र-वक्र-वप्र०' (लि० सू० ९०) इति नपुंसकलिङ्गता।** रमणं रम्। रमु क्रीडायाम् (भ्वा० आ०) 'सम्पदादिभ्यः क्विप्' (वा० पा० अ० ३।३।९४) इति क्विप्-प्रत्ययः। तस्य सर्वापहारिलोपः। रं क्रीडां धरति इति रन्ध्रम्। रम्+धृञ् धारणे (भ्वा० उ०) 'क-प्रकरणे मूलविभुजादिभ्य उपसंख्यानम्' (वा० पा० अ० ३।२।५) इति क-प्रत्ययः। ककारानुबन्धलोपः। 'नश्चापदान्तस्य झलि' (पा० अ० ८।३।२४) इति मकारस्य अनुस्वारः। 'अनुस्वारस्य ययि परसवर्णः' (पा० अ० ८।४।५८) इति अनुस्वारस्य परसवर्णः नकारः। 'इको यणचि' (पा० अ० ६।१।७७) इति धातोः ऋकारस्य र्-यणादेशः। 'छिद्रं निर्व्यथनं रोकं रन्ध्रं श्वभ्रं वपा शुषिः' इत्यमरः। 'रन्ध्रं तु दूषणे छिद्रे' इति विश्व-मेदिन्यौ।

रविः पुं०। **इत्यत्र 'ऋषि-राशि-दृति-ग्रन्थि-क्रिमि-ध्वनि-वलि-कौलि-मौलि-रवि-कवि-कपि-मुनयः' (लि० सू० १०९) इति पुंल्लिङ्गता।** रौति रूयते स्तूयते

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by S3 Foundation USA

वा इति रविः। रु शब्दे (अ० प०) 'अच इः' (उ० ४। १४०) इति इ-प्रत्ययः। 'सार्वधातुकार्धधातुकयोः' (पा० अ० ७। ३। ८४) इति धातोः उकारस्य ओ-गुणः। 'एचोऽयवायावः' (पा० अ० ६। १। ७८) इति ओकारस्य अव्-आदेशः। 'भानुर्हंसः सहस्रांशुस्तपनः सविता रविः' इत्यमरः।

रश्मिः पुं०। इत्यत्र 'रश्मि-दिवसाभिधानानि' (लि० सू० १००) इति पुँल्लिङ्गता। अश्नुते व्याप्नोति यः सः रश्मिः। अश्नाति भुङ्क्ते वा यः सः रश्मिः। उभयत्र अशू व्याप्तौ संघाते च (स्वा० आ०), अश भोजने (क्र्या० प०) 'अश्नोते रश् च' (उ० ४। ४७) इति मि-प्रत्ययः, धातोः रश्-आदेशश्च। 'किरणोस्र-मयूखांशु-गभस्ति-घृणि-रश्मयः' इत्यमरः। 'किरण-प्रग्रहौ रश्मौ' इति चामरः। 'रश्मिः पुमान् दीधितौ स्यात् पक्ष्म-प्रग्रहयोरपि' इति मेदिनी। 'रश्मयः रश्मिनाम' (निघं० १। ५)। 'रश्मिः यमनात्' (निरु० २। १५)। 'अभीशवो वै रश्मयः' (शत० ब्रा० ५। ४। ३। १४)। 'रश्मयो ह्यस्य (सूर्यस्य) विश्वे देवाः' (शत० ब्रा० ३। ९। २। ६) 'तस्य (सूर्यस्य) ये रश्मयस्ते सुकृतः' (शत० ब्रा० १। ९। ३। १०), 'एते वा उत्पवितारो यत्सूर्यस्य रश्मयः' (शत० ब्रा० १। १। ३। ६)। 'तस्य (सूर्यस्य) ये रश्मयस्ते देवा मरीचिपाः' (शत० ब्रा० ४। १। १। १५) 'एते वै विश्वे देवा रश्मयः' (शत० ब्रा० २। ३। १। ७) 'तस्य (सूर्यस्य) ये रश्मयस्ते विश्वे देवाः' (शत० ब्रा० २। ३। १। ७)। 'अथ यः कपाले रसो लिप्त आसीत् ते रश्मयोऽभवन्' (शत० ब्रा० ६। १। २। ३)। 'एते वै रश्मयो विश्वे देवाः' (शत० ब्रा० १२। ४। ४। ६)। 'तद् यदेकैकस्य रश्मेर्द्वौ द्वौ वर्णौ भवतः' (गोप० उ० ६। ६)। '(सविता) रश्मिभिर्वर्षं (समदधात्)' (गोप० पू० १। ३६)। 'युक्ता ह्यस्य (इन्द्रस्य) हरयः शता दशेति। सहस्रं हैत आदित्यस्य रश्मयः' (जैमि० उ० १। ४४। ५)। 'ये ते मारुताः (पुरोडाशाः) रश्मयस्ते' (शत० ब्रा० ९। ३। १। २५)। 'रश्मय एव हिङ्कारः' (जैमि० उ० १। ३३। ९)। 'अन्नं रश्मिः' (शत० ब्रा० ८। ५। ३। ३)। 'रश्मयो वा एत आदित्यस्य यद् दिवाकीर्त्यानि' (तां० ब्रा० ४। ६। १३)। 'मासा वै रश्मयो मरुतो रश्मयः' (ता० ब्रा० १४। १२। ९)। 'रश्मयो वै दिवाकीर्त्यानि (सामानि)' (तैत्ति० ब्रा० १। २। ४। २)। 'प्राणा रश्मयः' (तैत्ति० ब्रा० ३। २। ५। २)।

रसम्, रसः नपुं०, पुं०। इत्यत्र **'चमसांस-रस-निर्यासोपवास-कार्पास-वास-मास-कास-कांस-मासानि नपुंसके च'** (लि० सू० ९८) इति नपुंसकलिङ्गता **पुँल्लिङ्गता च**। रस्यते शब्द्यते आस्वाद्यते स्निह्यते वा इति रसम्। रस शब्दे (भ्वा० प०) रस आस्वादन-स्नेहनयोः (चु० उ०) 'अकर्तरि च कारके संज्ञायाम्' (पा० अ० ३। ३।

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by S3 Foundation USA

१९) इति घञ्-प्रत्ययः। घकार-ञकारानुबन्धलोपः। अत्र 'अत उपधायाः' (पा० अ० ७।२।११६) इति धातोः उपधायाः आकारस्य आ-वृद्धिः तु संज्ञापूर्वकविधेः अनित्यत्वात् न भवति। अथवा रसनं रसः। चौरादिकात् रस धातोः 'हेतुमति च' (पा० अ० ३।१। २६) इति णिच्-प्रत्ययः। णकार-चकारानुबन्धलोपः। 'एरच्' (पा० अ० ३।३।५६) इति अच्-प्रत्ययः। चकारानुबन्धलोपः। 'बहुलमन्यत्रापि संज्ञा-छन्दसोः' (उ० २।२३) इति णिच्प्रत्ययस्य इकारस्य लोपः। **अथवा** रसति शब्दं करोति इति रसः रसं वा। रस शब्दे 'नन्दिग्रहि-पचादिभ्यो०' (पा० अ० ३। १। १३४) इति अच्-प्रत्ययः। चकारानुबन्धलोपः। **अथवा** यः रसयति धातून् सः रसः। चौरादिकात् रस धातोः पूर्ववत् णिच् प्रत्ययः। णकारचकारानुबन्धलोपः। 'नन्दि-ग्रहि-पचादिभ्यो०' (पा० अ० ३।१। १३४) इति अच्-प्रत्ययः। चकारानुबन्धलोपः। पूर्ववत् णिच्प्रत्ययस्य इकारस्य लोपः। 'रूपं शब्दो गन्ध-रस-स्पर्शाश्च विषया अमी', 'रसाः पुंसि'; 'अथ चपलो रसः सूतश्च पारदे', 'शृङ्गारादौ विषे वीर्ये गुणे रागे द्रवे रसः' इत्यमरः। 'रसो गन्धरसे स्वादे तिक्तादौ विषरागयोः। शृङ्गारादौ द्रवे वीर्ये देहधात्वम्बुपारदे। रसा तु शल्लकीपाठा जिह्वाधरणिकङ्गुषु' इति विश्वः। 'रसः स्वादे जले वीर्ये शृङ्गारादौ विषे द्रवे। बोले रागे गृहे धातौ तिक्तादौ पारदेऽपि च। रसा तु रसनापाठा-सल्लकीक्षिति-कङ्गुपु' इति हैमः। 'रसः वाङ्नाम' (निघं० १।११)। 'रस उदकनाम' (निघं० १।१२)। 'रस अन्ननाम' (निघं० २।७)। 'रसो वै मधु' (शत० ब्रा० ६। ४। ३। २)। 'स्वधायै त्वेति रसाय त्वेत्येवैतदाह' (शत० ब्रा० ५।४।३।७)। 'रसो वाऽआपः' (शत० ब्रा० ३। ३। ३। १८)। 'रसो वृष्टिः' (मैत्रा० सं० २। ५। ७)। 'यद्वै तत्सुकृतं (ब्रह्म) रसो वै सः। रसं ह्येवायं लब्ध्वाऽऽनन्दी भवति' (तैत्ति० आ० ८।७।१३, तै० उ० २।६।१)। 'रस ओङ्कारः' (जैमि० २।७८)।

रागः पुं०। इत्यत्र **'घञबन्तः' (लि० सू० ३६) इति पुँल्लिङ्गता**। रज्यते अनेन इति रागः अथवा रञ्जनं रागः। रञ्ज रागे (भ्वा० उ०) रञ्ज रागे (दि० उ०) 'भावे' (पा० अ० ३।३।१८) इति घञ्-प्रत्ययः। घकार-ञकारानुबन्धलोपः। 'घञि च भावकरणयोः' (पा० अ० ३।४।२७) इति धातोः ञ्-रूपनकारस्य लोपः। 'अत उपधायाः' (पा० अ० ७।२।११६) इति धातोः उपधायाः अकारस्य आ-वृद्धिः। 'चजोः कु घिण्ण्यतोः' (पा० अ० ७।३।५२) इति धातोः जकारस्य गकारः।

राजा पुं०। इत्यत्र **'नान्तः' (लि० सू० ४८) इति पुँल्लिङ्गता**। राजति राजते वा इति राजा। राजृ दीप्तौ (भ्वा० उ०) 'कनिन् यु-वृषि-तक्षि-राजि-धन्वि-द्यु-प्रतिदिवः' (उ०

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by S3 Foundation USA

१।५६) इति कनिन्-प्रत्ययः। ककारेकार-नकारानुबन्धलोपः। एवं राजन् अयं शब्दः निष्पद्यते, अस्य प्रथमैकवचने राजा भवति। 'राजा प्रभौ नृपे चन्द्रे यक्षे क्षत्रिय-शक्रयोः' इत्यमरः। 'राजा राजतेः' (निरु २।३)। 'राजा महिमा' (तैत्ति० ब्रा० ३।९।१०।१) एवं (शत० ब्रा० १३।२।११।२)। 'तस्माद् राजा दण्ड्यः' (शत० ब्रा० ५।४।४।७)। 'यद् राजा करोति तद् विट् करोति' (मैत्रा० सं० १।१०।१३)। 'राजानो वै राष्ट्रभृतस्ते हि राष्ट्राणि बिभ्रति' (शत० ब्रा० ९।४।१।१)। 'राजा ब्राह्मणादबलीयानमित्रेभ्यो वै स बलीयान् भवति' (शत० ब्रा० ५।४।४।१५)। 'एतद्ध वै राजतं यद् राजा' (जैमि० उ० २।१८१)। 'राज्ञ एव राजसूयम्' (शत० ब्रा० ५।१।१।१२)। 'तस्माद् राजोरुबली भावुकः' (शत० ब्रा० १३।२।२।८)। 'नाराजकस्य युद्धमस्ति' (शत० ब्रा० १।५।९।१)। 'तस्माद् राजा बाहुबली भावुकः' (शत० ब्रा० १३।२।२।५)। 'विशि राजा प्रतिष्ठितः' (काठ० सं० ८।४)।

राजिः स्त्री०। इत्यत्र **'शष्कुलि-राजि-कुट्यशनि-वर्ति-भृकुटि-त्रुटि-वलि-पङ्क्तयः' (लि० सू० २६) इति स्त्रीलिङ्गता।** राजति राजते वा इति राजिः। राजृ दीप्तौ (भ्वा० उ०) 'वसि-वपि-यजि-राजि-व्रजि-सदि-हनि-वाशि-वदि-वारिभ्य इञ्' (उ० ४।१२६) इति इञ्-प्रत्ययः। ञकारानुबन्धलोपः। अथवा 'सर्वधातुभ्य इन्' (उ० ४।११९) इति इन्-प्रत्ययः। नकारानुबन्धलोपः। 'राजिः स्त्री पङ्क्ति-रेखयोः' इति मेदिनी। 'श्रेणी लेखास्तु राजयः' इत्यमरः।

राटम् नपुं०। इत्यत्र **'किरीट-मुकुट-वट-वीट-शृङ्गाटक-राट-लोष्टानि नपुंसके' (लि० सू० ६५) इति नपुंसकलिङ्गता।** राति ददाति इति राटम्। रा दाने (अ० प०) 'उणादयो बहुलम्' (पा० अ० ३।३।१) इति उणादीनां बहुलवचनात् 'शकादिभ्योऽटन्' (उ० ४।८२) इति अटन्-प्रत्ययः। नकारानुबन्धलोपः। 'अकः सवर्णे दीर्घः' (पा० अ० ६।१।१०१) इति आकारस्य अकारस्य च आ-दीर्घः। **अथवा** राति ददाति इति राः। रा धातोः 'क्विप् च' (पा० अ० ३।२।७६) इति क्विप्-प्रत्ययः। तस्य सर्वापहारिलोपः। अटति इति अटः। अट गतौ (भ्वा० प०) 'नन्दि-ग्रहि-पचादिभ्यो०' (पा० अ० ३।१।१३४) इति अच्-प्रत्ययः। चकारानुबन्धलोपः। रा-शब्दस्य अट-शब्देन सह समासे अपि राटं भवति।

रात्रिः स्त्री०। इत्यत्र **'तिथि-नाडि-रुचि-वीचि-नालि-धूलि-किकि-केलिच्छवि-रात्र्यादयः' (लि० सू० २५) इति स्त्रीलिङ्गता।** राति सुखं ददाति, द्यति खण्डयति वा इति रात्रिः। रा दाने (अ० प०) 'रा-शदिभ्यां त्रिप्' (उ० ४।६८) इति त्रिप्-

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by S3 Foundation USA

प्रत्ययः। पकारानुबन्धलोपः। 'निशा निशीथिनी रात्रिः' इत्यमरः। 'रात्री रात्रिस्तमस्विनी' इति शब्दार्णवः। 'रात्रिः प्ररमयति भूतानि नक्तञ्चारीण्युपरमयतीतराणि ध्रुवीकरोति रातेर्वा स्याद् दानकर्मणः प्रदीयन्तेऽस्यामवश्यायाः' (निरु० २। १८)। 'सगरा रात्रिः' (शत० ब्रा० १।७।२।२६)। 'सोमो रात्रिः' (शत० ब्रा० ३।४।४।१५)। 'क्षेमो रात्रिः' (शत० ब्रा० १३।१।४।३)। 'रात्रिः वै व्युष्टिः' (शत० ब्रा० १३।२।१।६)। 'अन्धो रात्रिः' (तां० ब्रा० ९।१।७)। 'भ्रातृव्य-दैवत्या रात्रिः' (तैत्ति० ब्रा० २।२।६।४)। 'आग्रेयी वै रात्रिः' (तैत्ति० ब्रा० १।१।४।२)। 'आग्रेयी रात्रिः' (तैत्ति० ब्रा० १।५।३।४)। 'रात्रिर्वै पिशङ्गिला' (तैत्ति० ब्रा० ३।९।५।३)। 'वारुणी रात्रिः' (तैत्ति० ब्रा० १।७। १०।१)। 'रात्रिः सावित्री' (गोप० पू० १।३३)। 'मृत्योस्तम इव हि रात्रिः' (गोप० ब्रा० उ० ५।१)। 'रात्रिर्वरुणः' (ऐत० ब्रा० ४।१०)। 'तमः पाप्मा रात्रिः' (कौषी० ब्रा० १७।६।९)। 'तम इव रात्रिर्मृत्युरिव' (ऐत० ब्रा० ४।५)। 'अहर्वै शबलो रात्रिः श्यामः' (कौषी० ब्रा० २।९)। 'रात्रिरेव श्रीः' (शत० ब्रा० १०।२।६।१६)। 'रात्रयः क्षणाः' (ऐत० ब्रा० १।१३)। 'ब्रह्मणो वै रूपमहः क्षत्रस्य रात्रिः' (तैत्ति० ब्रा० ३।९। १४।३)। 'राथन्तरी वै रात्री' (ऐत० ब्रा० ५।३०)। 'एषा वा उक्थ्यस्य समा यद् रात्रिः' (तां० ब्रा० ९।१।२५, ९।१।२६)।

राशिः पुं०। इत्यत्र **'ऋषि-राशि-दृति-ग्रन्थि-क्रिमि-ध्वनि-बलि-कौलि-मौलि-रवि-कपि-मुनयः' (लि० सू० १०१) इति पुँल्लिङ्गता।** 'अश्नुते व्याप्नोति इति राशिः पुञ्जः।' अशू व्याप्तौ संघाते च' (स्वा० आ०) **अथवा** अश्यते उपभुज्यते येन सः राशिः। अश भोजने (क्र्या० प०) 'अशि-पणाय्यो रुडायलुकौ च' (उ० ४। १३४) इति इण्-प्रत्ययः धातो रुडागमश्च। प्रत्यये णकारानुबन्धलोपः। आगमे उकार-टकारानुबन्धलोपः। 'अत उपधायाः' (पा० अ० ७।२।११६) इति धातोः उपधायाः अकारस्य आ-वृद्धिः। **अथवा** रश शब्दे दीप्तौ वा इति सौत्रात् धातोः 'उणादयो बहुलम्' (पा० अ० ३।३।१) इति उणादीनां बहुलवचनात् 'जनि-घसिभ्यामिण्' (उ० ४। १३१) इति इण्-प्रत्ययः। णकारानुबन्धलोपः। पूर्ववत् धातोः उपधायाः अकारस्य 'अत उपधायाः' (पा० अ० ७।२।११६) इति आ-वृद्धिः। 'पुञ्ज-राशी तूत्करः कूटमस्त्रियाम्' इत्यमरः। 'राशिर्मेषादि-पुञ्जयोः' इति मेदिनी। 'द्वौ राशी पुञ्ज-मेषाद्यौ' इति चामरः। 'स राशिश्चतुश्चत्वारिंशो भवति रथन्तरसामा' (जैमि० ब्रा० २।१६४)।

रुक्मम् नपुं०। इत्यत्र **'रुक्म-सिध्म-युग्मेध्म-गुल्माध्यात्म-कुङ्कुमानि नपुंसके' (लि० सू० ८४) इति नपुंसकलिङ्गता।** रोचते दीप्यते इति रुक्मम्, वर्णविशेषः वा।

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by S3 Foundation USA.

रुच दीप्तावभिप्रीतौ च (भ्वा० आ०) 'युजि-रुचि-तिजां कुश्च' (उ० १। १४६) इति मक्-प्रत्ययः धातोः चकारस्य ककारश्च। प्रत्यये ककारानुबन्धलोपः। कित्त्वात् 'क्ङिति च' (पा० अ० १। १। ५) इति निषेधात् 'पुगन्त-लघूपधस्य च' (पा० अ० ७। ३। ८६) इति धातोः उपधायाः उकारस्य प्राप्तः ओ-गुणः न भवति। 'रुक्मं कार्त्तस्वरं जाम्बूनदमष्टापदोऽस्त्रियाम्' इत्यमरः। 'रुक्मं लोहे सुवर्णे च' इति हैमः। 'रुक्मं च काञ्चने लौहे' इति मेदिनी। 'रुक्ममिति हिरण्यनाम' (निघं० १। २)। 'सत्यं रुक्मः' (तैत्ति० आ० १। २५। १)। 'असौ वाऽदित्य एव रुक्म एव हीमाः सर्वाः प्रजा अतिरोचते रोचोह वै तं रुक्म इत्याचक्षते परोक्षम्' (तैत्ति० ब्रा० ३। ९। २०। २)। 'रुक्मा होतुः' (मैत्रा० सं० ४। ४। ८)। 'तस्य (अश्वस्य श्वेतस्य) रुक्मः पुरस्ताद् भवति। तदेतस्य रूपं क्रियते य एष (आदित्यः) तपति' (शत० ब्रा० ३। ५। १। २०)। 'सत्यं हैतद् रुक्मः' (शत० ब्रा० ६। ७। १। १-२)। 'प्रजापतिस्तेजो वीर्यं रुक्मः' (शत० ब्रा० ६। ७। १। ९)। 'असौ वाऽ आदित्य एष रुक्मः' (शत० ब्रा० ६। ७। १। ३)। 'रुक्मो वै समुद्रः' (यजुः १३। १६)।

रुचिः स्त्री०। इत्यत्र **'तिथि-नाडि-रुचि-वीचि-नालि-धूलि-किकि-केलिच्छवि-रात्र्यादयः' (लि० सू० २५) इति स्त्रीलिङ्गता।** रोचते रुच्यते वा या सा रुचिः। रुच दीप्तावभिप्रीतौ च (भ्वा० आ०) 'इगुपधात् कित्' (उ० ४। १२१) इति इन्-प्रत्ययः स कित्। नकारानुबन्धलोपः। कित्त्वात् 'क्ङिति च' (पा० अ० १। १। ५) इति निषेधात् 'पुगन्त-लघूपधस्य च' (पा० अ० ७। ३। ८६) इति धातोः उपधायाः उकारस्य प्राप्तः ओ-गुणः न भवति। 'स्युः प्रभा-रुग्-रुचिस्त्विड्-भा-भाश्छवि-द्युति-दीप्तयः' तथा 'अभिष्वङ्गे स्पृहायां च गभस्तौ च रुचिःस्त्रियाम्' इत्यमरः। 'रुचिः स्त्री दीप्तौ शोभाया-मभिष्वङ्गाभिलाषयोः' इति मेदिनी। 'रुचिर्योषिति शोभायाम्' इति विश्वः।

रुट् स्त्री०। **इत्यत्र 'प्रावृड्-विप्रुड्-रुट्-तृट्-विट्-त्विषः' (लि० सू० २३) इति स्त्रीलिङ्गता।** रोटते इति रुट्, रोषति इति रुट्, रुष्यति इति रुट् अथवा रोहति इति रुट्। रुट प्रतिघाते (भ्वा० आ०), रुष हिंसायाम् (भ्वा० प०) रुष हिंसायाम् (दि० प०) रुह बीजन्मति प्रादुर्भावे च। सर्वत्र 'क्विप् च' (पा० अ० ३। २। ७६) इति क्विप्-प्रत्ययः। तस्य सर्वापहारिलोपः। प्रत्ययस्य कित्त्वात् 'क्ङिति च' (पा० अ० १। १। ५) इति निषेधात् 'पुगन्तलघूपधस्य च' (पा० अ० ७। ३। ८६) इति धातोः उपधायाः उकारस्य प्राप्तः ओ-गुणः न भवति। एवं रुट् प्रतिघाते धातोः रुट्, रुष् धातोः रुष्, रुहधातोश्च रुट् निष्पद्यते रुष् रुह् अनयोः शब्दयोः प्रथमैकवचने रुट् भवति।

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by S3 Foundation USA

रुधिरम् नपुं०। **इत्यत्र 'मुख-नयन-लोह-वृत-मांस-रुधिर-कार्मुक-विवर-जल-हल-धनान्नाभिधानानि' (लि० सू० १३७) इति नपुंसकलिङ्गता।** रुणद्धि अकाले जीवननाशम् अथवा रुध्यते आव्रियते चर्मणा यत् तद् रुधिरम्। रुधिर् आवरणे (रु० ड०) 'इदि-मदि-खिदि-छिदि-भिदि-मन्दि-चन्दि-तिमि-मिहि-मुहि-मुचि-रुचि-रुधि-बन्धि-शुषिभ्यः किरच्' (उ० १।५१) किरच्-प्रत्ययः। ककार-चकारानुबन्धलोपः। कित्त्वात् 'क्ङिति च' (पा० अ० १।१।५) इति निषेधात् 'पुगन्तलघूपधस्य च' (पा० अ० ७।३।८६) इति धातोः उपधायाः उकारस्य प्राप्तः ओ-गुणः न भवति। 'रुधिरेऽसृग्-लोहितास्र-क्षतज-शोणितम्' इत्यमरः। 'रुधिरोऽङ्गारके पुंसि क्लीबे तु कुङ्कुमाऽसृजोः' इति मेदिनी।

रूपम् नपुं०। **इत्यत्र 'पाप-रूपोडुप-तल्प-शिल्प-पुष्प-शष्प-समीपान्तरीपाणि नपुंसके' (लि० सू० ७८) इति नपुंसकलिङ्गता।** रूप्यते शब्द्यते स्तूयते इति रूपम्। रु शब्दे (अ० प०) 'खष्प-शिल्प-शष्प-वाष्प-रूप-पर्व-तल्पाः' (उ० ३।२८) इति प-प्रत्ययः, धातोः उकारस्य दीर्घः ऊकारश्च। **अथवा** रूपयति रूप्यते वा यत् तद् रूपम्। रूप रूपकरणे (चु० उ०) 'नन्दि-ग्रहि-पचादिभ्यो०' (पा० अ० ३।१।१३४) इति अच्-प्रत्ययः। चकारानुबन्धलोपः। **अथवा** रुप्यति मोहयति इति रूपम्। रुप विमोहने (दि० प०) 'नन्दि-ग्रहि०' (पा० अ० ३।१।१३४) इति अच्प्रत्ययः। चकारानुबन्धलोपः। 'अन्येषामपि दृश्यते' (पा० अ० ६।३।१३७) इति धातोः उपधायाः उकारस्य ऊ-दीर्घः। 'रूपं शब्दो गन्ध-रस-स्पर्शाश्च विषया अमी' इत्यमरः। 'रूपं तु श्लोक-शब्दयोः पशावाकारे सौन्दर्ये नाणके नाटकादिके। ग्रन्थावृत्तौ स्वभावे च' इति हैमः। 'रूपं स्वभावे नाटके पशु-शब्दयोः, ग्रन्थावृत्तौ नाटकादावाकारश्लोकयोरपि' इति विश्वः। 'रूपं स्वभाव-सौन्दर्ये नालोकपशु-वृन्दयोः। ग्रन्थावृत्तौ नाटकादावाकारश्लोक-योरपि' इति मेदिनी। 'रूपं रोचतेः' (निरु० २।३) एवं (निरु० ३।१३) तथा 'रूपाणि प्रज्ञानानि' (निरु० १२।१३)। 'अन्नं वै रूपम्' (शत० ब्रा० ९।२।१।१२)। 'योषित्येव रूपं दधाति' (तैत्ति० ब्रा० ३।८।१३।२) एवं (शत० ब्रा० १३।१।९।६)। 'कुमारी रूपं (गच्छति)' (गोप० पू० २।२)। 'रूपं हिरण्यम्' (मैत्रा० सं० ४।८।२)।

रूप्यम् नपुं०। **इत्यत्र 'धान्याज्य-सस्य-रूप्य-पण्य-वर्ण्य-धृष्य-हव्य-कव्य-काव्य-सत्यापत्य-मूल्य-शिक्य-कुड्य-मद्य-हर्म्य-तूर्य-सैन्यानि' (लि० सू० १६८) इति नपुंसकलिङ्गता।** रूप-शब्दः पूर्वं व्याख्यात्। आहतं प्रशस्तं वा रूपम् अस्य अस्ति इति रूप्यम्। रूप-शब्दात् 'रूपादाहतप्रशंसयोर्यप्' (पा० अ० ५।२।

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by S3 Foundation USA

१२०) इति यप्-प्रत्ययः। पकारानुबन्धलोपः। 'यस्येति च' (पा० अ० ६।४।१४८) इति पकार-परवर्त्तिनः अकारस्य लोपः। **अथवा** रूपयितुं योग्यं रूप्यम्। रूप रूपक्रियायाम् (चु० उ०) 'सत्यापपाश०' (पा० अ० ३। १। २५) इति णिच्-प्रत्ययः। णकार-चकारानुबन्धलोपः। 'अचो यत्' (पा० अ० ३।१।९७) इति यत्प्रत्ययः। तकारानुबन्ध-लोपः। 'बहुलमन्यत्रापि संज्ञाछन्दसोः' (उ० २। २३) इति णिच्-प्रत्ययस्य इकारस्य लोपः। 'दुर्वर्णं रजतं रूप्यं खर्जूरं श्वेतमित्यपि' इत्यमरः। 'रूप्यं प्रशस्ते रूपेऽपि' इति चामरः। 'रूप्या स्यात् सुन्दरे त्रिषु। आयतस्वर्णरजते रजते च नपुंसकम्' इति मेदिनी।

रेणुः स्त्री०, पुं०। इत्यत्र **'धेनु-रज्जु-कुहू-सरयू-तनु-रेणु-प्रियङ्गवः स्त्रियाम्' (लि० सू० ५२) इति स्त्रीलिङ्गता तथा 'मृत्यु-सीधु-कर्कन्धु-किष्कु-कण्डु-रेणवः' (लि० सू० १७३) इति स्त्रीलिङ्गता पुँल्लिङ्गता च।** रिणाति गच्छति हिनस्ति रीयते गम्यते हिंस्यते या यः वा सा स रेणुः। री गति-रेषणयोः (क्र्या० प०) 'अजि-वृ-रीभ्यो निच्च' (उ० ३। ३८) इति णु-प्रत्ययः स च नित्। नित्त्वं स्वरार्थम्। 'सार्वधातुकार्ध-धातुकयोः' (पा० अ० ७। ३। ८४) इति धातोः ईकारस्य ए-गुणः। 'रेणुर्द्वयोः स्त्रियां धूलिः पांशुर्ना न द्वयो रजः' इत्यमरः। 'रेणुः स्त्रीपुंसयोर्धूलौ पुँल्लिङ्गः पर्पटे पुनः' इति मेदिनी। 'रेणुः पर्यटके धूल्यामर्के' इति विश्वः।

रेफः पुं०। इत्यत्र **'पल्लव-पल्वल-कफ-रेफ-कटाह-निर्व्यूह-मठ-मणि-तरङ्ग-तुरङ्ग-गन्ध-मृदङ्ग-सङ्ग-समुद्ग-पुङ्खाः' (लि० सू० ११६) इति पुँल्लिङ्गता।** रिफति कत्थते युध्यते निन्दति हिनस्ति ददाति द्यति वा इति रेफः। रिफ कत्थन-युद्ध-निन्दा-हिंसा-दानेषु (भ्वा० प०) 'अवद्यावमाधमार्वरेफाः कुत्सिते' (उ० ५। ५४) इति अ-प्रत्ययः। 'पुगन्त-लघूपधस्य च' (पा० अ० ७। ३। ८६) इति धातोः उपधायाः इकारस्य ए-गुणः। **अथवा** रिफ्यते कत्थ्यते युध्यते निन्द्यते हिंस्यते दीयते वा यः सः इति रेफः। उक्त रिफ-धातोः 'अकर्त्तरि कारके संज्ञायाम्' (पा० अ० ३। ३। १९) इति घञ्-प्रत्ययः। घकार-ञकारानुबन्धलोपः। पूर्ववत् धातोः उपधायाः 'पुगन्तलघूपधस्य च' (पा० अ० ७। ३। ८६) इति इकारस्य ए-गुणः। **अथवा** रेफणं रेफः। उक्त-रिफ-धातोः 'भावे' (पा० अ० ३। ३। १८) इति घञ्-प्रत्ययः। घकार-ञकारानुबन्धलोपः। पूर्ववत् धातोः उपधायाः इकारस्य ए-गुणः। **अथवा** रिफ्यते यत्र यस्मिन् वा इति रेफः। उक्त-रिफ-धातोः 'पुंसि संज्ञायां घः प्रायेण' (पा० अ० ३। ३। ११८) इति घ-प्रत्ययः। घकारानुबन्धलोपः। अत्रापि धातोः इकारस्य पूर्ववत् ए-गुण। 'निकृष्ट-प्रतिकृष्टार्व-रेफ-याप्यावमाधमाः' इत्यमरः। 'र-वर्णे पुंसि रेफः स्यात् कुत्सिते वाच्यलिङ्गकः' इति

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by S3 Foundation USA

चामरः। 'रेफो र-वर्णे पुंसि स्यात् कुत्सिते वाच्यवत् पुनः' इति विश्वः। 'रेफो र-वर्णे पुंसि स्यात् कुत्सिते पुनरन्यवत्' इति मेदिनी।

रोम नपुं०। **इत्यत्र 'नाम-रोमणी नपुंसके' (लि० सू० १५१) इति नपुंसकलिङ्गता।** रौति शब्दयति रवते गच्छति हिनस्ति रूयते शब्द्यते गम्यते हिंस्यते वा यत् तद् रोम। रु शब्दे (अ० प०), रुङ् गतिरेपणयोः रेषणं हिंसा (भ्वा० आ०) 'नामन्-सीमन्-व्योमन्-रोमन्-लोमन्-पाप्मन्-ध्यामन्' (उ० ४। १५२) इति मनिन्-प्रत्ययः। इकार-नकारानुबन्धलोपः। 'सार्वधातुकार्धधातुकयोः' (पा० अ० ७। ३। ८४) इति धातोः उकारस्य ओ-गुणः एवं रोमन् अयं शब्दः निष्पद्यते। अस्य प्रथमा-द्वितीयैकवचने रोम भवति। **अथवा** लूयते छिद्यते छिद्यते यत् तद् रोम। लूञ् छेदने (क्र्या० उ०) 'नामन्-सीमन्०' (उ० ४। १५२) इति मनिन्-प्रत्ययः। इकार-नकारानुबन्धलोपः। 'सार्वधातुकार्धधातुकयोः' (पा० अ० ७। ३। ८४) इति धातोः उकारस्य ओ-गुणः एवं लोमन् अयं शब्दः निष्पद्यते। र-लयोः अभेद-प्रसिद्ध्या लोमन् एव रोमन् अपि व्यवह्रियते। तस्य प्रथमा-द्वितीयैकवचने रोम भवति। 'तनूरुहं रोम लोम' इत्यमरः। 'तनूरुहं तु लोम्नि स्यात् पतत्रे च नपुंसकम्' इति मेदिनी।

लक्षा स्त्री०। **इत्यत्र 'लक्षा कोटिः स्त्रियाम्' (लि० सू० १४६) इति स्त्रीलिङ्गता।** 'वा लक्षा नियुतं च तद्' इति अमरात् क्लीबे अपि लक्षम् इति सिद्धान्तकौमुद्यां भट्टोजिदीक्षितः। 'तल्लक्षं नियुतशब्दवाच्यमपि' इति मुकुटः। 'लक्षा न पुंसि संख्यायां क्लीबे व्याज-शरव्ययोः' इति मेदिनी। लक्षणं लक्षा। लक्ष दर्शनाङ्कनयोः (चु० प०), 'लक्ष आलोचने' (चु० आ०) 'गुरोश्च हलः' (पा० अ० ३। ३। १०३) इति अ-प्रत्ययः 'अजाद्यतष्टाप्' (पा० अ० ४। १। ४) इति टाप्-प्रत्ययः। टकार-पकारानुबन्धलोपः। 'अकः सवर्णे दीर्घः' (पा० अ० ६। १। १०१) इति अकारस्य आकारस्य च आ-दीर्घः एवं लक्षा व्युत्पद्यते।

लक्ष्मीः स्त्री०। **इत्यत्र 'ईकारान्तश्च' (लि० सू० १०) इति स्त्रीलिङ्गता।** लक्षयति पश्यति अङ्कयति आलोचयति वा इति लक्ष्मीः। लक्ष दर्शनाङ्कयोः (चु० उ०), लक्ष आलोचने (चु० आ०) 'लक्षेर्मुट् च' (उ० ३। १६०) इति ई-प्रत्ययः, तस्य मुडागमश्च। उकार-टकारानुबन्धलोपः। धातोः णिच्-प्रत्ययस्य इकारस्य 'बहुलमन्यत्रापि संज्ञाछन्दसोः' (उ० २। २३) इति लोपः। 'लक्ष्मीः पद्मालया पद्मा' इत्यमरः। 'लक्ष्मीः सम्पत्ति-शोभयोः। ऋद्ध्योपधौ च पद्मायां वृद्धि-नामौषधेऽपि च' इति मेदिनी। 'योग्यमृद्धिः सिद्धि-लक्ष्म्यौ' तथा 'सम्पत्तिः श्रीश्च लक्ष्मीश्च' इति चाप्यमरः। 'लक्ष्मीः श्री-शोभा-

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by S3 Foundation USA

'सम्पत्ति-प्रियङ्गुपु' इति हैमः। 'लक्ष्मीर्लाभाद्वा लक्षणाद्वा (लप्स्यमानाद्वा) लाञ्छनाद्वा कपतेर्या स्यात् प्रेप्साकर्मणो लग्यतेर्वा स्यादाश्लेप-कर्मणो लज्जतेर्वा स्यादश्लाघाकर्मणः' (निरु० ४। ९)। 'तस्माद् यस्य मुखे लक्ष्म भवति तं पुण्य-लक्ष्मीक इत्याचक्षते' (शत० ब्रा० ८। ४। ४। ११)। 'तस्माद् यस्य सर्वतो लक्ष्म भवति तं पुण्यलक्ष्मीक इत्याचक्षते' (शत० ब्रा० ८। ५। ४। ३)। 'श्रीश्च ते लक्ष्मीश्च ते पत्न्या अहोरात्रे पार्श्वे नक्षत्राणि रूपमश्विनौ व्यात्तम्' (काठकसंकलन १०३। १)

लता स्त्री०। इत्यत्र **'भूमि-विद्युत्-सरिल्लता-वनिताभिधानानि' (लि० सू० १८) इति स्त्रीलिङ्गता**। लतति वेष्टयति इति लता। लतिः सौत्रः वेष्टनार्थकः धातुः। ततः 'नन्दि-ग्रहि-पचादिभ्यो०' (पा० अ० ३। १। १३४) इति अच्-प्रत्ययः। चकारानुबन्ध-लोपः। स्त्रियाम् 'अजाद्यतष्टाम्' (पा० अ० ४। १। ४) इति टाप्-प्रत्ययः। टकार-पकारानुबन्धलोपः। 'अकः सवर्णे दीर्घः' (पा० अ० ६। १। १०१) इति अकारस्य आकारस्य च आ-दीर्घः। 'लता गोवन्दनी गुन्द्रा'. 'मरुन्माला तु पिशुना स्पृक्का देवी लता लघुः' एवं 'पारावताङ्घ्रिः कटभी पण्या ज्योतिष्मती लता' इत्यमरः। 'लता प्रियङ्गुशाखयोः। पृक्काज्योतिष्मतीवल्ली लताकस्तूरिकासु च। माधवी दूर्वयोः' इति मेदिनी।

ललाटम् नपुं०। इत्यत्र **'किरीट-मुकुट-ललाट-वट-वीट-शृङ्गाट-कराट-लोष्टानि नपुंसके' (लि० सू० ६५) इति नपुंसकलिङ्गता**। लल्यते ईप्स्यते लड्यते विलस्यते वा अनेन इति ललः लडः वा। लल ईप्सायाम् (चु० आ०), लड विलासे (भ्वा० प०) 'गोचर-सञ्चर-वह-व्रज-व्यजपण-निगमाश्च' (पा० अ० ३। ३। ११९) इति घ-प्रत्ययः। घकारानुबन्धलोपः। डलयोः अभेदस्मरणात् लडः अपि ललः एव भवति। ततः ललम् ईप्सां विलासं वा अटति इति ललाटम्। लल+अट गतौ (भ्वा० प०) 'कर्मण्यण्' (पा० अ० ३। २। १) इति अण्-प्रत्ययः। णकारानुबन्धलोपः। 'अत उपधायाः' (पा० ७। २। ११६) इति धातोः उपधायाः अकारस्य आ-वृद्धिः। 'अकः सवर्णे दीर्घः' (पा० अ० ६। १। १०१) इति अकारस्य आकारस्य च आ-दीर्घः। 'ललाटमलिकं गोधिः' इत्यमरः। 'ललाटादेव सिंहोऽजायत' (जैमि० ब्रा० २। २६७)।

लवणम् नपुं०। इत्यत्र **'ऋण-लवण-पर्ण-तोरण-रणोष्णानि नपुंसके' (लि० सू० ६८) इति नपुंसकलिङ्गता**। लुनाति छिनत्ति इति लवणम्। लूञ् छेदने (क्र्या० उ०) 'नन्दि-ग्रहि-पचादिभ्यो०' (पा० अ० ३। १। १३४) इति ल्यु-प्रत्ययः। लकारानु-बन्धलोपः। 'युवोरनाकौ' (पा० अ० ७। १। १।) इति यु-स्थाने अनादेशः। 'सार्वधातु-कार्धधातुकयोः' (पा० अ० ७। ३। ८४) इति धातोः ऊकारस्य ओ-गुणः। 'एचोऽयवायावः'

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by S3 Foundation USA

(पा० अ० ६।१।७८) इति ओकारस्य अव्-आदेश:। 'लवणाल्लुक्' (पा० अ० ४। ४।२४) इति लिङ्गात् नस्य णत्वम्। 'सामुद्रं यत्तु लवणमक्षीवं वसिरं च तत्' इत्यमर:। 'लवणं सैन्धवादौ ना सिन्धुरक्षाभिदो रसे। तद्युक्ते वाच्यलिङ्गः स्यान्नदीभेदद्विपोः स्त्रियाम्' इति मेदिनी। 'लवणो राक्षसे रसे। अस्थिभेदे लवणा त्विट्' इति हैम:। 'लवणेन सुवर्णं सन्दध्यात्' (गोप० ब्रा० १।१।१४, जैमि० उ० ३।४।३।३)। 'तस्मादाहुर्गावो लवणमिति। तस्मादु वो लवणेन पणं चरति, गाव एव भवन्ति' (जैमि० ब्रा० ३। २३६)।

लाजा: पुं०। इत्यत्र **'दाराक्षत-लाजासूनां बहुत्वं च' (लि० सू० १०६) इति पुँल्लिङ्गता बहुवचनत्वं च।** यान् लाजन्ति ते लाजा: **अथवा** लाज्यन्ते भर्जिता: क्रियन्ते इति लाजा:। लाज भर्जने (भ्वा० प०) 'अकर्त्तरि च कारके संज्ञायाम्' (पा० अ० ३। ३।१९) इति घञ्-प्रत्यय:। घकार-ञकारानुबन्धलोप:। एवं लाज-शब्द: निष्पद्यते। अस्य प्रथमैकवचने 'लाजा:' भवति 'लाजा: पुंभूम्नि चाक्षता:' इत्यमर:। 'लाजा लाजते:' (निरु० ६।९), 'आदित्यानां वा एतद्रूपं यल्लाजा:' (तै० ब्रा० ३।८।१४।४)। 'नक्षत्राणां वा एतद्रूपं यल्लाजा:' (शत० ब्रा० १३।२।१।५)।

लिङ्गम् नपुं०। इत्यत्र **'भय-लिङ्ग-भग-पदानि नपुंसके' (लि० सू० ३८) इति नपुंसकलिङ्गता।** लिङ्ग्यते गम्यते अनेन अस्मिन् वा इति लिङ्गम्। लिगिं गतौ (भ्वा० प०) 'हलश्च' (पा० अ० ३।३।१२१) इति घञ्-प्रत्यय:। घकार-ञकारानुबन्धलोप:। धातो: इदित्त्वात् 'इदितो नुम् धातो:' (पा० अ० ७।१।५८) इति नुम्-आगम:। उकार-मकारानुबन्धलोप:। 'नश्चापदान्तस्य झलि' (पा० अ० ८।३।२४) इति नकारस्य अनुस्वार:। 'अनुस्वारस्य ययि परसवर्ण:' (पा० अ० ८।४।४८) इति अनुस्वारस्य परसवर्ण: ङकार:। **अथवा** लिङ्गति गच्छति इति लिङ्गम्। उक्त लिगि-धातो: 'नन्दि-ग्रहि-पचादिभ्यो०' (पा० अ० ३।१।१३४) इति अच्-प्रत्यय:। चकारानुबन्धलोप:। धातो: इदित्त्वात् पूर्ववत् नुम्-आगम:। उकार-मकारानुबन्धलोप:। नकारस्य अनुस्वार: अनुस्वारस्य परसवर्ण: ङकारश्च। 'लिङ्गं चिह्नरेफयो:' इत्यमर:। 'लिङ्गं चिह्नेऽनुमाने च सांख्योक्तप्रकृतावपि। शिवमूर्त्तिविशेषे च मेहनेऽपि नपुंसकम्' इति मेदिनी।

लोष्टम् नपुं०। इत्यत्र **'किरीट-मुकुट-ललाट-वट-वीट-शृङ्गाट-कराट-लोष्टानि नपुंसके' (लि० सू० ६५) इति नपुंसकलिङ्गता।** लुनाति छिनत्ति क्षतं करोति इति लोष्टम्। लूञ् छेदने (क्र्या० उ०) 'लोष्ट-पलितौ' (उ० ३।१२) इति क्त-प्रत्यय:। तस्य सुडागम: धातो: ऊकारस्य ओ-गुणश्च। प्रत्यये ककारानुबन्धलोप:। 'आदेश-

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by S3 Foundation USA

प्रत्यययोः' (पा० अ० ८।३।५९) इति सस्य षः। 'ष्टुना ष्टुः' (पा० अ० ८।४।४१) इति तस्य टः। **अथवा** लोष्टते संघातः येन भवति तद् लोष्टम्। लोष्ट संघाते (भ्वा० आ०) 'नन्दि-ग्रहि-पचादिभ्यो०' (पा० अ० ३। १। १३४) इति अच्-प्रत्ययः। चकारानुबन्धलोपः। 'लोष्टानि लेष्टवः पुंसि' इत्यमरः। 'लेष्टुः शण्डेऽपि लोष्टः स्यात्' इति बोपालितः।

लोहम् नपुं०। **इत्यत्र 'मुख-नयन-लोह-वन-मांस-रुधिर-कार्मुक-विवर-जल-हल-धनान्नाभिधानानि' (लि० सू० १३७) इति नपुंसकलिङ्गता।** लुभ्यते अनेन इति लोहम्। लुभ गार्ध्ये (दि० प०) 'अकर्तरि च कारके संज्ञायाम्' (पा० अ० ३। ३। १९) इति घञ्-प्रत्ययः। घकार-ञकारानुबन्धलोपः। धातोः उपधायाः उकारस्य 'पुगन्त लघूपधस्य च' (पा० अ० ७। ३। ८६) इति ओ-गुणः। 'पृषोदरादीनि यथोपदिष्टम्' (पा० अ० ६।३।१०९) इति धातोः भकारस्य हकारः। 'वंशकागुरुराजार्हलोहं कृमिज-जोङ्गकम्' एवम् 'लोहोऽस्त्री शस्त्रकं तीक्ष्णं पिण्डं कालायसायसी' इत्यमरः। 'लोहोऽस्त्री शस्त्रके लोहं जोङ्गके सर्वतैजसे' इति मेदिनी। 'श्यामं च मे लोहं च मे (यज्ञेन कल्पताम्)' (तै० सं० ४।७।५।१)। 'लोहेन सीसं सन्दध्यात्' (गोप० ब्रा० १।१।१४)। 'दिशो वै लोहमय्यः (सूच्यः)' (शत० ब्रा० १३।२।१०।३)।

लोहितः, लोहितम् पुं०, नपुं०। **इत्यत्र 'घृत-भूत-मुस्त-क्ष्वेलितैरावत-पुस्तक-बुस्त-लोहिताः' (लि० सू० १७७) इति पुँल्लिङ्गता नपुंसकलिङ्गता च।** रोहति बीजात् जायते प्रादुर्भवति इति रोहितम्। रुह बीजजन्मनि प्रादुर्भावे च (भ्वा० प०) 'रुहे रश्च लो वा' (उ० ३। ९४) इति इतन्-प्रत्ययः धातोः रेफस्य विकल्पेन हकारादेशश्च। प्रत्यय-नकारानुबन्धलोपः। 'पुगन्तलघूपधस्य च' (पा० अ० ७।३।८६) इति धातोः उपधायाः उकारस्य ओ-गुणः। **अथवा** रोहणं रोहः। रोहः सञ्जातः अस्य इति रोहितः रोहितं वा। रोह-शब्दात् 'तारकादिभ्य इतच्' (पा० अ० ५। २। ३६) इति इतच्-प्रत्ययः। चकारानुबन्धलोपः। 'यस्येति च' (पा० अ० ६।४।१४८) इति ह-परवर्तिनः अकारस्य लोपः। 'कपिलकादीनां संज्ञाछन्दसोर्वा रो लमापद्यते' (वा० पा० अ० ८।२।१८) इति रोहित-शब्दस्य रेफस्य लत्व-सम्पादनेन लोहित-शब्दः निष्पद्यते। 'रोहितो लोहितो रक्तः' इत्यमरः। 'रुधिरेऽसृग्लोहितास्त्ररक्तक्षतज-शोणितम्' इति चामरः। 'लोहितं रक्तगोशीर्षे कुङ्कुमे रक्तचन्दने। पुमान् नदान्तरे भौमे वर्णे च त्रिपु तद्वति' इति मेदिनी। 'लोहितो मङ्गले नदे। वर्णभेदे लोहितं तु कुङ्कुमे रक्तचन्दने। गोशीर्षे रुधिरे युद्धे' इति हैमः। 'लोहिता इव चन्द्रशकाः' (शत० ब्रा० ५।४।१।१-२)। 'ते यद्देवानामप्यल्पकं

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by S3 Foundation USA

लोहितमसुरा अकुर्वंस्तद्रात्रीभी रक्षांस्यसुम्भन्' (काठ० सं० १०।७)। 'रुद्रं लोहितेन (प्रीणामि)' (मैत्रा० सं० ३।१५।३)।

वक्त्रम्, वक्त्रः नपुं०, पुं०। इत्यत्र '**द्वाराग्र-स्फार-तक्र-चक्र-वप्र०**' (**लि० सू० ९०**) **इति नपुंसकलिङ्गता 'वक्त्र-नेत्रारण्य-गाण्डीवानि पुंसि च' (लि० सू० १३९) इति पुँल्लिङ्गता नपुंसकलिङ्गता च**। उच्यते येन तद् वक्त्रम् सः वक्त्रः वा। वच परिभाषणे (अ० प०) 'गु-धृ-वी-पचि-वचि-यमि-सदि-क्षदिभ्यस्त्रः' (उ० ४। १६८) इति त्र-प्रत्ययः। 'चोः कुः' (पा० अ० ८।२।३०) इति चकारस्य ककारः। अथवा वक्ति इति वक्। वच्-धातोः 'क्विप् च' (पा० अ० ३।२।७६) इति क्विप्-प्रत्ययः। तस्य सर्वापहारिलोपः। वचं त्रायते इति वक्त्रं वक्त्रः वा। वच्+त्रैङ् पालने (भ्वा० आ०) 'आदेच उपदेशेऽशिति' (पा० अ० ६।१।४५) इति धातोः ऐकारस्य आकारः। 'अन्येष्वपि दृश्यते' (पा० अ० ३।२।१०१) इति ड-प्रत्ययः। डकारानुबन्धलोपः। 'टेः' (पा० अ० ६।४।१४३) इति धातोः आकारस्य टेर्लोपः। पूर्ववत् चकारस्य 'चोः कुः' (पा० अ० ८।२।३०) इति ककारः। 'वक्त्रास्यं वदनं तुण्डमाननं लपनं मुखम्' इत्यमरः। 'वक्त्रमास्ये छन्दसि च' इति हैमः। 'वक्त्राभ्यां चक्रवाकौ (अजायेताम्)' (जै० उ० २।२६७)।

वज्रं, वज्रः नपुं०, पुं०। इत्यत्र '**चक्र-वज्रान्धकार-सारावारापार-क्षीर-तोमर-शृङ्गार-भृङ्गार-मन्दारोशीर-तिमिर-शिशिराणि नपुंसके च' (लि० सू० ९२) इति नपुंसकलिङ्गता पुँल्लिङ्गता च**। वजति गच्छति गम्यते प्राप्यते वा यत् तद् वज्रं यः सः वज्रः वा। वज गतौ (भ्वा० प०) 'ऋज्रेन्द्राग्र-वज्र-विप्र-कुब्र-चुब्र-क्षुर-भद्रोग्र-भेर-भेल-शुक्र-शुक्ल-गौर-वन्ररा-मालाः' (उ० २।२९) इति रन्-प्रत्ययः। नकारानुबन्धलोपः। 'ह्लादिनी वज्रमस्त्री स्यात् कुलिशं भिदुरं पविः' इत्यमरः। 'वज्रोऽस्त्री हीरके रवौ' इति चामरः। 'वज्रं स्याद् बालके धात्र्यां क्लीबं योगान्तरे पुमान्। वज्रः स्नेह्यां गुडुच्यां च वज्री स्नुह्यन्तरे स्मृता। दम्भोलौ हीरकेऽप्यस्त्री' इति मेदिनी। 'अस्त्रियौ वज्र-कुलिशौ' इति संसारावर्त्तः। 'वज्रः वर्जयतीति सतः' (निरु० ३।११)। 'वज्रो वा आपः' (शत० ब्रा० १।१।१।१७)। 'वज्रो वै स्फ्यः' (शत० ब्रा० १।२।५।२०) एवं (तै० ब्रा० १।७।१०।५)। 'वज्रो वै वषट्कारः' (शत० ब्रा० १।३।३।१४)। 'वीर्यं वज्रः' (शत० ब्रा० १।३।५।७)। 'वज्रो वा आज्यम्' (शत० ब्रा० १।४।४।४)। 'पञ्चदशः (स्तोमः) वै वज्रः' (शत० ब्रा० १।३।५।७) एवं (तैत्ति० ब्रा० २।२।७। २) तथा (तां० ब्रा० २।४।२) एवं (कौषी० ब्रा० ७।२)। 'वज्रो वै शरः' (शत० ब्रा०

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by S3 Foundation USA

३।१।३।१३)।'संवत्सरो हि वज्र:' (शत० ब्रा० ३।४।४।१५)।'वज्रो वा अभ्रि:' (शत० ब्रा० ३।५।४।२)।'वज्रो वै परशु:' (शत० ब्रा० ३।६।४।१०)।'वज्रो यूप:' (शत० ब्रा० ३।६।४।१९)।'संवत्सरो वज्र:' (शत० ब्रा० ३।६।४।१९)। 'वज्र: शास:' (शत० ब्रा० ३।८।१।५)।'वज्रो वै यूपशकल:' (शत० ब्रा० ३।८।१।१५)।'वज्रो वै अश्व:' (शत० ब्रा० ४।३।४।२७)।'वज्रो वै रथ:' (शत० ब्रा० ५।१।४।३) एवं (तैत्ति० ब्रा० १।३।६।१)।'वज्रो वै विकङ्कत:' (शत० ब्रा० ५। २।४।१८)।'वज्रो वै पशव:' (शत० ब्रा० ६।४।४।६)।'वीर्यं वै वज्र:' (शत० ब्रा० ७।३।१।१९)।'वज्रेणैवैतद् रक्षांसि नाष्ट्रा अपहन्ति' (शत० ब्रा० ७।४।१। ३४)।'वज्रो वै त्रिष्टुप्' (शत० ब्रा० ७।२।२।२४)।'वज्र: पञ्चदश:' (शत० ब्रा० ८। ४।१।१०)।'वज्रो वा ओज:' (शत० ब्रा० ८।४।१।२०)।'दक्षिणत उद्यामो हि वज्र:' (शत० ब्रा० ८।५।१।१३)।'वज्रो वै ग्रावा' (शत० ब्रा० ११।५।९।७)। 'वज्रो वै वषट्कार:' (ऐत० ब्रा० ३।१८, कौषी० ब्रा० ३।५, गोप० उ० ३।१।५)। 'वज्रो वा एष यद् यूप:' (ऐत० ब्रा० २।१) एवं (षडविं० ब्रा० ४।४) तथा (कौषी० ब्रा० १०।१)।'वज्र एव वाक्' (ऐत० ब्रा० २।२१)।'वज्रो वै वक्रम्' (तैत्ति० ब्रा० १।४।४।१०)।'वज्रो वा एष यद् वषट्कार:' (ऐत० ब्रा० ३।६)।'वाग्घि वज्र:' (ऐत० ब्रा० ४।१)।'वज्रो वै वैश्वानरीयं (सूक्तम्)' (ऐत० ब्रा० ३।१४)।'वज्रो वै सामिधेन्य:' (कौषी० ब्रा० ३।२)।'वज्रो वै यौधाजयं (साम)' (तां० ब्रा० ७।५। १२)।'वज्रो वै हिंकार:' (कौषी० ब्रा० ३।२)।'वज्रो वै महानाम्न्य: (ऋच:)' (षड्विं० ब्रा० ३।११)।'एष वज्रो यत् षोडशी (शस्त्रम्)' (कौषी० ब्रा० १७।१)। 'वज्रो वा एष यत् षोडशी' (ऐत० ब्रा० ४।१)।'शाक्करो वज्र:' (तैत्ति० ब्रा० २।१।५। ११)।'वज्रो वै षोडशी' (गोप० उ० २।१३) एवं (तां० ब्रा० १२।१३।१४)।'वज्र: षोडशी' (षड्विं० ब्रा० ३।११)।'वज्रो वै त्रिणव: (स्तोम:)' (तां० ब्रा० ३।१।२)। 'अष्टाश्रिर्वै वज्रम्' (ऐत० ब्रा० २।१)।'पुरो गुरोरिव हि वज्र:' (तां० ब्रा० ८।५।२)। 'वज्रो वै भान्त:' (यजु० १४।२३)।'त्रिवृद्वै वज्र:' (कौषी० ब्रा० ३।२)।'वज्रो वाऽअश्व:' (शत० ब्रा० ४।३।४।२७)।'शाक्करो वज्र:' (तैत्ति० ब्रा० २।१।५। ११)।'वज्रा वा: उपसद:' (शत० ब्रा० १०।२।५।२)।'आनुष्टुभो वा एष वज्रो यत् षोडशी (शस्त्रम्)' (कौषी० ब्रा० १७।१)।

वटम् नपुं०। इत्यत्र 'किरीट-मुकुट-ललाट-वट-वीट-शृङ्गाट-कराट-लोष्टानि नपुंसके' (लि० सू० ६५) इति नपुंसकलिङ्गता। वटति वेष्टते इति वटम्। वट वेष्टने (भ्वा० प०) 'नन्दि-ग्रहि-पचादिभ्यो०' (पा० अ० ३।१।१३४) इति अच्-

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by S3 Foundation USA

प्रत्यय:। चकारानुबन्धलोप:। अथवा वट्यते वेष्ट्यते अनेन इति वट:। 'पुंसि संज्ञायां घ: प्रायेण' (पा० अ० ३। ३। ११८) इति घ-प्रत्यय:। घकारानुबन्धलोप:। 'न्यग्रोधो बहुपाद् वट:' इत्यमर:। 'वटी त्रिपु गुणे पुंसि स्यान्न्यग्रोध-कपर्दयो:' इति मेदिनी।

वत्स: पुं०। **इत्यत्र 'सोपध:' (लि० सू०९६) इति पुँल्लिङ्गता।** वदति इति वत्स:। वद व्यक्तायां वांचि (भ्वा० प०) 'वृ-तृ-वदि-वसि-हनि-कमि-कषिभ्य: स:' (उ० ३। ६२) इति स-प्रत्यय:। 'खरि च' (पा० अ० ८। ४। ५५) इति दकारस्य तकार:। 'शकृत्करस्तु वत्स: स्यात्' इत्यमर:। 'वत्सौ तर्णक-वर्षौ द्वौ' इति चामर:। 'वत्स: पुत्राहिवर्षयो:। तर्णके नोरसि क्लीबम्' इति मेदिनी। 'वत्सस्तर्णकपुत्रादिवर्षे' इति विश्व:। 'पुत्रादौ तर्णके वर्षे वत्स:' इति रुद्र:। 'वत्सा वै दैव्या अध्वर्यव:' (शत० ब्रा० १। ८। १। २७)। 'वत्सा उ वै यज्ञपतिं वर्धन्ति यस्य ह्येते भूयिष्ठा भवन्ति स हि यज्ञपतिर्भवति' (शत० ब्रा० १। ८। १। २८)। 'मन एव वत्स:' (शत० ब्रा० ११। ३। १। १)। 'अयमेव वत्सो योऽयं (वायु:) पवते' (शत० ब्रा० १२। ४। १। ११)। 'अग्निर्हि ब्रह्मणो वत्स:' (जैमि० उ० २। १३। १)। 'वायुदेवत्यो वै वत्स:' (तैति० आ० ५। ७। २)।

वनम् नपुं०। **इत्यत्र 'जघनाजिन-तुहिन-कानन-वन-वृजिन-विपिन-वेतन-शासन-सोपान-मिथुन-श्मशान-रत्न-निम्न-चिह्नानि नपुंसके' (लि० सू० ७५) इति तथा 'मुख-नयन-लोह-वन-मांस-रुधिर-कार्मुक-विवर-जल-हल-धनान्नाभिधानानि' (लि० सू० १३७) इति नपुंसकलिङ्गता।** वन्यते शब्द्यते संभज्यते सेव्यते याच्यते हिंस्यते वा यत् तद् वनम्। वन शब्दे (भ्वा० प०) वन सम्भक्तौ (भ्वा० प०), वनु याचने (त० प०), वन हिंसायाम् (भ्वा० प०) 'अकर्त्तरि च कारके संज्ञायाम्' (पा० अ० ३। ३। १९) इति घञ्-प्रत्यय:। घकार-ञकारानुबन्धलोप:। संज्ञापूर्वक-विधे: अनित्यत्वात् अत्र 'अत उपधाया:' (पा० अ० ७। २। ११६) इति धातो: उपधाया: अकारस्य वृद्धि: न भवति। अथवा वनति इति वनम्। उक्त-वन-धातो: 'नन्दि-ग्रहि-पचादिभ्यो०' (पा० अ० ३। १। १३४) इति अच्-प्रत्यय:। चकारानुबन्धलोप:। 'पय: कीलालममृतं जीवनं भुवनं वनम्', 'अटव्यरण्यं विपिनं गहनं काननं वनम्' तथा 'वनं सलिल-कानने' इत्यमर:। 'क्लीबं स्यात् कानने नीरे निवासे निलये वनम्' इति रभस:। 'वनं नपुंसके नीरे निवासालयकानने' इति मेदिनी। 'वनं प्रस्रवणे गेहे प्रवासेऽम्भसि कानने' इति हैम:। 'वनमिति रश्मिनामसु पठितम्' (निघं० १। ५, ४। ३१)। 'वनम् उदक नाम' (निघं० १। १२)। 'वनं वनोते:' (निरु० ८। ३)। 'वनानां = रश्मीनाम्' (निरु० १२। ७२)।

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by S3 Foundation USA

वनिता स्त्री०। इत्यत्र '**भूमि-विद्युत्-सरिल्लता-वनिताभिधानानि**' (**लि० सू० १८**) **इति स्त्रीलिङ्गता**। वनति शब्दयति, सम्भजति सेवते, याचते हिनस्ति या सा वनिता। वन शब्दे (भ्वा० प०), वन सम्भक्तौ (भ्वा० प०), वनु याचने (त० आ०) वन हिंसायाम् (भ्वा० प०) 'उणादयो बहुलम्' (पा० अ० ३। ३। १) इति उणादीनां बहुलवचनात्, 'हृ-श्याभ्यामितन्' (उ० ३।९३) इति इतन्-प्रत्ययः। नकारानुबन्धलोपः। 'अजाद्यतष्टाप्' (पा० अ० ४। १। ४) इति टाप्-प्रत्ययः। टकार-पकारानुबन्धलोपः। 'अकः सवर्णे दीर्घः' (पा० अ० ६। १। १०१) इति अकारस्य आकारस्य च आ-दीर्घः। **अथवा** वन्यते स्म इति वनिता। उक्त-वन-धातोः 'निष्ठा' (पा० अ० ३। २। १०२) इति क्त-प्रत्ययः। ककारानुबन्धलोपः। 'आर्धधातुकस्येड् वलादेः' (पा० अ० ७। २। ३५) इति इडागमः। टकारानुबन्धलोपः। पूर्ववत् टाप्-प्रत्ययः। टकार-पकारानुबन्धलोपः। अकारस्य आकारस्य आ-दीर्घः। 'प्रतीपदर्शिनी वामा वनिता महिला तथा' इत्यमरः। 'वनिता जनितात्यर्थानुरागायां च योपिति' इति चामरः। 'वनिता जातरागा स्त्री स्त्रियः स्त्री त्रिपु याचिते' इति मेदिनी।

वप्रम् नपुं०। इत्यत्र '**द्वाराग्र-स्फार-तक्र-वक्र-वप्र०**' (**लि० सू० ९०**) **इति नपुंसकलिङ्गता**। वपति बीजं यः, बीजं वा उप्यते यत्र तद् वप्रम्। डुवप् बीज-सन्तानयोः (भ्वा० उ०) 'वृधि-वपिभ्यां रन्' (उ० २। २८) इति रन्-प्रत्ययः। नकारानुबन्धलोपः। 'स्याच्चयो वप्रमस्त्रियाम्' एवं 'पुंनपुसकयोर्वप्रः केदारः क्षेत्रम्' तथा 'नागर्नासकयोगेष्टवप्राणि' इत्यमरः। 'वप्रस्ताते पुमान्, अस्त्री रेणौ क्षेत्रे चये तटे' इति मेदिनी। 'वप्रश्चावरणे वृन्दे प्राकारे मूल-बन्धने' इति धरणिः।

वरण्डः पुं०। इत्यत्र '**षण्ड-मण्ड-करण्ड-भरण्ड-वरण्ड-तुण्ड-गण्ड-मुण्ड-पाषण्ड-शिखण्डाः**' (**लि० सू० ११२**) **इति पुँल्लिङ्गता**। वृणोति व्रियते वा इति वरण्डः। वृञ् वरणे (स्वा० उ०) 'अण्डन् कृ-सृ-भृ-वृञः' (उ० १। १२९) इति अण्डन्- प्रत्ययः। नकारानुबन्धलोपः। 'उरण् रपरः' (पा० अ० १। १। ५१) इति सहकारेण 'सार्वधातुकार्धधातुकयोः' (पा० अ० ७। ३। ८४) इति धातोः ऋकारस्य अर्-गुणः। **अथवा** वरश्चासौ अण्डः इति वरण्डः। वर + अण्ड इत्यवस्थायां 'शकन्ध्वादिषु पररूपं वाच्यम्' (वा० पा० अ० ६। १। ९४) इति रेफोत्तर-वर्त्तिनः अकारस्य पररूपम्। 'वरण्डो मुखरोगः' इति सिद्धान्तकौमुद्याम् उणादौ। 'वरण्डोऽप्यन्तरावेदौ समूह-मुखरोगयोः' इति मेदिनी।

वरत्रा स्त्री०। इत्यत्र '**यात्रा-मात्रा-भस्त्रा-दंष्ट्रा-वरत्राः स्त्रियामेव**' (**लि० सू० १५५**) **इति स्त्रीलिङ्गता**। वृणोति जलादि-वस्तुं या सा वरत्रा, व्रियते वा यया सा वरत्रा। वृञ्

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by S3 Foundation USA

वरणे (स्वा० उ०) 'वृञश्चित्' (उ० ३।१०७) इति अत्रन्-प्रत्ययः। नकारानुबन्धलोपः। 'उरण् रपरः' (पा० अ० १।१।५१) इति सहकारेण 'सार्वधातुकार्धधातुकयोः' (पा० अ० ७।३।८४) इति धातोः ऋकारस्य अर्-गुणः। 'अजाद्यतष्टाप्' (पा० अ० ४।१। ४) इति टाप्-प्रत्ययः। टकार-पकारानुबन्धलोपः। 'अकः सवर्णे दीर्घः' (पा० अ० ६। १।१०१) इति अकारस्य आकारस्य च आ-दीर्घः। **अथवा** वरं त्रायते रक्षति या सा वरत्रा। वर + त्रैङ् पालने (भ्वा० आ०) 'आदेच उपदेशेऽशिति' (पा० अ० ६।१। ४५) इति धातोः ऐकारस्य आकारादेशः। 'आतोऽनुपसर्गे कः' (पा० अ० ३।२।३) इति क-प्रत्ययः। ककारानुबन्धलोपः। 'आतो लोप इटि च' (पा० अ० ६।४।६४) इति धातोः आकारस्य लोपः। एवं वरत्र-शब्दः निष्पद्यते। ततः स्त्रियां पूर्ववत् टाप्-प्रत्ययः। टकार-पकारानुबन्धलोपः। अकारस्य आकारस्य च आ-दीर्घः। 'दूष्या कक्ष्या वरत्रा च' इत्यमरः। 'नध्री वध्री वरत्रा स्यात्' इति चामरः।

वरम् नपुं०। इत्यत्र **'द्वन्द्व-बर्ह-दुःख-बडिश-पिच्छ-बिम्ब-कुटुम्ब-कवच-वर-शर-वृन्दारकाणि' (लि० सू० १६९) इति नपुंसकलिङ्गता।** व्रियते इति वरम्। वरणं वा वरम्। वृञ् वरणे (स्वा० उ०) 'ग्रह-वृ-दृ-निश्चि-गमश्च' (पा० अ० ३।३। ५८) इति अप्-प्रत्ययः। पकारानुबन्धलोपः। 'उरण् रपरः' (पा० अ० १।१।५१) इति सहकारेण 'सार्वधातुकार्धधातुकयोः' (पा० अ० ७।३।८४) इति धातोः ऋकारस्य अर्-गुणः। अथवा वृणोति इति वरं वरः वा। उक्त वृ-धातोः 'नन्दि-ग्रहि-पचादिभ्यो०' (पा० अ० ३।१।१३४) इति अच्-प्रत्ययः। चकारानुबन्धलोपः। पूर्ववत् धातोः ऋकारस्य अर्-गुणः। 'काश्मीरजन्माग्निशिखे वरं बाह्लीकपीतनम्', 'वरो वृतौ' एवं 'देवाद्वृते वरः श्रेष्ठे त्रिषु क्लीबं मनाक् प्रिये' इत्यमरः। 'वरो जामातरि वृतौ देवतादेरभीप्सिते। षिङ्गे पुंसि त्रिषु श्रेष्ठे कुङ्कुमे तु नपुंसकम्। वरी प्रोक्ता शतावर्यां वरा च स्यात् फलत्रिके। मनागिष्टे वरं क्लीबं केचिदाहुस्तदव्ययम्' इति मेदिनी। 'वरं तु घुसृणे किञ्चिदिष्टे' इति हैमः। वरो वरयितव्यो भवति' (निरु० १।७)। 'वर इव वै स्वर्गो लोकः' (जैमि० ब्रा० २।९९)। 'वरो न प्रतिगृह्यः' (तै० सं० ७।१।६।५)। 'सर्वं वै वरः' (शत० ब्रा० २।२।१।४)। 'यद्वरं ददात्यात्मानं तेन स्पृणोति। आत्मा हि वरः' (कपिष्ठलकठ सं० ४४।५)।

वर्चस्कम्, वर्चस्कः नपुं०, पुं०। इत्यत्र **'कण्टकानीक-सरक-मोदक-चषक-मस्तक-पुस्तक-तडाक-निष्क-शुष्क-वर्चस्क-पिनाक-भाण्डक-पिण्डक-कटक-शण्डक-पिटक-तालक-फलक-पुलाकानि नपुंसके च' (लि० सू०**

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by S3 Foundation USA

६३) इति नपुंसकलिङ्गता पुँल्लिङ्गता च। वर्चते दीप्यते वर्च्यते वा यत् तद् वर्चस्कम्। वर्च दीप्तौ (भ्वा० आ०) 'सर्वधातुभ्योऽसुन्' (उ० ४। १९०) इति असुन्-प्रत्ययः। उकार-नकारानुबन्धलोपः। एवं वर्चस् अयं शब्दः निष्पद्यते। कुत्सितं वर्चः वर्चस्कम्। 'कुत्सिते' (पा० अ० ५। ३। ७४) इति वर्चस् इत्यस्मात् शब्दात् कुत्सायां कन्-प्रत्ययः। नकारानुबन्धलोपः। 'गूथं पुरीषं वर्चस्कमस्त्री विष्ठाविषौ स्त्रियौ' इत्यमरः।

वर्ण्यम् नपुं०। इत्यत्र **'धान्याज्य-सस्य-रूप्य-पण्य-वर्ण्य-वृष्य-हव्य-कव्य-काव्य-सत्यापत्य-मूल्य-शिक्य-कुड्य-मद्य-हर्म्य-तूर्य-सैन्यानि' (लि० सू० १६८) इति नपुंसकलिङ्गता।** वर्णयितुं योग्यं वर्ण्यम्। वर्ण प्रेरणे वर्णने चेत्येके (चु० प०), वर्ण वर्णक्रिया-विस्तार-गुणवचनेषु (चु० उ०) 'ऋहलोर्ण्यत्' (पा० अ० ३। १। १२४) इति ण्यत्-प्रत्ययः। णकार-तकारानुबन्धलोपः।

वर्त्तिः स्त्री०। इत्यत्र **'शष्कुलि-राजि-कुट्यशनि-वर्ति-भृकुटि-त्रुटि-वलि-पङ्क्तयः' (लि० सू० २६) इति स्त्रीलिङ्गता।** वर्त्तन्ते वर्त्यते वा यत्र यया वा सा वर्तिः। या वर्तते सा अपि वर्तिः। वृतु वर्तने (भ्वा० आ०) 'हृ-पिषि-रुहि-वृति-विदि-छिदि-कीर्तिभ्यश्च' (उ० ४। १२०) इति इन्-प्रत्ययः। नकारानुबन्धलोपः। 'पुगन्त-लघूपधस्य च' (पा० अ० ७। ३। ८६) इति धातोः उपधायाः ऋकारस्य 'उरण् रपरः' (पा० अ० १। १। ५) इति सहकारेण अर्-गुणः। अथवा वर्तते वर्त्यते वा यत्र यया वा सा वर्तिः। वृतु वर्तने (भ्वा० आ०) 'वृतेश्छन्दसि' (उ० ४। १४२) इति इ-प्रत्ययः। पूर्ववत् धातोः उपधायाः ऋकारस्य अर्-गुणः। 'गात्रानुलेपनी वर्तिर्वर्णकं स्याद् विलेपनम्' इत्यमरः। 'वर्तिर्भेषजनिर्माणे नयनाञ्जनलेखयोः। गात्रानुलेपनी दीपदशा-दीपेषु योषिति' इति मेदिनी।

वर्म नपुं०। **इत्यत्र 'मन् द्व्यच्कोऽकर्तरि' (लि० सू० १४९) इति नपुंसकलिङ्गता।** वृणोति देहम् इति वर्म। वृञ् वरणे (स्वा० उ०) 'अन्येभ्योऽपि दृश्यन्ते' (पा० अ० ३। २। ७५) इति मनिन्-प्रत्ययः। इकार-नकारानुबन्धलोपः। 'सार्वधातुकार्धधातुकयोः' (पा० अ० ७। ३। ८४) इति धातोः ऋकारस्य 'उरण् रपरः' (पा० अ० १। १। ५१) इति सहकारेण अर्-गुणः एवं वर्मन् निष्पद्यते। अस्य प्रथमा-द्वितीयैक-वचने वर्म भवति। 'अथ तनुत्रं वर्म दंशनम्' इत्यमरः। 'वर्म गृहनाम' (निघं० ३। ४)।

वर्षम्, वर्षः नपुं०, पुं०। **इत्यत्र 'यूष-करीष-मिष-विष-वर्षाणि नपुंसके च' (लि० सू० ९५) इति नपुंसकलिङ्गता पुँल्लिङ्गता च।** वृणोति स्वीकुरुते। व्रियते स्वीक्रियते वा इति वर्षम् वर्षः वा। वृञ् वरणे (स्वा० उ०) 'वृ-तृ-वदि-वचि-वसि-

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by S3 Foundation USA

हनि-कवि-कपिभ्य: स:' (उ० ३।६२) इति स-प्रत्यय:। 'सार्वधातुकार्धधातुकयो:' (पा० अ० ७।३।८४) इति धातो: ऋकारस्य 'उरण् रपर:' (पा० अ० १।१।५१) इति सहकारेण अर्-गुण:। 'आदेश-प्रत्यययो:' (पा० अ० ८।३।५९) इति प्रत्ययस्य सस्य षकार:। **अथवा** वर्षणं वर्षं वर्षो वा, वृष्यते वा यत् तद् वर्षं य: स वा वर्ष:। वृषु सेचने (भ्वा० प०) 'अज्-विधौ भयादीनामुपसंख्यानम्' (वा० पा० अ० ३।३।५६) इति अच्-प्रत्यय:। चकारानुबन्धलोप:। 'पुगन्त-लघूपधस्य च' (पा० अ० ७।३।८६) इति धातो: उपधाया: ऋकारस्य 'उरण् रपर:' (पा० अ० १।१।५१) इति सहकारेण अर्-गुण:। **अथवा** वर्षति वर्षयते वा इति वर्षं वर्ष: वा। वृषु सेचने (भ्वा० प०), वृष शक्तिबन्धने (चु० उ०) शक्तिवन्धनं प्रजनन-सामर्थ्यं शक्तिबन्धश्च। 'नन्दि-ग्रहि-पचादिभ्यो०' (पा० अ० ३।१।१३४) इति अच्-प्रत्यय:। धातो: उपधाया: ऋकारस्य अर्-गुण: पूर्ववत् एव। 'वृष्टिर्वर्षम्' इत्यमर:। 'अथ वृष्टिर्वर्षमस्त्री केचिदिच्छन्ति वर्षणम्' इति शब्दार्णव:। 'वर्षस्तु समा द्वीपांशवृष्टिषु। वर्षवरेऽपि वर्षास्तु प्रावृषि' इति हैम:। 'लोकोऽयं भारतं वर्षम्' इत्यमर:। 'पुनंपुंसकयोर्वर्षं जम्बूद्वीपाब्दवृष्टिषु' इति रुद्र:। 'वर्षं स्थानं विदु: प्राज्ञा इमं लोकं च भारतम्' इति माघ:। अपराण्यपि वर्षाणि यथा- 'स्याद् भारतं किंपुरुषं हरिवर्षं च दक्षिणा:। रम्यं हिरण्मयकुरू सुमेरोरुत्तरास्त्रय:। भद्राश्व-केतुमालौ तु द्वौ वर्षौ पूर्व-पश्चिमौ। इलावृतं तु मध्यस्थं सुमेरुर्यत्र तिष्ठति' इति वाचस्पति:। 'स्याद् वृष्टौ लोकधात्वंशे वत्सरे वर्षमस्त्रियाम्' इत्यमर:। 'वर्षोऽस्त्री भारतादौ च जम्बूद्वीपाब्दवृष्टिषु। प्रावृट्काले स्त्रियां भूम्नि' इति मेदिनी। 'वर्षं हवि: (सावित्री)' (गोप० ब्रा० १।१।३३, तैत्ति० आ० २।१४।१)।

वर्षा: स्त्री०। इत्यत्र **'अप्-सुमनस्समा-सिकता-वर्षाणां बहुत्वं च' (लि० सू० २९) इति स्त्रीलिङ्गता बहुवचनत्वं च।** वर्ष-शब्द: पूर्वं व्याख्यात:। तत: वर्षम् अर्थात् वर्षणम् अत्र अस्ति अस्मिन् अर्थे 'अर्श आदिभ्योऽच्' (पा० अ० ५।२।१२७) इति अच्-प्रत्यय:। चकारानुबन्धलोप:। 'शकन्ध्वादिषु पररूपं वाच्यम्' (वा० पा० अ० ६।१।९४) इति षकारोत्तरवर्त्तिन: अकारस्य पररूपम्। तत: स्त्रियाम् 'अजाद्यतष्टाप्' (पा० अ० ४।१।४) इति टाप्-प्रत्यय:। टकार-पकारानुबन्धलोप:। 'अक: सवर्णे दीर्घ:' (पा० अ० ६।१।१०१) इति अकारस्य आकारस्य च आ-दीर्घ:। 'वर्षा वर्षत्यासु पर्जन्य:' (निरु० ४।२७)। '(ऋतु:) यद् वर्षति तद् वर्षाणां (रूपम्)' (शत० ब्रा० २।२।३।८)। 'मरुतो वै वर्षस्येशते' (शत० ब्रा० ९।१।२।५)। 'षड्भि: पार्जन्यैर्वा मारुतैर्वा (पशुभि:) वर्षासु यजते' (शत० ब्रा० १३।५।४।२८)।

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by S3 Foundation USA

'यदा वै वर्षाः पिन्वतेऽथैनाः सर्वे देवाः सर्वाणि भूतान्युपजीवन्ति' (शत० ब्रा० १४।३।२।२२)।'वर्षा वै सर्व ऋतवः' (शत० ब्रा० २।२।३।७)।'वर्षा ह त्वेव सर्वेषामृतूनां रूपम्' (शत० ब्रा० २।२।३।७)।'वर्षा एव यशः' (गोप० ब्र० ५।१५)।'वर्षं सावित्री' (गोप० ब्रा० पू० १।१३)।'सेनानीग्रामण्याविति वार्षिकौ तावृतू' (शत० ब्रा० ८।६।१।१८)।'वर्षा उद्गावा तस्माद् यदा बलवद् वर्षति साम्न इवोपब्दिः क्रियते' (शत० ब्रा० ११।२।७।३२)।'वर्षा उद्गीथः' (षड्विं० ब्रा० ३।१)।'प्रजापतिः वर्षामुद्गीथम् (अकरोत्)' (जैमि० उप० ब्रा० १।१२।७)।'वर्षा उत्तरः (पक्षः संवत्सरः)' (तै० ब्रा० ३।११।१०।३)।'वर्षाः पुच्छं (संवत्सरस्य)' (तै० ब्रा० ३।११।१०।४)।'वर्षा-शरदौ सारस्वताभ्याम् (अवरुन्धे)' (शत० ब्रा० १२।८।२।३४)।'वर्षा ह्यस्य (वैश्यस्य) ऋतुं' (तां० ब्रा० ६।१।१०)।'तस्माद् वैश्यो वर्षास्वादधीत विड्ढि वर्षाः' (शत० ब्रा० २।१।३।५)।'ओषधीर्वर्षाभ्यः (प्रजापतिः प्रायच्छत्)' (तैत्ति० सं० ७।२।१०।२)।'चक्षुर्वर्षाः (ऋतुरास) पर्जन्यो वर्षाः' (जैमि० ब्रा० २।२१)।'ता (वर्षाः) उभयं कुर्वन्त्या च तपन्ति वर्षन्ति च' (जैमि० ब्रा० ३।१)।

वलिः स्त्री०। इत्यत्र **'शष्कुलि-राजि-कुट्यशनि-वर्ति-भृकुटि-त्रुटि-वलि-पङ्क्तयः' (लि० सू० २६) इति स्त्रीलिङ्गता।** वलते संवृणोति इति वलिः। वल संवरणे (भ्वा० आ०) 'सर्वधातुभ्य इन्' (उ० ४।११९) इति इन्-प्रत्ययः। नकारानुबन्ध-लोपः।'वीथ्याविरावलिः पङ्क्तिः श्रेणी' इत्यमरः।

वसनम्, वसनः नपुं०, पुं०। इत्यत्र **'मान-यानाभिधान-नलिन-पुलिनोद्यान-शयनासन-स्थान-चन्दनालान-समान-भवन-वसन-सम्भावन-विभावन-विमानानि नपुंसके च' (लि० सू० ७६) इति नपुंसकलिङ्गता पुँल्लिङ्गता च।** वस्यते अनेन इति वसनम्। वस आच्छादने (अ० प०) 'करणाधिकरणयोश्च' (पा० अ० ३।३।११७) इति ल्युट्-प्रत्ययः। लकार-टकारानुबन्धलोपः।'युवोरनाकौ' (पा० अ० ७।१।१) इति यु-स्थाने अनादेशः।'वस्त्रमाच्छादनं वासश्चेलं वसनमंशुकम्' इत्यमरः।'वसनं छादने वस्त्रे' इति मेदिनी।

वसु नपुं०। इत्यत्र **'श्मश्रु-जातु-वसु-स्वाद्वश्रु-जतु-त्रपु-तालूनि नपुंसके' (लि० सू० ५४) तथा 'वसु चार्थवाचि' (लि० सू० ५५) इति नपुंसकलिङ्गता।** वस्ते आच्छादयति येन तद् वसु धनं, वसति सर्वत्र उष्यते वा येन तद् वसु, अथवा वसन्ति येषु ते वसवः अथवा ये वसन्ति वासयन्ति वा ते अपि वसवः। वस आच्छादने (अ० आ०) 'शॄ-स्वृ-स्निहि-त्रप्यसि-वसि-हनि-क्लिदि-बन्धि-मनिभ्यश्च' (उ० १।१०)

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by S3 Foundation USA

इति उ-प्रत्ययः। 'आदित्य-विश्व-वसवः', 'शिवमल्ली पाशुपत एकाष्ठीलो वुको वसुः', 'द्रव्यं वित्तं स्वापतेयं रिक्थमृक्थं धनं वसु', 'देवभेदेऽनले रश्मौ वसू रत्ने धने वसु' इत्यमरः। 'वसुर्ना देवभेदाग्निभा-योक्त्र-बक-राजसु। क्लीबं वृद्ध्यौपधे श्याले रै-रत्ने मधुरे त्रिषु' इति मेदिनी। 'वसुर्मयूखाग्निजनाधिपेषु योक्त्रे सुरे स्याद् वसु हाटके च। वृद्ध्यौपध-स्थान-धनेषु रत्ने वसु स्मृतं स्यान्मधुरेऽन्यवच्च' इति विश्वप्रकाशः। 'वसुस्त्वग्नौ देवभेदे नृपे रुचौ। योक्त्रे शुष्के वसु स्वादौ रत्ने वृद्ध्यौषधे धने' इति सुधाव्याख्यायां भानुजिदीक्षितः। 'तद् यदिदं सर्वं वासयन्ते तस्माद् वसवः' (शत० ब्रा० १४। ६। ९। ४)। 'अग्निश्च पृथिवी च वायुश्चान्तरिक्षं चादित्यश्च द्यौश्च चन्द्रमाश्च नक्षत्राणि चैते वसवः' (शत० ब्रा० १४। ६। ९। ४)। 'वसवो यद् विवसते सर्वम्' (निरु० १२। ४। ४१)।

वस्तिः पुं०, स्त्री०। **इत्यत्र 'सारथ्यतिथि-कुक्षि-बस्ति-पाण्यञ्जलयः' (लि० सू० ११७) इति पुँल्लिङ्गता तथा 'गो-मणि-यष्टि-मुष्टि-पाटलि-बस्ति-शाल्मलि-त्रुटि-मसि-मरीचयः' (लि० सू० १७२) इति स्त्रीलिङ्गता पुँल्लिङ्गता च।** यः या वा वस्ते आच्छादयति सः सा वा वस्तिः। वस आच्छादने (अ० आ०) 'वसेस्तिः' (उ० ४। १८) इति ति-प्रत्ययः। व-बयोः अभेद-स्मरणात् वस्तिः बस्तिः अपि उच्चार्यते। 'वस्तिर्नाभेरधो द्वयोः', 'वस्तयः स्युर्दशासूत्रे' इति सिद्धान्तकौमुद्याम् उणादौ। 'वस्तिर्द्वयोर्निरूहे नाभ्यधो-भूमिदशासु च' इति मेदिनी।

वस्तु नपुं०। **इत्यत्र 'दारु-कशेरु-जतु-वस्तु-मस्तूनि नपुंसके' (लि० सू० ५८) इति नपुंसकलिङ्गता।** वस्ते आच्छादयति येन तद् वस्तु, वसन्ति वा येन तद् वस्तु। वस आच्छादने (अ० आ०) वस निवासे (भ्वा० प०) 'वसेरगारे णिच्च' (उ० १। ७०) इति केवलं तुन्-प्रत्ययः। अगारार्थे तु तुन्-प्रत्ययः णित् अपि भवति। अत्र तु अगारार्थः न, अतः केवलं तुन्-प्रत्ययः एव, तेन णित्त्वाभावात् 'अत उपधायाः' (पा० अ० ७। २। ११६) इति धातोः उपधायाः अकारस्य आ-वृद्धिः अपि न भवति तुन्-प्रत्यये नकारानबुन्धलोपेन वस्तु निष्पद्यते।

वस्त्रम् नपुं०। **इत्यत्र 'द्वाराग्र-स्फार-तक्र-वक्र-वप्र०' (लि० सू० ९०) इति नपुंसकलिङ्गता।** वस्ते आच्छादयति येन तद् वस्त्रम्, उष्यते आच्छाद्यते वा येन तद् वस्त्रम्। वस आच्छादने (अ० आ०) 'सर्वधातुभ्यः ष्ट्रन्' (उ० ४। १६०) इति ष्ट्रन्-प्रत्ययः। षकार-नकारानुबन्धलोपः। षकारे लुप्ते तत्सन्नियोगेन जातः ट्रन्-वर्त्ती टकारः अपि स्वीयां पूर्वां स्थितिं प्राप्तः तकारः भवति। 'वस्त्रमाच्छादनं वासः' इत्यमरः। 'वस्त्रं वस्ते:' (निरु० ४। २४)।

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by S3 Foundation USA

वह्निः नपुं०। इत्यत्र **'वह्नि-वृष्ण्यग्नयः पुंसि' (लि० सू० ७) इति पुँल्लिङ्गता।** वहति हव्यं यः देवेभ्यः उह्यते वा हव्यं येन सः वह्निः। वह प्रापणे (भ्वा० उ०) 'वहि-श्रि-श्रु-यु-द्रु-ग्ला-हा-त्वरिभ्यो नित्' (उ० ४। ५२) इति नि-प्रत्ययः स च नित् नित्त्वं स्वरार्थम्। 'अग्निर्वैश्वानरो वह्निः' इत्यमरः। 'वह्निर्वैश्वानरेऽपि स्याच्चित्रकाख्यौषधौ पुमान्' इति मेदिनी। 'वह्निः अश्वनाम' (निघं० १। १४)। 'वह्निः वोल्हा' (निरु० ३। ४)। 'यदी मातरो जनयन्त वह्निमन्त्यः' (ऋ० सं० ३। २। ५)। 'वह्निना हि तत्र गच्छति यत्र जिगमिषति' (जैमि० ब्रा० २। ९९)। 'वह्निर्होता' (तैत्ति० सं० २। २। १०। ५)। 'वह्नयः वोढारः' (निरु० ८। ३)। 'वह्निरसि हव्यवाहनः' (मैत्रा० सं० १। २। १२) एवं (काठ० सं० २। १३)। 'वह्निर्वा अनड्वान्' (तैत्ति० ब्रा० १। १। ६। १०)।

वंशः पुं०। इत्यत्र **'वंशांश-पुरोडाशाः' (लि० सू० ११३) इति पुँल्लिङ्गता।** वमति उद्गिरति इति वंशः। टुवम् उद्गिरणे (भ्वा० प०) 'उणादयो बहुलम्' (पा० अ० ३। ३। १) इति उणादीनां बहुल-वचनात् 'जनि-दा-च्यु-सृ-वृ-मदि-पमि-नमि-भृञ्भ्य इत्वन्-त्वन्-त्नण्-क्लिन्-शक्-स्य-ढ-डटाऽटचः' (उ० ४। १०५) इति शक्-प्रत्ययः। ककारानुबन्धलोपः। **अथवा** 'पृषोदरादीनि यथोपदिष्टम्' (पा० अ० ६। ३। १०९) इति श-प्रत्ययः। 'नश्चापदान्तस्य झलि' (पा० अ० ८। ३। २४) इति धातोः मकारस्य अनुस्वारः। **अथवा** वनति वन्यते वा इति वंशः। वन शब्दे (भ्वा० प०) अत्रापि पूर्ववत् शक्-प्रत्ययः अथवा श-प्रत्ययः। नकारस्य 'नश्चापदान्तस्य झलि' (पा० अ० ८। ३। २४) इति अनुस्वारः। **अथवा** वष्टि उश्यते वा इति वंशः। वश कान्तौ (अ० प०) 'नन्दि-ग्रहि-पचादिभ्यो०' (पा० अ० ३। १। १३४) इति अच्-प्रत्ययः। चकारानुबन्ध-लोपः। **अथवा** 'अकर्त्तरि च कारके संज्ञायाम्' (पा० अ० ३। ३। १९) इति घञ्-प्रत्ययः। घकार-ञकारानुबन्धलोपः। संज्ञापूर्वकविधेः अनित्यत्वात् अत्र 'अत उपधायाः' (पा० अ० ७। २। ११६) इति धातोः उपधायाः अकारस्य आ-वृद्धिः न। 'संख्या वंश्येन' (पा० अ० २। १। १९) इति निर्देशात् नुम्-आगमः। उकार-मकारानुबन्धलोपः। वन् श् अ इत्यवस्थायां नकारस्य 'नश्चापदान्तस्य झलि' (पा० अ० ८। ३। २४) इति अनुस्वारः। एवम् अपि वंश-शब्दः निष्पद्यते। 'वंशे त्वक्सारकर्मारत्वचि-सार-तृण-ध्वजाः' इत्यमरः। 'वंशोऽन्ववायः सन्तानः' इति चामरः। 'वंशो वेणौ कुले वर्गे पृष्ठाद्यवयवेऽपि च' इति विश्व-मेदिन्यौ।

वाक् स्त्री०। इत्यत्र **'स्रक्-त्वग्-ज्योग्-वागू-यवागू-नौ-स्फिजः' (लि० सू० ३०) इति स्त्रीलिङ्गता।** या सत्यान वक्ति यया वा शब्दाः उच्यन्ते सा वाक्। वच

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by S3 Foundation USA

परिभाषणे (अ० प०) 'क्विब् वचि-प्रच्छि-श्रि-स्रु-द्रु-प्रु-ज्वां दीर्घोऽसम्प्रसारणं च' (उ० २।५८) इति क्विप्-प्रत्ययः धातोः उपधायाः अकारस्य आ-दीर्घः एवं 'वचि-स्वपि-यजादीनां किति' (पा० अ० ६।१।१५) इति धातोः वकारस्य प्राप्तस्य उकाररूप-सम्प्रसारणस्य अभावश्च। क्विप्-प्रत्ययस्य सर्वापहारिलोपः। एवं वाच् इत्ययं शब्दः निष्पद्यते। अस्य प्रथमैकवचने वाक् भवति। 'ब्राह्मी तु भारती भाषा गीर्वाग् वाणी सरस्वती' इत्यमरः।'वाग्वाचे भारत्यां वचने स्त्रियौ' इति सुधाव्याख्यायां भानुजिदीक्षितः। 'वाक् कस्माद् वचेः' (निरु० २। २३)। 'वाचि आस्ये' (निरु० ८। २१)। 'वाक् वाङ्नाम' (निघं० १।११)। 'वाक् पदनाम' (निघं० ५।५)। 'वाग् वै यज्ञः' (शत० ब्रा० १।१।२।२, ऐत० ब्रा० ५।२४)। 'वागु वै यज्ञः' (शत० ब्रा० १।१।४।११)। 'वाग् वै हविष्कृत्' (शत० ब्रा० १।१।४।११)। 'वाग् वा अनुष्टुप्' (शत० ब्रा० १। ३।२।१६, ऐत० ब्रा० १।२८, गोप० ब्रा० उ० ६।१६)। 'वाक् च वै प्राणश्च मिथुनम्' (शत० ब्रा० १।४।१।२)। 'योषा हि वाक्' (शत० ब्रा० १।४।४।४)। 'वाग् वै मनसो ह्सीयसी' (शत० ब्रा० १।४।४।७)। 'अपरिमिततरमिय हि मनः परिमिततरेव हि वाक्' (शत० ब्रा० १।४।४।७)। 'शीर्ष्णो हीयमधिवाग् वदति' (शत० ब्रा० १। ४।४।११)। 'वाग्घोता' (शत० ब्रा० १।५।१।२)। 'वाग्घि यज्ञः' (शत० ब्रा० १। ५।२।७)। 'वागु हि रेतः' (शत० ब्रा० १।५।२।७)। 'वाग्घि प्रजापतिः' (शत० ब्रा० १।६।३।२७)। 'वाग् वै वषट्कारो वाग् रेतः' (शत० ब्रा० १।७।२।२१)। 'वाग्वा अस्य (प्रजापतेः) स्वो महिमा' (शत० ब्रा० २।२।४।४)। 'प्रजापतिर्वै वाक्पतिः' (शत० ब्रा० ३।१।३।२२)। 'योषा वा इयं वाक् यदेनं न युविता' (शत० ब्रा० ३।२। १।२२)। 'वागेवाग्निः' (शत० ब्रा० ३।२।२।१३)। 'वाग्घ्येषा (पथ्या स्वस्तिः)' (शत० ब्रा० ३।२।३।१५)। 'वाग्वै धेनुः' (तां० ब्रा० १८।९।२१)। 'वाक् सावित्री' (जैमि० उप० ब्रा० ४।२७।१५)। 'वाग्वै विश्वकर्मऽर्षिः' (यजुः १३।५८)। 'वाग्घि ब्रह्म' (ऐत० ब्रा० २।१५)। 'वाग्वै सुब्रह्मण्या' (ऐत० ब्रा० ६।३)। 'वागु वै वायुः' (तैत्ति० ब्रा० १।८।८।१, तां० ब्रा० १८।८।७)। 'वाग्घि वज्रः' (ऐत० ब्रा० ४।१)। 'वाग्वै यज्ञः' (ऐत० ब्रा० ५।२४)। 'एकाक्षरा वै वाक्' (तां० ब्रा० ४।३।३)।

वातः पुं०।इत्यत्र 'हस्त-कुन्तान्त-व्रात-वात-दूत-धूर्त-सूत-चूत-मुहूर्ताः' (लि० सू० १११) इति पुँल्लिङ्गता। वाति गच्छति सूचयति वा इति वातः। वा गति-गन्धनयोः (अ० प०) 'हसि-मृ-ग्रिण्-वाऽमि-दमि-लू-पू-धूर्विभ्यस्तन्' (उ० ३।८६) इति तन्-प्रत्ययः अथवा वातु इत्याशिषि 'क्तिच्-क्तौ च संज्ञायाम्' (पा० अ० ३।३।१७४)

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by S3 Foundation USA

इति क्त-प्रत्ययः। तन्-प्रत्यये नकारानुबन्धलोपः। क्त-प्रत्यये ककारानबुन्धलोपः। 'नभस्वद्-वात-पवन-पवमान-प्रभञ्जनाः' इत्यमरः। 'वातः पदनाम' (निघं० ५।४) 'वातो वातीतः सतः' (निरु० १०।३४)। 'प्राणो वै वातः' (शत० ब्रा० १।१।२।१४)। 'वातो वै यज्ञः' (शत० ब्रा० ३।१।३।२६)। 'न वै वातात् किञ्चनाशी योऽस्ति न मनसः किञ्चनाशी योऽस्ति तस्मादाह वातो वा मनो वेति' (शत० ब्रा० ५।१।४।८)। 'यो वै प्राणः स वातः' (शत० ब्रा० ५।२।४।९)। 'वातो हि वायुः' (शत० ब्रा० ८।७।३।१२)। 'एष (वातः) हीदं सर्वं व्यचः करोति' (शत० ब्रा० ९।४।१।१०)। 'युक्तो वातो ऽन्तरिक्षेण ते सह' (तां० ब्रा १।२।१)। 'वाग् वातस्य पत्नी' (गोप० ब्रा० उ० २।९)।

वायसः पुं०। इत्यत्र **'सोपधः' (लि० सू० ९६)** इति पुँल्लिङ्गता। वयते गच्छति इति वायसः। वय गतौ (भ्वा० आ०) 'वयश्च' (उ० ३।१२०) इति असच्-प्रत्ययः स च णित्। णित्त्वात् 'अत उपधायाः' (पा० अ० ७।२।११६) इति धातोः उपधायाः अकारस्य आ-वृद्धिः। प्रत्यये चकारानुबन्धलोपः। **अथवा** वेति गच्छति खादति वा इति वायसः। वी गति-व्याप्ति-प्रजन-कान्त्यसन-खादनेषु (अ० प०) 'सर्वधातुभ्योऽसुन्' (उ० ४।१९०) इति असुन्-प्रत्ययः। उकार-नकारानुबन्धलोपः। 'सार्वधातुकार्धधातुकयोः' (पा० अ० ७।३।८४) इति धातोः ईकारस्य ए-गुणः। 'एचोऽयवायावः' (पा० अ० ६।१।७८) इति एकारस्य अय्-आदेशः। एवं वयस् अयं शब्दः निष्पद्यते। पुनः वयः एव वायसः भवति। वयस् अस्मात् शब्दात् 'प्रज्ञादिभ्यश्च' (पा० अ० ५।४।३८) इति स्वार्थे अण्-प्रत्ययः। णकारानुबन्धलोपः। 'तद्धितेष्वचामादेः' (पा० अ० ७।२।११७) इति आद्यचः आ-वृद्धिः। 'वायसः काकः' इति सिद्धान्त-कौमुद्याम् उणादौ। 'बलिभुग्वायसा अपि' इत्यमरः। 'वायसोऽगुरुवृक्षेऽपि श्रीवासध्वाङ्क्षयोः पुमान्' इति मेदिनी।

वालः, वालम् पुं०, नपुं०। इत्यत्र **'शील-मूल-मङ्गल-साल-कमल-तल-मुसल-कुण्डल-पलल-मृणाल-वाल-निगल-पलल-विडाल-खिल-शूलाः पुंसि च' (लि० सू० १४३)** इति पुँल्लिङ्गता नपुंसकलिङ्गता च। वलते संवृणोति संचरति इति वालः वालं वा। वल संवरणे संचरणे च (भ्वा० आ०) 'नन्दि-ग्रहि-पचादिभ्यो०' (पा० अ० ३।१।१३४) इति अच्-प्रत्ययः। चकारानुबन्धलोपः। एवं वल शब्दः निष्पद्यते। ततः वलः एव वालः वालं वा इत्यस्मिन् स्वार्थे 'प्रज्ञादिभ्यश्च' (पा० अ० ५।४।३८) इति अण्-प्रत्ययः। णकारानुबन्धलोपः। 'तद्धितेष्वचामादेः' (पा० अ० ७।

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by S3 Foundation USA

२। ११७) इति आद्यचः आ-वृद्धिः। **अथवा** वल्यते संव्रियणे सञ्चर्यते वा इति वालः वालं वा। वल संवरणे संचरणे च (भ्वा० आ०) 'अकर्त्तरि कारके संज्ञायाम्' (पा० अ० १। १। १९) इति घञ्-प्रत्ययः। घकार-ञकारानुबन्धलोपः। 'अत उपधायाः' (पा० अ० ७। २। ११६) इति धातोः उपधायाः अकारस्य आ-वृद्धिः। व-बयोः अभेद-स्मरणात् वालः वासं वा एव बालः बालं वा अपि संजायते। **अथवा** स्वतन्त्ररूपेण बल प्राणने (भ्वा० प०) धातोः अपि उक्तरीत्या बालः बालं वा सिध्यति। 'चिकुरः कुन्तलो बालः कचः केशः शिरोरुहः' इत्यमरः। 'वालं पर्व वृणोतेः' (निरु० ११। ३१)।

वासम्, वासः नपुं०, पुं०। **इत्यत्र 'चमसांस-रस-निर्यासोपवास-कार्पास-वास-मास-कास-कांस-मांसानि- नपुंसके च' (लि० सू० ९८) इति नपुंसकलिङ्गता पुँल्लिङ्गता च।** वसनं वासं वासः वा। वस आच्छादने (अ० आ०), वस निवासे (भ्वा० प०) 'भावे' (पा० अ० ३। ३। १८) इति घञ्-प्रत्ययः। घकार-ञकारानुबन्धलोपः। 'अत उपधायाः' (पा० अ० ७। २। ११६) इति धातोः उपधायाः अकारस्य आ-वृद्धिः। **अथवा** वस्ते आच्छादयति येन तद् वासः। वस आच्छादने (अ० आ०) 'सर्वधातुभ्योऽसुन्' (उ० ४। १९०) इति असुन्-प्रत्ययः। **अथवा** 'वसेर्णित्' (उ० ४। २१९) इति असुन्-प्रत्ययः स च णित्। णित्त्वात् तस्मिन् परे पूर्ववत् धातोः उपधायाः अकारस्य 'अत उपधायाः' (पा० अ० ७। २। ११६) इति आ-वृद्धिः। उकार-नकारानुबन्धलोपः। एवं वासस् अयं सकारान्तः शब्दः निष्पद्यते। अस्य प्रथमा-द्वितीयैक-वचने वासः नपुंसकलिङ्गे भवति। 'वस्त्रमाच्छादनं वासः' इत्यमरः। 'रूपं वा एतत् पुरुषस्य यद् वासः' (शत० ब्रा० १३। ४। १। १५)। 'तस्माद्‌उ सुवासा इव बुभूषेत्' (शत० ब्रा० ३। १। २। १६)। 'तस्य वा एतस्य वाससः। अग्नेः पर्यासो भवति वायोरनु छादो नीविः' (शत० ब्रा० ३। १। २। १८)। 'निष्पेष्ट वै ब्रूयाद् यदेवास्य (वाससः) अत्रामेध्या (स्त्री) कणति वा वयति वा तदस्य (वाससः) मेध्यमस्मादिति' (शत० ब्रा० ३। १। २। १९)। ओषधयो वै वासः' (शत० ब्रा० १। ३। १। १४)। 'त्वग्धि वासः' (शत० ब्रा० ४। ३। ४। २६)। 'सौम्यं हि देवताया वासः' (तैत्ति० ब्रा० १। ६। १। ११)। 'सर्वदैवत्यं वै वासः' (तैत्ति० ब्रा० १। १। ६। ११)। 'सर्वदैवत्यं वासः' (ऐत० ब्रा० ७। ३)।

विचित्रम् नपुं०। **इत्यत्र 'द्वाराग्र-स्फार-तक्र०' (लि० सू० ९०) इति नपुंसकलिङ्गता।** विचित्र्यते विचित्रणं वा इति विचित्रम्। वि + चित्र चित्रीकरणे (चु०

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by S3 Foundation USA

उ०) 'अकर्त्तरि च कारके संज्ञायाम्' (पा० अ० ३। ३। १९) इति घञ्-प्रत्ययः। घकार-ञकारानुबन्धलोपः।

विटपम्, विटपः नपुं०, पुं०। इत्यत्र **'शूर्प-कुतुप-कुणप-द्वीप-विटपानि नपुंसके च' (लि० सू० ७९) इति नपुंसकलिङ्गता पुँल्लिङ्गता च।** वेटति शब्दयति वायुना इति विटपं विटपः वा। विट शब्दे (भ्वा० प०) 'विटप-विष्टप-विशिपोपलाः' (उ० ३। १४५) इति कपन्-प्रत्ययः। ककार-नकारानुबन्धलोपः। कित्त्वात् 'पुगन्त-लघूपधस्य च' (पा० अ० ७। ३। ८६) इति धातोः उपधायाः इकारस्य ए-गुणः न भवति। **अथवा** वेटति शब्दयति इति विटः। विट शब्दे (भ्वा० प०) 'इगुपध-ज्ञा-प्री-किरः कः' (पा० अ० ३। १। १३५) इति क-प्रत्ययः। ककारानुबन्धलोपः। अत्र अपि धातोः उपधायाः इकारस्य पूर्ववत् एव ए-गुणः न। विटान् पाति इति विटपं विटपः वा। विट + पा रक्षणे (अ० प०) 'आतोऽनुपसर्गे कः' (पा० अ० ३। २। ३) इति क-प्रत्ययः। ककारानुबन्धलोपः। 'आतो लोप इटि च' (पा० अ० ६। ४। ६४) इति धातोः आकारस्य लोपः। 'विटोऽद्रौ धवले षिङ्गे मूषिके खदिरेऽपि च' इति मेदिनी। इह मेदिन्यां धवले इत्यस्य स्थाने लवणे, षिङ्गे इत्यस्य स्थाने षिद्धे इति अपि काश्यां सं० १९२९ प्रकाशिते द्वादश-कोष-संग्रहे पाठः प्राप्तः भवति। **अथवा** विटानां पानम् इति विटपं विटपः वा। विट + पा रक्षणे (अ० प०), पा पाने (भ्वा० प०) 'घञर्थे क-विधानम्' (वा० पा० अ० ३। ३। ५८) इति क-प्रत्ययः। ककारानुबन्धलोपः। धातोः आकारस्य पूर्ववत् 'आतो लोप इटि च' (पा० अ० ६। ४। ६४) इति लोपः। 'विस्तारो विटपोऽस्त्रियाम्' इत्यमरः। 'स्तम्बेऽपि विटपोऽस्त्रियाम्' इति चामरः। 'विटपो न स्त्रियां स्तम्ब-शाखा-विस्तार-पल्लवे। विटाधिपे ना पुंसि भ्रान्तौ च कल्पने' इति मेदिनी। 'शांखायां पल्लवे स्तम्बे विस्तारे विटपोऽस्त्रियाम्' इति रभसः। 'स्कन्धादूर्ध्वं तरोः शाखाः कटपो विटपो मतः' इति कात्यः। 'विटपः पल्लवे षिङ्गे विस्तारे-स्तम्ब-शाखयोः' इति विश्वः।

विट् स्त्री०। इत्यत्र **'प्रावृड्-विप्रुड्-रुट्-तृड्-विट्-त्विषः' (लि० सू० २३) इति स्त्रीलिङ्गता।** वेटति शब्दयति इति विट्। विट् शब्दे (भ्वा० प०) 'क्विप् च' (पा० अ० ३। २। ७६) इति क्विप्-प्रत्ययः। तस्य सर्वापहारिलोपः। **अथवा** वेषति सिञ्चति, वेवेष्टि व्याप्नोति विष्णाति विप्रयुङ्क्ते इति विट्। विपु सेचने (भ्वा० प०), विष्लृ व्याप्तौ (जु० प०), विष विप्रयोगे (क्र्या० प०) सर्वत्र पूर्ववत् क्विप्-प्रत्ययः, तस्य सर्वापहारि-लोपश्च। एवं विष् इत्ययं शब्दः निष्पद्यते। अस्य प्रथमैकवचने विट् इति भवति।

वित्तम् नपुं०। इत्यत्र **'नवनीतानावतानानृतामृत-निमित्त-वित्त-चित्त-पित्त-व्रत-रजत-वृत्त-पलितानि' (लि० सू० १६५) इति नपुंसकलिङ्गता।** विद्यते स्म इति

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by S3 Foundation USA

वित्तम्। विद विचारणे (अ० आ०), विद्लृ लाभे (तु० उ०), 'निष्ठा' (पा० अ० ३। २।१०२) इति क्त-प्रत्ययः। ककारानुबन्धलोपः। कित्त्वात् 'क्ङिति च' (पा० अ० १। १।५) इति निषेधात् 'पुगन्तलघूपधस्य च' (पा० अ० ७।३।८६) इति धातोः उपधायाः इकारस्य प्राप्तः ए-गुणः न। 'खरि च' (पा० अ० ८।४।५५) इति धातोः दकारस्य तकारः। 'द्रव्यं वित्तं स्वापतेयम्', 'प्रतीते प्रथित-ख्यात-वित्त-विज्ञात-विश्रुताः', 'विन्न वित्तौ' इत्यमरः। 'वित्तं क्लीबं धने वाच्यलिङ्गं ख्याते विचारिते' इति मेदिनी। 'एतावान् खलु वै पुरुषो यावदस्य वित्तम्' (तैत्ति० ब्रा० १।४।७।७) 'वित्तं धननाम' (निघं० २।१०)।

विदिः स्त्री०। इत्यत्र **'दर्वि-विदि-वेदि-खनि-शान्यश्रि-वेशि-कृष्योषधि-कट्यङ्गुलयः' (लि० सू० २४) इति स्त्रीलिङ्गता।** वेत्ति जानाति विद्यते अस्ति, विन्ते विचारयति, विन्दति प्राप्नोति वेदयते चेतयते आख्याति निवसति वा इति विदिः। विद ज्ञाने (अ० प०), विद सत्तायां (दि० आ०), विद विचारणे (रु० आ०), विद्लृ लाभे (तु० उ०), विद चेतनाख्याननिवासेषु (चु० उ०) 'पृषोदरादीनि यथोपदिष्टम्' (पा० अ० ६।३।१०९) इति कि-प्रत्ययः। ककारानुबन्धलोपः। कित्त्वात् तस्मिन् परे 'क्ङिति च' (पा० अ० १।१।५) इति निषेधात् 'पुगन्तलघूपधस्य च' (पा० अ० ७। ३।८६) इति धातोः उपधायाः इकारस्य प्राप्तः ए-गुणः न।

विद्या स्त्री०। इत्यत्र **'ऊङाबन्तश्च' (लि० सू० ११) इति स्त्रीलिङ्गता।** विदन्ति जानन्ति अनया इति विद्या। विद ज्ञाने (अ० प०) 'संज्ञायां समज-निषद-निपत-मन-विद-षुञ्-शीङ्-भृञिणः' (पा० अ० ३।३।९९) इति क्यप्-प्रत्ययः। ककार-पकारानुबन्धलोपः। प्रत्ययस्य कित्त्वात् तस्मिन् परे 'क्ङिति च' (पा० अ० १।१।५) इति निषेधात् 'पुगन्तलघूपधस्य च' (पा० अ० ७।३।८६) इति धातोः उपधायाः इकारस्य प्राप्तः ए-गुणः न। 'अजाद्यतष्टाप्' (पा० अ० ४।१।४) इति टाप्-प्रत्ययः। टकार-पकारानुबन्ध-लोपः। 'अकः सवर्णे दीर्घः' (पा० अ० ६।१।१०१) इति अकारस्य आकारस्य च आ-दीर्घः। 'विद्यया देवलोकः (जय्यः) देवलोको वै लोकानां श्रेष्ठस्तस्माद् विद्यां प्रशंसन्ति' (शत० ब्रा० १४।४।३।२४)। 'विद्या ह वै ब्राह्मणमाजगाम तवाहमस्मि त्वं मां पालयानर्हते मानिने नैव मा दा गोपाय मां श्रेयसी तवाहमस्मि' (छान्दोग्य ब्राह्मणम्)। 'विद्या वै धिषणा' (तै० ब्रा० ३।२।२।२) एवं (तैत्ति० सं० ५। १।७।२ तथा मैत्रा० सं० ४।२।१, काठ० सं० १९।७, ३१।१)। 'विद्यया सार्धं म्रियेत न विद्यामूषरे वपेत्' (छान्दोग्य-ब्राह्मणम्)। 'धर्मार्थौ यत्र न स्यातां शुश्रूषा वाऽपि तद्विधा।

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by S3 Foundation USA

तत्र विद्या न वक्तव्या शुभं वीजमिवोषरे।।' (मनुस्मृतिः २।११२)।'विद्ययैव समं कामं मर्त्तव्यं ब्रह्मवादिना। आपद्यपि हि घोरायां न त्वेनामिरिणे वपेत्।।' (मनुस्मृतिः २।११३)

विद्युत् स्त्री०। इत्यत्र **'भूमि-विद्युत्-सरिल्लता-वनिताभिधानानि' (लि० सू० १८) इति स्त्रीलिङ्गता।** विशेपेण द्योतते शोभते इति विद्युत्। वि + द्युत दीप्तौ (भ्वा० आ०) 'भ्राज-भास-धुर्-विद्युतोर्जि-पृ-जु-ग्रावस्तुवः क्विप्' (पा० अ० ३।२।१७७) इति क्विप्-प्रत्ययः। तस्य सर्वापहारिलोपः। 'तडित्-सौदामनी विद्युच्चञ्चला चपला अपि' इत्यमरः।'विद्युत्तडिति सन्ध्यायां स्त्रियां त्रिपु तु निष्प्रभे' इति मेदिनी।'विद्युद् वाऽशनिः' (शत० ब्रा० ६।१।३।१४)।'वृष्टिर्वै विराट् तस्या एते घोरे तन्वौ विद्युच्च ह्रादुनिश्च' (शत० ब्रा० १२।८।३।११)।'विद्युद् ब्रह्मेत्याहुः। विदानाद् विद्युत्' (शत० ब्रा० १४।८।७।१)।'विद्युद्वाऽअपां ज्योतिः' (शत० ब्रा० ७।५।२।४९)।'(वसोर्धारायै) विद्युत्स्तनः' (शत० ब्रा० ९।३।३।१५)।'विद्युदेव सविता' (गो० पू० १।३३)। 'वृष्टिर्वै याज्या विद्युदेव, विद्युद्धीदं वृष्टिमन्नाद्यं सम्प्रयच्छति' (ऐत० ब्रा० २।४१)। '(प्रजापतिः) तान् (देवान्) व्यद्यत्। यद् व्यद्यत् तस्माद् विद्युत्' (तैत्ति० ब्रा० ३।१०।९।१)।'विद्युत् सावित्री' (जैमि० उ० ४।२७।९)।'यो विद्युति (पुरुषः) स सर्वरूपः। सर्वाणि ह्येतस्मिन् रूपाणि' (जैमि० उ० १।२७।६)।'तपो विद्युत्' (जैमि० ब्रा० ३।३७३)।'तेजो यो विद्युतोऽशनिः पतति तत्तत्' (जैमि० ब्रा० ३।३७३)। 'विद्युति सत्यम्' (शां० आ० ६।२)।'विद्युत् सूर्ये समाहिता' (तैत्ति० आर० १।८।२)।'विद्युदप्सु' (जैमि० ब्रा० २।३३२, ४३४)।'सुवर्ण एव रुक्मो विद्युतो रूपम्' (शत० ब्रा० १२।८।३।११)।'वीव वा इदमद्युतदिति। सैषा विद्युदभवत्' (जैमि० ब्रा० ३।३८०)।

विपद् स्त्री०। इत्यत्र **'प्रतिपदापद्विपत्सम्पच्छरत्संसत्परिषदुषः संवित्क्षुत्पुन्मुत्समिधः' (लि० सू० २७) इति स्त्रीलिङ्गता।** विपदनं विपद् विपद्यते वा अनया इति विपद्। वि + पद् गतौ (दि० आ०) 'सम्पदादिभ्यः क्विप्' (वा० पा० अ० ३।३।९४) इति क्विप्। तस्य सर्वापहारिलोपः। 'विपत्तौ विपदापदौ' इत्यमरः।

विपिनम् नपुं०। इत्यत्र **'जघनाजिन-तुहिन-कानन-वन-वृजिन-विपिन-वेतन-शासन-सोपान-मिथुन-श्मशान-रत्न-निम्न-चिह्नानि नपुंसके' (लि० सू० ७५) इति स्त्रीलिङ्गता।** यद् वेपते कम्पते, वेपयति कम्पयति, यत्र कम्पन्ते कम्प्यते वा तद् विपिनम्। टुवेपृ कम्पने (भ्वा० आ०) 'वेपि-तुहोर्ह्रस्वश्च' (उ० २।५३) इति इनन्-

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by S3 Foundation USA

प्रत्ययः, धातोः एकारस्य इकारः ह्रस्वः च। 'अटव्यरण्यं विपिनं गहनं काननं वनम्' इत्यमरः।

विप्रुट् स्त्री०। इत्यत्र **'प्रावृड्-विप्रुड्-रुट्-तृड्-विट्-त्विषः' (लि० सू० २३) इति स्त्रीलिङ्गता।** विशेषेण प्रोषति दहति तापम् इति विप्रुट्। विगता रुद्धा वा प्रुट् दाहः यतः सा विप्रुट्। वि + प्रुषु दाहे (भ्वा० प०) 'सम्पदादिभ्यः क्विप्' (वा० पा० अ० ३। ३। ९४) इति क्विप्-प्रत्ययः। तस्य सर्वापहारिलोपः। एवं विप्रुष् इत्ययं शब्दः निष्पद्यते। अस्य 'प्रथमैकवचने' विप्रुट् भवति। 'पृषन्ति-बिन्दुपृषताः पुमांसो विप्रुषः स्त्रियः' इत्यमरः।

विभावनम्, विभावनः नपुं०, पुं०। **इत्यत्र 'मान-यानाभिधान-नलिन-पुलिनोद्यान-शयनासन-स्थान-चन्दनालान-समान-भवन-वसन-सम्भाव-विभावन-विमानानि नपुंसके च' (लि० सू० ७६) इति नपुंसकलिङ्गता पुँल्लिङ्गता च।** विभाव्यते अनेन अस्मिन् वा इति विभावनं विभावनः वा। वि + भू सत्तायाम् (भ्वा० प०) 'हेतुमति च' (पा० अ० ३। १। २६) इति णिच्-प्रत्ययः। णकार-चकारानुबन्धलोपः। 'अचो ञ्णिति' (पा० अ० ७। २। ११५) इति धातोः ऊकारस्य औ-वृद्धिः। 'करणाधिकरणयोश्च' (पा० अ० ३। ३। ११७) इति ल्युट्-प्रत्ययः। लकार-टकारानुबन्धलोपः। 'णेरनिटि' (पा० अ० ६। ४। ५१) इति अथवा 'बहुलमन्यत्रापि संज्ञाछन्दसोः' (उ० २। २३) इति णिच्-प्रत्ययस्य इकारस्य लोपः। 'युवोरनाकौ' (पा० अ० ७। १। १) इति यु-स्थाने अनादेशः, एवं विभावन-शब्दः निष्पद्यते। अस्य प्रथमैक- वचने नपुंसकलिङ्गे विभावनं पुँल्लिङ्गे च विभावनः भवति।

विमानम्, विमानः नपुं०, पुं०। **इत्यत्र 'मान-यानाभिधान-नलिन-पुलिनोद्यान-शयनासन-स्थान-चन्दनालान-समान-भवन-वसन-सम्भावन-विभावन-विमानानि नपुंसके च' (लि० सू० ७६) इति नपुंसकलिङ्गता पुँल्लिङ्गता च।** विशेषेण मान्ति अनेन अस्मिन् वा इति विमानं विमानः वा। वि + मा माने (अ० प०) 'करणाधिकरणयोश्च' (पा० अ० ३। ३। ११७) इति ल्युट्-प्रत्ययः। लकार-टकारानुबन्ध-लोपः। 'युवोरनाकौ' (पा० अ० ७। १। १) इति यु-स्थाने अनादेशः। 'अकः सवर्णे दीर्घः' (पा० अ० ६। १। १०१) इति आकारस्य अकारस्य च आ-दीर्घः। 'व्योमयानं विमानोऽस्त्री' इत्यमरः। 'विमानो व्योमयाने च सप्तभूमिगृहेऽपि च। घोटके यानमात्रे च पुंनपुंसकयोर्मतः' इति मेदिनी।

वियत् नपुं०। **इत्यत्र 'वियज्जगत्-सकृत्-शकृत्-पृषत्-शकृद्यकृदुदश्वितः' (लि० सू० १६४) इति नपुंसकलिङ्गता।** विशेषेण यच्छति उपरमते इति वियत्। वि + यम

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by S3 Foundation USA

उपरमे (भ्वा० प०) 'क्विप् च' (पा० अ० ३। २। ७६) इति क्विप्-प्रत्ययः। 'यमादीनामिति वक्तव्यम्' (पा० अ० ६।४।४०) इति धातोः मकारस्य लोपः। क्विप्-प्रत्ययस्य सर्वापहारिलोपः। 'ह्रस्वस्य पिति कृति तुक्' (पा० अ० ६। १। ७१) इति तुगागमः। उकार-ककारानुबन्धलोपः। **अथवा** विशेषेण विविधप्रकारेण वा यतते यः यत् वा स तत् वियत्। वि + यती प्रयत्ने (भ्वा० अ०) पूर्ववत् क्विप्-प्रत्ययः, तस्य सर्वापहारिलोपश्च। 'वियद्-विष्णुपदं वा तु पुंस्याकाशविहायसी' इत्यमरः। 'वियत् अन्तरिक्षनाम' (निघं० १। ३)।

विवरम् नपुं०। इत्यत्र **'मुख-नयन-लोह-वन-मांस-रुधिर-कार्मुक-विवर-जल-हल-धनान्नाभिधानानि' (लि० सू० १३७) इति नपुंसकलिङ्गता च।** विव्रियते इति विवरम्। वृञ् वरणे (स्वा० उ०) 'ग्रह-वृ-दृ-निश्चि-गमश्च' (पा० अ० ३। ३। ५८) इति अप्-प्रत्ययः। पकारानुबन्धलोपः। 'सार्वधातुकार्धधातुकयोः' (पा० अ० ७। ३। ८४) इति धातोः ऋकारस्य 'उरण् रपरः' (पा० अ० १। १। ५१) इति सहकारेण अर्-गुणः। **अथवा** विवृणोति इति विवरम्। वृञ् वरणे (स्वा० उ०) 'नन्दि-ग्रहि-पचादिभ्यो०' (पा० अ० ३। १। १३४) इति अच्-प्रत्ययः। चकारानुबन्धलोपः। धातोः ऋकारस्य पूर्ववत् अर्-गुणः। **अथवा** वीनां पक्षिणां विपु पक्षिपु वा वरम् इति विवरम्। विशब्दस्य वरशब्देन षष्ठीतत्पुरुष-समासः। **अथवा** विगतं वरम् अस्मात् इति विवरम्, बहुव्रीहिसमासः। **अथवा** वि विशिष्टः वरः यस्य तत् विवरम्, बहुव्रीहिसमासः। 'सुषिरं विवरं बिलम्' इत्यमरः। 'विवरं दूषणे गते' इति मेदिनी।

विंशतिः स्त्री०। इत्यत्र **'विंशत्यादिरानवतेः' (लि० सू० १३) इति स्त्रीलिङ्गता।** द्वौ दश तौ परिमाणम् अस्य सङ्घस्य इति विंशतिः। 'पङ्क्ति-विंशति-त्रिंशच्चत्वारिंशत्-पञ्चाशत्-षष्टि-सप्तत्यशीति-नवति-शतम्' (पा० अ० ५।१।५९) इति शतिच्-प्रत्ययः, द्वयोः दशतो विन् भावः। प्रत्यये चकारानुबन्धलोपः। विन् इत्यस्य नकारस्य 'नश्चापदान्तस्य झलि' (पा० अ० ८। ३। २४) इति अनुस्वारः। एवं विंशति-शब्दः निष्पद्यते। 'प्रजापतेर्विस्रस्तादाप आयंस्तास्वितास्वविशद् यदविशत् तस्माद् विंशतिः' (शत० ब्रा० ७।५।२।४४)।

विषम्, विषः नपुं०, पुं०। इत्यत्र **'यूष-करीष-मिष-विष-वर्षाणि नपुंसके च' (लि० सू० ९५) इति नपुंसकलिङ्गता पुँल्लिङ्गता च।** वेवेष्टि व्याप्नोति कायम् इति विषं विषः वा अथवा विष्णाति विप्रयुङ्क्ते कायम् इति विषं विषः वा। विष्लृ व्याप्तौ (जु० उ०), विष विप्रयोगे (क्र्या० प०) 'इगुपध-ज्ञा-प्री-किरः कः' (पा० अ० ३। १।

CC-0 Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by S3 Foundation USA

१३५) इति क-प्रत्ययः। ककारानुबन्धलोपः। कित्त्वात् 'क्ङिति च' (पा० अ० १।१।५) इति निषेधात् 'पुगन्तलघूपधस्य च' (पा० अ० ७।३।८६) इति धातोः उपधायाः इकारस्य प्राप्तः ए-गुणः न भवति। 'क्ष्वेडस्तु गरलं विषम्' इत्यमरः। 'यवमात्रं वै विषस्य न हिनस्ति' (गोप० ब्रा० २।१।३)। 'विषम् उदकनाम' (निघं० १।१२)। 'विषमित्युदकनाम, विष्णातेर्विपूर्वस्य स्नातेः शुद्ध्यर्थस्य विपूर्वस्य वा सचतेः' (निरु० १२।२६)।

विषाणम्, विषाणः नपुं०, पुं०। **इत्यत्र 'कार्षापण-स्वर्ण-सुवर्ण-व्रण-चरण-वृषण-विषाण-चूर्ण-तृणानि नपुंसके च' (लि० सू० ६९) इति नपुंसकलिङ्गता पुँल्लिङ्गता च।** व्यस्ति इति विषाणं विषाणः वा। वि + अस भुवि (अ० प०) 'ताच्छिल्य-वयोवचन-शक्तिषु चानश्' (पा० अ० ३।२।१२९) इति चानश्-प्रत्ययः। चकार-शकारानुबन्धलोपः। वि अस् आन इति स्थितौ 'श्नसोरल्लोपः' (पा० अ० ६।४।१११) इति धातोः अस् इत्यस्य अकारस्य लोपः। 'उपसर्गप्रादुर्भ्यामस्तिर्यच्परः' (पा० अ० ८।३।८७) इति सस्य षः। 'अट्-कुप्वाङ्-नुम्-व्यवायेऽपि' (पा० अ० ८।४।२) इति नस्य णः। 'विषाणं स्यात् पशुशृङ्गेभदन्तयोः। विषाणी क्षीरकाकोल्यामजशृङ्ग्यां च योषिति। कुष्ठनामौषधौ क्लीबं त्रिषु शृङ्गेभदन्तयोः' इति मेदिनी।

विस्तरः पुं०। **इत्यत्र 'घाजन्तश्च' (लि० सू० ३७) इति पुँल्लिङ्गता।** विस्तरणं शब्दस्य इति विस्तरः। स्तृञ् आच्छादने (क्र्या० उ०) 'ऋदोरप्' (पा० अ० ३।३।५७) इति अप्-प्रत्ययः। पकारानुबन्धलोपः। 'उरण् रपरः' (पा० अ० १।१।५१) इति सहकारेण ऋकारस्य स्थाने 'सार्वधातुकार्धधातुकयोः' (पा० अ० ७।३।८४) इति अर्-गुणः। 'स च शब्दस्य विस्तरः' इत्यमरः।

वीचिः स्त्री०। **इत्यत्र 'तिथि-नाडि-रुचि-वीचि-नालि-धूलि-किकि-केलिच्छवि-रात्र्यादयः' (लि० सू० २५) इति स्त्रीलिङ्गता।** वयते जायते वा इति वीचिः। वेञ् तन्तुसन्ताने (भ्वा० उ०) 'वेञो डिच्च' (उ० ४।७३) इति ईचि-प्रत्ययः, स च डित्। डित्त्वात् 'टेः' (पा० अ० ६।४।१४३) इति धातोः एकारस्य लोपः। अथवा वयनं वीः गतिः इत्यर्थः। वीं गतिं चिनोति इति वीचिः। वी + चिञ् चयने (स्वा० उ०) 'क्विप् च' (पा० अ० ३।२।७६) इति क्विप्-प्रत्ययः। तस्य सर्वापहारिलोपः। 'भङ्गस्तरङ्ग ऊर्मिर्वा स्त्रियां वीचिः' इत्यमरः। 'वीचिः स्वल्पतरङ्गे स्यादवकाशे सुखे द्वयोः' इति अमरकोश सुधाव्याख्यायां भानुजिदीक्षितः।

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by S3 Foundation USA

वीटम् नपुं०। इत्यत्र **'किरीट-मुकुट-ललाट-वट-वीट-शृङ्गाट-कराट-लोष्टानि नपुंसके' (लि० सू० ६५) इति नपुंसकलिङ्गता।** वि विशेषेण एटति गच्छति इति वीटम्। वि + इट गतौ (भ्वा० प०) 'इगुपधज्ञाप्रीकिरः कः' (पा० अ० ३।१।१३५) इति क-प्रत्ययः। ककारानुबन्धलोपः। कित्त्वात् तस्मिन् परे 'क्ङिति च' (पा० अ० १।१।५) इति निषेधात् 'पुगन्त-लघूपधस्य च' (पा० अ० ७।३।८६) इति धातोः उपधायाः इकारस्य प्राप्तः ए-गुणः न भवति।

वृक्षः पुं०। **इत्यत्र 'षोपधः' (लि० सू० ९३) इति पुँल्लिङ्गता।** यः वृश्च्यते छिद्यते स वृक्षः। ओव्रश्चू छेदने (तु० प०) 'स्नु-व्रश्चि-कृत्यृषिभ्यः कित्' (उ० ३।६६) इति स-प्रत्ययः, स च कित्। कित्त्वात् तस्मिन् परे 'ग्रहि-ज्या-वयि-व्यधि-वष्टि-विचति-वृश्चति-पृच्छति-भृज्जतीनां ङिति च' (पा० अ० ६।१।१६) इति धातोः रेफस्य ऋकारः सम्प्रसारणम्। 'सम्प्रसारणाच्च' (पा० अ० ६।१।१०८) इति अकारस्य पूर्वरूपम्। 'स्कोः संयोगाद्योरन्ते च' (पा० अ० ८।२।२९) इति शकाररूप-सलोपः। 'चोः कुः' (पा० अ० ८।२।३०) इति चस्य कः। 'आदेश-प्रत्यययोः' (पा० अ० ८।३।५९) इति सस्य षः। पुनः क्-ष्-संयोगेन वृक्षः निष्पद्यते। **अथवा** वृक्षते वृणोति इति वृक्षः। वृक्ष वरणे (भ्वा० आ०) 'इगुपध-ज्ञा-प्री-किरः कः' (पा० अ० ३।१।१३५) इति क-प्रत्ययः। ककारानुबन्धलोपः। कित्त्वात् 'क्ङिति च' (पा० अ० १।१।५) इति निषेधात् 'उरण् रपरः' (पा० अ० १।१।५१) इति सहकारेण 'पुगन्तलघूपधस्य च' (पा० अ० ७।३।८६) इति धातोः ऋकास्य प्राप्तः अर्-गुणः न भवति। 'वृक्षो महीरुहः शाखी' इत्यमरः। 'वृक्षः व्रश्चनात्। वृत्वा क्षां तिष्ठतीति वा' (निरु० २।६)। 'श्रीर्वै वृक्षस्याग्रम्' (तैत्ति० ब्रा० ३।९।७।४)।

वृजिनम् नपुं०। इत्यत्र **'जघनाजिन-तुहिन-कानन-वन-वृजिन-विपिन-वेतन-शासन-सोपान-मिथुन-श्मशान-रत्न-निम्न-चिह्नानि नपुंसके' (लि० सू० ७५) इति नपुंसकलिङ्गता।** वृक्ते वर्जयति इति वृजिनः वृजिनं वा। वृज्यते त्यज्यते वा यः सः वृजिनः यत् तद् वा वृजिनम्। वृजी वर्जने (अ० आ०) 'वृजेः किच्च' (उ० २।४८) इति इनच्-प्रत्ययः स च कित्। कित्त्वात् तस्मिन् परे धातोः उपधायाः ऋकारस्य 'उरण् रपरः' (पा० अ० १।१।५१) इति सहकारेण 'पुगन्त-लघूपधस्य च' (पा० अ० ७।३।८६) इति प्राप्तः अर्-गुणः 'क्ङिति च' (पा० अ० १।१।५) इति निषेधात् न भवति। प्रत्यये चकारानुबन्धलोपः। 'कलुषं वृजिनैनोघमंहो दुरित-दुष्कृतम्' इत्यमरः। 'अरालं वृजिनं जिह्मम्', 'केशेऽपि वृजिनः' इति चामरः। 'वृजिनं कल्मषे क्लीबं केशे ना कुटिलं त्रिषु' इति मेदिनी। 'वृजिनानि वर्जनीयानि' (निरु० १०।४१)।

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by S3 Foundation USA

वृत्तम् नपुं०। इत्यत्र '**नवनीतावतानानृतामृत-निमित्त-वित्त-चित्त-पित्त-व्रत-रजत-वृत्त-पलितानि' (लि० सू० १६५) इति नपुंसकलिङ्गता।** वर्त्तते स्म वृत्यते स्म वा इति वृत्तम्। वृतु वर्त्तने 'निष्ठा' (पा० अ० ३। २। १०२) इति क्त-प्रत्ययः। ककार-तकारानुबन्धलोपः। कित्त्वात् 'पुगन्तलघूपधस्य च' (पा० अ० ७। ३। ८६) इति धातोः ऋकारस्य 'उरण् रपरः' (पा० अ० १। १। ५१) इति सहकारेण प्राप्तः अर्-गुणः 'क्ङिति च' (पा० अ० १। १। ५) इति निषेधात् न भवति **अथवा** वर्त्तते स्म इत्यर्थे कर्त्तरि 'गत्यर्थाकर्मकश्लिष-शीङ्स्थासवसजनरुहजीर्यतिभ्यश्च' (पा० अ० ३। ४। ७२) इति अपि क्तः प्रत्ययः भवति। शेषकार्यं पूर्ववत्। 'वर्त्तुलं निस्तलं वृत्तम्', 'वृत्ते तु वृत्तवावृत्तौ' तथा 'वृत्तं पद्ये चरित्रे त्रिष्वतीते दृढनिस्तले' इत्यमरः। वृत्तोऽधीतेऽप्यतीतेऽपि वर्त्तुलेऽपि मृते वृते। 'वृत्तोऽन्यलिङ्गं वा क्लीबे छन्दश्चारित्रवृत्तिषु' इति मेदिनी। 'वृत्तं वृत्तौ दृढे मृते। चरित्रे वर्तुले छन्दःस्वतीताधीतयोर्वृते' इति हैमः।

वृन्दारकम् नपुं०। इत्यत्र '**द्वन्द्व-बर्ह-दुःख-बडिश-पिच्छं-बिम्ब-कुटुम्ब-कवच-वर-शर-वृन्दारकाणि' (लि० सू० १६९) इति नपुंसकलिङ्गता।** प्रशस्तं वृन्दं येषां तद् वृन्दारकम्। वृन्दशब्दात् 'शृङ्ग-वृन्दाभ्यामारकन्' (वा० पा० अ० ५। २। १२१) इति आरकन्-प्रत्ययः। नकारानुबन्धलोपः। 'अकः सवर्णे दीर्घः' (पा० अ० ६। १। १०१) इति अकारस्य आकारस्य च आ-दीर्घः। 'वृन्दारका दैवतानि पुंसि वा देवता स्त्रियाम्' इत्यमरः। 'वृन्दारकौ रूपि-मुख्यौ' इति चामरः। 'वृन्दारकः सुरे पुंसि मनोज्ञश्रेष्ठयोस्त्रिषु' इति मेदिनी।

वृषणम्, वृषणः नपुं०, पुं०। इत्यत्र '**कार्षापण-स्वर्ण-सुवर्ण-व्रण-चरण-वृषण-विषाण-चूर्ण-तृणानि नपुंसके च' (लि० सू० ६९) इति नपुंसकलिङ्गता पुँल्लिङ्गता च।** वर्षति इति वृषणं वृषणः वा। वृषु सेचने (भ्वा० प०) 'उणादयो बहुलम्' (पा० अ० ३। ३। १) इति उणादीनां बहुलवचनात् 'कृ-पृ-वृजि-मन्दि-निधाञः क्युः' (उ० २। ८२) इति क्यु-प्रत्ययः। **अथवा** 'रञ्जेः क्युन्' (उ० २। ८०) इति क्युन्-प्रत्ययः। क्युन्-प्रत्यये ककार-नकारानुबन्धलोपः, क्यु-प्रत्यये तु केवलं ककारानुबन्धलोपः। 'युवोरनाकौ' (पा० अ० ७। १। १) इति यु-स्थाने अनादेशः। प्रत्ययस्य कित्त्वात् तस्मिन् परे 'क्ङिति च' (पा० अ० १। १। ५) इति निषेधात् 'उरण् रपरः' (पा० अ० १। १। ५१) इति सहकारेण 'पुगन्त-लघूपधस्य च' (पा० अ० ७। ३। ८६) इति धातोः उपधायाः ऋकारस्य प्राप्तः अर्-गुणः न भवति। **अथवा** वृषं नह्यति बध्नाति इति वृषणं वृषणं वा। वृष + णह बन्धने (दि० उ०) 'णो नः' (पा० अ० ६। १। ६५) इति धातोः

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi, Digitized by S3 Foundation USA

णस्य नः। 'अन्येष्वपि दृश्यते' (पा० अ० ३। २। १०१) इति ड-प्रत्ययः। डकारानुबन्धलोपः। डित्त्वात् तस्मिन् परे 'टेः' (पा० अ० ६। ४। १४३) इति धातोः अह् इत्यस्य टेर्लोपः। 'अट्-कुप्वाङ्नुम्व्यवायेऽपि' (पा० अ० ८। ४। २) इति धातोः नस्य णः। **अथवा** वृषं नयति इति वृषणः। वृष + णीञ् प्रापणे (भ्वा० उ०) अत्रापि धातोः नस्य पूर्ववत् णः, ड-प्रत्ययः। डकारानुबन्धलोपः, धातोः ईकारस्य, टेर्लोपः, नकारस्य णकारश्च। 'मुण्डोऽण्डकोषो वृषणः' इत्यमरः।

वृषलः पुं०। **इत्यत्र 'तूलोपल-ताल-कुसूल-तरल-कम्बल-देवल-वृषलाः पुंसि' (लि० सू० १४२) इति पुँल्लिङ्गता।** वर्षति सिञ्चति इति वृषलः। वृषु सेचने (भ्वा० प०) 'वृषादिभ्यश्चित्' (उ० १। १०६) इति कल-प्रत्ययः। ककारानुबन्धलोपः। कित्त्वाद् धातोः उपधायाः ऋकारस्य 'उरण् रपरः' (पा० अ० १। १। ५१) इति सहकारेण 'पुगन्त-लघूपधस्य च' (पा० अ० ७। ३। ८६) इति प्राप्तः अर्-गुणः 'क्ङिति च' (पा० अ० १। १। ५) इति निषेधात् न भवति। **अथवा** वर्षति इति वृषः। वृषु सेचने (भ्वा० प०) 'इगुपध-ज्ञा-प्री-किरः कः' (पा० अ० ३। १। १३५) इति क-प्रत्ययः। ककारानुबन्धलोपः। कित्त्वात् धातोः उपधायाः ऋकारस्य प्राप्तः अर्-गुणः पूर्ववत् निषेधात् न भवति। पुनः वृषं लाति इति वृषलः। वृष + ला आदाने (अ० प०) 'अतोऽनुपसर्गे कः' (पा० अ० ३। २। ३) इति क-प्रत्ययः। ककारानुबन्धलोपः। 'आतो लोप इटि च' (पा० अ० ६। ४। ६४) इति धातोः आकारस्य लोपः। **अथवा** वृषं लुनाति इति वृषलः। वृष + लूञ् छेदने (क्र्या० उ०) 'अन्येष्वपि दृश्यते' (पा० अ० ३। २। १०१) इति ड-प्रत्ययः। डकारानुबन्धलोपः। डित्त्वात् 'टेः' (पा० अ० ६। ४। १४३) इति धातोः ऊकारस्य टेर्लोपः। 'शूद्रश्चावरवर्णाश्च वृषलाश्च जघन्यजाः' इत्यमरः।

वृषः पुं०। **इत्यत्र 'षोपधः' (लि० सू० ९३) इति पुँल्लिङ्गता।** वृष शब्दः पूर्वं वृषलशब्द-व्याख्याने व्याख्यातः। 'स्याद् धर्ममस्त्रियां पुण्यश्रेयसी सुकृतं वृषः', 'वृषोऽटरूपः सिंहास्यो वासको वाजिदन्तकः', 'शृङ्गी तु ऋषभो वृषः', 'उक्षा भद्रो बलीवर्द ऋषभो वृषभो वृषः', 'शुक्रले मूपिके श्रेष्ठे सुकृते वृषभे वृषः' इति चामरः। 'वृषो धर्मे बलीवर्दे शृङ्ग्यां पुंराशिभेदयोः। श्रेष्ठे स्यादुत्तरस्थश्च वासमूषिकशुक्रले। वृषा मूषिकपर्ण्यां च' इति मेदिनी। 'वृषः स्याद् वासके धर्मे सौरभेये च शुक्रले' इति विश्वः। 'वृषो गव्याखु-धर्मयोः। पुंराशिभेदयोः शृङ्ग्यां वासके शुक्रलेऽपि च। श्रेष्ठे स्यादुत्तरस्थश्च' इति हैमः। 'तयोर् (ब्राह्मणयोः) याः प्रोक्षणीयाराप आसँस्ताभिरनुविसृज्य शीर्षे अच्छिनत्। तौ वृषश्च यवाषश्चाभवताम्। तस्मात्तौ वर्षेषु शुष्यतः। अद्भिर्हि हतौ' (काठ० सं० ३०। १, कपि० सं० ४६। ४)।

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by S3 Foundation USA

वृष्णिः पुं०। इत्यत्र 'वह्नि-वृष्ण्यग्नयः पुंसि' (लि० सू० ७) इति पुँल्लिङ्गता। वर्षति इति वृष्णिः। वृषु सेचने (भ्वा० प०) 'सृ-वृषिभ्यां कित्' (उ० ४।५०) इति नि-प्रत्ययः, स च कित्। कित्त्वात् 'उरण् रपरः' (पा० अ० १।१।५१) इति सहकारेण 'पुगन्तलघूपधस्य च' (पा० अ० ७।३।८६) इति धातोः उपधायाः ऋकारस्य प्राप्तः अर्-गुणः 'क्ङिति च' (पा० अ० १।१।५) इति निषेधात् न भवति। 'रषाभ्यां नो णः समानपदे' (पा० अ० ८।४।१) इति नस्य णः। 'मेढ्रोरभ्रोरणोर्णायुमेषवृष्णय एडके' इत्यमरः।

वेणिः स्त्री०। इत्यत्र 'चुल्लि-वेणि-खार्यश्च' (लि० सू० ३२) इति स्त्रीलिङ्गता। यः वीयते क्षिप्यते सा वेणिः। वी गति-व्याप्ति-प्रजन-कान्त्यसनखादनेषु (अ० प०) 'वी-ज्या-ज्वरिभ्यो निः' (उ० ४।४९) इति नि-प्रत्ययः, बाहुलकत्वात् नस्य च णः। 'सार्वधातुकार्धधातुकयोः' (पा० अ० ७।३।८४) इति धातोः ईकारस्य ए-गुणः। **अथवा** वेणति इति वेणिः। वेणृ गतिज्ञानचिन्तानिशामनवादित्रग्रहणेषु (भ्वा० उ०) 'सर्वधातुभ्य इन्' (उ० ४।११९) इति इन्-प्रत्ययः। नकारानुबन्धलोपः। 'वेणि-प्रवेणी' इत्यमरः। 'करणिश्रोणिवेणयः' इति स्त्रीकाण्डेनिगमः।

वेतनम् नपुं०। इत्यत्र 'जघनाजिन-तुहिन-कानन-वन-वृजिन-विपिन-वेतन-शासन-सोपान-मिथुन-श्मशान-रत्न-निम्न-चिह्नानि नपुंसके' (लि० सू० ७५) इति नपुंसकलिङ्गता। वेति गच्छति प्राप्नोति कामयते इच्छति खादति उपभुङ्क्ते वा यद् जनः तद् वेतनम्। वी गति-व्याप्ति-प्रजन-कान्त्यसन-खादनेषु (अ० प०) 'वी-पतिभ्यां तनन्' (उ० ३।१५०) इति तनन्-प्रत्ययः। नकारानुबन्धलोपः। 'सार्वधातुकार्धधातुकयोः' (पा० अ० ७।३।८४) इति धातोः ईकारस्य ए-गुणः। 'कर्मण्या तु विधाभृत्याभृतयो भर्म वेतनम्' इत्यमरः।

वेदिः स्त्री०। इत्यत्र 'दर्वि-विदि-वेदि-खनि-शान्यश्रि-वेशि-कृष्योषधि-कट्यङ्गुलयः' (लि० सू० २४) इति स्त्रीलिङ्गता। या विद्यते यस्यां वा पुण्यं विद्यते सा वेदिः। **अथवा** वेद्यते शोधनद्वारा ज्ञायते विचार्यते प्राप्यते वा या सा वेदिः। **अथवा** यः वेत्ति जानाति स वेदिः। विद सत्तायां (दि० आ०), विद्लृ लाभे (तु० उ०), विद ज्ञाने (अ० प०) 'हृ-पिषि-रुहि-वृति-विदि-छिदि-कीर्तिभ्यश्च' (उ० ४।१२०) इति इन्-प्रत्ययः। नकारानुबन्धलोपः। 'सर्वधातुभ्य इन्' (उ० ४।११९) इत्यनेन एव इन्-प्रत्यये सिद्धे अपि पुनः 'हृ-पिषि०' (उ० ४।१२०) अनेन इन्-विधानम् 'इगुपधात् कित्' (उ० ४।१२१) तथा 'इगुपधज्ञाप्रीकिरः कः' (पा० अ० ३।१।१३५) इति

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by S3 Foundation USA

सूत्रद्वयबाधनार्थम्। 'वेदिः परिष्कृता भूमिः' इत्यमरः। 'वेदिः स्यात् पण्डिते पुमान्। स्त्रियामङ्गुलिमुद्रायां स्यात् परिष्कृत-भूतले' इति मेदिनी। 'वेदिर्वै देवलोकः' (शत० ब्रा० ८।६।३।६)। 'योषा वै वेदिः' (शत० ब्रा० १।३।३।८)। 'वेदिरेव विश्वाची (अप्सराः)' (शत० ब्रा० १।२।५।१५)। 'योषा वै वेदिर्वृषा वेदः' (शत० ब्रा० १। ९।२।२१)। 'सा वै (वेदिः) पश्चाद् वरीयसी स्यात् मध्ये संह्वारिता पुनः पुरस्तादुर्वी' (शत० ब्रा० १।२।५।१६) 'व्याममात्री (वेदिः) पश्चात् स्यादित्याहुः। एतावान् षै पुरुषः। पुरुष-सम्मिता हि त्र्यरत्नि प्राची' (शत० ब्रा० १।२।५।१४)। 'तस्मात् त्र्यङ्गुला वेदिः स्यात्' (शत० ब्रा० १।२।५।९)। 'सा वै (वेदिः) प्राक् प्रवणा स्यात्' (शत० ब्रा० १।२।५।१७)। 'अथो (वेदिः) उदक् प्रवणा' (शत० ब्रा० १।२।५।१७)। '(वेदिः) चतुरङ्गुलं खेया' (तैत्ति० ब्रा० ३।२।९।११)। 'पृथिवी वेदिः' (ऐत० ब्रा० ५।२८) एवं (तैत्ति० ब्रा० ३।३।६।२)। 'एतावती वै पृथिवी यावती' (तैत्ति० ब्रा० ३।२।९।१२)। 'यावती वै वेदिस्तावती पृथिवी' (शत० ब्रा० ३।७।२।१)। 'तस्मादाहुर्यावती वेदिस्तावती पृथिवीति' (शत० ब्रा० १।२।५।७)। 'वेदिर्वै परोऽन्तः पृथिव्याः' (तैत्ति० ब्रा० ३।९।५।५)। 'यावती वै वेदिस्तावतीयं पृथिवी' (जैमि० उ० १।५।५)। 'तस्याः (पृथिव्याः) एतत्परिभितं रूपं यदन्तर्वेद्यथैव भूमाऽपरिमितो यो बहिर्वेदिः' (ऐत० ब्रा० ८।५)। 'उर्वरा वेदिर्भवत्येतत् (स्थानं) वा अस्याः (पृथिव्याः) वीर्यवत्तमम्' (तां० ब्रा० १६।१३।६)। 'तं (यज्ञं) वेद्यामन्वविन्दन् यद् वेद्यामन्वविन्दंस्तद् वेदेर्वेदित्वम्' (ऐत० ब्रा० ३।९)। 'यन्वेवात्र विष्णुमन्वविन्दं-स्तस्माद् वेदिर्नाम' (शत० ब्रा० १।२।५।१०)। 'तद् यदेनेन यज्ञेन (विष्णुना) इमां सर्वां (पृथिवीं) समविन्दन्त तस्माद् वेदिर्नाम' (शत० ब्रा० १।२।५।७)। 'वेदिर्देवेभ्यो-ऽनिलायत ता वेदेनान्वविन्दन्' (तैत्ति० ब्रा० ३।३।९।१०)।

वेशिः स्त्री०। इत्यत्र **'दर्वि-विदि-वेदि-खनि-शान्यश्रि-वेशि-कृष्योषधि-कट्यङ्गुलयः' (लि० सू० २४) इति स्त्रीलिङ्गता।** या विशति सा वेशिः। विश प्रवेशने (उ० प०) 'सर्व-धातुभ्य इन्' (उ० ४।११९) इति इन्-प्रत्ययः। नकारानुबन्धलोपः। धातोः उपधायाः इकारस्य 'पुगन्त-लघूपधस्य च' (पा० अ० ७।३।८६) ए-गुणः।

वैरम् नपुं०। इत्यत्र **'द्वाराग्र-स्फार-तक्र-वक्र०' (लि० सू० ९०) इति नपुंसकलिङ्गता।** वीरस्य भावः कर्म वा इति वैरम्। वीर-शब्दात् 'हायनान्त-युवादिभ्योऽण्' (पा० अ० ५।१।१३०) इति अण्-प्रत्ययः। णकारानुबन्धलोपः। 'यस्येति

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by S3 Foundation USA

च' (पा० अ० ६।४।१४८) इति रेफोत्तरवर्त्तिनः अकारस्य लोपः। 'तद्धितेष्वचामादेः' (पा० अ० ७। २। ११७) इति व-परवर्तिनः ईकारस्य ऐ-वृद्धिः। एवं वैर-शब्दः निष्पद्यते। 'वैरं विरोधो विद्वेषः' इत्यमरः।

व्रजः, व्रजम् पुं०, नपुं०। इत्यत्र **'व्रज-कुञ्ज-कुच-कूर्च-प्रस्थ-दर्पार्भार्धच-दर्भ-पुच्छाः' (लि० सू० १७९) इति पुँल्लिङ्गता नपुंसकलिङ्गता च।** व्रजति इति व्रजः व्रजं वा। व्रज गतौ (भ्वा० प०) 'नन्दिग्रहि-पचादिभ्यो०' (पा० अ० ३।१।१३४) इति अच्-प्रत्ययः। चकारानुबन्धलोपः। **अथवा** व्रज्यते अनेन अस्मिन् वा इति व्रजम्। व्रज धातोः करणाधिकरणयोः 'गोचर-सञ्चर-वह-व्रज-व्यजापण-निगमाश्च' (पा० अ० ३। ३।११९) इति घ-प्रत्ययः। घकारानुबन्धलोपः। 'समूह-निवह-व्यूह-सन्दोह-विसर-व्रजाः' इत्यमरः। 'गोष्ठाध्वनिवहा व्रजाः' इति चामरः। 'व्रजः मेघनाम' (निघं० १। १०)। 'व्रजः व्रजत्यन्तरिक्षे' (निरु० ६।२)।

व्रणम्, व्रणः नपुं०, पुं०। इत्यत्र **'कार्षापण-स्वर्ण-सुवर्ण-व्रण-चरण-वृषण-विषाण-चूर्ण-तृणानि नपुंसके च' (लि० सू० ६९) इति नपुंसकलिङ्गता पुँल्लिङ्गता च।** व्रणति शब्दयति व्रणयति गात्रं विचूर्णयति वा इति व्रणं व्रणः वा। व्रण शब्दे (भ्वा० प०), व्रण गात्रविचूर्णने (चु० उ०) 'नन्दि-ग्रहि-पचादिभ्यो०' (पा० अ० ३। १। १३४) इति अच्-प्रत्ययः। चकारानुबन्धलोपः। 'व्रणोऽस्त्रियामीर्ममरुः क्लीबे' इत्यमरः।

व्रतम् नपुं०। इत्यत्र **'नवनीतावतानानृतामृत-निमित्त-वित्त-चित्त-पित्त-व्रत-रजत-वृत्त-पलितानि' (लि० सू० १६५) इति नपुंसकलिङ्गता।** व्रियते यत् तद् व्रतम्। वृञ् वरणे (स्वा० उ०), वृञ् वरणे (क्र्या० उ०), वृ वरणे भरणे इत्येके (क्र्या० प०) 'उणादयो बहुलम्' (पा० अ० ३।३।१) इति उणादीनां बहुलवचनात् 'पृषि-रञ्जिभ्यां कित्' (उ० ३।१११) इति अतच्-प्रत्ययः सः च कित्। चकारानुबन्धलोपः। प्रत्ययस्य कित्त्वात् तस्मिन् परे 'सार्वधातुकार्धधातुकयोः' (पा० अ० ७।३।८४) इति धातोः ऋकारस्य 'उरण् रपरः' (पा० अ० १।१।५१) इति सहकारेण प्राप्तः अर्-गुणः 'क्ङिति च' (पा० अ० १।१।५) इति निषेधात् न भवति। 'इकोयणचि' (पा० अ० ६।१।७७) इति धातोः ऋकारस्य र्-यणादेशः। **अथवा** व्रजन्ति प्राप्नुवन्ति स्वलक्ष्यम् अनेन इति व्रतम्। व्रज गतौ (भ्वा० प०) 'गोचर-सञ्चर-वह-व्रज-व्यजापण-निगमाश्च' (पा० अ० ३।१।११९) इति घ-प्रत्ययः। घकारानुबन्धलोपः। 'पृषोदरादीनि यथोपदिष्टम्' (पा० अ० ६। ३। १०९) इति धातोः जकारस्य तकारः। 'नियमो व्रजमस्त्रियाम्' इत्यमरः। 'व्रतमिति कर्मनाम' (निघं० २।१)। 'व्रतं कर्मनाम वृणोतीति सतः' (नि०

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by S3 Foundation USA

२।१३)। 'इदमपीतरद् व्रतमेतस्मादेव निवृत्तिकर्म वारयतीति सतः। अन्नमपि व्रतमुच्यते यदावृणोति शरीरम्' (निरु० २। १३)। 'तदुहाषाढः सावयसोऽनशनमेव व्रतं मेने' (शत० ब्रा० १।१।१।७)। 'अमानुष इव वाऽएतद् भवति यत् व्रतमुपैति' (शत० ब्रा० १।९।३।२३)। 'एतत् खलु वै व्रतस्य रूपं यत् सत्यम्' (शत० ब्रा० १२।८।२।४)। 'वीर्यं वै व्रतम्' (शत० ब्रा० १३।४।१।१५)। 'अन्नं वै व्रतम्' (शत० ब्रा० ७।५।१। २५, ता० ब्रा० २२।४।५)। 'अन्नं हि व्रतम्' (शत० ब्रा० ६।६।४।५)। 'अन्नं व्रतम्' (ता० ब्रा० २३।२७।२)। 'नह वाऽव्रतस्य देवा हविरश्नन्ति' (कौषी० ब्रा० ३।१, ऐत० ब्रा० ७।११)। 'संवत्सरं हि व्रतं नाति' (तै० सं० २।५।४।४,५।७।६।१)। 'श्रीर्वै व्रतम्' (जै० ब्रा० २।४१४)।

व्रातः पुं०। इत्यत्र **'हस्त-कुन्तान्त-व्रात-वात-दूत-धूर्त-सूत-चूत-मुहूर्त्ताः' (लि० सू० १११) इति पुँल्लिङ्गता।** व्रत्यते नियम्यते इति व्रातः। 'मुण्ड-मिश्र-श्लक्ष्ण-लवण-व्रत-वस्त्र-हल-कल-कृत-तूस्तेभ्यो णिच्' (पा० अ० ३।१।२१) इति व्रत-शब्दात् णिच्-प्रत्ययः। णकार-चकारानुबन्धलोपः। 'अतो लोपः' (पा० अ० ६।४।४८) इति व्रतशब्दे तकार-परवर्त्तिनः अकारस्य लोपः। 'अकर्त्तरि च कारके संज्ञायाम्' (पा० अ० ३। ३। १९) इति घञ्-प्रत्ययः। घकार-ञकारानुबन्धलोपः। **अथवा** 'एरच्' (पा० अ० ३। ३। ५६) इति अच्-प्रत्ययः। चकारानुबन्धलोपः। 'हेतुमति च' (पा० अ० ३। १। २६) इति अथवा 'बहुलमन्यत्रापि संज्ञाछन्दसोः' (उ० २। २३) इति णिच्-प्रत्ययस्य इकारस्य लोपः। 'व्रातच्फञोरस्त्रियाम्' (पा० अ० ५। ३। ११३) इति लिङ्गात् 'पृषोदरादीनि यथोपदिष्टम्' (पा० अ० ६। ३। १०९) इति व्रत शब्दे व्र-परवर्त्तिनः अकारस्य आ-वृद्धिः। एवं व्रात-शब्दः निष्पद्यते। **अथवा** व्रतस्य अयं व्रातः **अथवा** व्रतानां समूहः व्रातः **अथवा** व्रतात् आगतः व्रातः। सर्वत्र व्रत-शब्दात् 'तस्येदम्' (पा० अ० ४। ३। १२०) 'तस्य समूहः' (पा० अ० ४। २। ३७), 'तत आगतः' (पा० अ० ४। ३। ७४) इति क्रमशः अण्-प्रत्ययः। णकारानुबन्धलोपः। 'यस्येति च' (पा० अ० ६। ४। १४८) इति व्रतशब्दे तकार-परवर्त्तिनः अकारस्य लोपः। 'तद्धितेष्वचामादेः' (पा० अ० ७। २। ११७) इति व्र-परवर्त्तिनः अकारस्य आ-वृद्धिः। एवम् अपि व्रत-शब्दः निष्पद्यते। 'स्तोमौघ-निकर-व्रात-वार-सङ्घात-सञ्चयाः' इत्यमरः। 'विषम इव वै व्रातः' (तां० ब्रा० १७।१।५, ११)। 'व्राताः मनुष्यनाम' (निघं० २।३)।

शकन् नपुं०। इत्यत्र **'वियज्जगत्-सकृत्-शकन्-पृषच्-छकृद्-यकृद्-उदश्वितः' (लि० सू० १८४) इति नपुंसकलिङ्गता।** शक्नोति इति शकन्। शक्लृ शक्तौ (स्वा०

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by S3 Foundation USA

च' (पा० अ० ६।४।१४८) इति रेफोत्तरवर्त्तिनः अकारस्य लोपः। 'तद्धितेष्वचामादेः' (पा० अ० ७। २। ११७) इति व-परवर्तिनः ईकारस्य ऐ-वृद्धिः। एवं वैर-शब्दः निष्पद्यते। 'वैरं विरोधो विद्वेषः' इत्यमरः।

व्रजः, व्रजम् पुं०, नपुं०। इत्यत्र **'व्रज-कुञ्ज-कुच-कूर्च-प्रस्थ-दर्पार्भार्धच-दर्भ-पुच्छाः' (लि० सू० १७९) इति पुँल्लिङ्गता नपुंसकलिङ्गता च।** व्रजति इति व्रजः व्रजं वा। व्रज गतौ (भ्वा० प०) 'नन्दिग्रहि-पचादिभ्यो०' (पा० अ० ३।१।१३४) इति अच्-प्रत्ययः। चकारानुबन्धलोपः। **अथवा** व्रज्यते अनेन अस्मिन् वा इति व्रजम्। व्रज धातोः करणाधिकरणयोः 'गोचर-सञ्चर-वह-व्रज-व्यजापण-निगमाश्च' (पा० अ० ३। ३। ११९) इति घ-प्रत्ययः। घकारानुबन्धलोपः। 'समूह-निवह-व्यूह-सन्दोह-विसर-व्रजाः' इत्यमरः। 'गोष्ठाध्वनिवहा व्रजाः' इति चामरः। 'व्रजः मेघनाम' (निघं० १। १०)। 'व्रजः व्रजत्यन्तरिक्षे' (निरु० ६। २)।

व्रणम्, व्रणः नपुं०, पुं०। इत्यत्र **'कार्षापण-स्वर्ण-सुवर्ण-व्रण-चरण-वृषण-विषाण-चूर्ण-तृणानि नपुंसके च' (लि० सू० ६९) इति नपुंसकलिङ्गता पुँल्लिङ्गता च।** व्रणति शब्दयति व्रणयति गात्रं विचूर्णयति वा इति व्रणं व्रणः वा। व्रण शब्दे (भ्वा० प०), व्रण गात्रविचूर्णने (चु० उ०) 'नन्दि-ग्रहि-पचादिभ्यो०' (पा० अ० ३। १। १३४) इति अच्-प्रत्ययः। चकारानुबन्धलोपः। 'व्रणोऽस्त्रियामीर्ममरुः क्लीबे' इत्यमरः।

व्रतम् नपुं०। इत्यत्र **'नवनीतावतानानृतामृत-निमित्त-वित्त-चित्त-पित्त-व्रत-रजत-वृत्त-पलितानि' (लि० सू० १६५) इति नपुंसकलिङ्गता।** व्रियते यत् तद् व्रतम्। वृञ् वरणे (स्वा० उ०), वृञ् वरणे (क्र्या० उ०), वृ वरणे भरणे इत्येके (क्र्या० प०) 'उणादयो बहुलम्' (पा० अ० ३। ३। १) इति उणादीनां बहुलवचनात् 'पृषि-रञ्जिभ्यां कित्' (उ० ३। १११) इति अतच्-प्रत्ययः सः च कित्। चकारानुबन्धलोपः। प्रत्ययस्य कित्त्वात् तस्मिन् परे 'सार्वधातुकार्धधातुकयोः' (पा० अ० ७। ३। ८४) इति धातोः ऋकारस्य 'उरण् रपरः' (पा० अ० १। १। ५१) इति सहकारेण प्राप्तः अर्-गुणः 'क्ङिति च' (पा० अ० १। १। ५) इति निषेधात् न भवति। 'इकोयणचि' (पा० अ० ६। १। ७७) इति धातोः ऋकारस्य र्-यणादेशः। **अथवा** व्रजन्ति प्राप्नुवन्ति स्वलक्ष्यम् अनेन इति व्रतम्। व्रज गतौ (भ्वा० प०) 'गोचर-सञ्चर-वह-व्रज-व्यजापण-निगमाश्च' (पा० अ० ३। १। ११९) इति घ-प्रत्ययः। घकारानुबन्धलोपः। 'पृषोदरादीनि यथोपदिष्टम्' (पा० अ० ६। ३। १०९) इति धातोः जकारस्य तकारः। 'नियमो व्रजमस्त्रियाम्' इत्यमरः। 'व्रतमिति कर्मनाम' (निघं० २। १)। 'व्रतं कर्मनाम वृणोतीति सतः' (नि०

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by S3 Foundation USA

२।१३)। 'इदमपीतरद् व्रतमेतस्मादेव निवृत्तिकर्म वारयतीति सतः। अन्नमपि व्रतमुच्यते यदावृणोति शरीरम्' (निरु० २। १३)। 'तदुहाषाढः सावयसोऽनशनमेव व्रतं मेने' (शत० ब्रा० १।१।१।७)। 'अमानुष इव वाऽएतद् भवति यत् व्रतमुपैति' (शत० ब्रा० १।९।३।२३)। 'एतत् खलु वै व्रतस्य रूपं यत् सत्यम्' (शत० ब्रा० १२।८।२।४)। 'वीर्यं वै व्रतम्' (शत० ब्रा० १३।४।१।१५)। 'अन्नं वै व्रतम्' (शत० ब्रा० ७।५।१।२५, ता० ब्रा० २२।४।५)। 'अन्नं हि व्रतम्' (शत० ब्रा० ६।६।४।५)। 'अन्नं व्रतम्' (ता० ब्रा० २३।२७।२)। 'नह वाऽव्रतस्य देवा हविरश्नन्ति' (कौषी० ब्रा० ३।१, ऐत० ब्रा० ७।११)। 'संवत्सरं हि व्रतं नाति' (तै० सं० २।५।४।४, ५।७।६।१)। 'श्रीर्वै व्रतम्' (जै० ब्रा० २।४१४)।

व्रातः पुं०। इत्यत्र **'हस्त-कुन्तान्त-व्रात-वात-दूत-धूर्त-सूत-चूत-मुहूर्त्ताः' (लि० सू० १११) इति पुँल्लिङ्गता**। व्रत्यते नियम्यते इति व्रातः। 'मुण्ड-मिश्र-श्लक्ष्ण-लवण-व्रत-वस्त्र-हल-कल-कृत-तूस्तेभ्यो णिच्' (पा० अ० ३।१।२१) इति व्रत-शब्दात् णिच्-प्रत्ययः। णकार-चकारानुबन्धलोपः। 'अतो लोपः' (पा० अ० ६।४।४८) इति व्रतशब्दे तकार-परवर्त्तिनः अकारस्य लोपः। 'अकर्त्तरि च कारके संज्ञायाम्' (पा० अ० ३। ३। १९) इति घञ्-प्रत्ययः। घकार-ञकारानुबन्धलोपः। **अथवा** 'एरच्' (पा० अ० ३।३।५६) इति अच्-प्रत्ययः। चकारानुबन्धलोपः। 'हेतुमति च' (पा० अ० ३।१।२६) इति अथवा 'बहुलमन्यत्रापि संज्ञाछन्दसोः' (उ० २।२३) इति णिच्-प्रत्ययस्य इकारस्य लोपः। 'व्रातच्फञोरस्त्रियाम्' (पा० अ० ५। ३। ११३) इति लिङ्गात् 'पृषोदरादीनि यथोपदिष्टम्' (पा० अ० ६। ३। १०९) इति व्रत शब्दे व्र-परवर्त्तिनः अकारस्य आ-वृद्धिः। एवं व्रात-शब्दः निष्पद्यते। **अथवा** व्रतस्य अयं व्रातः **अथवा** व्रतानां समूहः व्रातः **अथवा** व्रतात् आगतः व्रातः। सर्वत्र व्रत-शब्दात् 'तस्येदम्' (पा० अ० ४।३।१२०) 'तस्य समूहः' (पा० अ० ४।२।३७), 'तत आगतः' (पा० अ० ४।३।७४) इति क्रमशः अण्-प्रत्ययः। णकारानुबन्धलोपः। 'यस्येति च' (पा० अ० ६।४।१४८) इति व्रतशब्दे तकार-परवर्त्तिनः अकारस्य लोपः। 'तद्धितेष्वचामादेः' (पा० अ० ७।२।११७) इति व्र-परवर्त्तिनः अकारस्य आ-वृद्धिः। एवम् अपि व्रत-शब्दः निष्पद्यते। 'स्तोमौघ-निकर-व्रात-वार-सङ्घात-सञ्चयाः' इत्यमरः। 'विषम इव वै व्रातः' (तां० ब्रा० १७।१।५, ११)। 'व्राताः मनुष्यनाम' (निघं० २।३)।

शकन् नपुं०। इत्यत्र **'वियज्जगत्-सकृत्-शकन्-पृषच्-छकृद्-यकृद्-उदश्वितः' (लि० सू० १६४) इति नपुंसकलिङ्गता**। शक्नोति इति शकन्। शक्लृ शक्तौ (स्वा०

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by S3 Foundation USA

प०) 'पृषोदरादीनि यथोपदिष्टम्' (पा० अ० ६। ३। १०९) इति अनङ्-प्रत्ययः। अकार-ङकारानुबन्धलोपः। एवं शकन् निष्पद्यते। **अथवा** शाम्यति इति शकन्। शमु उपशमे (दि० प०) 'अन्येष्वपि दृश्यते' (पा० अ० ३। २। १०१) इति ड-प्रत्ययः। डकारानु-बन्धलोपः। डित्त्वात् तस्मिन् परे 'टेः' (पा० अ० ६। ४। १४३) इति धातोः अम् इत्यस्य टेर्लोपः। एवं श इति निष्पद्यते। कनति इति कन् कनी दीप्तिकान्तिगतिषु (भ्वा० प०) 'क्विप् च' (पा० अ० ३। २। ७६) इति क्विप्-प्रत्ययः। तस्य सर्वापहारिलोपः। शश्चासौ कन् इति शकन्। श-शब्दस्य कन् इति शब्देन सह समासः।

शकृत् नपुं०। इत्यत्र **'वियज्जगत्-सकृत्-शकन्-पृषत्-शकृद्-यकृद्-उदश्वितः' (लि० सू० १६४) इति नपुंसकलिङ्गता।** यत् निःसर्तुं निःसारयितुं वा शक्नोति शक्यते वा तत् शकृत्। शक्लृ शक्तौ (स्वा० प०) 'शकेर्ऋतिन्' (उ० ४। ५९) इति ऋतिन्-प्रत्ययः। इनावितौ लोपः। 'उच्चारावस्करौ शमलं शकृत्' इत्यमरः।

शङ्कुः पुं०। इत्यत्र **'शङ्कुः पुंसि' (लि० सू० १४७) इति पुँल्लिङ्गता।** शङ्कते यस्मात् सः शङ्कुः अथवा य शङ्कते सः शङ्कुः। शकि शङ्कायाम् (भ्वा० आ०) 'खरु-शङ्कु-पीयु-नीलङ्गुलिपु' (उ० १। ३६) इति कु-प्रत्ययः। ककारानुबन्धलोपः। धातोः इदित्त्वात् 'इदितो नुम् धातोः' (पा० अ० ७। १। ५८) इति नुम्-आगमः। उकार-मकारानुबन्धलोपः। 'नश्चापदान्तस्य झलि' (पा० अ० ८। ३। २४) इति नस्य अनुस्वारः। 'अनुस्वारस्य ययि परसवर्णः' (पा० अ० ८। ४। ५८) इति अनुस्वारस्य परसवर्णः ङकारः। 'तद् (शङ्कुसाम) उ सीदन्तीयमित्याहुः' (तां० ब्रा० ११। १०। १३)। 'शङ्कु भवत्यह्नो धृत्यै यद्वा अधृतं शङ्कुना तदाधार' (तां० ब्रा० ११। १०। ११)।

शण्डकम्, शण्डकः नपुं०, पुं०। इत्यत्र **'कण्टकानीक-सरक-मोदक-चषक-मस्तक-पुस्तक-तडाक-निष्क-शुष्क-वर्चस्क-पिनाक-भाण्डक-पिण्डक-कटक-शण्डक-पिटक-तालक-फलक-पुलाकानि नपुंसके च' (लि० सू० ६३) इति नपुंसकलिङ्गता पुँल्लिङ्गता च।** शाम्यति शान्तं शान्तः वा भवति इति शण्डकं शण्डकः वा। शमु उपशमे (दि० प०) 'अमन्ताड्डः' (उ० १। ११४) इति ड-प्रत्ययः। 'नश्चापदान्तस्य झलि' (पा० अ० ८। ३। २४) इति मकारस्य अनुस्वारः। 'अनुस्वारस्य ययि परसवर्णः' (पा० अ० ८। ४। ५८) इति अनुस्वारस्य परसवर्णः णकारः। एवं शण्ड-शब्दः निष्पद्यते। पुनः शण्डः एव शण्डकं शण्डकः वा। शण्डशब्दात् (सर्वप्रातिपदिकेभ्यः स्वार्थे कन्) इति कन्-प्रत्ययः। नकारानुबन्धलोपः। **अथवा** शण्डं कायति शब्दयति इति शण्डकः। ... कै शब्दे (भ्वा० प०) 'आदेच उपदेशेऽशिति'

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by S3 Foundation USA

(पा० अ० ६ । १ । ४५) इति धातोः ऐकारस्य आकारः। 'आतोऽनुपसर्गे कः' (पा० अ० ३ । २ । ३) इति क-प्रत्ययः। ककारानुबन्धलोपः। 'आतो लोप इटि च' (पा० अ० ६ । ४ । ६४) इति धातोः आकारस्य लोपः। एवम् अपि शण्डक-शब्दः व्युत्पद्यते। **अथवा** शण्डते रुग्णः भवति इति शण्डकं शण्डकः वा। शडि रुजायां सङ्घाते च (भ्वा० आ०) 'ण्वुल्-तृचौ' (पा० अ० ३ । १ । १३३) इति ण्वुल्-प्रत्ययः। णकार-लकारानुबन्धलोपः। 'युवोरनाकौ' (पा० अ० ७ । १ । १) इति वु-स्थाने अकादेशः। धातोः इदित्त्वात् 'इदितो नुम् धातोः' (पा० अ० ७ । १ । ५८) इति नुम्-आगमः। उकार-मकारानुबन्धलोपः। 'नश्चापदान्तस्य झलि' (पा० अ० ८ । ३ । २४) इति नकारस्य अनुस्वारः। 'अनुस्वारस्य ययि परसवर्णः' (पा० अ० ८।४।५८) इति अनुस्वारस्य परसवर्णः णकारः। 'शण्डाय त्वैष ते योनिर्वीरतां पाहि' (तै० सं० १।४।८।१)।

शतः, शतम् पुं०, नपुं०। **इत्यत्र 'शतायुत-प्रयुताः पुंसि च' (लि० सू० १४५) इति पुँल्लिङ्गता नपुंसकलिङ्गता च।** दश दशतः परिमाणम् अस्य सङ्घस्य इति शतम्। दशन् इत्यस्मात् त-प्रत्ययः दशन् इत्यस्य च श इत्यादेशः। 'शतं बहुनाम' (निघं० ३। १)। 'एषा वाव यज्ञस्य मात्रा यच्छशतम्' (तां० ब्रा० २०।१५।१२)।

शब्दः पुं०। **इत्यत्र 'ह्रद-कन्द-कुन्द-बुद्बुद-शब्दाः' (लि० सू० ११४) इति पुँल्लिङ्गता।** शपन्ति आक्रोशन्ति आह्वयन्ति येन सः शब्दः। शप आक्रोशे (भ्वा० प०) 'शा-शपिभ्यां द-दनौ' (उ० ४। ९८) इति दन्-प्रत्ययः। नकारानुबन्धलोपः। 'झलां जश् झशि' (पा० अ० ८।४।५२) इति धातोः पकारस्य बकारः। **अथवा** शब्दयते येन सः शब्दः शब्दनं वा शब्दः। शब्द उपसर्गादाविष्कारे च, चाद् भाषणे, अनुपसर्गाच्च आविष्कारे इत्येव (चु० उ०) 'भावे' (पा० अ० ३। ३। १८) इति घञ्-प्रत्ययः। घकार-ञकारानु-बन्धलोपः। 'रूपं शब्दो गन्धरसस्पर्शाश्च विषया अमी' इत्यमरः। 'शास्त्रे शब्दस्तु वाचकः' इति तथा 'शब्दे निनाद-निनद-ध्वनि-ध्वान-रव-स्वनाः' इति चामरः। 'शब्दोऽक्षरे यशो गीत्योर्वाक्ये खे श्रवणे ध्वनौ' इति हैमः।

शयनम्, शयनः नपुं०, पुं०। **इत्यत्र 'मान-यानाभिधान-नलिन-पुलिनोद्यान-शयनासन-स्थान-चन्दनालान-समान-भवन-सम्भावन-विभावन-विमानानि नपुंसके च' (लि० सू० ७६) इति नपुंसकलिङ्गता पुँल्लिङ्गता च।** शेते इति शयनं शयनः वा। शीङ् स्वप्ने (अ० प०) 'बहुलमन्यत्रापि' (उ० २।७९) इति युच्-प्रत्ययः। चकारानुबन्धलोपः। 'सार्वधातुकार्धधातुकयोः' (पा० अ० ७। ३। ८४) इति धातोः ईकारस्य ए-गुणः। 'यु-वोरनाकौ' (पा० अ० ७। १। १) इति यु-स्थाने अनादेशः।

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by S3 Foundation USA

'एचोऽयवायावः' (पा० अ० ६ । १ । ७८) इति एकारस्य अय्-आदेशः। **अथवा** शय्यते अस्मिन् इति शयनं शयनः वा। शीङ् स्वप्ने। 'करणाधिकरणयोश्च' (पा० अ० ३ । ३ । ११७) इति अधिकरणे अथवा 'ल्युट् च' (पा० अ० ३ । ३ । ११५) इति भावे। ल्युट्-प्रत्ययः। लकार-टकारानुबन्धलोपः। पूर्ववत् धातोः ईकारस्य ए-गुणः, यु-स्थाने अनादेशः एकारस्य अयादेशश्च। 'स्यान्निद्रा शयनं स्वापः' इत्यमरः। 'शय्यायां शयनीयवत्। शयनम्' इति चामरः। 'शयनं सुरते निद्राशय्ययोश्च नपुंसकम्' इति मेदिनी।

शरच्छायम् नपुं०। **इत्यत्र 'अनल्पे छाया' (लि० सू० १२७) इति अथवा 'छाया बाहुल्ये' (पा० अ० २। ४। २२) इति नपुंसकलिङ्गता।** शराणां छाया इति शरच्छायम्। 'षष्ठी' (पा० अ० २ । २ । ८) इति शरशब्दस्य छाया-शब्देन समासः। 'ह्रस्वो नपुंसके प्रातिपदिकस्य' (पा० अ० १ । २ । ४७) इति छाया-शब्दे यकारपरवर्त्तिनः आकारस्य अकारः ह्रस्वः। 'छे च' (पा० अ० ६ । १ । ७३) इति तुग्-आगमः। उकार-ककारानुबन्ध-लोपः। 'स्तोः श्चुना श्चुः' (पा० अ० ८ । ४ । ४०) इति श्चुत्वस्य असिद्धत्वात् 'झलां जशोऽन्ते' (पा० अ० ८ । २ । ३९) इति तकारस्य दकारः। 'खरि च' (पा० अ० ८ । ४ । ५५) इति चर्त्वस्य असिद्धत्वात् पूर्वं 'स्तोः श्चुना श्चुः' (पा० अ० ८ । ४ । ४०) इति दकारस्य जकारः। ततः 'खरि च' (पा० अ० ८ । ४ । ५५) इति जकारस्य चकारः। एवं शरच्छाय-शब्दः निष्पद्यते। शराणाम् अनल्पता बाहुल्यं वा शरच्छायशब्देन बुध्यते।

शरद् स्त्री०। **इत्यत्र 'प्रतिपदापद्विपत्सम्पच्छरत्संसत्परिषदुषःसंवित्क्षुत्पुन्मुत्समिधः' (लि० सू० २७) इति स्त्रीलिङ्गता।** शृणाति हिनस्ति इति शरद्, शीर्यते वा अस्याम् ओषधि-समूहः इति शरद्। शृ हिंसायां (क्र्या० प०) 'शृ-दृ-भसोऽदिः' (उ० १। १३०) इति अदि-प्रत्ययः। इकारस्य उच्चारणार्थत्वात् 'अद्' एव प्रत्ययः। 'सार्वधातुकार्ध-धातुकयोः' (पा० अ० ७ । ३ । ८४) इति धातोः ॠकारस्य 'उरण् रपरः' (पा० अ० १। १ । ५१) इति सहकारेण अर्-गुणः। 'अथ शरत् स्त्रियाम्' इत्यमरः। 'स्याद् ॠतौ वत्सरे शरत्' इति चामरः। 'शरत् स्त्री वत्सरेऽप्यृतौ' इति मेदिनी। 'शरद् भवेच्छरदया प्रावृट् प्रावृषया सह' इति विश्वः। 'शरदः=शरच्छृता अस्यामोषधयो भवन्ति शीर्णा आप इति वा' (निरु० ४। २५)। 'शरद् वै बर्हिरिति हि शरद् बर्हिर्या इमा ओषधयो ग्रीष्म-हेमन्ताभ्यां नित्यक्ता भवन्ति, ता वर्षा वर्धन्ते ताः शरदि बर्हिषो रूपं प्रस्तीर्णाः शेरते तस्माच्छरद् बर्हिः' (शत० ब्रा० १ । ५ । ३ । १२)। 'शरद् ब्रह्मा तस्माद् यदा सस्यं पच्यते ब्रह्मण्वत्यः प्रजा इत्याहुः' (शत० ब्रा० ११ । २ । ७ । ३२) 'वर्षाशरदौ सारस्वताभ्याम् (अवरुन्धे)' (शत० ब्रा० १२ । ८ । २ । ३४)। 'शरदेव सर्वम्' (गोपथ० पू० ५ । १५)।

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by S3 Foundation USA

'स्वधा वै शरद्' (शत० ब्रा० १३।८।१।४)। 'अन्नं वै शरद्' (मैत्रा० सं० १।६।९)। 'शरत्पुच्छं (संवत्सरस्य)' (तैत्ति० ब्रा० ३।११।१०।३)। 'शरद् वा अस्य (रुद्रस्य) अम्बिका स्वसा' (तैत्ति० ब्रा० १।६।१०।४)। 'शरत् प्रतिहारः' (षड्विं० ब्रा० ३।१)। 'तस्माच्छरदमोषधयोऽभिसंपच्यते' (तां० ब्रा० २१।१५।३)। '(प्रजापतिः) शरदं प्रतिहारम् अकरोत्' (जैमि० उ० १।१२।७)। 'शरद् वै वैश्यर्तुः' (तैत्ति० ब्रा० १।१।२।७)। 'यद् विद्योतते तच्छरदः (रूपम्)' (शत० ब्रा० २।२।३।८)। 'शरदि हि खलु वै भूयिष्ठा ओषधयः पच्यन्ते' (जैमि० उ० १। ३५। ५)। 'शरदुत्तरः पक्षः (संवत्सरस्य)' (तैत्ति० ब्रा० ३।११।१०।४)। 'षड्भिर्मैत्रावरुणैः (पशुभिः) शरदि यजते' (शत० ब्रा० १३।५।४।२८)।

शरम्, शरः नपुं०, पुं०। इत्यत्र **'द्वन्द्व-बर्ह-दुःख-बडिश-पिच्छ-बिम्ब-कुटुम्ब-कवच-वर-शर-वृन्दारकाणि' (लि० सू० १६९) इति नपुंसकलिङ्गता, 'देवासुरात्म-स्वर्ग-गिरि-समुद्र-नख-केश-दन्त-स्तन-भुज-कण्ठ-खड्ग-शर-पङ्काभिधानानि' (लि० सू० ४३) इति पुँल्लिङ्गता च।** शृणाति इति शरः। शृ हिंसायाम् (क्र्या० प०) 'नन्दि-ग्रहि-पचादिभ्यो०' (पा० अ० ३।१।१३४) इति अच्-प्रत्ययः। चकारानुबन्धलोपः। 'सार्वधातुकार्धधातुकयोः' (पा० अ० ७। ३। ८४) इति धातोः ऋकारस्य 'उरण् रपरः' (पा० अ० १।१।५१) इति सहकारेण अर्-गुणः। **अथवा** शीर्यते अनेन इति शरं शरः वा। उक्तशृधातोः 'ऋदोरप्' (पा० अ० ३।३।५७) इति अच्-प्रत्ययः। पकारानुबन्धलोपः। धातोः ऋकारस्य पूर्ववत् अर्-गुणः। 'गुन्द्रस्तेजनकः शरः' इत्यमरः। 'कलम्बमार्गणशराः' इति चामरः। 'शरस्तु तेजने बाणे दध्यग्रे ना शरं जले' इति विश्व-मेदिन्यौ। 'शरः शृणाते' (निरु० ५।४)। 'अङ्गिरसो वै स्वर्गं लोकं यन्तस्ते मेखलाः संन्यकिरन्। ततः शर उदतिष्ठत्' (कपि० सं० ३६।१)। 'ऊर्ग्वै शराः' (तै० सं० ६।१।३।३)। 'इन्द्रो वै वृत्राय वज्रं प्राहरत् तस्य यत् प्राशीर्यत स शरोऽभवत् तच्छरस्य शरत्वम्' (काठ० सं० २३।४, कपि० सं० ३६।१)। 'येऽन्तः शरा अशीर्यन्त ते शरा अभवन् तच्छराणां शरत्वम्' (तै० सं० ६।१।३।५)। 'अथ (इन्द्रः) यत्र (वज्रे) प्राहरत्तच्छकलोऽशीर्य्यत स पतित्वा शरोऽभवत्तस्माच्छरो नाम यदशीर्य्यत' (शत० ब्रा० १।२।४।१)।

शरीरम् नपुं०। इत्यत्र **'द्वाराग्र-स्फार-तक्र-वक्र०' (लि० सू० ९०) इति नपुंसकलिङ्गता।** यत् शीर्यते हिंस्यते शीर्णं भवति तत् शरीरम्। शृ हिंसायां (क्र्या० प०) 'कॄ-शॄ-पॄ-कटि-पटि-शौरिभ्य ईरन्' (उ० ४। ३१) इति ईरन्-प्रत्ययः।

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by S3 Foundation USA

नकारानुबन्धलोपः। 'उरण् रपरः' (पा० अ० १।१।५१) इति सहकारेण 'सार्वधातुकार्धधातुकयोः' (पा० अ० ७।३।८४) इति धातोः ऋकारस्य अर्-गुणः। 'शरीरं वर्ष्म विग्रहः' इत्यमरः। 'शरीरं शृणातेः शम्नातेर्वा' (निरु० २।१६)। 'शरीरे आदित्ये' (निरु० १२।३७)। 'शरीरं हृदये (श्रितम्)' (तैत्ति० ब्रा० ३।१०।८।७)। 'अथ यत् सर्वमस्मिन्नश्रयन्त तस्मादु शरीरम्' (शत० ब्रा० ६।१।१।४)। 'अशरीरं वै रेतोऽशरीरा वपा यद् वै लोहितं यन्मांसं तच्छरीरम्' (ऐत० ब्रा० २।१४)। 'अङ्गानि च मेऽस्थीनि च मे परूँषि च मे शरीराणि य मे (यज्ञेन कल्पन्ताम्)' (तै० सं० ४।७।१।३)। 'कमग्निं चिनुते वैश्वसृजमग्निं चिन्वानः। शरीरं प्रत्यक्षेण' (तै० आ० १।२२।११)। 'यो वै प्रमीयतेऽग्निं तस्य शरीरं गच्छति, सोमं रसः' (मैत्रा० सं० २।३।५)। 'यदनो वा रथं वा (ददाति) शरीरं तेन (निष्क्रीणीते)' (मैत्रा० सं० ४।८।३)। 'केन सुखदुःखे इति, शरीरेणेति' (शां० आ० ३।७)। 'प्राण उदक्रामतत्प्राण उत्क्रान्तेऽपद्यत। तदशीर्यताशारीति ३ँ तच्छरीरमभवत्तच्छरीरस्य शरीरत्वम्' (ऐत० आ० २।१।४)।

शलाका स्त्री०। **इत्यत्र 'शलाका नित्यं स्त्रियाम्' (लि० सू० ३४) इति स्त्रीलिङ्गता।** शलति शलते गच्छति चलति संवृणोति वा इति शलाका। शल गतौ (भ्वा० प०), शल चलन-संवरणयोः (भ्वा० आ०) 'शलि-पटि-पतिभ्यो नित्' (उ० ४।१५) इति **अथवा** 'पिनाकादयश्च' (उ० ४।१६) इति आक-प्रत्ययः। स च नित्, नित्त्वं स्वरार्थम्। एवं शलाक इति निष्पद्यते। ततः स्त्रियाम् 'अजाद्यतष्टाप्' (पा० अ० ४।१।४) इति टाप्-प्रत्ययः। टकार-पकारानुबन्धलोपः। 'अकः सवर्णे दीर्घः' (पा० अ० ६।१।१०१) इति अकारस्य आकारस्य च आ-दीर्घः।

शल्यः, शल्यम् पुं०, नपुं०। **इत्यत्र 'शृङ्गार्ध-निदाघोद्यम-शल्य-दृढाः' (लि० सू० १७८) इति पुँल्लिङ्गता नपुंसकलिङ्गता च।** यः यद् वा शलति गच्छति शलते संवृणोति वा स तद् शल्यः शल्यं वा। अथवा येन शल्यते विध्यते सः शल्यः तद् शल्यं वा। शल गतौ (भ्वा० प०), शल चलन-संवरणयोः (भ्वा० आ०) 'सानसि-वर्णसि-पर्णसि-तण्डुलाङ्कुश-चषालेल्वल-पल्वल-धिष्ण्य-शल्याः' (उ० ४।१०८) इति य-प्रत्ययः। **अथवा** 'अघ्न्यादयश्च' (उ० ४।११३) इति यक्-प्रत्ययः। ककारानुबन्धलोपः। 'वा पुंसि शल्यं शङ्कुर्ना' इत्यमरः। 'पिण्डीतको मरुबकः श्वसनः करहाटकः। शल्यश्च मदने' इति चामरः। 'शल्यं तु न स्त्रियां शङ्कौ क्लीबं क्ष्वेडेषु तोमरे। मदनद्रुश्वाविधोर्ना' इति मेदिनी। 'क्ष्वेडा-शङ्कुशरे शल्यं ना श्वाविन्मदनद्रुमे' इति रभसः। 'विकृत्य हि शल्यं मध्यतो निर्हरन्ति' (मैत्रा० सं० २।३।१)। 'यथानुभिद्य शल्यं

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by S3 Foundation USA

निर्हरत्येवमेवास्य (आमयाविनः) एतन्मध्यतो यक्ष्मं निर्हरति.....शल्यं निर्हृत्य समायत्य संनह्यति' (काठ० सं० १२।१)।

शवः, शवम् पुं०, नपुं०। इत्यत्र **'दण्ड-मण्ड-खण्ड-शव-सैन्धव-पार्श्वाकाश-कुश-काशाङ्कुश-कुलिशाः' (लि० सू० १८१) इति पुँल्लिङ्गता नपुंसकलिङ्गता च।** श्वयति गच्छति वर्धते वायुना फुल्लति इति शवः। टु ओ श्वि गति-वृद्ध्योः (भ्वा० प०) 'श्वेः सम्प्रसारणं च' (उ० ४।१९४) इति असुन्-प्रत्ययः, धातोः वकारस्य उकारः सम्प्रसारणं च। 'सम्प्रसारणाच्च' (पा० अ० ६।१।१०८) इति धातोः इकारस्य पूर्वरूपम्। 'सार्वधातुकार्धधातुकयोः' (पा० अ० ७।३।८४) इति उकारस्य ओ-गुणः। 'एचोऽयवायावः' (पा० अ० ६।१।७८) इति ओकारस्य अवादेशः। एवं शवस् इति निष्पद्यते। अस्य नपुंसकलिङ्गे प्रथमा-द्वितीयैकवचने शवः भवति। **अथवा** शवति गच्छति इति शवः। शु गतौ (भ्वा० प०) 'नन्दि-ग्रहि-पचादिभ्यो०' (पा० अ० ३।१।१३४) इति अच्-प्रत्ययः। चकारानुबन्धलोपः। 'सार्वधातुकार्धधातुकयोः' (पा० अ० ७।३।८४) इति धातोः उकारस्य ओ-गुणः। 'एचोऽयवायावः' (पा० अ० ६।१।७८) इति ओकारस्य अवादेशः। **अथवा** शवति गच्छति इति शवः। शव गतौ (भ्वा० प०) पूर्ववत् अच्-प्रत्ययः। चकारानुबन्धलोपः। एवम् अयम् अकारान्तः शव-शब्दः पुँल्लिङ्गे नपुंसकलिङ्गे च निष्पद्यते। 'कुणपः शवमस्त्रियाम्' इत्यमरः। 'शवः स्यात् कुणपे पुमान्। नपुंसकं तु पानीये' इति मेदिनी। 'विकारमस्यार्येषु भाषन्ते शव इति' (निरु० २।४०)। 'बलं वै मरुतः (शवः)' (शत० ब्रा० ७।३।१।२९) एवं (काठ० सं० २९।९)।

शशोर्णम् नपुं०। इत्यत्र **'गृहशशाभ्यां क्लीबे' (लि० सू० २२) इति नपुंसकलिङ्गता।** शशस्य ऊर्णा इति शशोर्णम्। शश-शब्दस्य ऊर्णा-शब्देन सह 'षष्ठी' (पा० अ० २।२।८) इति समासः। 'आद्गुणः' (पा० अ० ६।१।८७) इति अकारस्य ऊकारस्य च ओ-गुणः। एवं शशोर्णा इत्यवस्थायां 'ह्रस्वो नपुंसके प्रातिपदिकस्य' (पा० अ० १।२।४७) इति णकारपरवर्त्तिनः आकारस्य अकारः ह्रस्वः। एवं शशोर्ण-शब्दस्य प्रथमाद्वितीयैकवचने शशोर्णं भवति। 'शशोर्णं शशलोमनि' इत्यमरः।

शष्कुलिः स्त्री०। इत्यत्र **'शष्कुलि-राजि-कुट्यशनि-वर्ति-भृकुटि-त्रुटि-वलि-पङ्क्तयः' (लि० सू० २६) इति स्त्रीलिङ्गता।**

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by S3 Foundation USA

शष्पम् नपुं०। इत्यत्र **'पाप-रूपोडुप-तल्प-शिल्प-पुष्प-शष्प-समीपान्तरीपाणि नपुंसके' (लि० सू० ७८) इति नपुंसकलिङ्गता।** शस्यते हन्यते कर्त्यते यत् तद् शष्पम् **अथवा** यत् शसति हिनस्ति तत् शष्पम्। शसु हिंसायाम् (भ्वा० प०) 'खष्प-शिल्प-शष्प-वाष्प-रूप-पर्प-तल्पाः' (उ० ३। २८) इति प-प्रत्ययः धातोः सस्य च षः। 'शष्पं बाल-तृणम्' इत्यमरः। 'शष्पं बालतृणेऽपि च पुंसि स्यात् प्रतिभाहानौ' इति मेदिनी।

शस्त्रम् नपुं०। इत्यत्र **'द्वाराग्र-स्फार-तक्र-वक्र०' (लि० सू० ९०) इति नपुंसक-लिङ्गता।** येन शस्यते हिंस्यते हन्यते, येन वा शसन्ति घ्नन्ति तत् शस्त्रम्। शसु हिंसायां (भ्वा० प०) 'अमि-चि-मि-शसिभ्यः क्त्रः' (उ० ४। १६५) इति क्त्र-प्रत्ययः। ककारानुबन्धलोपः। **अथवा** शस्यते हिंस्यते येन तत् शस्त्रम्। शसु हिंसायां (भ्वा० प०) 'दाम्-नी-शस-यु-युज-स्तु-तुद-सि-सिच्-मिह-पत-दश-नहः करणे' (पा० अ० ३। २। १८२) इति ष्ट्रन्-प्रत्ययः। षकार-नकारानुबन्धलोपे सति प्रत्यये त्र इति अवशिष्यते। षत्वे निवृत्ते तत्प्रयुक्तः टकारः अपि तकाररूपे आयाति। 'शस्त्रमायुध-लौहयोः' इत्यमरः। 'शस्त्रं लौहास्त्रयोः क्लीबं छुरिकायां तु योषिति' इति मेदिनी। 'शस्त्रं तद् यदेनच्छ्यति तस्माच्छस्त्रं नाम' (शत० ब्रा० ४। ३। २। ३)। 'प्रजा शस्त्रम्' (शत० ब्रा० ५। २। २। २०)। 'विट् शस्त्रम्' (षड्विं० १। ४)। 'वाग् हि शस्त्रम्' (ऐत० ब्रा० ३। ४४)। 'ताञ्छस्त्रैः प्रशास्ति। तच्छस्त्राणां शस्त्रत्वम्' (जैमि० ब्रा० २। २४)। 'विश्वानि इति शस्त्रं (प्रजापतिरसृजत्)' (तां० ब्रा० ६। ९। १५)।

शानिः स्त्री०। इत्यत्र **'दर्वि-विदि-वेदि-खनि-शान्यश्रि-वेशि-कृष्योषधि-कट्यङ्गुलयः' (लि० सू० २४) इति स्त्रीलिङ्गता।** शीशांसति शीशांसते वा इति शानिः। शान तेजने (भ्वा० उ०) 'सर्वधातुभ्य इन्' (उ० ४। ११९) इति इन्-प्रत्ययः। नकारानुबन्धलोपः।

शालूकम् नपुं०। इत्यत्र **'चिबुक-शालूक-प्रातिपदिकांशुकोल्मुकानि नपुंसके' (लि० सू० ६२) इति नपुंसकलिङ्गता।** शलति गच्छति, शल्यते गम्यते प्राप्यते वा यत् तत् शालूकम्। शल गतौ (भ्वा० प०), शल चलन-संवरणयोः (भ्वा० आ०) 'उणादयो बहुलम्' (पा० अ० ३। ३। १) इति उणादीनां बहुलवचनात् 'खर्जि-पिञ्जा-दिभ्य ऊरोलचौ' (उ० ४। ९१) इति ऊर-प्रत्ययः, धातोः उपधायाः अकारस्य बाहुलकात् आ-वृद्धिः। 'भेके मण्डूक-वर्षाभू-शालूर-प्लव-दर्दुराः' इत्यमरः।

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by S3 Foundation USA

शाल्मलिः स्त्री०, पुं०। इत्यत्र **'गो-मणि-यष्टि-भृष्टि-पाटलि-बस्ति-शाल्मलि-त्रुटि-मसि-मरीचयः' (लि० सू० १७२) इति स्त्रीलिङ्गता पुँल्लिङ्गता च।** शालयति इति शाल्। शल गतौ (भ्वा० प०), शल चलन-संवरणयोः (भ्वा० आ०) 'हेतुमति च' (पा० अ० ३।१।२६) इति णिच्-प्रत्ययः। णकार-चकारानुबन्धलोपः। 'अत उपधायाः' (पा० अ० ७।२।११६) इति धातोः उपधायाः अकारस्य आ-वृद्धिः। 'क्विप् च' (पा० अ० ३।२।७६) इति **अथवा** 'अन्येभ्योऽपि दृश्यते' (पा० अ० ३।२।१७८) इति क्विप्-प्रत्ययः। 'णेरनिटि' (पा० अ० ६।४।५१) इति **अथवा** 'बहुलमन्यत्रापि संज्ञाछन्दसोः' (उ० २। २३) इति णिच्प्रत्ययस्य इकारस्य लोपः। क्विप्प्रत्ययस्य सर्वापहारिलोपः। एवं शाल् निष्पद्यते। मलते इति मलिः। मल धारणे (भ्वा० आ०) 'सर्वधातुभ्य इन्' (उ० ४। ११९) इति इन्-प्रत्ययः। नकारानुबन्धलोपः। एवं मलि निष्पद्यते। पुनः शाल् चासौ मलिश्च इति शाल्मलिः। शाल्-शब्दस्य मलि-शब्देन सह समासे शाल्मलिः इति निष्पद्यते। 'पिच्छिला पूरणी मोचा स्थिरायुः शाल्मलिर्द्वयोः' इत्यमरः।

शासनम् नपुं०। इत्यत्र **'जघनाजिन-तुहिन-कानन-वन-वृजिन-विपिन-वेतन-शासन-सोपान-मिथुन-श्मशान-रत्न-निम्न-चिह्नानि नपुंसके' (लि० सू० ७५) इति नपुंसकलिङ्गता।** शास्ति शिष्टिर्वा इति शासनम् शासु अनुशिष्टौ (अ० प०) 'ल्युट् च' (पा० अ० ३। ३। ११५) इति भावे ल्युट्-प्रत्ययः। लकार-टकारानुबन्धलोपः। 'युवोरनाकौ' (पा० अ० ७। १। १) इति यु-स्थाने अनादेशः। 'अववादस्तु निर्देशो निदेशः शासनं च सः' इत्यमरः। 'शासनं राजदत्तोर्व्यां लेखाज्ञाशास्त्रशान्तिषु' इति मेदिनी।

शिक्यम् नपुं०। इत्यत्र **'धान्याज्य-सस्य-रूप्य-पण्य-वर्ण्य-धृष्य-हव्य-कव्य-काव्य-सत्यापत्य-मूल्य-शिक्य-कुड्य-मद्य-हर्म्य-तूर्य-सैन्यानि' (लि० सू० १६८) इति नपुंसकलिङ्गता।** स्रंसते अस्मात् इति शिक्यम्। स्रंसु अधःपतने (भ्वा० आ०) 'स्रंसेः शिः कुट् किच्च' (उ० ५।१६) इति यत्-प्रत्ययः, तस्य कुडागमः, यत्-प्रत्ययः कित्, धातोः शि इत्यादेशः च। यत्प्रत्यये तकारानुबन्धलोपः। कुडागमे उकार-टकारानुबन्धलोपः। कित्त्वात् तस्मिन् परे 'क्ङिति च' (पा० अ० १।१।५) इति निषेधात् 'सार्वधातुकार्धधातुकयोः' (पा० अ० ७।३।८४) इति धातोः इकारस्य प्राप्तः ए-गुणः न भवति। **अथवा** यत् भारं वोढुं शक्नोति तत् शिक्यम्। शक्लृ शक्तौ (स्वा० प०) 'अघ्न्यादयश्च' (उ० ४। ११३) इति यक्-प्रत्ययः। 'पृषोदरादीनि यथोपदिष्टम्'

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by S3 Foundation USA

(पा० अ० ६।३।१०९) इति धातोः उपधायाः अकारस्य इकारः। प्रत्यये ककारानुबन्धलोपः। प्रत्ययस्य कित्त्वात् तस्मिन् परे 'क्ङिति च' (पा० अ० १।१।५) इति निषेधात् 'पुगन्तलघूपधस्य च' (पा० अ० ७।३।८६) इति धातोः उपधायाः इकारस्य प्राप्तः ए-गुणः न भवति। 'ऋतवः शिक्यमृतुभिर्हि संवत्सरः शक्नोति स्थातुं यच्छक्नोति तस्माच्छिक्यम्' (शत० ब्रा० ६।७।१।१८)। 'दिशः शिक्यं दिग्भिर्हीमे लोकाः शक्नुवन्ति स्थातुं यच्छक्नुवन्ति तस्माच्छिक्यम्' (शत० ब्रा० ६।७।१।१६)। 'प्राणाः शिक्यं प्राणैर्ह्ययमात्मा शक्नोति स्थातुं यच्छक्नोति तस्माच्छिक्यम्' (शत० ब्रा० ६।७।१।२०)।

शिखण्डः पुं०। इत्यत्र **'षण्ड-मण्ड-करण्ड-भरण्ड-वरण्ड-शण्ड-मुण्ड-पाषण्ड-शिखण्डाः' (लि० सू० ११२) इति पुँल्लिङ्गता।** यः शेते सः शिखः। शीङ् स्वप्ने (अ० आ०) 'शीङो ह्रस्वश्च' (उ० ५।२४) इति ख-प्रत्ययः, धातोः ईकारस्य ह्रस्वः इकारश्च। ह्रस्व-विधान-सामर्थ्यात् तस्य इकारस्य 'सार्वधातुकार्धधातुकयोः' (पा० अ० ७।३।८४) इति एकारः गुणः न भवति। एवं शिख-शब्दः निष्पद्यते। अमति गच्छति इति अण्डः। अम गतिशब्दसम्भक्तिषु (भ्वा० प०) 'ञमन्ताड्डः' (उ० १।११४) इति ड-प्रत्ययः। 'नश्चापदान्तस्य झलि' (पा० अ० ८।३।२४) इति मकारस्य अनुस्वारः। 'अनुस्वारस्य ययि परसवर्णः' (पा० अ० ८।४।५८) इति अनुस्वारस्य परसवर्णः णकारः। एवम् अण्ड-शब्दः निष्पद्यते। पुनः शिखश्चासौ अण्डश्च इति शिखण्डः। शिख + अण्ड इत्यवस्थायां 'शकन्ध्वादिषु पररूपं वाच्यम्' (वा० ६।१।९४) इति खकार-परवर्त्तिनः अकारस्य पररूपम्। एवं शिखण्ड-शब्दः निष्पद्यते। 'शिखण्डश्च पिच्छबर्हे नपुंसके' इत्यमरः। 'शिखण्डो बर्हचूडयोः' इति हैमः।

शिरीषम् नपुं०। इत्यत्र **'शिरीषर्जीषाम्बरीष-पीयूष-पुरीष-किल्बिष-कल्माषाणि नपुंसके' (लि० सू० ९४) इति नपुंसकलिङ्गता।** यः शृणाति यत् वा शृण्वन्ति जनाः सः शिरीषः शिरीषं वा। **अथवा** यत् शीर्णं भवति शीर्यते वा यत् तत् शिरीषम्। शॄ हिंसायां (क्र्या० प०) 'शॄ-पॄभ्यां किच्च' (उ० ४।२८) इति ईषन्-प्रत्ययः, स च कित्। कित्त्वात् 'सार्वधातुकार्धधातुकयोः' (पा० अ० ७।३।८४) इति धातोः ॠकारस्य 'उरण् रपरः' (पा० अ० १।१।५१) इति सहकारेण प्राप्तः अर्-गुणः 'क्ङिति च' (पा० अ० १।१।५) इति निषेधात् न भवति। 'ॠत इद् धातोः' (पा० अ० ७।१।१००) इति धातोः ॠकारस्य 'उरण् रपरः' (पा० अ० १।१।५१) इति सहकारेण इर्-आदेशः। प्रत्यये नकारानुबन्धलोपः। 'शिरीषस्तु कपीतनः' इत्यमरः।

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by S3 Foundation USA

शिरोरुहः पुं०। इत्यत्र **'देवासुरात्म-स्वर्ग-गिरि-समुद्र-नख-केश-दन्त-स्तव-भुज-कण्ठ-खड्ग-शर-पङ्काभिधानानि' (लि० सू० ४३) इति पुँल्लिङ्गता।** शिरसि रोहति इति शिरोरुहः। शिरस् + रुह बीजजन्मनि प्रादुर्भावे च (भ्वा० प०) 'इगुपध-ज्ञा-प्री-किरः कः' (पा० अ० ३।१।१३५) इति क-प्रत्ययः। ककारानुबन्धलोपः। प्रत्ययस्य कित्त्वात् तस्मिन् परे 'क्ङिति च' (पा० अ० १।१।५) इति निषेधात् धातोः उपधायाः उकारस्य 'पुगन्त-लघूपधस्य च' (पा० अ० ७। ३। ८६) इति प्राप्तः ओ-गुणः न भवति। 'स-सजुषो रुः' (पा० अ० ८।२।६६) इति सस्य रुत्वम्। उकारानुबन्धलोपः। 'हशि च' (पा० अ० ६।१।११४) इति रु इत्यस्य रेफस्य उकारः। 'आद्गुणः' (पा० अ० ६। १। ८७) इति अकारस्य उकारस्य च ओ-गुणः 'कचः केशः शिरोरुहः' इत्यमरः।

शिल्पम् नपुं०। इत्यत्र **'पाप-रूपोडुप-तल्प-शिल्प-पुष्प-शष्प-समीपान्तरीपाणि नपुंसके' (लि० सू० ७८) इति नपुंसकलिङ्गता।** यत् शीलति समादधाति तद् शिल्पम्। शील समाधौ (भ्वा० प०) 'खष्प-शिल्प-शष्प-वाष्प-रूप-पर्प-तल्पाः' (उ० ३। २८) इति प-प्रत्ययः धातोः ईकारस्य ह्रस्वः इकारश्च। ह्रस्व-विधान-सामर्थ्यात् इकारस्य 'पुगन्तलघूपधस्य च' (पा० अ० ७।३।८६) इति ए-गुणः न। 'शिल्पं कर्म कलादिकम्' इत्यमरः। 'शिल्पं स्रुवे क्रियादिके' इति हैमः। 'शिल्पं रूपनाम' (निघं० ३।७)। 'प्राणाः शिल्पानि' (कौषी० २५, १२, १३)। 'शिल्पैर्हि सर्वं कुर्वन्ति' (काठ० संक० ८।५)। 'यद्वै प्रतिरूपं तच्छिल्पम्' (शत० ब्रा० ३।२।१।५)। 'त्रिवृद्वै शिल्पं नृत्यं गीतं वादित्रमिति' (कौषी० ब्रा० २९,५)। 'आत्मसंस्कृतिर्वै शिल्पानि आत्मानमेवास्य तत्संस्कुर्वन्ति' (गोप० २।६।७)। 'तौ वा एताविन्द्रस्तोमौ (अभिषिद्विश्वजितौ) वीर्य्यवन्तौ शिल्पं वा एतौ नाम स्तोमावास्ताम्' (तां० ब्रा० १६। ४। ८)। 'आत्मसंस्कृतिर्वाव शिल्पानि छन्दोमयं वा एतैर्यजमान आत्मानं संस्कुरुते' (ऐत० ब्रा० ६। २७)।

शिशिरम्, शिशिरः नपुं०, पुं०। इत्यत्र **'द्वाराग्र-स्फार-तक्र-वक्र-वप्र०' (लि० सू० ९०) इति तथा 'अभाषायां हेमन्तशिशिरावहोरात्रे च' (लि० सू० १२५) इति नपुंसकलिङ्गता एवं 'चक्र-वज्रान्धकार-सारावारपार-क्षीर-तोमर-शृङ्गार-भृङ्गार-मन्दारोशीर-तिमिर-शिशिराणि नपुंसके च' (लि० सू० ९२) इति नपुंसकलिङ्गता पुँल्लिङ्गता च।** शशति गच्छति व्याप्नोति इति शिशिरम्। शश प्लुतगतौ (भ्वा० प०) 'अजिर-शिशिर-शिथिल-स्थिर-स्फिर-स्थविर-खदिराः' (उ० १।५३) इति किरन्-प्रत्ययः धातोः उपधायाः अकारस्य इकारश्च। 'तुषारः शिशिरो जडः' एवं

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by S3 Foundation USA

'शिशिरोऽस्त्रियाम्' इत्यमरः। 'शिशिरो ना हिते न स्त्री ऋतुभेदे जडे त्रिषु' इति मेदिनी। 'शिशिरः स्याद् ऋतोर्भेदे तुषारे शीतलेऽन्यवत्' इति विश्वः। 'शिशिरं शृणातेः शम्नाते र्वा' (निरु० १। १०)। 'षड्भिरैन्द्रा-बार्हस्पत्यैः (पशुभिः) शिशिरे यजते' (शत० ब्रा० १३।५।४।२८)। 'शिशिरे सौरीम् (आलभते)' (मैत्रा० सं० २।५।२)। 'शिशिरष्षष्ठः (ऋतूनाम्)' (जैमि० २।३५६)। 'उद्यता त्रयोदश्याहुतिरासीदथ शिशिरमसृज्यत, तस्मादे-तदृतूनामशान्तं क्रूरमहुताद्धि समभवदहुतादसृज्यत' (मैत्रा सं० १।८।२)। 'तामाहुति-मप्सु प्रासिञ्चत्। ततः शिशिरमजायत। तस्मात्तत् क्रूरतमम्' (कपि० सं० ४। १)। 'शिशिरं प्रतिष्ठानम्' (मैत्रा० ४।९।१८)। 'शिशिराय विकरान् आलभते' (काठक-सं० ५०।४)।

शीधु, शीधुः नपुं०, पुं०। इत्यत्र 'मद्गु-मधु-सीधु-शीधु-सानु-कमण्डलूनि नपुंसके च' **(लि० सू० ५६) इति नपुंसकलिङ्गता पुँल्लिङ्गता च।** यत्पानेन शेते जनः तत् शीधु सः शीधुः वा। शीङ् स्वप्ने (अ० आ०) 'शीङो धुक्-लक्-वलञ्-वालनः' (उ० ४। ३९) इति धुक्-प्रत्ययः। ककारानुबन्धलोपः। कित्त्वात् तस्मिन् परे 'सार्वधातु-कार्धधातुकयोः' (पा० अ० ७। ३। ८४) इति धातोः ईकारस्य प्राप्तः ए-गुणः 'क्ङिति च' (पा० अ० १। १। ५) इति निषेधात् न भवति। 'मैरेयमासवः शीधुः' इत्यमरः। 'पुंनपुंसकयोर्दारुजीवातुस्थाणुशीधवः' इति त्रिकाण्डशेषः।

शीलः, शीलम् पुं०, नपुं०। इत्यत्र **'शील-मूल-मङ्गल-साल-कमल-तल-मुसल-कुण्डल-पलल-मृणाल-बाल-निगल-पलाल-बिडाल-खिल-शूलाः पुंसि च' (लि० सू० १४३) इति पुँल्लिङ्गता नपुंसकलिङ्गता।** येन सुखं शेते जनः सः शीलः तद् शीलं वा। शीङ् स्वप्ने (अ० आ०) 'शीङो धुक्-लक्-वलञ्-वालनः' (उ० ४। ३९) इति लक्-प्रत्ययः। ककारानुबन्धलोपः। कित्त्वात् तस्मिन् परे 'क्ङिति च' (पा० अ० १। १। ५) इति निषेधात् 'सार्वधातुकार्धधातुकयोः' (पा० अ० ७। ३। ८४) इति धातोः ईकारस्य प्राप्तः ए-गुणः न भवति। **अथवा** शीलनं शीलः शीलं वा, येन शील्यते वा तद् शीलम्। शील समाधौ (भ्वा० प०) 'पुंसि संज्ञायां घः प्रायेण' (पा० अ० ३। ३। ११८) इति घ-प्रत्ययः **अथवा** 'भावे' (पा० अ० ३। ३। १८) इति घञ्-प्रत्ययः। घ-प्रत्यये घकारानुबन्धलोपः, घञ्-प्रत्यये च घकार-ञकारानुबन्धलोपः। 'शीलं स्वभावे सद्वृत्ते' इत्यमरः। 'शुचौ तु चरिते शीलम्' इति चामरः। 'शीलं स्वभावे सद्वृत्ते' इति विश्वः। 'निष्ठा च शीलं चारित्रं चरित्रं तथा' इति रत्नकोषः। 'शीलं स्वभावे सद्वृत्ते' इति मेदिनी।

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by S3 Foundation USA

शुक्रम् नपुं०। इत्यत्र '**शुक्रमदेवतायाम्**' (**लि० सू० ९१**) **इति अदेवतावाचकस्य नपुंसकलिङ्गता, देवतावाचकस्य तु पुँल्लिङ्गता एव**। शोचति शोकं करोति यत्राशात् तत् शुक्रम् **अथवा** शुच्यते पवित्रः भवति येन तत् शुक्रम् **अथवा** शोचति विरही जनः यस्मिन् तत् शुक्रम्। शुच शोके (भ्वा० प०), शुचिर् पूतीभावे (दि० आ०) 'ऋज्रेन्द्राग्र-वज्र-विप्र-कुब्र-चुब्र-क्षुर-खुर-भद्रोग्र-भेर-भेल-शुक्र-शुक्ल-गौर वन्रेरा-मालाः' (उ० २। २९) इति रन्-प्रत्ययः धातोः चकारस्य च ककारः, निपातनात् 'पुगन्तलघूपधस्य च' (पा० अ० ७। ३। ८६) इति धातोः उपधायाः उकारस्य प्राप्तस्य ओ-गुणस्य अभावश्च। नकारानुबन्धलोपः। **अथवा** शोकति गच्छति येन तत् शुक्रम्। शुक गतौ (भ्वा० प०) पूर्ववत् रन्-प्रत्ययः धातोः उपधाया उकारस्य च निपातनात् ओ-गुणाभावः। प्रत्यये नकारानुबन्धलोपः। **अथवा** शवनं शुः गतिः इत्यर्थः। शु गतौ (भ्वा० प०) 'सम्पदादिभ्यः क्विप्' (वा० पा० अ० ३। ३। ९४) इति क्विप्-प्रत्ययः। तस्य सर्वापहारि-लोपः। एवं शु-शब्दः निष्पद्यते। शुं = गति क्राम्यति इति शुक्रम्। शु + क्रमु पादविक्षेपे (भ्वा० प०) 'अन्येष्वपि दृश्यते' (पा० अ० ३। २। १०१) इति ड-प्रत्ययः। डकारानु-बन्धलोपः। 'टेः' (पा० अ० ६। ४। १४३) इति धातोः अम् इत्यस्य टेर्लोपः। एवम् अपि शुक्र-शब्दः निष्पद्यते। 'सप्तार्चिर्दमुनाः शुक्रश्चित्रभानुर्विभावसुः', 'शुक्रो दैत्यगुरुः काव्य उशना भार्गवः कविः', 'ज्येष्ठे शुक्रः', 'शुक्रं तेजोरेतसी च बीजवीर्येन्द्रियाणि च' इत्यमरः। 'शुक्रं तेजोऽक्षिरुजोः' इति हैमः। 'शुक्रः स्याद् भार्गवे ज्येष्ठमासे वैश्वानरे पुमान्। रेतोऽक्षिरुग्भिदोः क्लीबम्' इति मेदिनी। 'शुक्रम् उदकनाम' (निघं० १। १२)। 'शुक्रं शोचतेर्ज्वलतिकर्मणः' (निरु० ८। ११)। 'शुक्रं ह्येतच्छुक्रेण क्रीणाति यत् सोमं हिरण्येन' (शत० ब्रा० ३। ३। ३। ६)। 'अत्तैव शुक्र आद्यो मन्थी (ग्रहः)' (शत० ब्रा० ४। २। १। ३)। 'एत द्वा एष एव शुक्रो य एष (आदित्यः) तपति तद् यदेष तपति तेनैष शुक्रः' (शत० ब्रा० ४। २। १। १)। 'एष वै शुक्रो य एष (आदित्यः) तपत्येष उ एव बृहन्' (शत० ब्रा० ४।५।९।६)। 'असौ वा आदित्यः शुक्रः' (शत० ब्रा० ९। ४। २। २१)। 'एष वै शुक्रो य एष (आदित्यः) तपति' (शत० ब्रा० ४। ३। १। २६)। 'सत्यं वै शुक्रम्' (शत० ब्रा० ३। ९। ३। २५)। 'शुक्रं हिरण्यम्' (तै० ब्रा० १। ७। ६। ३)। 'शुक्रा ह्यापः' (तैत्ति० ब्रा० १। ७। ६। ३)। 'ज्योतिः शुक्रमसौ (आदित्यः)' (ऐत० ब्रा० ७। १२)। 'ज्योतिर्वै शुक्रं हिरण्यम्' (ऐत० ब्रा० ७। १२)। 'तत्र ह्यादित्यः शुक्रश्चरति' (गोप० पू० २। ९)। 'तेजोऽसि शुक्रमस्यमृतमसि' (शत० ब्रा० १। ३। ३। २८)। 'अत्ता वै शुक्रः (ग्रहः)' (शत० ब्रा० ५। ४। ४। २०)। 'एतौ शुक्रश्च शुचिश्च एव ग्रैष्मौ

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by S3 Foundation USA

(मासौ) स यदेतयोर्बलिण्ठं तपति तेनो हैतौ शुक्रश्च शुचिश्च' (शत० ब्रा० ४। ३। १। १५)। 'शुक्रः (निर्म्मलः) सोमः' (तां० ब्रा० ६। ६। ९)। 'शुक्रो देवेषु रोचते' (मैत्रा० सं० २। ७। ५)। 'यजमान-देवत्यो वै शुक्रः' (काठ० सं० २७। ८)।

शुक्लः, शुक्ला, शुक्लम् पुं०, स्त्री०, नपुं०। इत्यत्र **'गुणवचनं च' (लि० सू० १८६) इति पुँल्लिङ्गता स्त्रीलिङ्गता नपुंसकलिङ्गता च**। शोचति शोकं करोति, शोकति गच्छति वा मनः यस्मिन् सः शुक्लः, यस्यां सा शुक्ला यस्मिन् वा तत् शुक्लम्। शुच शोके (भ्वा० प०), शुक गतौ (भ्वा० प०) 'ऋज्रेन्द्राग्र-वज्र-विप्र-चुब्र-क्षुर-खुर-भद्रोग्र-भेर-भेल-शुक्र-शुक्ल-गौर-वन्रेरा-मालाः' (उ० २। २९) इति रन्-प्रत्ययः धातोः चकारस्य ककारः, निपातनात् धातोः उपधायाः उकारस्य 'पुगन्तलघूपधस्य च' (पा० अ० ७। ३। ८६) इति प्राप्तस्य ओ-गुणस्य अभावः। प्रत्यये नकारानुबन्धलोपः। 'कपिलकादीनां संज्ञाछन्दसोर्वा रोलमापद्यते' (वा० पा० अ० ८। २। १८) इतिं रस्य लः। 'शुक्ल-शुभ्र-शुचि-श्वेत-विशद-श्येत-पाण्डराः' इत्यमरः। 'शुक्लो योगान्तरे सिते नपुंसकं तु रजते' इत्यपि अमरकोषसुधा-व्याख्यायां भानुजिदीक्षितः। 'शुक्लं तद् यच्छुक्लं तद्वाचो रूपमृचोऽग्नेर्मृत्योः' (जैमि० ब्रा० १। २५। ८)। 'शुक्लं साम' (काठ० सं० २३। ३)।

शुक्लता स्त्री०। इत्यत्र **'तलन्तः' (लि० सू० १७) स्त्रीलिङ्गता**। शुक्ल-शब्दः पूर्वं व्याख्यातः। शुक्लस्य भावः शुक्लता। शुक्ल-शब्दात् 'तस्य भावस्त्व-तलौ' (पा० अ० ५। १। ११९) इति तल्-प्रत्ययः। लकारानुबन्धलोपः। 'अजाद्यतष्टाप्' (पा० अ० ४। १। ४) इति टाप्-प्रत्ययः। टकार-पकारानुबन्धलोपः। 'अकः सवर्णे दीर्घः' (पा० अ० ६। १। १०१) इति अकारस्य आकारस्य च आ-दीर्घः। एवं शुक्लता निष्पद्यते।

शुक्लत्वम् नपुं०। इत्यत्र **'त्व-ष्यञौ तद्धितौ' (लि० सू० १२१) इति नपुंसकलिङ्गता**। शुक्ल-शब्दः पूर्वं व्याख्यातः। शुक्लस्य भावः शुक्लत्वम्। शुक्ल-शब्दात् 'तस्य भावस्त्व-तलौ' (पा० अ० ५। १। ११९) इति त्व-प्रत्ययः। एवं शुक्लत्वं निष्पद्यते।

शुल्वम् नपुं०। इत्यत्र **'बल-कुसुम-शुल्ब-पत्तन-रणाभिधानानि' (लि० सू० १५८) इति नपुंसकलिङ्गता**। शोचति शुच्यते वा यत् यत् शुल्बम्। शुच शोके (भ्वा० प०) 'उल्बादयश्च' (उ० ४। ९६) इति बन्-प्रत्ययः, धातोः चकारस्य च लकारः एवं 'पुगन्तलघूपधस्य च' (पा० अ० ७। ३। ८६) इति धातोः उपधायाः उकारस्य प्राप्तस्य

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by S3 Foundation USA

ओ-गुणस्य अभावः। **अथवा** शुल्बयति शुल्ब्यते वा इति शुल्बम्। शुल्ब माने (चु० उ०) 'अकर्त्तरि च कारके संज्ञायाम्' (पा० अ० ३। ३। १९) इति घ-प्रत्ययः। घकारानुबन्धलोपः। 'अथ ताम्रकम्। शुल्बं म्लेच्छमुखं द्व्यष्टवरिष्ठोदुम्बराणि च' तथा 'शुल्बं वराटकः स्त्री तु रज्जु त्रिषु वटी गुणः' इत्यमरः। 'शुल्बं ताम्रे यज्ञकर्मण्याचारे जलसन्निधौ' इति मेदिनी।

शुष्कम्, शुष्कः नपुं०, पुं०। **इत्यत्र 'कण्टकानीक-सरक-मोदक-चषक-मस्तक-पुस्तक-तडाक-निष्क-शुष्क-वर्चस्क-पिनाक-भाण्डक-पिण्डक-कटक-शण्डक-पिटक-तालक-फलक-पुलाकानि च नपुंसके च' (लि० सू० ६३) इति नपुंसकलिङ्गता पुँल्लिङ्गता च।** यत् शुष्यति तत् शुष्कं यः शुष्यति स शुष्कः वा। शुष शोषणे (दि० प०) 'सृ-वृ-भू-शुषि-मुषिभ्यः कक्' (उ० ३। ४१) इति कक्-प्रत्ययः। ककारानुबन्धलोपः। प्रत्ययस्य कित्त्वात् तस्मिन् परे 'क्ङिति च' (पा० अ० १। १। ५) इति निषेधात् 'पुगन्तलघूपधस्य च' (पा० अ० ७। ३। ८६) इति धातोः उपधायाः उकारस्य प्राप्तः ओ-गुणः न भवति। **अथवा** शुष्यति स्म इति भूतार्थे शुप्-धातोः 'निष्ठा' (पा० अ० ३। २। १०२) इति क्त-प्रत्ययः। ककारानुबन्धलोपः। अत्र अपि कित्त्वात् धातोः उपधायाः उकारस्य 'पुगन्तलघूपधस्य च' (पा० अ० ७। ३। ८६) इति प्राप्तः ओ-गुणः 'क्ङिति च' (पा० अ० १। १। ५) इति निषेधात् न भवति। 'शुषः कः' (पा० अ० ८। २। ५१) इति क्त-प्रत्ययस्य तकारस्य क-विधानेन शुष्क-शब्दः निष्पद्यते।

शूर्पम्, शूर्पः नपुं०, पुं०। **इत्यत्र 'शूर्प-कुतुप-कुणप-द्वीप-विटपानि नपुंसके च' (लि० सू० ७९) इति नपुंसकलिङ्गता पुँल्लिङ्गता च।** यत् शृणाति यः शृणाति येन वा शीर्यते तत् शूर्पं सः शूर्पः वा। शृ हिंसायां (क्र्या० प०) 'सू-शृभ्यां निच्च' (उ० ३। २६) इति प-प्रत्ययः, स च नित्। नित्त्वं स्वरार्थम्। बाहुलकात् 'उरण् रपरः' (पा० अ० १। १। ५१) इति सहकारेण धातोः ऋकारस्य उर्-आदेशः। 'हलि च' (पा० अ० ८। २। ७७) इति उर् इत्यस्य उकारस्य ऊ-दीर्घः। **अथवा** यत् शूर्पयति यः वा शूर्पयति येन वा शूर्प्यते तत् शूर्पम्, सः शूर्पः वा। शूर्प माने (चु० उ०) 'नन्दि-ग्रहि-पचादिभ्यो०' (पा० अ० ३। १। १३४) इति अच्-प्रत्ययः अथवा 'पुंसि संज्ञायां घः प्रायेण' (पा० अ० ३। ३। ११८) इति घ-प्रत्ययः। अच्प्रत्यये चकारानुबन्धलोपः, घ-प्रत्यये तु घकारानुबन्धलोपः। 'प्रस्फोटनं शूर्पमस्त्री' इत्यमरः।

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by S3 Foundation USA

शूलः, शूलम् पुं०, नपुं०। इत्यत्र **'शील-मूल-मङ्गल-साल-कमल-तल-मुसल-कुण्डक-पलल-मृणाल-वाल-निगल-पलाल-बिडाल-खिल-शूलाः पुंसि च' (लि० सू० १४३) इति पुँल्लिङ्गता नपुंसकलिङ्गता च**। शूलति इति शूलः शूलं वा। शूल रुजायां (भ्वा० प०) 'इगुपधज्ञाप्रीकिरः कः' (पा० अ० ३। १। १३५) इति क-प्रत्ययः। ककारानुबन्धलोपः। **अथवा** शूलनं शूलः शूलं वा। उक्त-शूल-धातोः 'भावे' (पा० अ० ३। ३। १८) इति घञ्-प्रत्ययः। घकार-ञकारानुबन्धलोपः। **अथवा** शूल्यते अनेन इति शूलः शूलं वा। उक्त-शूल-धातोः 'पुंसि संज्ञायां घः प्रायेण:' (पा० अ० ३। ३। ११८) इति करणे घ-प्रत्ययः। घकारानुबन्धलोपः। 'अस्त्री शूलं रुगायुधम्' इत्यमरः। 'शूलोऽस्त्री रोग आयुधे। मृत्यु-केतनयोगेषु' इति मेदिनी।

शृङ्गः, शृङ्गम् पुं०, नपुं०। इत्यत्र **'शृङ्गार्घ-निदाघोद्यम-शल्य-दृढाः' (लि० सू० १७८) इति पुँल्लिङ्गता नपुंसकलिङ्गता च**। शृणाति हिनस्ति येन स शृङ्गः तत् शृङ्गं वा, शीर्यते हिंस्यते वा येन स शृङ्गः तत् शृङ्गं वा। शृ हिंसायां (क्र्या० प०) 'शृणातेर्ह्रस्वश्च' (उ० १। २६) इति गन्-प्रत्ययः धातोः ॠकारस्य ऋकारः ह्रस्वः प्रत्ययस्य कित्त्वं नुडागमश्च। प्रत्यये नकारानुबन्धलोपः। आगमे उटावितौ लोपः एवं शृन् ग इत्यवस्थायां 'सार्वधातुकार्धधातुकयोः' (पा० अ० ७। ३। ८४) इति धातोः ऋकारस्य 'उरण् रपरः' (पा० अ० १। १। ५१) इति सहकारेण प्राप्तः अर्-गुणः 'क्ङिति च' (पा० अ० १। १। ५) इति निषेधात् न भवति। 'नश्चापदान्तस्य झलि' (पा० अ० ८। ३। २४) इति नकारस्य अनुस्वारः। 'अनुस्वारस्य ययि परसवर्णः' (पा० अ० ८। ४। ५८) इति अनुस्वारस्य परसवर्णः ङकारः। 'कूटोऽस्त्री शिखरं शृङ्गम्', 'कूर्चशीर्षो मधुरकः शृङ्ग-ह्रस्वाङ्ग-जीवकाः' तथा 'शृङ्गं प्राधान्यसान्वोश्च' इत्यमरः। 'शृङ्गाणि ज्वलतोनाम' (निघं० १। १७)। 'शृङ्गं प्रभुत्वे शिखरे चिह्ने क्रीडाम्बुयन्त्रके। विषाणोत्कर्षयोश्चाथ शृङ्गः स्यात् कूर्चशीर्षके। स्त्री विषायां स्वर्ण- मीनभेदयोर्ऋषभौषधौ' इति मेदिनी। 'शृङ्गं विषाणमाख्यातं शैलाग्रे जलयन्त्रके। मीनौषधि-सुवर्णानां भेदे शृङ्गी प्रयुज्यते' इति उत्पलिनी कोषः। 'चत्वारि शृङ्गा इति वेदा वा एतदुक्ताः' (काठ० संकलन २५। १)।

शृङ्गाटकम् नपुं०। इत्यत्र **'किरीट-मुकुट-वट-वीट-शृङ्गाटक-राट-लोष्टानि नपुंसके' (लि० सू० ६५) इति नपुंसकलिङ्गता**। शृङ्ग-शब्दः पूर्वं व्याख्यातः। शृङ्गं प्राधान्यम् अटति इति शृङ्गाटः शृङ्ग + अट गतौ (भ्वा० प०) 'कर्मण्यण्' (पा० अ० ३। २। १) इति अण्-प्रत्ययः। णकारानुबन्धलोपः। 'अत उपधायाः' (पा० अ०

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by S3 Foundation USA

७।२।११६) इति धातोः उपधायाः अकारस्य आ-वृद्धिः। 'अकः सवर्णे दीर्घः' (पा० अ० ६। १। १०१) इति अकारस्य आकारस्य च आ-दीर्घः। एवं शृङ्गाट-शब्दः निष्पद्यते। पुनः शृङ्गाटम् एव शृङ्गाटकं भवति। (सर्वप्रातिपदिकेभ्यः स्वार्थे कन्) इति कन्-प्रत्ययः। नकारानुबन्धलोपः। 'शृङ्गाटक-चतुष्पथे' इत्यमरः। 'शृङ्गाटकं भवेद् वारि-कण्टके चतुष्पथे' इति अमरकोष-सुधाव्याख्यायां भानुजिदीक्षितः।

शृङ्गारम्, शृङ्गारः नपुं०, पुं०। इत्यत्र '**चक्र-वज्रान्धकार-सारावारपार-क्षीर-तोमर-शृङ्गार-भृङ्गार-मन्दारोशीर-तिमिर-शिशिराणि नपुंसके च**' (**लि० सू० ९२**) **इति नपुंसकलिङ्गता पुँल्लिङ्गता च**। शृङ्ग-शब्दः पूर्वं व्याख्यातः। शृङ्गं प्राधान्यम् ऋच्छति इयर्त्ति ऋणाति गच्छति वा इति शृङ्गारं शृङ्गारः वा। शृङ्ग + ऋ गति-प्रापणयोः (भ्वा० प०) ऋ गतौ (जु० प०), ॠ गतौ (क्र्या० प०) 'कर्मण्यण्' (पा० अ० ३। २। १) इति अण्-प्रत्ययः। णकारानुबन्धलोपः। 'अचोञ्णिति' (पा० अ० ७। २। ११५) इति धातोः ऋकारस्य ॠकारस्य च 'उरण् रपरः' (पा० अ० १। १। ५१) इति सहकारेण आर्-वृद्धिः। एवं शृङ्ग आर् आ इति स्थितौ 'अकः सवर्णे दीर्घः' (पा० अ० ६। १। १०१) इति अकारस्य आकारस्य च आ-दीर्घे सति शृङ्गार-शब्दः निष्पद्यते। 'शृङ्गारः शुचिरुज्ज्वलः' इत्यमरः। 'शृङ्गारो गज-मण्डने। सुरते रसभेदे च शृङ्गारं नागसम्भवे (चूर्णे लवङ्गपुष्पे च)' इति हैमः।

शौक्ल्यम् नपुं०। **इत्यत्र 'त्व-ष्यञौ तद्धितौ' (लि० सू० १२१) इति नपुंसकलिङ्गता।** शुक्ल-शब्दः पूर्वं व्याख्यातः। शुक्लस्य भावः कर्म वा इति शौक्ल्यम्। शुक्ल-शब्दात् 'गुणवचन-ब्राह्मणादिभ्यः कर्मणि च' (पा० अ० ५। १२४) इति ष्यञ्-प्रत्ययः। षकार-ञकारानुबन्धलोपः। 'यस्येति च' (पा० अ० ६। ४। १४८) इति लकार पर-वर्त्तिनः अकारस्य लोपः। 'तद्धितेष्वचामादेः' (पा० अ० ७। २। ११७) इति शकार परवर्त्तिनः उकारस्य औ-वृद्धिः। एवं शौक्ल्य-शब्दः निष्पद्यते।

श्मशानम् नपुं०। **इत्यत्र 'जघनाजिन-तुहिन-कानन-वन-वृजिन-विपिन-वेतन-शासन-सोपान-मिथुन-श्मशान-रत्न-निम्न-चिह्नानि नपुंसके' (लि० सू० ७५) इति नपुंसकलिङ्गता।** श्म = शरीरं शेते शवरूपे यत्र तत् श्मशानम्। श्म + शीङ् शयने (अ० आ०) 'पृषोदरादीनि यथोपदिष्टम्' (पा० अ० ६। ३। १०९) इति आन-प्रत्ययः धातोः ईकारस्य लोपश्च। 'श्मशानं स्यात् पितृवनम्' इत्यमरः। 'अथास्मै श्मशानं कुर्वन्ति गृहान् वा प्रज्ञानं वा यो वै कश्च म्रियते स शवस्तस्माऽएतदन्नं करोति तस्माच्छवान्नं ह वै तच्छ्मशानमित्याचक्षते परोक्षं श्मशा उ हैव नाम पितृणामत्तारस्ते हाऽमुष्मिँल्लोकेऽ-

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by S3 Foundation USA

ऽकृतश्मशानस्य साधुकृत्यामुपदम्भयन्ति तेभ्य एतदन्नं करोति तस्माच्छ्मशान्नं श्मशानं ह वै तच्छ्मशानमित्याचक्षते परोऽक्षम्' (शत० ब्रा० १३।८।१।१)। 'श्मशानं श्मशयनं, श्म शरीरम्' (निरु० ३।६)।

श्मश्रु नपुं०। **इत्यत्र 'श्मश्रु-जानु-वसु-स्वाद्वश्रु-जतु-त्रपु-तालूनि नपुंसके' (लि० सू० ५४) इति नपुंसकलिङ्गता**। श्म = श्रिञ् सेवायां (भ्वा० उ०) 'श्मनि श्रयतेर्डुन्' (उ० ५।२८) इति डुन्-प्रत्ययः। डकार-नकारानुबन्धलोपः। डित्त्वात् 'टेः' (पा० अ० ६।४।१४३) इति धातोः इकारस्य टेर्लोपः। **अथवा** श्मनि मुखे श्रूयते यत् तत् श्मश्रु। श्म + श्रु श्रवणे (भ्वा० प०) 'मितद्र्वादीनामुपसंख्यानम्' (वा० पा० अ० ३।२।१८०) इति डु-प्रत्ययः। उकारानुबन्धलोपः। डित्त्वात् अत्रापि 'टेः' (पा० अ० ६।४।१४३) इति धातोः उकारस्य टेर्लोपः। **अथवा** श्रवणं श्रु। श्मनि मुखे श्रु यस्य तत् श्मश्रु। श्म + श्रु श्रवणे (भ्वा० प०) 'सम्पदादिभ्यः क्विप्' (वा० पा० अ० ३।३।४) इति क्विप्-प्रत्ययः। तस्य सर्वापहारिलोपः। 'तद्वृद्धौ श्मश्रु पुंमुखे' इत्यमरः। 'श्मश्रुलोम श्मनि श्रितं भवति' (निरु० ३।६)।

श्राद्धम् नपुं०। **इत्यत्र 'श्राद्ध-कुलिश-दैव-पीठ-कुण्डाङ्काङ्ग-दधि-सक्थ्यक्ष्यास्यास्पदाकाश-कण्व-बीजानि' (लि० सू० १६६) इति नपुंसकलिङ्गता**। श्रद्धा अस्ति अस्मिन् इति श्राद्धम्। श्रद्धा-शब्दात् 'प्रज्ञाश्रद्धाचार्येभ्यो णः' (पा० अ० ५।२।१०१) इति ण-प्रत्ययः। णकारानुबन्धलोपः। 'यस्येति च' (पा० अ० ६।४।१४८) इति द्धकार-परवर्त्तिनः आकारस्य लोपः। 'तद्धितेष्वचामादेः' (पा० अ० ७।२।११७) इति श्रकार-परवर्त्तिनः अकारस्य आ-वृद्धिः। 'श्राद्धं तत्कर्म शास्त्रतः' इत्यमरः। 'हस्ति-छायायां (मघात्रयोदश्योर्योगे) श्राद्धं दद्यात्' (काठकसंक० ५६ : २-३)।

श्रीः स्त्री०। **इत्यत्र 'य्वन्तमेकाक्षरम्' (लि० सू० १२) इति स्त्रीलिङ्गता**। यां श्रयन्ति जनाः श्रीयते वा जनैः सा श्रीः। श्रिञ् सेवायाम् (भ्वा० उ०) 'क्विब् वचि-प्रच्छि-श्रि-श्रु-द्रु-प्रु-ज्वां दीर्घोऽसम्प्रसारणं च' (ड० २।५८) इति क्विप्-प्रत्ययः, धातोः इकारस्य दीर्घः ईकारः च। क्विपः सर्वापहारिलोपः। 'लक्ष्मीः पद्मालया पद्मा कमला श्रीर्हरिप्रिया' इत्यमरः। 'सम्पत्तिः श्रीश्च लक्ष्मीश्च' इति चामरः। 'लक्ष्मी-सरस्वती-धात्रिवर्ग-सम्पद्-विभूति-शोभासु। उपकरणवेशरचनाविधानेषु च श्रीरिति प्रथिता' इति व्याडिः 'श्रीर्वेशरचनाशोभा-भारतीसरलद्रुमे। लक्ष्मं त्रिवर्ग-सम्पत्तौ वेषोपकरणे मतौ' इति विश्वः। 'श्रीर्देवाः' (शत० ब्रा० २।१।४।९)। 'श्रीर्वै राष्ट्रम्' (शत० ब्रा० ६।७।

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by S3 Foundation USA

३।७) 'श्रियै पामा (निवर्तते)' (शत० ब्रा० १०।२।६।१९)। 'रात्रिरेव श्रीः श्रियां हैतद् रात्र्यां सर्वाणि भूतानि संवसन्ति' (शत० ब्रा० १०।२।६।१६)। 'श्रीर्वै स्वरः' (शत० ब्रा० ११।४।२।१०)। 'तस्याः (श्रियः) अग्निरन्नाद्यमादत्त। सोमो राज्यं वरुणः साम्राज्यं मित्रः क्षत्रमिन्द्रो बलं बृहस्पतिर्ब्रह्म-वर्चसं सविता राष्ट्रं पूषा भगं सरस्वती पुष्टिं त्वष्टा रूपाणि' (शत० ब्रा० ११।४।३।३)। 'श्रीर्वै राष्ट्रस्य भावः' (शत० ब्रा० १२।२।९।३)। 'यदा वै पुरुषः श्रियं गच्छति वीणास्मै वाद्यते' (शत० ब्रा० १३।१।५।१)। 'श्रीर्वै राष्ट्रस्याग्रम्' (शत० ब्रा० १३।२।९।७)। 'श्रीर्वै पिलिप्पिला' (शत० ब्रा० १३।२।६।१६)। 'श्रीर्वै सोमः' (शत० ब्रा० ४।१।३।९) तथा (मैत्रा० सं० १।११।६)। 'श्रीर्वा एक-शफम् अश्वाश्वतर-गर्दभरूपम्' (तैत्ति० ब्रा० ३।९।८।२)। 'श्रीः पृष्ठ्यानि' (कौषी० ब्रा० २१।५)। 'एकस्था वै श्रीः' (कौषी० ब्रा० १८।९)। 'श्रीर्वै वरुणः' (कौषी० ब्रा० १८।९)। 'षड् वा ऋतवस्संवत्सर-श्रीः' (जैमि० ब्रा० २।१४२)। '(सविता) श्रिया स्त्रियं (समदधात्)' (गोप० पू० १।३४) 'बहिर्धैव वै श्रीः' (जैमि० उ० १।४।६)। 'श्रीर्वै श्रावन्तीयम् (साम)' (तां० ब्रा० १२।४।५)। 'श्रीर्हि मनुष्यस्य सुवर्गो लोकः' (तैत्ति० सं० ७।४।४।२)। 'प्रजापतिः स्वर्गो लोकः। श्रीस्तत्' (जैमि० ब्रा० २।१९५)। 'श्रीर्वै स्वरः (स्वर्गो लोकः)' (शत० ब्रा० ११।४।२।१०)।

श्रोणिः पुं०, स्त्री०। इत्यत्र **'श्रोणि-योन्यूर्मयः पुंसि च' (लि० सू० ८) इति पुँल्लिङ्गता स्त्रीलिङ्गता च।** शृणोति इति श्रोणिः। श्रु श्रवणे (भ्वा० प०) 'वहि-श्रि-श्रु-यु-द्रु-ग्ला-हा-त्वरिभ्यो तित्' (उ० ४।५२) इति नि-प्रत्ययः स च नित्। नित्त्वं स्वरार्थम्। 'सार्वधातुकार्धधातुकयोः' (पा० अ० ७।३।८४) इति धातोः उकारस्य ओ-गुणः। 'अट्-कुप्वाङ्-नुम्-व्यवायेऽपि' (पा० अ० ८।४।२) इति नस्य णः। **अथवा** श्रोणति इति श्रोणिः। श्रोणृ संघाते (भ्वा० प०) 'सर्वधातुभ्य इन्' (उ० ४।११९) इति इन्-प्रत्ययः। नकारानुबन्धलोपः। 'कटिः श्रोणिः ककुद्मती' इत्यमरः। 'श्रोणिः श्रोणतेर्गतिचलनकर्मणः। श्रोणिश्चलतीव गच्छतः' (निरु० ४।३)। 'श्रोणिः द्वियजुः (इष्टका)' (शत० ब्रा० ७।५।१।३५)। 'जगती छन्द आदित्यो देवता श्रोणी' (शत० ब्रा० १०।३।२।६)।

श्वनिशा, श्वनिशम् नपुं०। इत्यत्र **'सुरासेनाच्छायाशालानिशा स्त्रियां च' (लि० सू० १२९) इति स्त्रीलिङ्गता नपुंसकलिङ्गता च।** शुनः निशा श्वनिशा श्वनिशं वा। श्वन् अस्य शब्दस्य निशा-शब्देन सह 'षष्ठी' (पा० अ० २।२।८) इति समासः। सुपो

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by S3 Foundation USA

लुक्। 'नलोपः प्रातिपदिकान्तस्य' (पा० अ० ८।२।७) इति श्वन् इत्यस्य नकारस्य लोपः। एवं श्वनिशा इति व्युत्पद्यते। 'विभाषा सेनासुराच्छाया-शाला-निशानाम्' (पा० अ० २।४।२५) इति अपि विकल्पेन श्वनिशाशब्दस्य नपुंसकलिङ्गता। तेन 'ह्रस्वो नपुंसके प्रातिपदिकस्य' (पा० अ० १।२।४७) इति श्वनिशाशब्दस्य ह्रस्वत्व-विधानात् श्वनिश-शब्दः नपुंसकलिङ्गे निष्पद्यते। अस्य प्रथमा-द्वितीयैकवचने श्वनिशम् भवति। 'श्वनिशं कृष्णचतुर्दशी। तस्यां किल केचिच्छ्वान उपवसन्ति। एतच्च शाबरभाष्ये तिर्यगधिकरणे स्पष्टम्' इति सिद्धान्तकौमुद्यां तत्पुरुषसमासप्रकरणे तत्त्वबोधिनीकारः।

श्वभ्रम् नपुं०। इत्यत्र **'द्वाराग्र-स्फार-तक्र-वक्र०' (लि० सू० ९०) इति नपुसंक-लिङ्गता।** श्वभ्रयति इति श्वभ्रम्। श्वभ्र गतौ (चु० उ०) 'सत्यापपाश०' (पा० अ० ३।१।२५) इति णिच्-प्रत्ययः। णकार-चकारानुबन्धलोपः। 'नन्दिग्रहि-पचादिभ्यो०' (पा० अ० ३।१।१३४) इति अच्-प्रत्ययः। चकारानुबन्धलोपः। 'णेरनिटि' (पा० अ० ६।४।५१) इति अथवा 'बहुलमन्यत्रापि संज्ञाछन्दसोः' (उ० २।२३) इति णिच्-प्रत्ययस्य इकारस्य लोपः। एवं श्वभ्र-शब्दः निष्पद्यते। **अथवा** शु शोभनम् अभ्रम् आकाशम् अत्र वा इति श्वभ्रम्। शु + अभ्र इति स्थितौ 'इको यणचि' (पा० अ० ६।१।७७) इति शु इत्यस्य उकारस्य व्-यणादेशः। एवमपि श्वभ्र इति निष्पद्यते। 'छिद्रं निर्व्यथनं रोकं रन्ध्रं श्वभ्रं वपा शुषिः' इत्यमरः।

षण्डः पुं०। **इत्यत्र 'षण्ड-मण्ड-करण्ड-भरण्ड-वरण्ड-तुण्ड-गण्ड-मुण्ड-पाषण्ड-शिखण्डाः' (लि० सू० ११२) इति पुँल्लिङ्गता।** सनति सम्भजति इति षण्डः। षण सम्भक्तौ (भ्वा० प०) सनोति ददाति वा इति षण्डः। षणु दाने (त० उ०) 'ञमन्ताड्डः' (उ० १।११४) इति ड-प्रत्ययः। 'धात्वादेः षः सः' (पा० अ० ६।१।६२) इति धात्वादेः षस्य सत्वं तु अत्र बाहुलकात् न भवति। 'षण्डो गोपतिरित्वरः' तथा 'अब्जादिकदम्बे षण्डमस्त्रियाम्' इत्यमरः। 'षण्डं पद्मादिसङ्घाते न स्त्री स्याद् गोपतौ पुमान्' इति मेदिनी। 'षण्डः स्मृतो बलीवर्दे भवेत् षण्डं तु कानने' इति अजयः। 'षण्डः समूहे' इति सारस्वतकोषः।

षट् त्रि० लि०। **इत्यत्र 'ष्णान्ता संख्या' (लि० सू० १८५) इति त्रिलिङ्गता।** सहते इति षट्। षह मर्षणे मर्षणं नाम प्रसहनं तच्च क्षमा अभिभवश्चेति सिद्धान्तकौमुद्यां भट्टोजिदीक्षितः। 'क्विप् च' (पा० अ० ३।२।७६) इति क्विप्-प्रत्ययः। तस्य सर्वापहारि-लोपः। प्रथमैकवचने सु-प्रत्ययः। उकारानुबन्धलोपः। 'हो ढः' (पा० अ० ८।२।३१) इति हकारस्य ढकारः। 'हल्ङ्याब्भ्यो दीर्घात्सुतिस्यपृक्तं हल्' (पा० अ० ६।१।६८)

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by S3 Foundation USA

इति सुप्रत्ययस्य सकारस्य लोपः। 'झलो जशोऽन्ते' (पा० अ० ८। २। ३९) इति ढस्य डः। 'वाऽवसाने' (पा० अ० ८। ४। ५६) इति डकारस्य वैकल्पिकः टकारः। अत्र 'धात्वादेः षः सः' (पा० अ० ६। १। ६२) इति धातोः षस्य सकारः तु संज्ञापूर्वकविधेः अनित्यत्वात् बाहुलकाद् वा न भवति। **अथवा** षटति अवयवः इति षट्। (भवति) षट अवयवे (भ्वा० प०) पूर्ववत् क्विप्-प्रत्ययः। तस्य सर्वापहारिलोपः। संज्ञापूर्वकविधेः अनित्यत्वात् बाहुलकात् वा अत्र अपि धातोः आदेः षकारस्य 'धात्वादेः षः सः' (पा० अ० ६। १। ६२) इति सकारः न भवति। **अथवा** उक्त षट अवयवे धातोः 'पृषोदरादीनि यथोपदिष्टम्' (पा० अ० ६। ३। १०९) इति डषि-प्रत्ययः। डकारेकारानुबन्धलोपः। डित्त्वात् 'टेः' (पा० अ० ६। ४। १४३) इति धातोः अट् इत्यस्य टेर्लोपः। एवं संख्यावाचकः षष् अयं शब्दः निष्पद्यते। 'षट् पुनः सहतेः' (निरु० ४। २७)।

षष्टिः स्त्री०। इत्यत्र **'विंशत्यादिरानवतेः' (लि० सू० १३) इति स्त्रीलिङ्गता।** षड् दशतः परिमाणम् अस्य सङ्घस्य इति षष्टिः। 'पङ्क्ति-षष्टि-सप्तत्यशीति-नवति-शतम्' (पा० अ० ५। १। ५९) इति ति-प्रत्ययः, प्रकृतेः षण्णां दशतम् इत्यस्य षष् इत्यादेशश्च। 'ष्टुना ष्टुः' (पा० अ० ८। ४। ४१) इति ति-प्रत्ययस्य तकारस्य टकारः। एवं षष्टि इति निष्पद्यते।

सकृत् नपुं०। इत्यत्र **'वियज्जगत्-सकृच्छकन्-पृषच्छकृद्यकृदुदश्वितः' (लि० सू० १६४) इति नपुंसकलिङ्गता।** एकवारम् इति सकृत्। एकशब्दात् 'एकस्य सकृच्च' (पा० अ० ५। ४। १९) इति सुच्-प्रत्ययः एकशब्दस्य स्थाने सकृत् इत्यादेशश्च। सुच्-प्रत्यये उकार-चकारानुबन्धलोपः। अवशिष्टस्य सकारस्य 'संयोगान्तस्य लोपः' (पा० अ० ८। २। २३) इति लोपः। अयं शब्दः अव्ययः। **अथवा** करोति इति कृत्। डुकृञ् करणे (त० उ०) 'क्विप् च' (पा० अ० ३। २। ७६) इति क्विप्-प्रत्ययः। तस्य सर्वापहारिलोपः। 'ह्रस्वस्य पिति कृति तुक्' (पा० अ० ६। १। ७१) इति तुगागमः। उकार-ककारानुबन्धलोपः। कृता सह इति सकृत्। 'तेन सहेति तुल्ययोगे' (पा० अ० २। २। २८) इति कृत् इत्यनेन सह-शब्दस्य समासः 'प्रथमानिर्दिष्टं समास उपसर्जनम्' (पा० अ० १। २। ४३) इति सह-शब्दस्य उपसर्जनसंज्ञा। 'उपसर्जनं पूर्वम्' (पा० अ० २। २। ३०) इति उपसर्जनसंज्ञकस्य सहशब्दस्य पूर्वनिपातः। 'वोपसर्जनस्य' (पा० अ० ६। ३। ८२) इति सह-शब्दस्य सादेशः। एवम् अपि सकृत् अयं शब्दः निष्पद्यते। अस्य एव शब्दस्य 'वियज्जगत्०' (लि० सू० १६४) इति नपुंसकलिङ्गता भवति। 'सकृत् सहैकवारे चापि' इत्यमरः। 'सकृत् सहैकवारयोः' इत्यजयः।

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by S3 Foundation USA

सक्तु, सक्तुः नपुं०, पुं०। इत्यत्र **'सक्तुर्नपुंसके च' (लि० सू० ५९) इति नपुंसकलिङ्गता पुँल्लिङ्गता च।** यत् सच्यते समवेतं क्रियते तत् सक्तु, यः सच्यते समवेतः क्रियते वा सः सक्तुः। षच समवाये (भ्वा० उ०) 'सि-तनि-गमि-मसि-सच्यविधाञ्-क्रुशिभ्यस्तुन्' (उ० १। ६९) इति तुन्-प्रत्ययः। नकारानुबन्धलोपः। 'चोः कुः' (पा० अ० ८। २। ३०) इति धातोः चकारस्य ककारः। 'धात्वादेः षः सः' (पा० अ० ६। १। ६२) इति धातोः षकारस्य सकारः। 'सक्तुः सचतेः। दुर्धावो भवति। कसतेर्वा स्याद् विपरीतस्य। विकसितो भवति' (निरु० ४। ९)। 'प्रजापतेर्वा एतद्-रूपं यत् सक्तवः' (तैत्ति० ब्रा० ३।८।१४।५)। 'देवानां वा एतद्रूपं यत् सक्तवः' (शत० ब्रा० १२।२।१।३)।

सक्थि नपुं०। इत्यत्र **'श्राद्ध-कुलिश-दैव-पीठ-कुण्डाङ्काङ्ग-दधि-सक्थ्यक्ष्यास्पदाकाश-कण्व-बीजानि' (लि० सू० १६६) इति नपुंसकलिङ्गता।** सजति सज्यते वा यत् तत् सक्थि। षञ्ज सङ्गे (भ्वा० प०) 'असि-सञ्जिभ्यां क्थिन्' (उ० १५४) इति क्थिन्-प्रत्ययः। ककारानुबन्धलोपः। प्रत्ययस्य कित्त्वात् तस्मिन् परे 'अनिदितां हल उपधायाः क्ङिति' (पा० अ० ६। ४। २४) इति धातुस्थ ञ-रूपनकारलोपः। 'चोः कुः' (पा० अ० ८। २। ३०) इति धातोः जकारस्य गकारः। 'खरि च' (पा० अ० ८।४।५५) इति गकारस्य ककारः। 'धात्वादेः षः सः' (पा० अ० ६। १। ६२) इति धातोः षकारस्य सकारः। एवं सक्थि निष्पद्यते। 'सक्थि क्लीबे पुमानूरुः' इत्यमरः। 'सक्थि सचतेरासक्तोऽन्यस्मिन् कायः' (निरु० ९। २०)।

सख्यम् नपुं०। इत्यत्र **'यद्-य-ढग्-यग्-अञ्-अण्-कञ्-छाश्च' (लि० सू० १२३) इति नपुंसकलिङ्गता।** समानं ख्याति यः जनः स सखा अथवा समानं ख्यायते यः जनैः स सखा। समान + ख्या प्रकथने (अ० प०) 'समाने ख्यः स चोदात्तः' (उ० ४। १३८) इति इण्-प्रत्ययः स च डित् धातोः यकारस्य लोपः। समान-शब्दस्य उदात्तः स इत्यादेशश्च। प्रत्यये णकारानुबन्धलोपः। प्रत्ययस्य डित्त्वात् 'टेः' (पा० अ० ६। ४। १४३) इति धातोः आकारस्य टेर्लोपः। एवं सखि निष्पद्यते। 'अथ मित्रं सखा सुहृत्' इत्यमरः। 'सखायः समानख्यानाः' (निरु० ७। ३०)। 'सखायः सप्तपदा अभूम' (तैत्ति० ब्रा० ३। ७। ७। १)। पुनः सख्युः भावः कर्म वा सख्यम्। सखि-शब्दात् 'सख्युर्यः' (पा० अ० ५। १। १२६) इति य-प्रत्ययः 'यस्येति च' (पा० अ० ६। ४। १४८) इति सखि-शब्दस्य इकारस्य लोपः। एवं सख्य-शब्दः निष्पद्यते। 'उत त्व सख्ये स्थिरपीतमाहुर्नैनं हिन्वन्त्यपि वाजिनेषु' (ऋ० सं० ८। २। २३)।

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by S3 Foundation USA

सङ्गः पुं०। इत्यत्र 'पल्लव-पल्वल-कफ-रेफ-कटाह-निर्व्यूह-मठ-मणि-तरङ्ग-तुरङ्ग-गन्ध-मृदङ्ग-सङ्ग-समुद्र-पुङ्खाः' (लि० सू० ११६) इति पुँल्लिङ्गता। सञ्जनं सङ्गः। षञ्ज सङ्गे (भ्वा० प०) 'धात्वादेः षः सः' (पा० अ० ६।१।६२) इति धातोः षस्य सः। 'भावे' (पा० अ० ३।३।१८) इति घञ्-प्रत्ययः। घकार-ञकारानुबन्धलोपः। 'चजोः कु घिण्ण्यतोः' (पा० अ० ७।३।५२) इति धातोः जकारस्य गकारः। गकारे सति धातुस्थः ञकारः अपि गकार-सन्निकर्षेण ङकार-रूपं परसवर्णं प्राप्नोति। एवं सङ्ग-शब्दः व्युत्पद्यते। अथवा सङ्गच्छते इति सङ्गः। सम् + गम्लृ गतौ (भ्वा० प०) 'अन्येष्वपि दृश्यते' (पा० अ० ३। २। १०१) इति ड-प्रत्ययः। डकारानुबन्धलोपः। प्रत्ययस्य डित्त्वात् तस्मिन् परे 'टेः' (पा० अ० ६।४।१४३) इति धातोः अम् इत्यस्य टेर्लोपः। सम् + ग् + अ इत्यवस्थायां 'नश्चापदान्तस्य झलि' (पा० अ० ८।३।२४) इति मकारस्य अनुस्वारः। 'अनुस्वारस्य ययि पर-सवर्णः' (पा० अ० ८।४।५८) इति अनुस्वारस्य परसवर्णः ङकारः। एवं सङ्ग इति निष्पद्यते। 'मेलके सङ्ग-सङ्गमौ' इत्यमरः।

सत्यम् नपुं०। इत्यत्र 'धान्याज्य-सस्य-रूप्य-पण्य-वर्ण्य-वृष्य-हव्य-कव्य-काव्य-सत्यापत्य-मूल्य-शिक्य-कुड्य-मद्य-हर्म्य-तूर्य-सैन्यानि' (लि० सू० १६८) इति नपुंसकलिङ्गता। सति साधु सत्यम्। सत् इत्यस्मात् 'तत्र साधुः' (पा० अ० ४।४।९८) इति यत्-प्रत्ययः। 'सत्यं तथ्यमृतं सम्यक्' इत्यमरः। 'सत्यं शपथ-तथ्ययोः' इति चामरः। 'सत्यं कृते च शपथे तथ्ये च त्रिषु तद्वति' इति मेदिनी। 'सत् उदकनाम' (निघं० १। १२)। 'सत्यं कस्मात्? सत्सु तायते सत्प्रभवं भवतीति वा' (निरु० ३। १३)। 'सत्यं वै सुकृतस्थलोकः' (तैत्ति० ब्रा० ३।३।६।११)। 'सत्यं वा एतद् यद् वर्षति' (तै० ब्रा० १।७।५।३)। 'असावादित्यः सत्यम्' (तै० ब्रा० २।१।११। १) 'चक्षुर्वै सत्यम्' (तै० ब्रा० ३। ३।५।२)। 'सत्यं ह होतैषमासीत् यद् विश्वसृज आसत' (तै० ब्रा० ३।१२।९।३)। 'सत्यं सत्यं वै हिरण्यम्' (गो० उ० ३। १७)। 'एतद्वै मनुष्येषु सत्यं यच्चक्षुः' (गो० उ० २।२३)। 'श्रद्धा पत्नी सत्यं यजमानः' (ऐत० ब्रा० ७।१०)। 'सत्यं ब्रह्मणि (प्रतिष्ठितम्)' (ऐत० ब्रा० ३।६, गो० उ० ३। २)। 'आपः सत्येन (प्रतिष्ठिताः)' (ऐत० ब्रा० ३।६, गो० उ० ३।२)। 'सत्यसहिता वै देवाः' (ऐत० ब्रा० १।६)। 'सत्यमया उ देवाः' (कौषी० ब्रा० २।८)। 'सत्यं देवा अनृतं मनुष्याः' (शत० ब्रा० १।१।२।१७)। 'स यः सत्यं वदति यथाग्निं समिद्धं तं घृतेनाभिषिञ्चेदेवं हैनं स उद्दीपयति तस्य भूयो भूय एव तेजो भवति श्वः श्वः श्रेयान्

CC-0 Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by S3 Foundation USA

भवत्यथ योऽनृतं वदति यथाग्निं समिद्धं तमुदकेनाभिषिञ्चेदेवं हैनं स जासयति तस्य कनीयः कनीय एव तेजो भवति श्वः श्वः पापीयान् भवति तस्मादु सत्यमेव वदेत्' (शत० ब्रा० २।२।२।१९)। 'स यः सत्यं वदति स दीक्षितः' (कौषी० ब्रा० ७।३)। 'सत्ये ह्येव दीक्षा प्रतिष्ठिता भवति' (शत० ब्रा० १४।६।९।२४)। 'सत्यं ब्रह्म' (शत० ब्रा० १४।८।५।१)। 'एतत् खलु वै व्रतस्य रूपं यत् सत्यम्' (शत० ब्रा० १२।८।२।४)। 'एकं ह वाऽअस्य जितमनपजय्यमेवं यशो भवति य एवं विद्वान् सत्यं वदति' (शत० ब्रा० ३।४।२।८)। '(सत्यं) तदेतत् त्र्यक्षरं सत्यमिति स इत्येकमक्षरं तीत्येकमक्षरमित्येकमक्षरं प्रथमोत्तमे अक्षरे सत्यं मध्यतोऽनृतम्' (शत० ब्रा० १४।८।६।२)। 'सत्यं वद' (तै० आ० ७।११।१, तैत्ति० उ० १।११।१)। 'सत्यं च मे श्रद्धा च मे (यज्ञेन कल्पताम्)' (तै० सं० ४।७।२।१)। 'सत्यान्न प्रमदितव्यम्' (तैत्ति० आ० ७।११।१, तै० उ० १।११।१)। 'सत्येनैव जयति' (मैत्रा० सं० ४।३।८)।

सप्ततिः स्त्री०। इत्यत्र 'विंशत्यादिरानवतेः' (लि० सू० १३) इति स्त्रीलिङ्गता। सप्त दशतः परिमाणमस्य सङ्घस्य इति सप्ततिः। 'पङ्क्ति-विंशति-त्रिंशच्चत्वारिंशत्-पञ्चाशत्-षष्टि-सप्तत्यशीति-नवति-शतम्' (पा० अ० ५।१।५९) इति सप्तानां दशतां सप्तभावः ति-प्रत्ययः। एवं सप्तति इति निष्पद्यते।

समयः पुं०। इत्यत्र 'योपधः' (लि० सू० ८६) इति पुँल्लिङ्गता। सम् = सम्यक् एति गच्छति इति समयः। सम् + इण् गतौ (अ० प०) 'नन्दि-ग्रहि-पचादिभ्यो०' (पा० अ० ३।१।१३४) इति अच्-प्रत्ययः। चकारानुबन्धलोपः। 'सार्वधातुकार्धधातुकयोः' (पा० अ० ७।३।८४) इति धातोः इकारस्य ए-गुणः। 'एचोऽयवायावः' (पा० अ० ६।१।७८) इति एकारस्य अय्-आदेशः। **अथवा** सम् अयते इति समयः। सम् + अय गतौ (भ्वा० आ०) पूर्ववत् अच्-प्रत्ययः। चकारानुबन्धलोपः। **अथवा** समयनं समयः। सम् + इण् गतौ (अ० प०) 'अज्विधौ भयादीनामुपसंख्यानम्' (पा० अ० ३।३।५६) इति अच्-प्रत्ययः। चकारानुबन्धलोपः। पूर्ववत् धातोः इकारस्य ए-गुणः एकारस्य अयादेशश्च। **अथवा** सम् + अय गतौ (भ्वा० आ०) 'पूर्ववत्-अज्विधौ भयादीनामुपसंख्यानम्' (पा० अ० ३।३।५६) इति अच्-प्रत्ययः। चकारानुबन्धलोपः। 'कालो दिष्टोऽप्यनेहाऽपि समयोऽपि' इत्यमरः। 'समयाः शपथाचार कालसिद्धान्तसंविदः' इति चामरः। 'समयः शपथाचारसिद्धान्तेषु तथा धियि। क्रियाकारे च निर्देशे सङ्केते कालभाषयोः' इति मेदिनी। 'समयः शपथे भाषासम्पदोः कालसंविदोः। सिद्धान्ताचार-सङ्केत-नियमावसरेषु च। क्रियाकारे निदेशे च' इति अमरकोष-सुधाव्याख्यायां भानुजिदीक्षितः।

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by S3 Foundation USA

समानम्, समानः नपुं०, पुं०। इत्यत्र **'मान-यानाभिधान-नलिन-पुलिनोद्यान-शयनासन-स्थान-चन्दनालान-समान-भवन-वसन-सम्भावन-विभावन-विमानानि नपुंसके च' (लि० सू० ७६) इति नपुंसकलिङ्गता पुँल्लिङ्गता च।** सम् = समन्तात् सम्यक् वा आनयति इति समानं समानः वा। सम् + आ + णीञ् प्रापणे (भ्वा० उ०), 'अन्येष्वपि दृश्यते' (पा० अ० ३।२।१०१) इति ड-प्रत्ययः। डकारानुबन्धलोपः। 'टेः' (पा० अ० ६।४।१४३) इति धातोः ईकारस्य टेर्लोपः। **अथवा** समानयति = प्राणयति इति समानः सम् + अन् प्राणने (अ० प०) 'हेतुमति च' (पा० अ० ३।१।२६) इति णिच्-प्रत्ययः। णकार-चकारानुबन्धलोपः। 'अत उपधायाः' (पा० अ० ७।२।११६) इति धातोः उपधायाः अकारस्य आ-वृद्धिः। पूर्ववत् ड-प्रत्ययः। डकारानुबन्धलोपः, धातोः णिच् प्रत्ययस्य इकारस्य 'टेः' (पा० अ० ६।४।१४३) इति लोपः। **अथवा** 'नन्दि-ग्रहि-पचादिभ्यो०' (पा० अ० ३।१।१३४) इति अच्-प्रत्ययः। चकारानुबन्धलोपः। एवं समान-शब्दः व्युत्पद्यते। **अथवा** समति इति समानं समानः वा। षम वैक्लव्ये (भ्वा० प०) 'ताच्छील्यवयोवचनशक्तिषु चानश्' (पा० अ० ३।२।१२९) इति चानश्-प्रत्ययः। चकार-शकारानुबन्धलोपः। आगम-शास्त्रस्य अनित्यत्वात् 'आने मुक्' (पा० अ० ७।२।८२) इति मुगागमः न। **अथवा** सह मानेन तिष्ठति इति समानं समानः वा। 'वोपसर्जनस्य' (पा० अ० ६।३।८२) इति सह-शब्दस्य स-भावः। **अथवा** समानं मानं मानो वा अस्य इति समानं समानः वा। 'समानस्य छन्दस्यमूर्धप्रभृत्युदर्केषु' (पा० अ० ६।३।८४) इति समानस्य स-भावः। 'प्राणोऽपानः समानश्चोदानव्यानौ च वायवः', 'वाच्यलिङ्गाः समस्तुल्यः सदृक्षः सदृशः सदृक्। साधारणः समानश्च' एवं 'समानाः सत्समैके स्युः' इत्यमरः। 'समानं सत्समैकेषु त्रिषु ना नाभिमारुते' इति मेदिनी। 'समानं सम्मानमात्रं भवति' (निरु० ४।२५)। 'निरुक्तनिरुक्त इव ह्ययं समानः' (षड्विं० १।२)। 'तं (संज्ञप्तं पशुम्) ऊर्ध्वादिव-समानेत्यनुप्राणत्समानमेवास्मिँस्तददधात्' (शत० ब्रा० ११।८।३।६)। 'दिशः समानः' (जैमि० उ० ४।२२।९)।

समासिकताः स्त्री०। इत्यत्र **'अप्-सुमनस्-समा-सिकता-वर्षाणां बहुत्वं च' (लि० सू० २९) इति स्त्रीलिङ्गता बहुवचनत्वं च।** समासः अस्ति अस्य इति समासिकः। समास-शब्दात् 'अत इति ठनौ' (पा० अ० ५।२।११५) इति ठन्-प्रत्ययः। नकारानु-बन्धलोपः। 'ठस्येकः' (पा० अ० ७।३।५०) इति ठस्य इकादेशः। 'यस्येति च' (पा० अ० ६।४।१४८) इति सकारोत्तरवर्त्तिनः अकारस्य लोपः। एवं

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by S3 Foundation USA

समासिक-शब्दः व्युत्पद्यते। पुनः समासिकस्य भावः कर्म वा इति समासिकता। समासिक-शब्दात् 'तस्य भावस्त्वतलौ' (पा० अ० ५। १। ११९) इति तल्-प्रत्ययः। लकारानुबन्धलोपः। 'अजाद्यतष्टाप्' (पा० अ० ४। १। ४) इति टाप्-प्रत्ययः। टकार-पकारानुबन्धलोपः। 'अकः सवर्णे दीर्घः' (पा० अ० ६। १। १०१) इति अकारस्य आकारस्य च आ-दीर्घः। एवं समासिकता अयं शब्दः निष्पद्यते।

समिध् स्त्री०। इत्यत्र **'प्रतिपद्-आपद्-विपत्-सम्पच्छरत्-संसत्-परिषद्-उषः-संवित्-क्षुत्-पुन्मुत्-समिधः' (लि० सू० २७) इति स्त्रीलिङ्गता।** समिध्यते अनया इति समिध्। सम् + ञि इन्धी दीप्तौ (रु० आ०) 'सम्पदादिभ्यः क्विप्' (वा० पा० अ० ३। ३। ९४) इति क्विप्-प्रत्ययः। तस्य सर्वापहारिलोपः। 'अनिदितां हल उपधायाः क्ङिति' (पा० अ० ६। ४। २४) इति धातोः उपधायाः नकारस्य लोपः। एवं समिध् इति निष्पद्यते। 'इन्धनं त्वेध इध्ममेधः समित् स्त्रियाम्' इत्यमरः। 'समिदसि समेधिषीमहि' (काठ० ४। १३, मैत्रा० सं० १। १०। १३, ४। ८। ५)। 'त्रिःसप्त समिधः कृताः' (काठ० संक० १०१ : १०)। 'एषा ते अग्ने समित् तथा समिध्यस्व' (तै० आ० ४। १०। ३)। 'यदेनं समयच्छत् तत्समिधः समित्त्वम्' (तै० ब्रा० २। १। ३। ८)। 'स प्रजापतिरब्रवीद् वार्यं वृणा अहं वा एतास् (विषलिप्ता ओषधीः) स्वदयिष्यामीति स एतां समिधमवृणीत, तस्मादेकैकः प्रजापतिः' (काठ० सं० ६। ५)। 'प्राणा वै समिधः, प्राणा ह्येतं समिन्धते' (शत० ब्रा० ९। २। ३। ४४)। 'प्राणा वै समिधः' (ऐत० ब्रा० २। ४, शत० ब्रा० १। ५। ४। १)। 'वसन्तो वै समित्' (शत० ब्रा० १। ५। ३। ९)। 'गर्भः समित्' (शत० ब्रा० ६। ६। २। १५)। 'अस्थीनि वै समिधः' (शत० ब्रा० ९। २। ३। ४६)। 'यदेनं समयच्छत् तत्समिधः समित्त्वम्' (तैत्ति० ब्रा० २। १। ३। ८)। 'समिधो यजति वसन्तमेव वसन्ते वा इदं सर्वं समिध्यते' (कौषी० ब्रा० ३। ४)। 'धूमकेतुः समिधा भाऋजीकः' (ऋ० सं० ७। ६। ११-२)।

समीपम् नपुं०। इत्यत्र **'पाप-रूपोडुप-तल्प-शिल्प-पुष्प-शष्प-समीपान्तरीपाणि नपुंसके' (लि० सू० ७८) इति नपुंसकलिङ्गता।** सङ्गता आपः यस्मिन् तत् समीपम्। सम् + अप् इत्यस्मात् 'ऋक्पूरब्धूः पथामानक्षे' (पा० अ० ५। ४। ७४) इति अ-प्रत्ययः। 'द्व्यन्तरुपसर्गेभ्योऽप ईत्' (पा० अ० ६। ३। ९७) इति अप् इत्यस्य अकारस्य ईकारः। 'समीपे निकटासन्नसन्निकृष्टनीडवत्' इत्यमरः।

समुद्रः पुं०। इत्यत्र **'पल्लव-पल्वल-कफ-रेफ-कटाह-निर्व्यूह-मठ-मणि-तरङ्ग-तुरङ्ग-गन्ध-मृदङ्ग-सङ्ग-समुद्र-पुङ्खाः (लि० सू० ११६) इति पुंल्लिङ्गता।** सम्

CC-0 Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by S3 Foundation USA

= सम्यक् समुदं गच्छति उद्गच्छतीति समुद्गः। अथवा मुद् प्रीतिः तया सह समुद् समुदं गच्छति इति समुद्गः। 'ड-प्रकरणे अन्यत्रापि दृश्यत इति वक्तव्यम्' (वा० पा० अ० ३।२।४८) इति ड-प्रत्ययः। डकारानुबन्धलोपः। 'टेः' (पा० अ० ६।४।१४३) इति गम्-धातोः अम् इत्यस्य टेर्लोपः।

समुद्रः पुं०। इत्यत्र **'देवासुरात्म-स्वर्ग-गिरि-समुद्र-नख-केश-दन्त-स्तन-भुज-कण्ठ-खड्ग-शर-पङ्काभिधानानि' (लि० सू० ४३) इति पुँल्लिङ्गता।** सम् = सम्यक् उनत्ति क्लिद्यति यः सः समुद्रः। सम् + उन्दी क्लेदने (रु० प०) 'स्फायि-तञ्चि-वञ्चि-शकि-क्षिपि-क्षुदि-सृपि-तृपि-दृपि-वन्द्युन्दि-श्विति-वृत्यजि-नी-पदि-मदि-मुदि-खिदि-छिदि-भिदि-मन्दि-चन्दि-दहि-दसि-दम्भि-वसि-वाशि-शीङ्-हसि-सिधि-शुभिभ्यो रक्' (उ० २। १३) इति रक्-प्रत्ययः। ककारानुबन्धलोपः। कित्त्वात् 'अनिदितां हल उपधायाः क्ङिति' (पा० अ० ६। ४। २४) इति धातोः नकारस्य लोपः। **अथवा** मुद्रया सह समुद्रः। 'अव्ययीभावे चाकाले' (पा० अ० ६।३।८१) इति अथवा 'वोपसर्जनस्य' (पा० अ० ६।३।८२) इति सह-शब्दस्य स-भावः। **अथवा** मुद् प्रीतिः तया सह इति समुद्रः। समुदं मुत्सहितं राति ददाति इति समुद्रः। समुद् + रा दाने (अ० प०) 'आतोऽनुपसर्गे कः' (पा० अ० ३। २। ३) इति क-प्रत्ययः। ककारानु-बन्धलोपः। 'आतो लोप इटि च' (पा० अ० ६। ४। ६४) इति धातोः आकारस्य लोपः। **अथवा** सम् समीचीनाः उद्राः जलचराः यस्मिन् सः समुद्रः। 'समुद्रोऽब्धिरकूपारः' इत्यमरः। 'समुद्रः अन्तरिक्षनाम' (निघं० १।३)। 'समुद्रः कस्मात् समुद् द्रवन्त्यस्मादापः, समभिद्रवन्त्येनमापः सम्मोदन्तेऽस्मिन् भूतानि समुदको भवति समुनत्तीति वा' (निरु० २।१०)। 'समुद्रः आदित्यः' (निघं० १३।१६)। 'समुद्रम् = समुदितारम्' (निरु० १०। ३५) 'अयं वै समुद्रो योऽयं (वायुः) पवत एतस्माद् वै समुद्रात् सर्वे देवाः सर्वाणि भूतानि समुद्रवन्ति' (शत० ब्रा० १४।२।२।२)। 'तद् यत् (आपः) समुद्रवन्ति तस्मात् समुद्र उच्यते' (गोप० पू० १।७)। 'य एवायं (वायुः) पवत एष एव समुद्र एवं हि सन्द्रवन्तं सर्वाणि भूतान्यनुसंद्रवन्ति' (जैमि० उ० १।२।५।४)। 'तद् वस्तिमभिनत्। स समुद्रोऽभवत्। तस्मात् समुद्रस्य (जलं) न पिबन्ति। प्रजननमिव हि मन्यन्ते' (तैत्ति० ब्रा० २।२।९।२-३)। 'मनो वै समुद्रः' (शत० ब्रा० ७।५।२।५८)। 'आपो वै समुद्रः' (शत० ब्रा० ३।८।४।११)। 'समुद्रो वाऽपां योनिः' (शत० ब्रा० ७।५।२।५८)। 'वाग् वै समुद्रो मनः समुद्रस्य चक्षुः' (ऋ० सं० ४।५८।१) एवं (तां० ब्रा० ६।४।७)। 'समुद्रो वाऽवभृथः' (तैत्ति० ब्रा० २।१।५।

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by S3 Foundation USA

२)। 'वाग्वै समुद्रः' (तां० ब्रा० ७।७।९)। 'वाग्वै समुद्रो न वै वाक् क्षीयते न समुद्रः क्षीयते' (ऐत० ब्रा० ५।१६)। 'एव वाव स समुद्रः यच्चात्वालः' (तै० ब्रा० १।५।१०।१)। 'रुक्मो वै समुद्रः' (शत० ब्रा० ७।४।२।५)। 'पुरुषो वै समुद्रः' (यजु० सं० १३।१६ एवं जैमि० उ० ३।३५।५)। 'समुद्र एवास्य (अश्वस्य मेध्यस्य) बन्धुः समुद्रो योनिः' (शत० ब्रा० १०।६।४।१) 'तस्मादिमं लोकं (पृथिवीं) सर्वतः समुद्रः पर्येति' (शत० ब्रा० ७।१।१।१३)। 'तद् यत् (आपः) समुद्रवन्त तस्मात् समुद्र उच्यते' (गोप० ब्रा० १।१।७)। 'समुद्र इव हि कामोऽपरिमितः' (काठ० सं० ९।१२)। 'समुद्रः स्रोत्यानाम् (अधिपतिः)' (तै० सं० ३।४।५।१)। 'समुद्रमनु प्रजाः प्रजायन्ते' (तै० सं० ५।२।६।१)। 'समुद्रोऽवगतः (सोमः)' (तै० सं० ४।४।९।२)। 'समुद्रेणापः (अन्वाभवन्)' (काठ० सं० ३५।१५)।

सम्पद् स्त्री०। इत्यत्र **'प्रतिपद्-आपद्-विपत्-सम्पच्छरत्-संसत्-परिषद्-उषः-संवित्-क्षुत्-पुन्मुत्-समिधः' (लि० सू० २७) इति स्त्रीलिङ्गता।** सम्पद्यते इति सम्पद्। सम्पदनम् अनया वा इति सम् + पद गतौ (दि० आ०) 'सम्पदादिभ्यः क्विप्' (वा० पा० अ० ३।३।९४) इति क्विप्-प्रत्ययः। तस्य सर्वापहारिलोपः। 'अथ सम्पदि सम्पत्तिः श्रीश्च लक्ष्मीश्च' इत्यमरः। 'श्रोत्रं वै सम्पच्छ्रोत्रे हीमे सर्वे वेदा अभिसम्पन्नाः' (शत० ब्रा० १४।९।२।४)। 'यो ह वै सम्पदं वेद, सं हास्मै कामाः पद्यन्ते' (शां० आ० ९।२)। 'यत् प्रजापतिं (देवाः) अब्रुवंस्तव सम्पदेति तस्मादनुष्टुभं सम्पद्यते' (जैमि० ब्रा० १।२११)।

सम्भावनम्, सम्भावनः नपुं०, पुं०। इत्यत्र **'मान-यानाभिधान-नलिन-पुलिनोद्यान-शयनासन-स्थान-चन्दनालान-समान-भवन-वसन-सम्भावन-विभावन-विमानानि नपुंसके च' (लि० सू० ७६) इति नपुंसकलिङ्गता पुँल्लिङ्गता च।** सम्भाव्यते अनेन अस्मिन् वा इति सम्भावनं सम्भावनः वा। सम् + भू सत्तायाम् (भ्वा० प०) 'हेतुमति च' (पा० अ० ३।१।२६) इति णिच्-प्रत्ययः। णकार-चकारानुबन्धलोपः। 'अचो ञ्णिति' (पा० अ० ७।२।११५) इति धातोः ऊकारस्य औ-वृद्धिः। 'करणाधिकरणयोश्च' (पा० अ० ३।३।११७) इति ल्युट्-प्रत्ययः। लकार-टकारानुबन्धलोपः। 'णेरनिटि' (पा० अ० ६।४।५१) इति अथवा 'बहुलमन्यत्रापि संज्ञाछन्दसोः' (उ० २।२३) इति णिच्प्रत्ययस्य इकारस्य लोपः। 'युवोरनाकौ' (पा० अ० ७।१।१) इति यु-स्थाने अनादेशः। एवं सम्भावन-शब्दः निष्पद्यते। अस्य प्रथमैकवचने नपुंसकलिङ्गे सम्भावनं पुँल्लिङ्गे च सम्भावनः भवति।

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by S3 Foundation USA

सरकम्, सरकः नपुं०, पुं०। इत्यत्र **'कण्टकानीक-सरक-मोदक-चषक-मस्तक-पुस्तक-तडाक-निष्क-शुष्क-वर्चस्क-पिनाक-भाण्डक-पिण्डक-पुलाकानि नपुंसके च' (लि० सू० ६३) इति नपुंसकलिङ्गता पुँल्लिङ्गता च।** यत् सरति यत्र वा सरन्ति जनाः तत् सरकम्। सृ गतौ (भ्वा० प०) 'कृञादिभ्यो वुन्' (उ० ५। ३५) इति वुन्-प्रत्ययः। नकारानुबन्धलोपः। 'युवोरनाकौ' (पा० अ० ७। १। १) इति वु-स्थाने अकादेशः। 'उरण् रपरः' (पा० अ० १। १। ५१) इति सहकारेण 'सार्वधातुकार्धधातुकयोः' (पा० अ० ७। ३। ८४) इति धातोः ऋकारस्य अर्-गुणः। हिन्दी-भाषायां प्रचलितः 'सड़क' शब्दः अस्य 'सरक' शब्दस्य एव अपभ्रंशरूपः अथवा र-डयोः अभेदात् सरकम् एव सडकम् इति।

सरयुः स्त्री०। इत्यत्र **'धेनु-रज्जु-कुटू-सरयु-तनु-रेणु-प्रियङ्गवः स्त्रियाम्' (लि० सू० ५२) इति स्त्रीलिङ्गता।** सरति गच्छति इति सरयुः सरन्ति वा यत्र जलानि सा सरयुः नदी। सृ गतौ (भ्वा० प०) 'सरतेरयुः' (उ० ३। २२) इति अयु-प्रत्ययः। 'उरण् रपरः' (पा० अ० १। १। ५१) इति सहकारेण 'सार्वधातुकार्धधातुकयोः' (पा० अ० ७। ३। ८४) इति धातोः ऋकारस्य अर्-गुणः। 'सरयुर्नदी' इति सिद्धान्तकौमुद्याम् उणादौ।

सरित् स्त्री०। इत्यत्र **'भूमि-विद्युत्-सरिल्लता-वनिताभिधानानि' (लि० सू० १८) इति स्त्रीलिङ्गता।** सरति गच्छति इति सरित्, सरन्ति वा आपः यस्यां सा सरित्। सृ गतौ (भ्वा० प०) 'हृ-सृ-सहि-युषिभ्य इतिः' (उ० १। ९७) इति इति-प्रत्ययः। प्रत्यये तकार-परवर्त्तिनः इकारस्य अनुबन्धस्य लोपः। 'उरण् रपरः' (पा० अ० १। १। ५१) इति सहकारेण 'सार्वधातुकार्धधातुकयोः' (पा० अ० ७। ३। ८४) इति धातोः ऋकारस्य अर्-गुणः। 'अथ नदी सरित्' इत्यमरः। 'सरितः नदीनाम' (निघं० १। १३)।

सर्वः त्रि० लि०। इत्यत्र **'सर्वादीनि सर्वनामानि' (लि० सू० १८९) इति पुँल्लिङ्गता स्त्रीलिङ्गता नपुंसकलिङ्गता च।** सरति इति सर्वः। सृ गतौ (भ्वा० प०) 'सर्व-निघृष्व-रिष्व-लष्व-शिव-पट्व-प्रह्वेष्वा अतन्त्रे' (उ० १। १५३) इति वन्-प्रत्ययः। नकारानुबन्धलोपः। 'उरण् रपरः' (पा० अ० १। १। ५१) इति सहकारेण 'सार्वधातु-कार्धधातुकयोः' (पा० अ० ७। ३। ८४) इति धातोः ऋकारस्य अर्-गुणः। **अथवा** सर्वति गच्छति इति सर्वः। सर्व गतौ (भ्वा० प०) 'धात्वादेः षः सः' (पा० अ० ३। १। १३४) इति धातोः षस्य सः। 'नन्दि-ग्रहि-पचादिभ्यो०' (पा० अ० ३। १। १३४) इति अच्-प्रत्ययः। चकारानुबन्धलोपः। 'अथ समं सर्वम्' इत्यमरः। 'एतद् (ओमिति) ध

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by S3 Foundation USA

वा इदं सर्वमक्षरम्' (जैमि० २।१०)।'गौरिदं सर्वम्' (मैत्रा० ४।२।३)।'चतुष्टयं वा इदं सर्वम्' (कौषी० ब्रा० २।१, ३।२, १९।४, २८।७)।'वागेवेदं सर्वम्' (ऐत० आ० ३।१।६)।'विश्वेदेवा एव सर्वम्' (गोप० १।५।१५)।'सर्वं वा इदम् एति च प्रेति च' (शत० ब्रा० १।४।१।५)।'सर्वं वै विश्वे देवाः' (शत० ब्रा० १।७।४। २२)।'आपो वै सर्वोऽद्भ्यो हीदं सर्वं जायते' (शत० ब्रा० ६।१।३।११)।

सस्यम् नपुं०। इत्यत्र **'धान्याज्य-सस्य-रूप्य-पण्य-वर्ण्य-धृष्य-हव्य-कव्य-काव्य-सत्यापत्य-मूल्य-शिक्य-कुड्य-मद्य-हर्म्य-तूर्य-सैन्यानि' (लि० सू० १६८) इति नपुंसकलिङ्गता।** यत् सस्यते तत् सस्यम्। 'षस स्वप्ने' (अ० प०) 'धात्वादेः षः सः' (पा० अ० ६।१।६४) इति धातोः षस्य सः।'मा-छा-ससिभ्यो यः' (उ० ४।११०) इति य-प्रत्ययः।'वृक्षादीनां फलं सस्यम्' इत्यमरः।

सहस्रम् नपुं०। **इत्यत्र 'शतादिः संख्या' (लि० सू० १४४) इति नपुंसकलिङ्गता।** हसति इति हस्रः। हसे हसने (भ्वा० प०) 'उणादयो बहुलम्' (पा० अ० ३।३।१) इति उणादीनां बहुलवचनात् 'वृधि-वपिभ्यां रन्' (उ० २।२८) इति रन्-प्रत्ययः। नकारानुबन्धलोपः। हस्रेण सह इति सहस्रम्।'प्रथमानिर्दिष्टं समास उपसर्जनम्' (पा० अ० १।२।४३) इति सहशब्दस्य उपसर्जनसंज्ञा।'उपसर्जनं पूर्वम्' (पा० अ० २।२। ३०) इति उपसर्जनसंज्ञकस्य सह-शब्दस्य हस्रशब्दात् पूर्वनिपातः। 'वोपसर्जनस्य' (पा० अ० ६।३।८२) इति सह-शब्दस्य सः आदेशः।'सहस्रं बहुनाम' (निघं० ३। १)।'सहस्रं = सहस्वत्' (निरु० ३।१०)।'भूमा वै सहस्रम्' (शत० ब्रा० ३।३।३। ८)।'सर्वं वै सहस्रम्' (शत० ब्रा० ४।६।१।१५)।'आयुर्वै सहस्रम्' (तैत्ति० ब्रा० ३।८।१५।३)।'परमं सहस्रम्' (तां० ब्रा० १६।९।२)।'तदाहुः किं सहस्रमितीमे लोका इमे वेवा अथो वागिति ब्रूयात्' (ऐत० ब्रा० ६।१५)।'पाशवः सहस्रम्' (तां० ब्रा० १६।१०।१२)।'यत् (प्रजापतिः) सहेत्यब्रवीत् तत्सहस्रस्य सहस्रत्वम्' (जैमि० ब्रा० २।२५४)।

सङ्ग्रामम्, सङ्ग्रामः नपुं०, पुं०। **इत्यत्र 'सङ्ग्राम-दाडिम-कुसुमाश्रम-क्षेम-क्षौम-होमोद्दामानि नपुंसके च' (लि० सू० ८५) इति नपुंसकलिङ्गता पुँल्लिङ्गता च तथा 'आहव-सङ्ग्रामौ' (लि० सू० १६०) इत्यनेन अपि पुँल्लिङ्गता।** ग्रसते ग्रस्यते वा यः सः ग्रामः। ग्रसु अदने (भ्वा० आ०) 'ग्रसेरा च' (उ० १।१४३) इति मँन्-प्रत्ययः। धातोः सकारस्य आकारादेशश्च। नकारानुबन्धलोपः।'अकः सवर्णे दीर्घः' (पा० अ० ६।१।१०१) इति अकारस्य आकारस्य च आ-दीर्घः। **अथवा** ग्रामयति

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by S3 Foundation USA

आमन्त्रयते इति ग्रामः। ग्राम आमन्त्रणे (चु० उ०) 'नन्दि-ग्रहि-पचादिभ्यो०' (पा० अ० ३।१।१३४) इति अच्-प्रत्ययः। चकारानुबन्धलोपः। सम् = सम्यक् ग्रामं ग्रामः वा इति सङ्ग्रामं सङ्ग्रामः वा। 'मोऽनुस्वारः' (पा० अ० ८।२।२३) इति सम् इत्यस्य मकारस्व अनुस्वारः।'वा पदान्तस्य' (पा० अ० ८।४।५९) इति अनुस्वारस्य वैकल्पिकः ङ-परसवर्णः। **अथवा** सङ्ग्रमणं सङ्ग्रामं सङ्ग्रामः वा।'सङ्ग्राम युद्धे' (चु० उ०) 'भावे' (पा० अ० ३।३।८) इति घञ्-प्रत्ययः। घकार-ञकारानुबन्धलोपः। **अथवा** सङ्ग्रामयते इति सङ्ग्रामः वा। उक्त-सङ्ग्राम-धातोः 'सत्यापपाश०' (पा० अ० ३। १। २५) इति णिच् प्रत्ययः। णकार-चकारानुबन्धलोपः। 'नन्दि-ग्रहि-पचादिभ्यो०' (पा० अ० ३।१।१३४) इति अच्-प्रत्ययः। चकारानुबन्धलोपः।'णेरनिटि' (पा० अ० ६।४।१) इति अथवा 'बहुलमन्यत्रापि संज्ञाछन्दसोः' (उ० २।२३) इति णिच्प्रत्ययस्य इकारस्य लोपः। 'समौ संवसथ-ग्रामौ' इत्यमरः। 'शब्दादिपूर्वो वृन्देऽपि ग्रामः' इति चामरः।'ग्रामे स्वरे संवसथे वृन्दे शब्दादि-पूर्वकः' इति विश्वः।'ग्रामः स्वरे संवसथे' इति मेदिनी।'अभ्यामर्द-समाघात-सङ्ग्रामाभ्यागमाहनाः' इत्यमरः।'सङ्ग्रामः कस्मात्? सङ्गमनाद्वा, सङ्गरणाद्वा, सङ्गतौ ग्रामाविति वा' (निरु० ३।१०)।

सम्बध्या स्त्री०। इत्यत्र 'तृटि-सीमा-सम्बध्याः' (लि० सू० ३१) इति स्त्रीलिङ्गता। सम्बधनं सम्बध् सम् + बध बन्धने (भ्वा० आ०) 'सम्पदादिभ्यः क्विप्' (पा० अ० ३। ३। ९४) इति क्विप्-प्रत्ययः। तस्य सर्वापहारिलोपः। सम्बधं याति इति सम्बध्या। सम्बध् + या प्रापणे (अ० प०) 'अन्येभ्योऽपि दृश्यते' (पा० अ० ३।२।१७८) इति क्विप्-प्रत्ययः। तस्य सर्वापहारिलोपः। एवं सम्बध्या निष्पद्यते।

संविद् स्त्री०। इत्यत्र **'प्रतिपद्-आपद्-विपत्-सम्पच्छरत्-संसत्-परिषद्-उषः-संवित्-क्षुत्-पुन्मुत्-समिधः' (लि० सू० २७) इति स्त्रीलिङ्गता।** संवेदनम् इति संविद्। सम् + विद ज्ञाने (अ० प०) 'सम्पदादिभ्यः क्विप्' (वा० पा० अ० ३।३। ९४) इति क्विप्-प्रत्ययः। तस्य सर्वापहारिलोपः। सम् इत्यस्य मकारस्य 'मोऽनुस्वारः' (पा० अ० ८।३।२३) इति अनुस्वारः।'संविदागूः प्रतिज्ञानम्' इत्यमरः।

संसद् स्त्री०। इत्यत्र **'प्रतिपद्-आपद-विपत्-सम्पच्छरत्-संसत्-परिषद्-उषः-संवित्-क्षुत्-पुन्मुत्-समिधः' (लि० सू० २७) इति स्त्रीलिङ्गता।** संसदनम् इति संसद् अथवा संसीदन्ति अस्याम् इति संसद् + सम् + षद्लृ विशरण-गत्यवसादनेषु (भ्वा० प०) 'धात्वादे षः सः' (पा० अ० ६। १। ६४) इति धातोः षस्य सः। 'सम्पदादिभ्यः क्विप्' (वा० पा० अ० ३।३।९४) इति क्विप्-प्रत्ययः। तस्य सर्वापहारि-

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by S3 Foundation USA

लोपः। 'मोऽनुस्वारः' (पा० अ० ८। ३। २३) इति सम् इत्यस्य मकारस्य अनुस्वारः। 'समज्या परिषद् गोष्ठी सभा-समिति-संसदः' इत्यमरः।

सानु, सानुः नपुं०, पुं०। **इत्यत्र 'मद्गु-मधु-सीधु-शीधु-सानु-कमण्डलूनि नपुंसके च' (लि० सू० ५६) इति नपुंसकलिङ्गता पुँल्लिङ्गता च।** सनति सम्भजति सनोति ददाति वा इति सानु सानुः वा। षण् सम्भक्तौ (भ्वा० प०), षणु दाने (त० उ०) 'धात्वादेः षः सः' (पा० अ० ६। १। ६४) इति धातोः षस्य सः। 'दृ-सनि-जनि-चरि-चटि-रहिभ्यो ञुण्' (उ० १। ३) इति ञुण्-प्रत्ययः। ञकार-णकारानुबन्धलोपः। 'अत उपधायाः' (पा० अ० ७। २। ११६) इति धातोः उपधायाः अकारस्य आ-वृद्धिः। 'स्नुः प्रस्थः सानुरस्त्रियौ' इत्यमरः। 'सानुरस्त्री वने प्रस्थे वात्यामार्गाग्रके विदे' इति मेदिनी। 'सानुः शृङ्गे बुधे मार्गे वात्यायां पल्लवे वने' इति अमरकोश-सुधाव्याख्यायां भानुजिदीक्षितः। 'सानुः शृङ्गे बुधे मार्गे वात्यायां पल्लवे वने' इति विश्वः।

सामग्र्यम् नपुं०। **इत्यत्र 'त्वष्यञौ तद्धितौ' (लि० सू० १२१) इति नपुंसकलिङ्गता।** समग्रस्य गुणः कर्म वा सामग्र्यम्। इत्यत्र समग्र-शब्दात् 'गुणवचन-ब्राह्मणादिभ्यः कर्मणि च' (पा० अ० ५। १। १२४) इति ष्यञ्-प्रत्ययः। षकार-ञकारानुबन्धलोपः। 'यस्येति च' (पा० अ० ६। ४। १४८) इति अकारस्य लोपः। 'तद्धितेष्वचामादेः' (पा० अ० ७। २। ११७) इति स-परवर्त्तिनः अकारस्य आ-वृद्धिः एवं सामग्र्य-शब्दः निष्पद्यते।

सामग्री स्त्री०। **इत्यत्र 'ईकारान्तश्च' (लि० सू० १०) इति स्त्रीलिङ्गता।** सामग्र्य-शब्दः पूर्वं व्याख्यातः ततः प्रत्ययस्य षित्त्वसामर्थ्यात् 'षिद्गौरादिभ्यश्च' (पा० अ० ४। १। ४१) इति ङीष्-प्रत्ययः। ङकार-षकारानुबन्धलोपः। 'यस्येति च' (पा० अ० ६। ४। १४८) इति य-परवर्त्तिनः अकारस्य लोपः। 'हलस्तद्धितस्य' (पा० अ० ६। ४। ५१) इति यकारस्य लोपः। एवं सामग्री-शब्दः निष्पद्यते।

सारथिः पुं०। **इत्यत्र 'सारथ्यतिथि-कुक्षि-बस्ति-पाण्यञ्जलयः' (लि० सू० ११७) इति पुँल्लिङ्गता।** सारयति गमयति चालयति वा अश्वान् रथं वा इति सारथिः। अन्तर्भावितण्यर्थात् सृ गतौ (भ्वा० प०) धातोः 'सर्तेर्णिच्च' (उ० ४। १९०) इति घथिन्-प्रत्ययः स च णित्। प्रत्यये घकार-नकारानुबन्धलोपः। प्रत्ययस्य णित्त्वात् तस्मिन् परे 'अचो ञ्णिति' (पा० अ० ७। २। ११५) इति 'उरण् रपरः' (पा० अ० १। १। ५१) इति सहकारेण धातोः ऋकारस्य आर्-वृद्धिः। अथवा रथेन सह इति सरथः। सरथस्य

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by S3 Foundation USA

अपत्यं पुमान् इति सारथिः। सरथ-शब्दात् 'अत इञ्' (पा० अ० ४। १। ९५) इति इञ्-प्रत्ययः। ञकारानुबन्धलोपः। 'यस्येति च' (पा० अ० ६। ४। १४८) इति थ-परवर्त्तिनः अकारस्य लोपः। 'तद्धितेष्वचामादेः' (पा० अ० ७। २। ११७) इति सरथ् शब्दे सकार-परवर्त्तिनः अकारस्य आ-वृद्धिः। 'नियन्ता प्राजिता यन्ता सूतः क्षत्ता च सारथिः' इत्यमरः।

सारम्, सारः नपुं०, पुं०। इत्यत्र **'चक्र-वज्रान्धकार-सारावारापार-क्षीर-तोमर-शृङ्गार-भृङ्गार-मन्दारोशीर-तिमिर-शिशिराणि नपुंसके च' (लि० सू० ९२) इति नपुंसकलिङ्गता पुँल्लिङ्गता च।** सरण सारः अथवा सरति कालान्तरम् इति सारः। सृ गतौ (भ्वा० प०) 'सृ स्थिरे' भावे (पा० अ० ३। ३। १७) इति घञ्-प्रत्ययः। घकार-ञकारानुबन्धलोपः। 'उरण् रपरः' (पा० अ० १। १। ५१) इति सहकारेण 'अचो ञ्णिति' (पा० अ० ७। २। ११५) इति धातोः ऋकारस्य आर्-वृद्धिः। 'सारो बले स्थिरांशे च न्याय्ये क्लीबं वरे त्रिषु' इति चामरः। 'सारो बले मज्जनि च स्थिरांशे, न्याय्ये च नीरे च धने च सारम्। वरेऽन्यवत् सारमुदाहरन्ति' इति अमर-कोशसुधाव्याख्यायां भानुजिदीक्षितः। 'सारो बले स्थिरांशे च मज्ज्ञि पुंसि जले धने। न्याय्ये क्लीबं त्रिषु वरे' इति मेदिनी।

सालः, सालम् पुं०। नपुं०। इत्यत्र **'शील-मूल-मङ्गल-साल-कमल-तल-मुसल-कुण्डल-पलल-मृणाल-वाल-निगल-पलाल-बिडाल-खिल-शूलाः पुंसि च' (लि० सू० १४३) इति पुँल्लिङ्गता नपुंसकलिङ्गता च।** सल्यते इति सालः सालं वा। षल गतौ (भ्वा० प०) 'धात्वादेः षः सः' (पा० अ० ६। १। ६४) इति धातोः षस्य सः। 'अकर्त्तरि च कारके संज्ञागाम्' (पा० अ० ३। ३। १९) इति घञ्-प्रत्ययः। घकार-ञकारानुबन्धलोपः। 'अत उपधायाः' (पा० अ० ७। २। ११६) इति धातोः उपधायाः अकारस्य आ-वृद्धिः। **अथवा** सलनं सालः सालं वा। उक्त-षल-धातोः 'भावे' (पा० अ० ३। ३। १८) इति घञ्-प्रत्ययः। पूर्ववत् घकार-ञकारानुबन्धलोपः। धातोः उपधायाः अकारस्य आ-वृद्धिः च। **अथवा** सलति इति सलः। षल गतौ (भ्वा० प०) 'धात्वादेः षः सः' (पा० अ० ६। १। ६४) इति षस्य सः। 'नन्दि-ग्रहि-पचादिभ्यो०' (पा० अ० ३। १। १३४) इति अच्-प्रत्ययः। चकारानुबन्धलोपः। एवं सल इति निष्पद्यते। पुनः सलः एव सालः। 'प्रज्ञादिभ्यश्च' (पा० अ० ५। ४। ३८) इति अण्-प्रत्ययः। णकारानुबन्धलोपः। 'यस्येति च' (पा० अ० ६। ४। १४८) इति ल-परवर्त्तिनः अकारस्य लोपः। 'तद्धितेष्वचामादेः' (पा० अ० ७। २। ११७) इति स-परवर्त्तिनः

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by S3 Foundation USA

आकारस्य आ-वृद्धिः। **अथवा** सनोति इति सः। षणु दाने (त० उ०) 'अन्येष्वपि दृश्यते' (पा० अ० ३। २। १०१) इति ड-प्रत्ययः। डकारानुबन्धलोपः। डित्त्वात् 'टेः' (पा० अ० ६। ४। १४३) इति धातोः अन् इत्यस्य टेर्लोपः। एवं स इति निष्पद्यते। अलति इति अलः। अल भूषणपर्याप्तिवारणेषु (भ्वा० प०) 'नन्दिग्रहिपचादिभ्यो०' (पा० अ० ३। १। १३४) इति अच्-प्रत्ययः। चकारानुबन्धलोपः। एवम् अल इति निष्पद्यते। पुनः सः चासौ अलः इति सालः। **अथवा** सम् + आलुनाति इति सालः। स + आ लूञ् छेदने (क्र्या० उ०) 'अन्येष्वपि दृश्यते' (पा० अ० ३। २। १०१) इति ड-प्रत्ययः डकारानुबन्धलोपः। 'टेः' (पा० अ० ६। ४। १४३) इति धातोः ऊकारस्य टेर्लोपः। स + आल् + अ = साल इति निष्पद्यते। 'प्राकारो वरणः सालः', 'अनोकहः कुटः सालः' एवं 'साले तु सर्जकार्ष्याश्वकर्णकाः सस्यसंवरः' इत्यमरः। 'पुंसि भूरुहमात्रेऽपि सालो वरणसर्जयोः' इति रभसः। 'सालः सर्जतरौ वृक्षमात्रप्राकारयोरपि' इति अमरकोष-सुधाव्याख्यां भानुजिदीक्षितः।

साहसम् नपुं०। **इत्यत्र 'पनस-बिस-बुस-साहसानि नपुंसके' (लि० सू० ९७) इति नपुंसकलिङ्गता।** येन सह्यते सत् सहः। षह मर्षणे (भ्वा० आ०) 'धात्वादेः षः सः' (पा० अ० ६। १। ६४) इति धातोः षस्य सः। 'सर्व-धातुभ्योऽसुन्' (उ० ४। १९०) इति असुन्-प्रत्ययः। उकार-नकारानुबन्धलोपः। एवं सहस् इति निष्पद्यते। 'सहः बलनाम' (निघं० २। ९)। सहसि बले भवम् इति साहसम्। सहस् इत्यस्मात् शब्दात् 'तत्र भवः' (पा० अ० ४। ३। ५२) इति अण्-प्रत्ययः। णकारानुबन्धलोपः। 'तद्धितेष्वचामादेः' (पा० अ० ७। २। ११७) इति सकारोत्तरवर्त्तिनः आद्यचः अकारस्य आ-वृद्धिः। एवं साहस इति निष्पद्यते। 'साहसं तु दमो दण्डः' इत्यमरः। 'साहसं तु दमे दुष्करकर्मणि। अविमृश्यकृतौ धाष्ट्र्ये' इति हैमः।

सिक्थम् नपुं०। **इत्यत्र 'काष्क-पृष्ठ-सिक्थोक्थानि नपुंसके' (लि० सू० ७१) इति नपुंसकलिङ्गता।** सिञ्चति इति सिक्थम्। षिच क्षरणे (तु० उ०) 'धात्वादेः षः सः' (पा० अ० ६। १। ६४) इति षस्य सः। 'पा-तृ-तुदि-वचि-रिचि-सिचिभ्यस्थक्' (उ० २। ७) इति थक्-प्रत्ययः। ककारानुबन्धलोपः। प्रत्ययस्य कित्त्वात् तस्मिन् परे 'पुगन्तलघूपधस्य च' (पा० अ० ७। ३। ८६) इति धातोः उपधायाः इकारस्य प्राप्तः ए-गुणः 'क्ङिति च' (पा० अ० १। १। ५) इति निषेधात् न भवति। 'चोः कुः' (पा० अ० ८। २। ३०) इति चस्य कः। 'मधु क्षौद्रं माक्षिकादि मधूच्छिष्टं तु सिक्थकम्' इत्यमरः। 'सिक्थे भक्तपुलाके ना मधूच्छिष्टे नपुंसकम्' इति मेदिनी।

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by S3 Foundation USA

सिध्मम् नपुं०। इत्यत्र '**रुक्म-सिध्म-युगमेध्म-गुल्माध्यात्म-कुङ्कुमानि नपुंसके' (लि० सू० ८४) इति नपुंसकलिङ्गता**। षेधति सिध्यति वा इति सिध्मम्। षिध गतौ, षिधू शास्त्रे मङ्गले च (भ्वा० प०), षिधु संराद्धौ (दि० प०) 'उणादयो बहुलम्' (पा० अ० ३। ३। १) इति उणादीनां बाहुलकत्वात् 'इषि-युधीन्धि-दसि-श्या-धू-सूभ्यो मक्' (उ० १। १४५) इति मक्-प्रत्ययः। ककारानुबन्धलोपः। प्रत्ययस्य कित्त्वात् तस्मिन् परे 'क्ङिति च' (पा० अ० १। १। ५) इति निषेधात् 'पुगन्तलघूपधस्य च' (पा० अ० ७। ३। ८६) इति धातोः इकारस्य प्राप्तः ए-गुणः न भवति। 'धात्वादेः षः सः' (पा० अ० ६। १। ६४) इति धातोः षस्य सः। 'किलाससिध्मे' इत्यमरः।

सीधु, सीधुः नपुं०, स्त्री०, पुं०। **इत्यत्र 'मद्गु-मधु-सीधु-शीधु-सानु-कमण्डलूनि नपुंसके' (लि० सू० ५६) इति नपुंसकलिङ्गता पुँल्लिङ्गता च तथा 'मृत्यु-सीधु-कर्कन्धु-किष्कु-कण्डु-रेणवः' (लि० सू० १७३) इति स्त्रीलिङ्गता पुँल्लिङ्गता च**। शीधु-शब्दः पूर्वं व्याख्यातः श-सयोः अभेद-स्मरणात् शीधु इत्येव सीधु इत्यपि भवति।

सीमा स्त्री०। **इत्यत्र 'तृट-सीमा-सम्बध्याः' (लि० सू० ३१) इति स्त्रीलिङ्गता**। सिनोति सिनाति बध्नाति इति सीमा। षिञ् बन्धने (स्वा० उ०, क्र्या० उ०) 'धात्वादेः षः सः' (पा० अ० ६। १। ६४) इति धातोः षस्य सः। 'नामन्-सीमन्-व्योमन्-रोमन्-लोमन्-पाप्मन्-ध्यामन्' (उ० ४। १५२) इति मनिन्-प्रत्ययः, धातोः इकारस्य ईकारः दीर्घश्च। इकार-नकारानुबन्धलोपः। एवं सीमन् निष्पद्यते। 'डाबुभाभ्यामन्यतरस्याम्' (पा० अ० ४। १। १३) इति डाप्-प्रत्ययः। डकार-पकारानुबन्धलोपः। डित्त्वात् 'टेः' (पा० अ० ६। ४। १४३) इति सीमन् इत्यस्य अन् इत्यस्य टेर्लोपः। 'सीम-सीमे स्त्रियामुभौ' इत्यमरः। 'सीमा घाटस्थितिक्षेत्रेष्वण्डकोपेऽपि च स्त्रियाम्' इति मेदिनी। 'मध्यं वै सीमा' (शत० ब्रा० ७। ४। १। १४)।

सीरः पुं०। **इत्यत्र 'सीरार्थौदनाः पुंसि' (लि० सू० १३८) इति पुँल्लिङ्गता**। सिनोति सिनाति बध्नाति इति सीरः। षिञ् बन्धने (स्वा० उ०, क्र्या० उ०) 'धात्वादेः षः सः' (पा० अ० ६। १। ६४) इति धातोः षस्य सः। 'शु-सि-चि-मीनां दीर्घश्च' (उ० २। २६) इति क्रन्-प्रत्ययः धातोः इकारस्य ई-दीर्घश्च। ककार-नकारानुबन्धलोपः। 'सीरः स्यादंशुमालिनि लाङ्गले' इति हैमः। 'लाङ्गलं हलम्। गोदारणं च सीरः' इत्यमरः। 'हलतिग्मकरौ सीरौ' इति रभसः। 'सीरोऽर्कहलयोः पुंसि' इति मेदिनी। 'सीरा नदी

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by S3 Foundation USA

नाम' (निघं० १।१३)। 'सीर आदित्यः सरणात्' (निरु० ९।४०)। 'सेरं हैतद् यत् सीरमिरामेवास्मिन्नेतद् दधाति' (शत० ब्रा० ७।२।२।२)।

सुमनस् स्त्री०। इत्यत्र **'अप्-सुमनस्समासिकतावर्षाणां बहुत्वं च' (लि० सू० २९) इति स्त्रीलिङ्गता बहुवचनत्वं च।** सु सुष्ठु मन्यते इति सुमनस्, अथवा सुष्ठु मनः वा आसु इति सुमनसः। सु + मन ज्ञाने (दि० आ०) 'सर्वधातुभ्योऽसुन्' (उ० ४। १९०) इति असुन्-प्रत्ययः। उकार-नकारानुबन्धलोपः। एवं सुमनस् इति व्युत्पद्यते। अस्य प्रथमाबहुवचने सुमनसः भवति। 'स्त्रियः सुमनसः पुष्पं प्रसूनं कुसुमं सुमम्', 'सुपर्वाणः सुमनसस्त्रिदिवेशा दिवौकसः' तथा 'सुमना मालती जातिः' इत्यमरः। 'स्त्रियां सुमनसो भूम्नि पुष्पे, जातौ तु भेदतः। विदुष्यपि यदा दृष्टस्तदा भेदेन शिष्यते' इति व्याडिः। 'सुमनाः पुष्पमालत्योः स्त्रियां ना धीरदेवयोः' इति मेदिनी। 'पुष्पं सुमनाः कुसुमम्' इति नाममाला।

सुरः पुं०। इत्यत्र **'देवासुरात्म-स्वर्ग-गिरि-समुद्र-नख-केश-दन्त-स्तन-भुज-कण्ठ-खड्ग-शर-पङ्काभिधानानि' (लि० सू० ४३) इति पुँल्लिङ्गता।** सुनोति सवति जनयति पूरयति मनःकामना इति सुरः। षुञ् अभिषवे (स्वा० उ०) 'धात्वादेः षः सः' (पा० अ० ६।१।६४) इति धातोः षस्य सः। 'सु-सू-धाञ्-गृधिभ्यः क्रन्' (उ० २।२५) इति क्रन्-प्रत्ययः। ककार-नकारानुबन्धलोपः। कित्त्वात् 'क्ङिति च' (पा० अ० १।१।५) इति निषेधात् 'सार्वधातुकार्धधातुकयोः' (पा० अ० ७।३।८४) इति धातोः उकारस्य प्राप्तः ओ-गुणः न भवति। **अथवा** सुरति प्रसवति ऐश्वर्यवान् वा भवति इति सुरः। 'सुर प्रसवैश्वर्ययोः' (तु० प०) 'इगुपधज्ञाप्रीकिरः कः' (पा० अ० ३।१।१३५) इति क-प्रत्ययः। अत्रापि कित्त्वात् 'पुगन्तलघूपधस्य च' (पा० अ० ७। ३।८६) इति धातोः उपधायाः उकारस्य प्राप्तः ओ-गुणः 'क्ङिति च' (पा० अ० १।१। ५) इति निषेधात् न भवति। **अथवा** समुद्रात् निःसृता सुरा मदिरा अस्ति अस्य इति सुरः। सुराशब्दात् 'अर्श आदिभ्योऽच्' (पा० अ० ५।२।१२७) इति अच्-प्रत्ययः। चकारानु-बन्धलोपः। 'शकन्ध्वादिषु पररूपं वाच्यम्' (वा० पा० अ० ६।१।९४) इति सुराशब्दस्य आकारस्य पररूपम्। **अथवा** सु शोभनं रमते अथवा राजते इति सुरः। सु + रमु क्रीडायां (भ्वा० आ०) राजृ दीप्तौ (भ्वा० आ०) 'अन्येष्वपि दृश्यते' (पा० अ० ३।२।१०१) इति ड-प्रत्ययः। डकारानुबन्धलोपः। डित्त्वात् 'टेः' (पा० अ० ६।४। १४३) इति रम् धातोः अम् इत्यस्य राज् धातो आज् इत्यस्य टेर्लोपः। 'अमरा निर्जरा देवाः' इत्यमरः। 'सुरा चषकमद्ययोः। पुंल्लिङ्गस्त्रिदिवेशे स्यात्' इति मेदिनी।

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by S3 Foundation USA

सुवर्णम्, सुवर्णः नपुं०, पुं०। इत्यत्र **'कार्षापण-स्वर्ण-सुवर्ण-व्रण-चरण-वृषण-विषाण-चूर्ण-तृणानि नपुंसके च' (लि० सू० ६९) इति नपुंसकलिङ्गता पुँल्लिङ्गता च।** सु शोभनः वर्णः स्तुतिः अस्य इति सुवर्णं सुवर्णः वा। अथवा सु सुष्ठु वर्ण्यते इति सुवर्णं सुवर्णः वा। सु + वर्ण वर्णने (चु० प०) 'सत्यापपाश' (पा० अ० ३। १। २५) इति णिच्-प्रत्ययः। णकार-चकारानुबन्धलोपः। 'एरच्' (पा० अ० ३। ३। ५६) इति अच्-प्रत्ययः। चकारानुबन्धलोपः। 'णेरणिटि' (पा० अ० ६। ४। ५१) इति **अथवा** 'बहुलमन्यत्रापि संज्ञाछन्दसोः' (उ० २। २३) इति णिच्प्रत्ययस्य इकारस्य लोपः। 'स्वर्णं सुवर्णं कनकं हिरण्यं हेम हाटकम्' इत्यमरः। 'सुवर्णविस्तौ हेम्नोऽक्षे' इति चामरः। 'सुवर्णो ना स्वर्णकर्षे स्वर्णा च मखान्तरे। स्त्री कृष्णागुरुणि क्लीबे काञ्चने हरिचन्दने' इति विश्वमेदिन्यौ। 'पशवो वै वसु सुवर्णम् असुवर्णम् इति वा आहुर् अपशुम्' (जैमि० ब्रा० ३। ८४)। 'तस्मात् सुवर्ण्यं हिरण्यं भार्यम्। सुवर्ण एव भवति। ऐनं प्रियं वाञ्छति ना प्रियम्' (तां० ब्रा० २। २। ४। ६)।

सूतः पुं०। इत्यत्र **'हस्त-कुन्तान्त-व्रात-वात-दूत-धूर्त-सूत-चूत-मुहूर्त्ताः' (लि० सू० ११) इति पुँल्लिङ्गता।** सुवति गमयति स्म प्रेरयति स्म अश्वान् इति सूतः। अथवा शिवेन सूयते स्म इति सूतः। 'षू प्रेरणे' (चु० प०) 'निष्ठा' (पा० अ० ३। २। १०२) इति अथवा 'गत्यर्थाकर्मक-श्लिषशीङ्स्थासवसजनरुहजीर्यतिभ्यश्च' (पा० अ० ३। ४। ७२) इति क्त-प्रत्ययः। ककारानुबन्धलोपः। 'धात्वादेः षः सः' (पा० अ० ६। १। ६४) इति धातो षस्य सः। प्रत्ययस्य कित्त्वात् तस्मिन् परे 'क्ङिति च' (पा० अ० १। १। ५) इति निषेधात् 'सार्वधातुकार्धधातुकयोः' (पा० अ० ७। ३। ८४) इति धातोः ऊकारस्य प्राप्तः ओ-गुणः न भवति। 'नियन्ता प्राजिता यन्ता सूतः क्षत्ता च सारथिः', 'अथ चपलो रसः सूतश्च पारदे', 'ब्राह्मण्यां क्षत्रियात्सूतः' एवं 'सूतस्त्वष्टरि सारथौ' इत्यमरः। 'सूतस्तु सारथौ तक्ष्णि क्षत्रियाद्ब्राह्मणीसूतो वन्दिपारदयोः पुंसि प्रसूते प्रेरिते त्रिषु' इति मेदिनी। 'सूतः पारद-सारथ्योः प्रसूतेरितवन्दिषु। ब्राह्मण्यां क्षत्रियाज्जाते तक्ष्णि' इति हैमः। 'सवो वै सूतः' (शत० ब्रा० ५। ३। १। ५)। 'वारुणो यवमयो दशकपालः सूतस्य गृहे' (मैत्रा० सं० २। ६। ५)।

सूत्रः, सूत्रम् पुं०, नं०। इत्यत्र **'पत्र-पात्र-पवित्रसूत्रच्छत्राः पुंसि च' (लि० सू० १५७) इति पुँल्लिङ्गता नपुंसकलिङ्गता,** तथा **'द्वाराग्र-स्फार-तक्र-वक्र-वप्र०' (लि० सू० ९०) इति इत्यनेन अपि नपुंसकलिङ्गता।** येन सीव्यते तत् सूत्रम्। षिवु तन्तुसन्ताने (दि० प०) 'धात्वादेः षः सः' (पा० अ० ६। १। ६४) इति धातोः षस्य

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by S3 Foundation USA

सः। 'सर्वधातुभ्यः ष्ट्रन्' (उ० ४। १६०) इति ष्ट्रन्-प्रत्ययः। षकार-नकारानुबन्धलोपः। 'सिविमुच्योष्टेरू च' (उ० ४। १६४) इति ष्ट्रन्-प्रत्ययस्य कित्त्वं धातोः इव् इत्यस्य टेः स्थाने ऊकारादेशश्च। प्रत्यये षत्व-निवृत्तौ तत्प्रयुक्त-टकारस्य अपि निवृत्त्या तत्र 'त्र' इत्येत्र अवशिष्यते। 'सूत्रि-मूत्रिभ्यां चुरादिण्यन्ताभ्यामेरचा रूपसिद्धेराद्युदात्तार्थमिदं सूत्रम्। न च घञा तत्सिद्धिः 'एरच्' इत्यस्य घञो बाधकत्वात्' इति सिद्धान्तकौमुद्याम् उणादौ तत्त्वबोधिनीकारः। **अथवा** सुवति प्रेरयति इति सूः षू प्रेरणे (तु० प०) **अथवा** सूते इति सूः षूङ् प्राणिगर्भविमोचने (अ० आ०) 'क्विप् च' (पा० अ० ३। २। ७६) इति क्विप्-प्रत्ययः। तस्य सर्वापहारिलोपः। एवं सू निष्पद्यते। सुवं त्रायते इति सूत्रः सूत्रं वा। सू + त्रैङ् पालने (भ्वा० आ०) 'आदेच उपदेशेऽशिति' (पा० अ० ६। १। ४५) इति धातोः ऐकारस्य आकारः। 'आतोऽनुपसर्गे कः' (पा० अ० ३। २। ३) इति क-प्रत्ययः। ककारानुबन्धलोपः। 'आतो लोप इटि च' (पा० अ० ६। ४। ६४) इति धातोः आकारस्य लोपः। एवं सूत्र-शब्दः निष्पद्यते। 'सूत्राणि नरि तन्तवः' इत्यमरः। 'सूत्रं तु सूचनाकारि-ग्रन्थे तन्तु-व्यवस्थयोः' इति हैमः। 'सूत्रं तु सूचनाग्रन्थे सूत्रतन्तुव्यवस्थयोः' इति विश्वः।

सेतुः पुं०। इत्यत्र **'रुत्वन्त' (लि० सू० ५७) इति पुँल्लिङ्गता**। सिनोति बध्नाति सीयते बध्यते वा यः सः सेतुः। षिञ् बन्धने (स्वा० उ०) 'धात्वादेः षः सः' (पा० अ० ६। १। ६४) इति धातोः षस्य सः। 'सि-तनि-गमि-मसि-सच्यवि-धाञ्-कुशिभ्य-स्तुन्' (उ० १। ६९) इति तुन्-प्रत्ययः। नकारानुबन्धलोपः। 'सार्वधातुकार्धधातुकयोः' (पा० अ० ७। ३। ८४) इति धातोः इकारस्य ए-गुणः। अत्र सेतुशब्दे तुन्-प्रत्यये परे तस्य 'आर्धधातुकस्येड् वलादेः' (पा० अ० ७। २। ३५) इति प्राप्तः इडागमः तु 'ति-तु-त्र-त-थ-सि-सु-स-र-कसेषु च' (पा० अ० ७। २। ९) इति निषेधात् न भवति। 'सेतुरालौ स्त्रियां पुमान्' इत्यमरः। 'वरणे वरणः सेतुस्तिक्तशाकः कुमारकः' इति चामरः। 'सेतुर्नालो कुमारके' इति मेदिनी।

सैन्धवः, सैन्धवम् पुं०, नपुं०। इत्यत्र **'दण्ड-मण्ड-खण्ड-शव-सैन्धव-पार्श्वाकाश-कुश-काशाङ्कुश-कुलिशाः' (लि० सू० १८१) इति पुँल्लिङ्गता नपुंसकलिङ्गता च**। सिन्धुषु भवः सैन्धवः भवं सैन्धवं वा। सिन्धु-शब्दात् 'तत्र भवः' (पा० अ० ४। ३। ५३) इति अण्-प्रत्ययः। णकारानुबन्धलोपः। 'ओर्गुणः' (पा० अ० ६। ४। १४६) इति धकार-परवर्त्तिनः उकारस्य ओ-गुणः। 'तद्धितेष्वचामादेः' (पा० अ० ७। २। ११७) इति सकारोत्तरवर्त्तिनः इकारस्य ऐ-वृद्धिः। 'एचोऽयवायावः' (पा०

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by S3 Foundation USA

अ० ६।१।७८) इति ओकारस्य अव्-आदेशः। 'वाजिवाहार्वगन्धर्वहयसैन्धवसप्तयः' इत्यमरः। 'सैन्धवोऽस्त्री शीतशिवं माणिमन्थं च सिन्धुजे' इति चामरः। 'सैन्धवस्तु सिन्धुदेशोद्भवे हये। माणिमन्थेऽपि' इति हैमः।

सैन्यम् नपुं०। **इत्यत्र 'धान्याज्य-सस्य-रूप्य-पण्य-वर्ण्य-वृष्य-हव्य-कव्य-काव्य-सत्यापत्य-मूल्य-शिक्य-कुड्य-मद्य-हर्म्य-तूर्य-सैन्यानि' (लि० सू० १६८) इति नपुंसकलिङ्गता।** सेना एव सैन्यम्। सेनाशब्दात् 'चातुर्वर्ण्यादीनां स्वार्थ उपसंख्यानम्' (वा० पा० अ० ५। १। १२४) इति स्वार्थे ष्यञ्-प्रत्ययः। षकार-ञकारानुबन्धलोपः। 'यस्येति च' (पा० अ० ६।४।१४८) इति न-परवर्त्तिनः आकारस्य लोपः। 'तद्धितेष्वचामादेः' (पा० अ० ७।२।११७) इति स-परवर्त्तिनः एकारस्य ऐ-वृद्धिः। 'वरूथिनी बलं सैन्यं चक्रं चानीकमस्त्रियाम्' इत्यमरः।

सोपानम् नपुं०। **इत्यत्र 'जघनाजिन-तुहिन-कानन-वन-वृजिन-विपिन-वेतन-शासन-सोपान-मिथुन-श्मशान-रत्न-निम्न-चिह्नानि नपुंसके' ('लि० सू० ७५) इति नपुंसकलिङ्गता।** सह वर्तमान उप उपरि आनः गमनं येन तत् सोपानम्। 'आरोहणं स्यात् सोपानम्' इत्यमरः।

सोमः पुं०। **इत्यत्र 'मोपधः' (लि० सू० ८३) इति पुँल्लिङ्गता।** सवति ऐश्वर्यहेतुर्भवति इति सोमः। षु प्रसवैश्वर्ययोः (भ्वा० प०) सूयते अमृतार्थं देवैः यः सः सोमः। षुञ् अभिषवे (स्वा० उ०) 'धात्वादेः षः सः' (पा० अ० ६।१।६४) इति धातोः षस्य सः। 'अर्ति-स्तु-सु-हु-सृ-धृ-क्षि-क्षु-भा-या-वा-पदि-यक्षि-नीभ्यो मन्' (उ० १।१४०) इति मन्-प्रत्ययः। नकारानुबन्धलोपः। 'सार्वधातुकार्धधातुकयोः' (पा० अ० ७। ३। ८४) इति धातोः उकारस्य ओ-गुणः। **अथवा** उमा पार्वती, उमया सह इति सोमः। 'प्रथमानिर्दिष्टं समास उपसर्जनम्' (पा० अ० १।२।४३) इति सह-शब्दस्य उपसर्जन-संज्ञा। 'उपसर्जनं पूर्वम्' (पा० अ० २।२।३०) इति उपसर्जनसंज्ञकस्य सह शब्दस्य उमा-शब्दात् पूर्वं निपातः। 'वोपसर्जनस्य' (पा० अ० ६।३।८२) इति सह-शब्दस्य सादेशः। 'गोस्त्रियोरुपसर्जनस्य' (पा० अ० १।२।४८) इति उमा-शब्दे म-परवर्त्तिनः आकारस्य अकारः ह्रस्वः। 'आद्गुणः' (पा० अ० ६।१।८७) इति अकारस्य उकारस्य च ओ-गुणः। 'अन्तो जैवातृकः सोमो ग्लौर्मृगाङ्कः कलानिधिः' इत्यमरः। 'सोमस्त्वोषधी-तद्रसेन्दुषु। दिव्यौषध्यां घनसारे समीरे पितृदैवते। वसुप्रभेदे सलिले वानरे किन्नरेश्वरे' इति हैमः। 'सोमस्तुहिनदीधितौ। वानरे च कुबेरे च पितृदेवे समीरणे। वसुप्रभेदे कर्पूरे

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by S3 Foundation USA

वीरे सोमलतौषधौ' इति मेदिनी। 'ओषधिः सोमः सुनोतेर्यदेनमभिषुण्वन्ति' (निरु० ११।५)। 'स्वा वै मऽएवेति। तस्मात् सोमो नाम' (शत० ब्रा० ३।९।४।२२)। 'श्रीर्वै सोमः' (शत० ब्रा० ४।१।३।९)। 'सोमो वै पर्णः' (शत० ब्रा० ६।५।१।१)। 'यशो वै सोमः' (शत० ब्रा० ४।२।४।९)। 'सोमो वै पवमानः' (शत० ब्रा० २।२।३। २२)। 'सोमो वा इन्द्रः' (शत० ब्रा० २।२।३।२३)। 'सोमो रात्रिः' (शत० ब्रा० ३। ४।४।१५)। 'हविर्वै देवानां सोमः' (शत० ब्रा० ३।५।३।५)। 'प्राणः सोमः' (शत० ब्रा० ७।३।१।२)। 'एष वा उत्तमः हविर्यत्सोमः' (शत० ब्रा० ३।९।४।५)। 'सोमो वै बभ्रुः' (शत० ब्रा० ७।२।४।२६)। 'रसः सोमः' (शत० ब्रा० ७।३।१।३)। 'सर्वं हि सोमः' (शत० ब्रा० ५।५।४।११)। 'गिरिषु हि सोमः' (शत० ब्रा० ३।३।४। ७)। 'सोमोऽस्माकं ब्राह्मणानां राजा' (शत० ब्रा० ५।४।२।३)। 'सोमः पयः' (शत० ब्रा० १२।७।३।१३)। 'सोम ओषधीनामधिराजः' (गोप० उ० १।१७)। 'पुमान् वै सोमः स्त्री सुरा' (तैत्ति० ब्रा० १।३।३।४)। 'रयि सोमो रयिपतिर्दधातु' (तैत्ति० ब्रा० २।८।१।६)। 'सोमो वै ब्राह्मणः' (तां० ब्रा० २३।१६।५)। 'दीक्षा सोमस्य राज्ञः पत्नी' (गोप० उ० २।९)। 'रेतः सोमः' (कौषी० ब्रा० १३।७)। 'वाज्येवैनं (सोमं) पीत्वा भवति' (तैत्ति० ब्रा० १।३।२।४)। 'सोमः शल्यः' (ऐत० ब्रा० १।२५)। 'घ्नन्ति खलु वा एतत्सोमं यदभिषुण्वन्ति' (तैत्ति० ब्रा० २।२।८।१)। 'सोमो वै राजपेयः' (तैत्ति० ब्रा० १।३।२।३)। 'सोमो वै पलाशः' (कौषी० ब्रा० २।२, शत० ब्रा० ६।६।३।७)। 'सोमो वै दधि' (तैत्ति० ब्रा० १।४।७।६)। 'अन्नं सोमः' (कौषी० ब्रा० ९।६)। 'चन्द्रमा वै सोमः' (कौषी० ब्रा० १६।५)।

सौदामनी स्त्री०। **इत्यत्र 'भूमि-विद्युत्-सरिल्लता-वनिताभिधानानि' (लि० सू० १८) इति स्त्रीलिङ्गता।** सुदामनि मेघे भवा इति सौदामनी। सुदामन् इत्यस्मात् 'तत्र भवः' (पा० अ० ४।३।५३) इति अण्-प्रत्ययः। णकारानुबन्धलोपः। 'तद्धितेष्वचामादेः' (पा० अ० ७।२।११७) इति स-परवर्त्तिनः उकारस्य औ-वृद्धिः। 'नस्तद्धिते' (पा० अ० ६।४।१४४) इति अन् इत्यस्य टेर्लोपः 'अन्' (पा० अ० ६।४।१६७) इति प्रकृतिभावविधानात् न भवति। एवं सौदामन-शब्दः निष्पद्यते। ततः स्त्रियाम् 'टिड्ढाणञ्' (पा० अ० ४।१।१५) इति ङीप्-प्रत्ययः। ङकार-पकारानुबन्धलोपः। 'यस्येति च' (पा० अ० ६।४।१४८) इति नकार-परवर्त्तिनः अकारस्य लोपः। एवं सौदामनी निष्पद्यते। 'तडित् सौदामनी विद्युत्' इत्यमरः। 'सौदामन्यप्सरो-भेदे तडित्तद्भेदयोः स्त्रियाम्' इति अमरकोषसुधाव्याख्यायां भानुजिदीक्षितः।

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by S3 Foundation USA

स्तनः पुं०। इत्यत्र **'देवासुरात्म-स्वर्ग-गिरि-समुद्र-नख-केश-दन्त-स्तन-भुज-कण्ठ-खड्ग-शर-पङ्काभिधानानि' (लि० सू० ४३) इति पुँल्लिङ्गता।** स्तनति शब्दयति यौवनोद्गमम् इति स्तनः। ष्टन शब्दे (भ्वा० प०) 'नन्दि-ग्रहि-पचादिभ्यो०' (पा० अ० ३।१।१३४) इति अच्-प्रत्ययः। चकारानुबन्धलोपः। 'धात्वादेः षः सः' (पा० अ० ६।१।६४) इति धातोः षस्य सः। **अथवा** स्तन्यते शब्द्यते वा यः सः इति स्तनः। उक्तधातोः 'पुंसि संज्ञायां घः प्रायेण' (पा० अ० ३।३।११८) इति कर्मणि घञ्-प्रत्ययः। घकारानुबन्धलोपः। धातोः षस्य सः पूर्ववत् एव। 'स्तनौ कुचौ' इत्यमरः।

स्तम्बः पुं०। **इत्यत्र 'अर्घ-पथि-मथ्यृभुक्षि-स्तम्ब-नितम्ब-पुगाः' (लि० सू० ११५) इति पुँल्लिङ्गता।** तिष्ठति इति स्तम्बः। तिष्ठति यत्र वा सः स्तम्बः। ष्ठा गतिनिवृत्तौ (भ्वा० प०) 'धात्वादेः षः सः' (पा० अ० ६।१।६४) इति धातोः षस्य सः। षत्वे निवृत्ते तत्प्रयुक्त-ठकारे अपि निवृत्ते स्था इति अवशिष्यते। 'स्थः स्तोऽम्बजबकौ' (उ० ४।९७) इति अम्बच्-प्रत्ययः धातोः स्त् इति आदेशश्च। प्रत्यये चकारानुबन्धलोपः। 'अकाण्डे स्तम्ब-गुल्मौ', 'स्तम्बो गुच्छस्तृणादिनः' इत्यमरः। 'स्तम्बोऽप्रकाण्ड-द्रुमगुच्छयोः' इति मेदिनी। 'स्तम्बो गुल्मे तृणादीनामप्रकाण्डेऽपि च' इति विश्वः।

स्तम्भः पुं०। **इत्यत्र 'भोपधः' (लि० सू० ८०) इति पुँल्लिङ्गता।** स्तम्भते प्रतिबध्नाति इति स्तम्भः। ष्टभि प्रतिबन्धे (भ्वा० आ०) 'धात्वादेः षः सः' (पा० अ० ६।१।६४) इति धातोः षस्य सः। धातोः इदित्त्वात् 'इदितो नुम् धातोः' (पा० अ० ७।१।५८) इति नुम्-आगमः। उकार-मकारानुबन्धलोपः। 'नश्चापदान्तस्य झलि' (पा० अ० ८।३।२४) इति नकारस्य अनुस्वारः। 'अनुस्वारस्य ययि परसवर्णः' (पा० अ० ८।४।५८) इति अनुस्वारस्य परसवर्णः मकारः। 'नन्दि-ग्रहि-पचादिभ्यो०' (पा० अ० ३।१।१३४) इति अच्-प्रत्ययः। चकारानुबन्धलोपः। **अथवा** स्तभ्यते येन सः स्तम्भः। पूर्वोक्त-धातोः षस्य सः, नुमागमः, उकार-मकारानुबन्धलोपः, नकारस्य अनुस्वारः, अनुस्वारस्य मकारः परसवर्णः पूर्ववत्। ततः 'पुंसि संज्ञायां घः प्रायेण' (पा० अ० ३।३।११८) इति घ-प्रत्ययः। घकारानुबन्धलोपः। **अथवा** स्तम्भनं स्तम्भः। इत्यत्र उक्त-धातोः 'भावे' (पा० अ० ३।३।१८) इति घञ्-प्रत्ययः। घकार-ञकारानुबन्धलोपः। 'स्तम्भौ स्थूणाजडीभावौ' इत्यमरः।

स्तबकः पुं०। **इत्यत्र 'कोपधः' (लि० सू० ६१) इति पुँल्लिङ्गता।** तिष्ठति यः यत्र वा तिष्ठति स्तबकः। ष्ठा गतिनिवृत्तौ (भ्वा० प०) 'धात्वादेः षः सः' (पा० अ० ६।१।

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by S3 Foundation USA

६४) इति धातोः षस्य सः। षत्वे निवृत्ते त-प्रयुक्ते ठकारे अपि निवृत्ते स्था इत्यवशिष्यते। 'स्थः स्तोऽम्बजबकौ' (उ० ४।९७) इति अबक-प्रत्ययः, धातोः स्त् इत्यादेशश्च। अथवा स्तूयते यः सः स्तवकः। ष्टुञ् स्तुतौ (अ० उ०) 'धात्वादेः षः सः' (पा० अ० ६। १। ६४) इति धातोः षस्य सः। षत्वे निवृत्ते तत्प्रयुक्ते टकारे अपि निवृत्ते स्तु इत्यवशिष्यते। 'कृञादिभ्यः संज्ञायां वुन्' (उ० ५। ३५) इति वुन्-प्रत्ययः। नकारानुबन्धलोपः। 'युवोरनाकौ' (पा० अ० ७।१।१) इति वु-स्थाने अकादेशः। 'सार्वधातुकार्धधातुकयोः' (पा० अ० ७।३।८४) इति धातोः उकारस्य ओ-गुणः। 'एचोऽयवायावः' (पा० अ० ७। १। ७८) इति ओकारस्य अव्-आदेशः। एवं स्तवक इति निष्पद्यते। 'स्याद् गुच्छकस्तु स्तबकः' इत्यमरः। वकार-बकारयोः एकत्व-स्मरणात् स्तबकः अपि।

स्तेयम् नपुं०। **इत्यत्र 'यद्-य-ढग्-यग्-अञ्-अण्-वुञ्-छाश्च भावकर्मणि' (लि० सू० १२३क) इति नपुंसकलिङ्गता।** स्तेनस्य भावः कर्म वा इति स्तेयम्। इत्यत्र स्तेन-शब्दात् 'स्तेनाद्यन्नलोपश्च' (पा० अ० ५। १। १२५) इति यत्-प्रत्ययः नकारस्य लोपश्च। प्रत्यये तकारानुबन्धलोपः। 'चौरिका स्तैन्य-चौर्ये च स्तेयम्' इत्यमरः। 'स्तेयं स्तैन्यं च चौर्यं स्याच्चौरिकाचोरिके स्त्रियाम्' इति वाचस्पतिः।

स्थलम् नपुं०। **इत्यत्र 'लोपधः' (लि० सू० १४१) इति नपुंसकलिङ्गता।** स्थलति इति स्थलम्। ष्ठल स्थाने (भ्वा० प०) 'धात्वादेः षः सः' (पा० अ० ६। १। ६४) इति धातोः षस्य सः। षत्वे निवृत्ते तत्प्रयुक्ते ठकारे अपि निवृत्ते स्थल इत्यवशिष्यते। 'नन्दि-ग्रहि-पचादिभ्यो०' (पा० अ० ३। १। १३४) इति अच्-प्रत्ययः। चकारानुबन्धलोपः। अथवा स्थल्यते स्थलन्ति वा यत्र तत् स्थलम्। उक्तधातोः षस्य सः। 'पुंसि संज्ञायां घः प्रायेण' (पा० अ० ३। ३। ११८) इति घ-प्रत्ययः। घकारानुबन्धलोपः। 'स्थलं स्थली' इत्यमरः।

स्थानम्, स्थानः नपुं०, पुं०। **इत्यत्र 'मान-यानाभिधान-नलिन-पुलिनोद्यान-शयनासन-स्थान-चन्दनालान-समान-भवन-वसन-सम्भावन-विभावन-विमानानि-नपुंसके च' (लि० सू० ७६) इति नपुंसकलिङ्गता पुँल्लिङ्गता च।** स्थीयते यत्र तिष्ठन्ति वा यत्र तत् स्थानं स स्थानः वा। ष्ठा गतिनिवृत्तौ (भ्वा० प०) 'धात्वादेः षः सः' (पा० अ० ६। १। ६४) इति धातोः षस्य सः। षत्वे निवृत्ते तत्प्रयुक्ते ठकारे अपि निवृत्ते स्था इति अवशिष्यते। 'करणाधिकरणयोश्च' (पा० अ० ३। ३।

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by S3 Foundation USA

११७) इति अधिकरणे तथा भावे 'ल्युट् च' (पा० अ० ३। ३। ११५) इति ल्युट्-प्रत्ययः। लकार-टकारानुबन्धलोपः। 'युवोरनाकौ' (पा० अ० ७। १। १) इति यु-स्थाने अनादेशः। 'अकः सवर्णे दीर्घः' (पा० अ० ६। १। १०१) इति आकारस्य अकारस्य च आ-दीर्घः। 'अवकाशे स्थितौ स्थानम्' इत्यमरः। 'स्थानं सादृश्येऽवकाशे स्थितौ वृद्धिक्षयेतरे' इति मेदिनी।

स्थूणम्, स्थूणः नपुं०, स्त्री०। **इत्यत्र 'स्थूणोर्णे नपुंसके च' (लि० सू० २१) इति नपुंसकलिङ्गता स्त्रीलिङ्गता च।** तिष्ठति येन यया वा छादनादिकं तत् स्थूणं, सा स्थूणा वा। ष्ठा गतिनिवृत्तौ (भ्वा० प०) 'धात्वादेः षः सः' (पा० अ० ६।१।६४) इति धातोः षस्य सकारः। षकारे निवृत्ते तत्प्रयुक्ते ठकारे अपि निवृत्ते स्था इति भवति। पुनः ततः 'रास्ना-सास्ना-स्थूणा-वीणाः' (उ० ३। १५) इति न-प्रत्ययः, धातोः आकारस्य ऊकारः प्रत्ययस्य नकारस्य च णत्वम्। नपुंसकलिङ्गे प्रथमा-द्वितीयैकवचने स्थूणं भवति, स्त्रीलिङ्गे तु 'अजाद्यतष्टाप्' (पा० अ० ४। १। ४) इति टाप्-प्रत्ययः। टकार-पकारानुबन्धलोपः। 'अकः सवर्णे दीर्घः' (पा० अ० ६। १। १०१) इति अकारस्य आकारस्य च आ-दीर्घः। 'स्थूणा स्तम्भे वेश्मनः' इत्यमरः। 'सूर्मी स्थूणायःप्रतिमा' इति चामरः। 'स्थूणा गृहस्तम्भः' इति सिद्धान्तकौमुद्याम् उणादौ। 'स्थूणा सूर्म्यां स्तम्भे रुगन्तरे' इति हैमः। 'स्थूणा स्यात् सूर्म्यां स्तम्भेऽपि वेश्मनः' इति मेदिनी।

स्फारम् नपुं०। **इत्यत्र 'द्वाराग्र-स्फार-तक्र-वक्र०' (लि० सू० ९०) इति नपुंसकलिङ्गता।** स्फरणं स्फारम्। स्फर सञ्चलने (तु० प) 'भावे' (पा० अ० ३। ३। १८) इति घञ्-प्रत्ययः। घकार-ञकारानुबन्धलोपः। 'अत उपधायाः' (पा० अ० ७। २। ११६) इति धातोः उपधायाः आकारस्य आ-वृद्धिः।

स्फिक् स्त्री०। **इत्यत्र 'स्रक्-त्वग्-ज्योग्-वाग्-यवागू-नौ-स्फिजः' (लि० सू० ३०) इति स्त्रीलिङ्गता।** स्फायते इति स्फिक्। स्फायी वृद्धौ (भ्वा० आ०) 'पृषोदरादीनि यथोपदिष्टम्' (पा० अ० ६। ३। १०९) इति डिच्-प्रत्ययः। डकार-चकारानुबन्धलोपः। डित्त्वात् 'टेः' (पा० अ० ६। ४। १४३) इति धातोः आय् इत्यस्य टेर्लोपः। एवं स्फिच् शब्दः निष्पद्यते। अस्य प्रथमैकवचने स्फिक् भवति। 'स्त्रियां स्फिचौ कटिप्रोथौ' इत्यमरः। 'स्त्रियां स्फिचौ कटिप्रोथौ कटी-प्रोथौ च पूलकौ' इति रभसः।

स्रक् स्त्री०। **इत्यत्र 'भाः-स्रुक्-स्रग्-दिग्-उष्णिग्-उपानहः' (लि० सू० २०) इति तथा 'स्रुक्-त्वग्-ज्योग्-वाग्-यवागू-नौ-स्फिजः' (लि० सू० ३०) इति स्त्रीलिङ्गता।** या सृज्यते या सृजति सुखं वा सा स्रक्। सृज विसर्गे (तु० प०) 'ऋत्विग्-

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by S3 Foundation USA

दधृक्-स्रग्-दिगुष्णिगञ्च्युयुजिक्रुञ्चां च' (पा० अ० ३। २। ५९) इति कर्मणि क्विन्-प्रत्ययः। धातोः अम्-आगमश्च। सृ + अम्-ज्-क्विन् इति स्थितौ। क्विन्-प्रत्ययस्य सर्वाप-हारिलोपः। अम् इत्यस्य मकारस्य अनुबन्धस्य लोपः। 'इको यणचि' (पा० अ० ६। १। ७७) इति स-पर-वर्त्तिनः ऋकारस्य र्-यणादेशः। एवं स्रज् इति निष्पद्यते। अस्य प्रथमैक-वचने स्रक् भवति। 'माल्यं मालास्रजौ मूर्ध्नि' इत्यमरः। 'स्रगुद्गातुः' (मैत्रा० सं० ४। ४। ८)। 'स्रजमुद्गात्रे (ददाति)' (तैत्ति० सं० १। ८। १८। १) एवं (तै० ब्रा० १। ८। २। ३)।

स्रुक् स्त्री०। इत्यत्र **'भाः-स्रुक्-स्रग्-दिग्-उष्णिग्-उपानहः' (लि० सू० २०) इति स्त्रीलिङ्गता।** स्रवति घृतादिकं यतः सा स्रुक्। स्रु गतौ (दि० प०) 'चिक् च' (उ० २। ६३) इति चिक्-प्रत्ययः। प्रत्यये इकारः उच्चारणार्थः। ककारस्य इत्त्वात् लोपः। स्रुच् इति निष्पद्यते। अस्य शब्दस्य प्रथमैकवचने स्रुक् भवति। 'योषा वै स्रुग् वृषा स्रुवः' (शत० ब्रा० ३। १। १। ९)। 'युजौ ह वा एते यज्ञस्य यत् स्रुचौ' (शत० ब्रा० १। ८। ३। २७)। 'बाहू वै स्रुचौ' (शत० ब्रा० ७। ४। १। ३३)। 'वाग्वै स्रुचः' (शत० ब्रा० ६। ३। १। ८)। 'इमे वै लोकाः स्रुचः' (तैत्ति० ब्रा० ३। ३। १। २)। 'गौर्वै स्रुचः' (तैत्ति० ब्रा० ३। ३। ५। ४)। 'यजमानः स्रुचः' (तैत्ति० ब्रा० ३। ३। ६। ३)। 'अरत्निमात्री स्रुग् भवति' (काठ० सं० ६। १, कपि० सं० ३। १२)। 'आज्येन वै वज्रेण देवा वृत्रमघ्नन् स्रुग्भ्यां बाहुभ्याम्' (काठ० सं० २४। ९)। 'घृतं वै देवा वज्रं कृत्वा सोममघ्नन्त्स्रुचौ बाहू' (मैत्रा० सं० ३। ८। २)।

स्वर्गः पुं०। **इत्यत्र 'देवासुरात्म-स्वर्ग-गिरि-समुद्र-नख-केश-दन्त-स्तन-भुज-कण्ठ-खड्ग-शर-पङ्काभिधानानि' (लि० सू० ४३) इति पुँल्लिङ्गता।** सु सुष्ठु, अर्ज्यते इति स्वर्गः। सु + अर्ज अर्जने (भ्वा० प०) 'अकर्त्तरि च कारके संज्ञायाम्' (पा० अ० ३। ३। १९) इति कर्मणि घञ्-प्रत्ययः। घकार-ञकारानुबन्धलोपः। 'चजोः कु घिण्ण्यतोः' (पा० अ० ७। ३। ५२) इति धातोः जकारस्य गकारः, 'इकोयणचि' (पा० अ० ६। १। ७७) इति सु इत्यस्य उकारस्य व्-यणादेशः। एवं स्वर्ग निष्पद्यते। **अथवा** स्वर् दिवं गच्छति इति स्वर्गः। स्वर् + गम्लृ गतौ 'अन्येष्वपि दृश्यते' (पा० अ० ३। २। १०१) इति ड-प्रत्ययः। डकारानुबन्धलोपः। डित्त्वात् तस्मिन् परे 'टेः' (पा० अ० ६। ४। १४३) इति धातोः अम् इत्यस्य टेर्लोपः। **अथवा** सु सुष्ठु ऋज्यते गम्यते स्थीयते अर्ज्यते उपार्ज्यते वा अस्मिन् इति स्वर्गः। सु + ऋज गतिस्थानार्जनोपार्जनेषु (भ्वा० आ०) 'हलश्च' (पा० अ० ३। ३। १२१) इति घञ्-प्रत्ययः। घकार-ञकारानु-बन्धलोपः। 'चजोः कु घिण्ण्यतोः' (पा० अ० ७। ३। ५२) इति अथवा 'न्यङ्क्वादीनां

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by S3 Foundation USA

च' (पा० अ० ७। ३। ५३) इति धातोः जकारस्य गकारः। 'पुगन्तलघूपधस्य च' (पा० अ० ७। ३। ८६) इति धातोः उपधायाः ऋकारस्य 'उरण् रपरः' (पा० अ० १। १। ५१) इति सहकारेण अर्-गुणः। एवमपि स्वर्ग-शब्दः व्युत्पद्यते। 'स्वरव्ययं स्वर्ग-नाक-त्रिदिव-त्रिदशालयाः' इत्यमरः। 'एकविंशो वा हीतः स्वर्गो लोकः' (तै० ब्रा० ३। १२। ३। ७)। 'अपरिमितो वै स्वर्गो लोकः' (ऐत० ब्रा० ६। २३)। 'साम्राज्यं वै स्वर्गो लोकः' (तां० ब्रा० ४। ६। २४)। 'स्वर्गो वै लोको नाकः' (यजु० १२। २)। 'अथ यत्परं भाः (सूर्यस्य) प्रजापतिर्वा स स्वर्गो लोकः' (शत० ब्रा० १। ९। ३। १०)। 'अग्निर्वै स्वर्गस्य लोकस्याधिपतिः' (ऐत० ब्रा० ३। ४२)। 'ओमिति वै स्वर्गो लोकः' (ऐत० ब्रा० ५। ३२)। 'स्वरिति सामभ्योऽक्षरत् स्वः स्वर्गलोकोऽभवत्' (षड्विं० ब्रा० १। ५)। 'बृहद् वै स्वर्गो लोकः' (तैत्ति० ब्रा० १। २। २। ४)। 'स्वर्गो वै लोको दुरोहणम्' (ऐत० ब्रा० ४। २०)। 'छन्दोभिर्हि स्वर्गं लोकं गच्छन्ति' (शत० ब्रा० ६। ५। ४। ७)। 'नव स्वर्गाः लोकाः' (ऐत० ब्रा० ४। १६)। 'दश स्वर्गा लोकाः' (गो० उ० ६। २)। 'असमायी वै स्वर्गो लोकः कश्चिद् वै स्वर्गे लोके समेतीति' (ऐत० ब्रा० ६। २६)।

स्वर्णम्, स्वर्णः नपुं०, पुं०। इत्यत्र '**कार्षापण-स्वर्ण-सुवर्ण-व्रण-चरण-वृषण-विषाण-चूर्ण-तृणानि नपुंसके च**' (लि० सू० ६९) इति नपुंसकलिङ्गता पुँल्लिङ्गता च। सु सुष्ठु ऋणोति गच्छति इति स्वर्णम् स्वर्णः वा। सु + ऋणु गतौ (त० उ०) 'नन्दि-ग्रहि-पचादिभ्यो०' (पा० अ० ३। १। १३४) इति अच्-प्रत्ययः। चकारानुबन्धलोपः। 'उरण् रपरः' (पा० अ० १। १। ५१) इति सहकारेण 'पुगन्तलघूपधस्य च' (पा० अ० ७। ३। ८६) इति धातोः उपधायाः ऋकारस्य अर्-गुणः। 'इकोयणचि' (पा० अ० ६। १। ७७) इति सु इत्यस्य उकारस्य व्-यणादशः। **अथवा** सु शोभनम् अर्णनम् अर्णः गतिः येन तत्स्वर्णं सः स्वर्णः वा। सु + ऋणु गतौ (त० उ०) 'भावे' (पा० अ० ३। ३। १८) इति घञ्-प्रत्ययः। घकार-ञकारानुबन्धलोपः। धातोः ऋकारस्य पूर्ववत् अर्-गुणः सु इत्यस्य उकारस्य च व्-यणादेशः। 'स्वर्णं सुवर्णं कनकम्' इत्यमरः।

स्वसा स्त्री०। इत्यत्र '**ऋकारान्ता मातृ-दुहितृ-स्वसृ-पोतृ-ननान्दरः**' (लि० सू० ३) इति स्त्रीलिङ्गता। सु सुष्ठु अस्यति प्रक्षिपति निदधाति वा भ्रातरं मातापित्रोः गृहे स्वम् आत्मानं वा मातापित्रोः गृहात् पतिगृहे सा स्वसा। **अथवा** या सु अस्यते प्रक्षिप्यते मातापितृभ्रात्रादिभिः पतिगृहे सा स्वसा। सु + असु क्षेपणे (दि० प०) 'सावसेर्ऋन्'

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by S3 Foundation USA

(उ० २। ९८) इति ऋन्-प्रत्ययः। नकारानुबन्धलोपः। 'इको यणचि' (पा० अ० ६। १।७७) इति सु इत्यस्य उकारस्य व्-यणादेशः। एवं स्वसृ निष्पद्यते। अस्य प्रथमैकवचने स्वसा भवति। 'भगिनी स्वसा' इत्यमरः। 'स्वसारः अङ्गुलिनाम' (निघं० २। ५)। 'स्वसा-सु असा स्वेषु सीदति वा' (निरु० ११। ३२)।

स्वादु नपुं०। इत्यत्र **'श्मश्रु-जानु-वसु-स्वाद्वश्रु-जतु-त्रपु-तालूनि नपुंसके' (लि० सू० ५४) इति नपुंसकलिङ्गता।** यः स्वदते सः स्वादुः यत् स्वद्यते वा तत्स्वादु। ष्वद आस्वादने (भ्वा० आ०) 'कृ-वा-पा-जिमि-स्वदि-साध्यशूभ्य उण्' (उ० १। १) इति उण्-प्रत्ययः। णकारानुबन्धलोपः। 'अत उपधायाः' (पा० अ० ७। २। ११६) इति धातोः उपधायाः अकारस्य आ-वृद्धिः। 'इष्ट-मधुरौ स्वादू' इत्यमरः। 'स्वादु मिष्ट-मनोज्ञयोः' इति मेदिनी।

हनुः पुं०। **इत्यत्र 'उकारान्तः' (लि० सू० ५१) इति पुँल्लिङ्गता।** यः हन्ति हन्यते वा येन सः हनुः। हन् हिंसागत्योः (अ० प०) 'शृ-स्वृ-स्निहि-त्रप्यसि-वसि-हनि-क्लिदि-बन्धि-मनिभ्यश्च' (उ० १। १०) इति उ-प्रत्ययः स च नित्। नित्त्वं स्वरार्थम्। 'धमन्यञ्जन-केशी च हनुर्हट्टविलासिनी' इत्यमरः। 'गण्डौ कपोलौ तत्परो हनुः' इति चामरः। 'हनुर्हट्टविलासिन्यां भृत्यावस्त्रे गदे स्त्रियाम्। द्वयोः कपोलावयवे' इति मेदिनी। 'हनुर्हन्तेः' (निरु० ६। १७)। 'असन्तृण्णे हि हनू' (तैत्ति० सं० ६। २। ११। ३)। 'हनू अधिषवणे' (मै० सं० ३। ८। ४)। 'वाजं हनुभ्यां (प्रीणामि)' (काठ० सं० ५३। २ एवं मैत्रा० सं० ३। १५। १)।

हयः पुं०। **इत्यत्र 'योपधः' (लि० सू० ८६) इति पुँल्लिङ्गता।** हिनोति गच्छति इति हयः। हि गतौ (स्वा० प०) 'नन्दि-ग्रहि-पचादिभ्यो०' (पा० अ० ३। १। १३४) इति अच्-प्रत्ययः। चकारानुबन्धलोपः। 'सार्वधातुकार्धधातुकयोः' (पा० अ० ७। ३। ८४) इति धातोः इकारस्य ए-गुणः। 'एचोऽयवायावः' (पा० अ० ६। १। ७८) इति एकारस्य अय्-आदेशः। **अथवा** हय गतौ (भ्वा० प०) पूर्ववत् अच्-प्रत्ययः। चकारानुबन्धलोपः। 'वाजिवाहार्वगन्धर्वहयसैन्धवसप्तयः' इत्यमरः। 'हयः अश्वनाम' (निघं० १। १४)। 'हयो भूत्वा देवानवहत्' (शत० ब्रा० १०। ६। ४। १)। '(हेऽश्व! त्वं) हयोऽसि' (तां० ब्रा० १। ७। १)।

हरीतकी स्त्री०। **इत्यत्र 'वृक्षजातिः स्त्रियामेव' (लि० सू० १६३) इति स्त्रीलिङ्गता।**
CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by S3 Foundation USA
हरिः वर्णः इतः यस्याम् इति हरीतकी। हरि + इत इत्यत्र 'अकः सवर्णे दीर्घः' (पा०

अ० ६।१।१०१) इति इकारस्य इकारस्य च ई दीर्घः।'संज्ञायां कन्' (पा० अ० ५।३।७५) इति कन्-प्रत्ययः। नकारानुबन्धलोपः।'षिद्-गौरादिभ्यश्च' (पा० अ० ४।१।४१) इति ङीष्-प्रत्ययः। ङकार-षकारानुबन्धलोपः।'यस्येति च' (पा० अ० ६।४।१४८) इति क-परवर्त्तिनः अकारस्य लोपः।'हरीतकी हैमवती चेतकी श्रेयसी शिवा' इत्यमरः।

हर्म्यम् नपुं०। इत्यत्र **'धान्याज्य-सस्य-रूप्य-पण्य-वर्ण्य-वृष्य-हव्य-कव्य-काव्य-सत्यापत्य-मूल्य-शिक्य-कुडय-मद्य-हर्म्य-तूर्य-सैन्यानि' (लि० सू० १६८) इति नपुंसकलिङ्गता।** हरति चित्तम् इति हर्म्यम्। हृञ् हरणे (भ्वा० उ०) 'अघ्न्यादयश्च' (उ० ४।११३) इति यक्-प्रत्ययः मुडागमश्च। प्रत्यये ककारानुबन्धलोपः। आगमे उकार-टकारानुबन्धलोपः।'हर्म्यादि धनिनां वासः' इत्यमरः।'हर्म्यं गृहनाम' (निघं० ३।४)।'हृदयानि उ वै हर्म्याणि। हृदयो है वै क्रुध्यति' (तैति० ब्रा० ३।३६४)।

हलम् नपुं०। इत्यत्र **'मुख-नयन-लोह-वन-मांस-रुधिर-कार्मुक-विवर-जल-हल-धनान्नाभिधानानि'(लि० सू० १३७) इति नपुंसकलिङ्गता।** हलति विलिखति यत् तद् हलम्। हल विलेखने (भ्वा० प०) 'नन्दि-ग्रहि-पचादिभ्यो०' (पा० अ० ३।१।१३४) इति अच्-प्रत्ययः। चकारानुबन्धलोपः।'लाङ्गलं हलम्' इत्यमरः।

हविः नपुं०। इत्यत्र **'इसुसन्तः' (लि० सू० १३४) इति नपुंसकलिङ्गता।** यत् जुहोति हूयते वा तद् हविः। हु दानादनयोः (जु० प०) 'अर्चि-शुचि-हु-सृपि-छादि-छर्दिभ्य इसिः' (उ० २।११०) इति इसि-प्रत्ययः। इकारानुबन्धलोपः।'सार्वधातु-कार्धधातुकयोः' (पा० अ० ७।३।८४) इति धातोः उकारस्य ओ-गुणः।'एचोऽयवायावः' (पा० अ० ६।१।७८) इति ओकारस्य अव्-आदेशः।'आदेश-प्रत्यययोः' (पा० अ० ८।३।५९) इति सस्य षः। एवं हविष् इति निष्पद्यते। अस्य प्रथमा-द्वितीयैकवचने हविः भवति।'सांनाय्यं हविः' इत्यमरः।'घृतमाज्यं हविः सर्पिः' इति चामरः।'हविष् उदकनाम' (निघं० १।१२)।'जीवं वै देवानां हविरमृतममृतानाम्' (शत० ब्रा० १।२।१।२०)।'हवींषि ह वा आत्मा यज्ञस्य' (शत० ब्रा० १।६।३।३९)।'अक्तं हि हविः' (शत० ब्रा० २।६।२।६)।'मासा हवींषि' (शत० ब्रा० ११।२।७।३)।'नहि हविरनभिघृतमस्ति' (मैत्रा० सं० १।१०।२०)।'हविर्वा एतद्यदग्निहोत्रम्' (काठ० सं० ६।४ड)।

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by S3 Foundation USA

हव्यम् नपुं०। इत्यत्र '**धान्याज्य-सस्य-रूप्य-पण्य-वर्ण्य-वृष-हव्य-कव्य-काव्य-सत्यापत्य-मूल्य-शिक्य-कुड्य-मद्य-हर्म्य-तूर्य-सैन्यानि**' (**लि० सू० १६८**) **इति नपुंसकलिङ्गता**। हूयते दीयते प्रक्षिप्यते वा अग्नौ यत् तद् हव्यम्। हूयन्ते देवाः येन तद् हव्यम्। हु दानादनयोः (जु० प०) 'अचो यत्' (पा० अ० ३। १। ९७) इति यत्-प्रत्ययः। तकारानुबन्धलोपः। 'सार्वधातुकार्धधातुकयोः' (पा० अ० ७। ३। ८४) इति धातोः उकारस्य ओ-गुणः। 'वान्तो यि प्रत्यये' (पा० अ० ६। १। ७९) इति ओकारस्य अव्-आदेशः। 'हव्यकव्ये दैवपैत्रे अन्ने' इत्यमरः। 'हव्यानि हवींषि' (निरु० ८। ७)। 'हव्यः हवनार्हः' (निरु० १०। ४२)।

हसनम् नपुं०। इत्यत्र '**भावे ल्युडन्तः**' (**लि० सू० ११९**) **इति नपुंसकलिङ्गता**। हासः हसितं वा इति हसनम्। हसे हसने (भ्वा० प०) 'ल्युट् च' (पा० अ० ३। ३। ११५) इति भावे ल्युट्-प्रत्ययः। लकार-टकारानुबन्धलोपः। 'युवोरनाकौ' (पा० अ० ७। १। १) इति यु-स्थाने अनादेशः।

हसितम् नपुं०। इत्यत्र '**निष्ठा च**' (**लि० सू० १२०**) **इति नपुंसकलिङ्गता**। हासः हसनं वा इति हसितम्। हसे हसने (भ्वा० प०) 'नपुंसके भावे क्तः' (पा० अ० ३। ३। ११४) इति क्त-प्रत्ययः। ककारानुबन्धलोपः। 'आर्धधातुकस्येड् वलादेः' (पा० अ० ७। २। ३५) इति इडागमः। टकारानुबन्धलोपः।

हस्तः पुं०। इत्यत्र '**हस्त-कुन्तान्त-व्रात-जात-दूत-धूर्त-सूत-चूत-मुहूर्ताः**' (**लि० सू० १११**) **इति पुंल्लिङ्गता**। हसति इति हस्तः। हस हसने (भ्वा० प०) 'हसि-मृ-ग्रिण्वामि-दमि-लू-पू-धूर्विभ्यस्तन्' (उ० ३। ८६) इति तन्-प्रत्ययः। नकारानुबन्ध-लोपः। 'आर्धधातुकस्येड् वलादेः' (पा० अ० ७। २। ३५) इति प्राप्तः इडागमः 'ति-तु-त्र-त-थ-सि-सु-सरकसेषु च' (पा० अ० ७। २। ९) इति निषेधात् न भवति। 'प्रकोष्ठे विस्तृतकरे हस्तः', 'पाशः पक्षश्च हस्तश्च कलापार्थाः कचात् परे' इत्यमरः। 'हस्तः करिकरे सप्रकोष्ठकरेऽपि च। ऋक्षे केशात्परो व्राते' इति मेदिनी। 'अत्रायमर्थः केशवाचकात्परो यो हस्त-शब्दः स समूहवाची, तथा च केशहस्त-शब्दः केश-समूहशब्दपर्यायः' इति सिद्धान्तकौमुद्याम् उणादौ तत्त्वबोधिनीकारः। 'हस्तो हन्तेः प्राशुर्हनने' (निरु० १। ७)। 'हस्तः हस्तो वितस्तिः' (शत० ब्रा० १०। २। २। ८)। '(नक्षत्रं) देवस्य सवितुर्हस्तः' (तैत्ति० ब्रा० १। ५। १। ३)। 'सविता देवता हस्तो नक्षत्रम्' (काठ० सं० ३९। १३)। 'हस्तो निसृष्टौ' (काठ० सं० ३४। १५)।

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by S3 Foundation USA

हृदयम् नपुं०। इत्यत्र **'किसलय-हृदयेन्द्रियोत्तरीयाणि नपुंसके' (लि० सू० ८७) इति नपुंसकलिङ्गता।** हरति विषयान् यत् तद् हृदयम्। हृञ् हरणे (भ्वा० उ०) 'वृं-ह्रो-षुग्-दुकौ च' (उ० ४। १०१) इति कयन्-प्रत्ययः। दुगागमश्च। प्रत्यये ककार-नकारानुबन्धलोपः। आगमे उकार-ककारानुबन्धलोपः। प्रत्ययस्य कित्त्वात् तस्मिन् परे 'सार्वधातुकार्धधातुकयोः' (पा० अ० ७। ३। ८४) इति धातोः ऋकारस्य 'उरण् रपरः' (पा० अ० १। १। ५१) इति सहकारेण प्राप्तः अर्-गुणः 'क्ङिति च' (पा० अ० १। १। ५) इति निषेधात् न भवति। **अथवा** हरति इति हृत्। हृञ् हरणे (भ्वा० उ०) 'क्विप् च' (पा० अ० ३। २। ७६) इति क्विप्-प्रत्ययः। तस्य सर्वापहारिलोपः। 'ह्रस्वस्य पिति कृति तुक्' (पा० अ० ६। १। ७१) इति तुगागमः। उकार-ककारानुबन्धलोपः। अयते इति अयम्। अय गतौ (भ्वा० आ०) 'नन्दि-ग्रहि-पचादिभ्यो०' (पा० अ० ३। १। १३४) इति अच्-प्रत्ययः। चकारानुबन्धलोपः। एवं हृत् च अदः अयम् इति हृदयम्। 'हृदयं हृत्' इत्यमरः। 'चित्तं तु चेतो हृदयम्' इति चामरः। 'हृदयं मानसे बुक्कोरसोरपि नपुंसकम्' इति मेदिनी। 'तदेतम् त्र्यक्षरं हृदयमिति हृ इत्येकमक्षरमभिहरन्त्यस्मै स्वाश्चान्ये च य एवं वेद, द इत्येकमक्षरं ददत्यस्मै स्वाश्चान्ये च य एवं वेद, यमित्येकमक्षरमेति स्वर्गं लोकं य एवं वेद' (शत० ब्रा० १४।८।४।१)। 'आत्मा वै मनो हृदयम्' (शत० ब्रा० ३।८।३।८)। 'तस्मादिदं गुहेव हृदयम्' (शत० ब्रा० ११। २। ६। ५)। 'मूर्धा हृदये श्रितः' (तैत्ति० ब्रा० ३। १०।८।९)। 'एष प्रजापतिर्यद् हृदयम्' (शत० ब्रा० १४। ८।४।१)। 'हृदयं वै सम्राट्। परमं ब्रह्म' (शत० ब्रा० १४।६।१०।१८)। 'परिमण्डलं हृदयम्' (शत० ब्रा० ९। १। २। ४०)। 'हृदयं वै स्तोमभागः' (शत० ब्रा० ८। ६। २। १५)। 'असौ वा आदित्यो हृदयम्' (शत० ब्रा० ९। १। २। ४०)। 'श्लक्ष्णं हृदयम्' (शत० ब्रा० ९। १। २। ४०)। 'प्राणो वै हृदयमतो ह्ययमूर्ध्वः प्राणः सञ्चरति' (शत० ब्रा० ३।८।३।१५)। 'प्रजानां रेतो हृदयं, हृदयस्य रेतो मनः' (ऐत० आर० २। १। ३)। 'मध्यतो वा आत्मनो हृदयम्' (जैमि० ब्रा० १। ७०)। 'हृदयं प्रेतिः' (जैमि० ब्रा० १। १४)।

हेमन्तम् नपुं०। इत्यत्र **'अभाषायां हेमन्त-शिशिरावहोरात्रे च' (लि० सू० १२५) इति छन्दसि नपुंसकलिङ्गता। भाषायां तु पुँल्लिङ्गता एव।** शैत्याद् यः हन्ति सः इति हेमन्तः ऋतुविशेषः। हन हिंसागत्योः (अ० प०) 'हन्तेर्मुट् हि च' (उ० ३। १२९) इति झच्-प्रत्ययः, तस्य मुडागयः धातोः च हि अयम्-आदेशः। प्रत्यये चकारानुबन्धलोपः। आगमे उकार-टकारानुबन्धलोपः। 'सार्वधातुकार्धधातुकयोः' (पा० अ० ७। ३। ८४)

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by S3 Foundation USA

इति हि इत्यस्य इकारस्य ए-गुणः 'झोऽन्तः' (पा० अ० ७। ३। ३) इति झस्य अन्तादेशः। 'हेमन्तो हिमवान्। हिमं पुनर्हन्तेर्वा हिनोतेर्वा' (निरु० ४। २७)। 'अन्त ऋतूनां हेमन्तः' (शत० ब्रा० १।५।३।१३)। 'हेमन्तो वा ऋतूनां स्वाहाकारो हेमन्तो हीनाः प्रजाः स्वं वशमुपनयते' (शत० ब्रा० १।५।४।५)। 'तस्य (संवत्सरस्य) वसन्त एवं द्वारं हेमन्तो द्वारं तं वा एवं संवत्सरं स्वर्गं लोकं प्रपद्यते' (शत० ब्रा० १।६। १। १९)। 'यद् वृष्ट्योद्गृह्णाति तद्धेमन्तस्य (रूपम्)' (शत० ब्रा० २। २। ३। ८)। 'एतौ सहश्च सहस्यश्च एव हैमन्तिकौ (मासौ) सः यद्धेमन्तः इमाः प्रजाः सहसेव स्वं वशमुपनयते तेनो हैतौ सहश्च सहस्यश्च' (शत० ब्रा० ४।३।१।१८)।'तस्य (पर्जन्यस्य) सेनजिच्च सुषेणश्च सेनानी-ग्रामण्याविति हैमन्तिकौ तावृतू' (शत० ब्रा० ८। ६। १। २०)। 'हेमन्तो निधनम्' (षड्विं० ब्रा० ३। १)। 'स्वाहाकृतिमन्तं यजति हेमन्तमेव हेमन्ते वा इदं सर्वं स्वाहाकृतम्' (कौषी० ब्रा० ३। ४)। 'हेमन्तो मध्यं (संवत्सरस्य)' (तैत्ति० ब्रा० ३। ११। १०। ४)। 'हेमन्तो हि वरुणः' (मैत्रा० सं० १। १०। १२)।

नारायणकाङ्कर-ग्रथित-व्याख्यात-सम्पादित एषः।
लिङ्गानुशासनकोष इह नूत्न-नूत्नः सम्पूर्णः।।

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by S3 Foundation USA

पाणिनीयं

लिङ्गानुशासनम्

अथ स्त्र्यधिकारः

१. लिङ्गम्। **अधिकारः अयम्।**

२. स्त्री। **अधिकारः अयम्।**

३. ऋकारान्ता मातृ-दुहितृ-स्वसृ-पोतृ (यातृ)-ननान्दरः। **स्त्रियाम्।**

४. अन्यू-प्रत्ययान्तो धातुः। **स्त्रियाम्।**

५. अशनि-भरण्यरणयः पुंसि च। **चात् स्त्रियाम् अपि।**

६. मि-न्यन्तः। **स्त्रियाम्।**

७. वह्नि-वृष्ण्यग्नयः पुंसि। **पूर्वसूत्रस्य अपवादः।**

८. श्रोणि-योन्यूर्मयः पुंसि च। **चात् स्त्रियाम् अपि।**

९. क्तिन्नन्तः। **स्त्रियाम्।**

१०. ईकारान्तश्च। **स्त्रियाम्।**

११. ऊङाबन्तश्च। **स्त्रियाम्।**

१२. य्वन्तमेकाक्षरम्। **स्त्रियाम्।**

१३. विंशत्यादिरानवतेः। **स्त्रियाम्।**

१४. दुन्दुभिरक्षेषु। **स्त्रियाम्।**

१५. नाभिरक्षत्रिये। **स्त्रियाम्।**

१६. उभावन्यत्र पुंसि।

१७. तलन्तः। **स्त्रियाम्।**

१८. भूमि-विद्युत्-सरिल्-लता-वनिताभिधानानि। **स्त्रियाम्।**

१९. यादो नपुंसकम्। **पूर्वसूत्रस्य अपवादः।**

२०. भास्-स्रुक्-दिग्-उष्णिग्-उपानहः। **स्त्रियाम्।**

२१. स्थूणोर्णे नपुंसके च। **चात् स्त्रियाम् अपि।**

२२. गृह-शशाभ्यां (स्थूणोर्णे) **क्लीबे।**

२३. प्रावृड्-विप्रुड्-रुट्-तुड्-विट्-त्विषः। **स्त्रियाम्।**

२४. दर्वि-विदि-वेदि-खनि-शान्यश्रि-वेशि-कृष्योपधि-कट्यङ्गुलयः। **स्त्रियाम्।**

२५. तिथि-नाडि-रुचि-वीचि-नालि-धूलि-किकि-केलि-च्छवि-रात्र्यादयः। **स्त्रियाम्।**

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by S3 Foundation USA

२६. शष्कुलि-राजि-कुट्यशनि-वर्ति-भ्रुकुटि-त्रुटि-वलि-पङ्क्तयः। **स्त्रियाम्।**

२७. प्रतिपद्-आपद्-विपत्-सम्पच्-छरत्-संसत्-परिषद्-उषः-संवित्-क्षुत्-पुन्-मुत्-समिधः। **स्त्रियाम्।**

२८. आशीर्-धूः-पूर्-गीर्-द्वारः। **स्त्रियाम्।**

२९. अप्-सुमनस्-समा-सिकता-वर्षाणां बहुत्वं च। **चात् स्त्रियाम्।**

३०. स्रक्-त्वग्-ज्योग्-वाग्-यवागू-नौ-स्फिजः। **स्त्रियाम्।**

३१. तृटि-सीमा-सम्बध्याः। **स्त्रियाम्।**

३२. चुल्लि-वेणि-खार्यश्च। **स्त्रियाम्।**

३३. तारा-धारा-ज्योत्स्नादयश्च। **स्त्रियाम्।**

३४. शलाका स्त्रियां नित्यम्।

।। इति स्त्र्यधिकारः।।

अथ पुँल्लिङ्गाधिकारः

३५. पुमान्। **अधिकारः अयम्।**

३६. घञ्-अबन्तः। **पुंसि।**

३७. घाऽजन्तश्च। **पुंसि।**

३८. भय-लिङ्ग-भग-पदानि नपुंसके।

३९. नङन्तः। **पुंसि।**

४०. याच्ञा स्त्रियाम्।

४१. क्यन्तो घुः। **पुंसि।**

४२. इषुधिः स्त्री च। **चात् पुंसि अपि।**

४३. देवाऽसुराऽत्म-स्वर्ग-गिरि-समुद्र-नख-केश-दन्त-स्तन-भुज-कण्ठ-खड्ग-शर-पङ्काभिधानानि। **पुंसि।**

४४. त्रिष्टप-त्रिभुवने नपुंसके। **पूर्वसूत्रस्य अपवादः।**

४५. द्यौः स्त्रियाम्। **पूर्वसूत्रस्य अपवादः।**

४६. इषु-बाहू स्त्रियां च। **चात् पुंसि अपि।**

४७. बाण-काण्डौ नपुंसके च। **चात् पुंसि अपि।**

४८. नान्तः। **पुंसि।**

४९. क्रतु (ऋतु)-पुरुष-कपोल-गुल्फ-मेघाभिधानानि। **पुंसि।**

५०. अभ्रं नपुंसकम्। **पूर्वसूत्रस्य अपवादः।**

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by S3 Foundation USA

५१. उकारान्तः। **पुंसि।**

५२. धेनु-रज्जु-कुहू-सरयु-तनु-रेणु-प्रियङ्गवः। **स्त्रियाम्।**

५३. समासे रज्जुः पुंसि च। **चात् स्त्रियाम् अपि।**

५४. श्मश्रु-जानु-स्वाद्वश्रु-जतु-त्रपु-तालूनि **नपुंसके।**

५५. वसु चार्थवाचि। **नपुंसके।**

५६. मद्गु-मधु-सीधु-शीधु-सानु-कमण्डलूनि **नपुंसके च। चात् पुंसि अपि।**

५७. रुत्वन्तः। **पुंसि।**

५८. दारु-कशेरु-जतु-वस्तु-मस्तूनि **नपुसंके। पूर्वसूत्रस्य अपवादः।**

५९. **सक्तुर्नपुंसके च। चात् पुंसि अपि।**

६०. प्राग् रश्मेरकारान्तः। **अधिकारः अयम्।**

६१. कोपधः। **पुंसि।**

६२. चिबुक-शालूक-प्रातिपदिकांशुकोल्मुकानि **नपुंसके।**

६३. कण्टकाऽनीक-सरक-मोदक-चषक-मस्तक-पुस्तक-तडाक-निष्क-शुष्क-वर्चस्क-पिनाक-भाण्डक-पिण्डक-कटक-शण्डक-पिटक-तालक-फलक-पुलाकानि **नपुंसके च। चात् पुंसि अपि।**

६४. टोपधः। **पुंसि।**

६५. किरीट-मुकुट-ललाट-वट-वीट (विट)-शृङ्गाट-कराट-लोष्टानि **नपुंसके।**

६६. कुट-कूट-कपट-कवाट-कर्पट-नट-निकट-कीट-कटानि **नपुंसके च। चात् पुंसि अपि।**

६७. णोपधः। **पुंसि।**

६८. ऋण-लवण-पर्ण-तोरण-रणोष्णानि **नपुंसके। पूर्वसूत्रस्य अपवादः।**

६९. कार्षापण-स्वर्ण-सुवर्ण-व्रण-चरण-वृषण-विषाण-चूर्ण-तृणानि **नपुंसके च। चात् पुंसि अपि।**

७०. थोपधः। **पुंसि।**

७१. काष्ठ-पृष्ठ-सिक्थोक्थानि **नपुंसके। पूर्वसूत्रस्य अपवादः।**

७२. काष्ठा दिगर्था **स्त्रियाम्।**

७३. तीर्थ-प्रोथ-यूथ-गाथानि **नपुंसके च। चात् पुंसि अपि।**

७४. नोपधः। **पुंसि।**

७५. जघनाऽजिन-तुहिन-कानन-वन-वृजिन-विपिन-वेतन-शासन-सोपान-मिथुन-श्मशान-रत्न-निम्न-चिह्नानि **नपुंसके।**

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by S3 Foundation USA

७६. मान-यानाऽभिधान-नलिन-पुलिनोद्यान-शयनाऽसन-स्थान-चन्दनाऽलान-समान-भवन-वसन-सम्भावन-विभावन-विमानानि **नपुंसके च। चात् पुंसि अपि।**

७७. पोपधः। **पुंसि।**

७८. पाप-रूपोडुप-तल्प-शिल्प-पुष्प-शष्प-समीपान्तरीपाणि **नपुंसके। पूर्वसूत्रस्य अपवादः।**

७९. शूर्प-कुतप-कुणप-द्वीप-विटपानि **नपुंसके च। चात् पुंसि अपि।**

८०. भोपधः। **पुंसि।**

८१. तलभं **नपुंसके च। पूर्वसूत्रस्य अपवादः।**

८२. जृम्भं **नपुंसके च। चात् पुंसि अपि।**

८३. मोपधः। **पुंसि।**

८४. रुक्म-सिध्म-युग्मेध्म-गुल्माऽध्यात्म-कुङ्कुमानि **नपुंसके। पूर्वसूत्रस्य अपवादः।**

८५. सङ्ग्राम-दाडिम-कुसुमाश्रम-क्षेम-क्षौम-होमोद्दामानि **नपुंसके च। चात् पुंसि अपि।**

८६. योपधः। **पुंसि।**

८७. किसलय-हृदयेन्द्रियोत्तरीयाणि **नपुंसके। पूर्वसूत्रस्य अपवादः।**

८८. गोमय-कषाय-मलयाऽन्वयाऽव्ययानि **नपुंसके च। चात् पुंसि अपि।**

८९. रोपधः। **पुंसि।**

९०. द्वाराऽग्र-स्फार-तक्र-वक्र-वप्र-क्षिप्र-क्षुद्र-नार-तीर-दूर-कृच्छ्र-रन्ध्राऽश्र-श्वभ्र-भीर-गभीर-क्रूर-विचित्र-केयूर-केदारोदराऽजस्र-शरीर-कन्दर-मन्दार-पञ्जराऽजर-जठराऽजिर-वैर-चामर-पुष्कर-गह्वर-कुहर-कुटीर-कुलीर-चत्वर-काश्मीर-नीराऽम्बर-शिशिर-तन्त्र-यन्त्र-नक्षत्र-क्षेत्र-मित्र-कलत्र-चित्र-मूत्र-सूत्र-वक्त्र-नेत्र-गोत्राऽङ्गुलित्र-भलत्र-शस्त्र-शास्त्र-वस्त्र-पत्र-पात्र-च्छत्राणि **नपुंसके। पूर्वसूत्रस्य अपवादः।**

९१. शुक्रमदेवतायाम्। **नपुंसके।**

९२. चक्र-वज्राऽन्धकार-साराऽवारपार-क्षीर-तोमर-शृङ्गार-भृङ्गार-मन्दारोशीर-तिमिर-शिशिराणि **नपुंसके च। चात् पुंसि अपि।**

९३. षोपधः। **पुंसि।**

९४. शिरीष-र्जीषाऽम्बरीष-पीयूष-पुरीष-किल्बिष-कल्माषाणि **नपुंसके। पूर्वसूत्रस्य अपवादः।**

९५. यूष-करीष-मिष-विष-वर्षाणि **नपुंसके च। चात् पुंसि अपि।**

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by S3 Foundation USA

९६. सोपधः। **पुंसि।**

९७. पनस-विस-बुस-साहसानि **नपुंसके। पूर्वसूत्रस्य अपवादः।**

९८. चमसाऽस-रस-निर्यासोपवास-कार्पास-वास-मास-कास-कांस-मांसानि **नपुंसके च। चात् पुंसि अपि।**

९९. कंसं चाप्राणिनि। **नपुंसके।**

१००. रश्मि-दिवसाभिधानानि। **पुंसि।**

१०१. दीधितिः **स्त्रियाम्। पूर्वसूत्रस्य अपवादः।**

१०२. दिनाऽहनी **नपुंसके। पूर्वसूत्रस्य अपवादः।**

१०३. मानाभिधानानि। **पुंसि।**

१०४. द्रोणाढकौ **नपुंसके च। चात् पुंसि अपि।**

१०५. खारी-मानिके **स्त्रियाम्। १०३ सूत्रस्य अपवादः।**

१०६. दाराऽक्षत-लाजासूनां बहुत्वं च। **चात् पुंसि।**

१०७. नाड्यपजनोपपदानि व्रणाङ्गपदानि। **पुंसि।**

१०८. मरुद्-गरुत्-तरद्-ऋत्विजः। **पुंसि।**

१०९. ऋषि-राशि-दृति-ग्रन्थि-क्रिमि-ध्वनि-बलि-कौलि-मौलि-रवि-कवि-कपि-मुनयः।

११०. ध्वज-गत-मुञ्ज-पुञ्जाः। **पुंसि।**

१११. हस्त-कुन्ताऽन्त-व्रात-वात-दूत-धूर्त-सूत-चूत-मुहूर्त्ताः। **पुंसि।**

११२. षण्ड-मण्ड-करण्ड-भरण्ड-वरण्ड-तुण्ड-गण्ड-मुण्ड-पाषण्ड-शिखण्डाः। **पुंसि।**

११३. वंशोऽश-पुरोडाशाः। **पुंसि।**

११४. ह्रद-कन्द-कुन्द-बुद्बुद-शब्दाः। **पुंसि।**

११५. अर्घ-पथि-मथ्यृभुक्षि-स्तम्ब-नितम्बपूगाः। **पुंसि।**

११६. पल्लव-पल्वल-कफ-रेफ-कटाह-निर्व्यूह-मठ-मणि-तरङ्ग-तुरङ्ग-गन्ध-मृदङ्ग-सङ्ग-समुद्र-पुङ्खाः। **पुंसि।**

११७. सारथ्यतिथि-कुक्षि-वस्ति-पाण्यञ्जलयः। **पुंसि।**

।। इति पुंल्लिङ्गाधिकारः।।

अथ नपुंसकाधिकारः

११८. नपुंसकम्। **अधिकारः अयम्।**

११९. भावे ल्युडन्तः। **नपुंसके।**

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by S3 Foundation USA

१२०. निष्ठा च (भावे)। **नपुंसके।**

१२१. त्व-ष्यञौ तद्धिते (भावे)। **नपुंसके।**

१२२. कर्मणि च ब्राह्मणादि-गुणवचनेभ्यः। **चाद् भावे नपुंसके।**

१२३. (क) यद्-य-ढग्-यग्-अञ्-अण्-वुञ्-छाश्च। **भावे कर्मणि च नपुंसके।**

१२३. (ख) अव्ययीभावः। **नपुंसके।**

१२४. द्वन्द्वैकत्वम्। **नपुंसके।**

१२५. अभाषायां हेमन्त-शिशिरावहोरात्रे च। **पूर्ववत् लिङ्गे।**

१२६. अनञ्कर्मधारयस्तत्पुरुषः। **अधिकारः अयम्।**

१२७. अनल्पे छाया। **नपुसंके।**

१२८. राजाऽमनुष्यपूर्वा सभा। **नपुंसके।**

१२९. सुरा-सेना-च्छाया-शाला-निशाः **स्त्रियां च। चात् नपुंसके अपि।**

१३०. (क) परवत्। उक्ताद् अन्यत् शिष्टः तत्पुरुषः परलिङ्गवत्।

१३०. (ख) रात्राह्नाहाः **पुंसि।**

१३१. अपथ-पुण्याहे **नपुंसके।**

१३२. संख्यापूर्वो रात्रिः। **नपुंसके।**

१३३. द्विगुः **स्त्रियां च** (व्यवस्थया)। **चात् नपुंसके अपि।**

१३४. इस्-उसन्तः। **नपुंसके।**

१३५. अर्चिः **स्त्रियां च।**

१३६. छदिः (छर्दिः) **स्त्रियामेव।**

१३७. मुख-नयन-लोह-वन-मांस-रुधिर-कार्मुक-विवर-जल-हल-धनान्नाभिधानानि। **नपुंसके।**

१३८. सीरार्थौदनाः **पुंसि। पूर्वसूत्रस्य अपवादः।**

१३९. वक्त्र-नेत्राऽरण्य-गाण्डीवानि **पुंसि च। चात् नपुंसके अपि।**

१४०. अटवी **स्त्रियाम्। १३७ पूर्वसूत्रस्य अपवादः।**

१४१. लोपधः। **नपुंसके।**

१४२. तूलोपल-ताल-कुसूल-तरल-कम्बल-देवल-वृषलाः **पुंसि। पूर्वसूत्रस्य अपवादः।**

१४३. शील-मूल-मङ्गल-साल-कमल-तल-मुसल-कुण्डल-पलल-मृणाल-वाल-निगल-पलाल-विडाल-खिल-शूलाः **पुंसि च। चात् नपुंसके अपि।**

१४४. शतादिः संख्या। **नपुंसके।**

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by S3 Foundation USA

१४५. शतायुत-प्रयुताः **पुंसि च। चात् नपुंसके अपि।**

१४६. लक्षाकोटिः **स्त्रियाम्। पूर्वसूत्रस्य अपवादः।**

१४७. शङ्कुः **पुंसि। १४४ पूर्वसूत्रस्य अपवादः।**

१४८. सहस्रं क्वचित्। **पुंसि अपि।**

१४९. मन् द्व्यच्कोऽकर्तरि। **नपुंसके।**

१५०. ब्रह्मन् **पुंसि च। चात् नपुंसके अपि।**

१५१. नाम-रोमणी **नपुंसके।**

१५२. असन्तो द्व्यच्कः। **नपुंसके।**

१५३. अप्सराः **स्त्रियाम्।**

१५४. त्रान्तः। **नपुंसके।**

१५५. यात्रा-मात्रा-भस्त्रा-दंष्ट्रा-वरत्राः **स्त्रियामेव। पूर्वसूत्रस्य अपवादः।**

१५६. भृत्राऽमित्र-छात्र-पुत्र-मन्त्र-वृत्र-मेढ्रोष्ट्राः **पुंसि। १५४ पूर्वसूत्रस्य अपवादः।**

१५७. पत्र-पात्र-पवित्र-सूत्र-च्छत्राः **पुंसि च। चात् नपुंसके अपि।**

१५८. बल-कुसुम-शुल्ब-पतन-रणाभिधानानि। **नपुंसके।**

१५९. पद्म-कमलोत्पलानि **पुंसि च। चात् नपुंसके अपि।**

१६०. आहव-सङ्ग्रामौ **पुंसि। १५८ पूर्वसूत्रस्य अपवादः।**

१६१. अजिः **स्त्रियामेव। १५८ पूर्वसूत्रस्य अपवादः।**

१६२. फलजातिः। **नपुंसके।**

१६३. वृक्षजातिः **स्त्रियामेव।**

१६४. वियज्-जगत्-सकृत्-शकन्-पृषच्-छकृद्-यकृद्-उदश्वितः। **नपुंसके।**

१६५. नवनीताऽवतानाऽमृत-निमित्त-वित्त-चित्त-पित्त-व्रत-रजत-वृत्त-पलितानि। **नपुंसके।**

१६६. श्राद्ध-कुलिश-दैव-पीठ-कुण्डाऽकाऽङ्क-दधि-सक्थ्यक्ष्यास्पदाकाश-कण्व-बीजानि। **नपुंसके।**

१६७. दैवं **पुंसि च। चात् नपुंसके।**

१६८. धान्याऽऽज्य-सस्य-रूप्य-पण्य-वर्ण्य-धृष्य-हव्य-कव्य-काव्य-सत्याऽपत्य-मूल्य-शिक्य-कुड्य-मद्य-हार्य-तूर्य-सैन्यानि। **नपुंसके।**

१६९. द्वन्द्व-बर्ह-दुःख-बडिश-पिच्छ-बिम्ब-कुटुम्ब-कवच-वर-शर-वृन्दारकाणि। **नपुंसके।**

१७०. अक्षमिन्द्रिये। **नपुंसके।**

।। इति नपुंसकाधिकारः ।।

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by S3 Foundation USA

अथ स्त्री-पुंसाधिकारः

१७१. स्त्री-पुंसयोः। **अधिकारः अयम्।**

१७२. गो-मणि-यष्टि-मुष्टि-पाटलि-वस्ति-शाल्मलि-त्रुटि-मसि-मरीचयः। **स्त्रियां पुंसि च।**

१७३. मृत्यु-सीधु-कर्कन्धु-किष्कु-कण्डु-रेणवः। **स्त्रियां पुंसि च।**

१७४. गुणवचनमुकारान्तं **नपुंसके च। चात् स्त्रियां पुंसि च।**

१७५. अपत्यार्थस्तद्धिते। **स्त्रियां पुंसि च।**

।। इति स्त्री-पुंसाधिकारः।।

अथ पुं-नपुंसकाधिकारः

१७६. पुं-नपुंसकयोः। **अधिकारः अयम्।**

१७७. घृत-भूत-मुस्त-क्ष्वेलितैरावत-पुस्त-पुस्त-लोहिताः। **पुंसि नपुंसके च।**

१७८. शृङ्गाऽर्घ-निदाघोद्यम-शल्य-दृढाः। **पुंसि नपुंसके च।**

१७९. व्रज-कुञ्ज-कुथ-कूर्च-प्रस्थ-दर्पाऽर्भाऽर्धच-दर्भ-पुच्छाः। **पुंसि नपुंसके च।**

१८०. कबन्धौषधाऽऽयुधान्ताः। **पुंसि नपुंसके च।**

१८१. दण्ड-मण्ड-खण्ड-शव-सैन्धव-पार्श्वाऽऽकाश-कुश-काशाऽङ्कुश-कुलिशाः। **पुंसि नपुंसके च।**

१८२. गृह-मेह-देह-पट्ट-पटहाऽष्टापदाऽम्बुद-ककुदाश्च। **पुंसि नपुंसके च।**

।। इति पुं-नपुंसकाधिकारः।।

अथ अविशिष्ट-लिङ्गाधिकारः

१८३. अविशिष्टलिङ्गम्। **अधिकारः अयम्।**

१८४. अव्ययं कति-युष्मद्-अस्मदः। **त्रिषु लिङ्गेषु।**

१८५. ष्णान्ता संख्या। **त्रिषु लिङ्गेषु।**

१८६. गुण-वचनं च। **त्रिषु लिङ्गेषु।**

१८७. कृत्याश्च। **त्रिषु लिङ्गेषु।**

१८८. करणाधिकरणयोर्ल्युट् च। **त्रिषु लिङ्गेषु।**

१८९. सर्वादीनि सर्वनामानि। **त्रिषु लिङ्गेषु।**

।। इति अविशिष्ट-लिङ्गाधिकारः।।

एवं

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by S3 Foundation USA

।। पाणिनीय लिङ्गानुशासनं सम्पूर्णम्।।

अथ लिङ्गानुशासन-शब्दानुक्रमणिका

पुँल्लिङ्ग-शब्दाः

शब्दः	सूत्र-संख्या
[अ]	
अंश	११३
अक्ष (इन्द्रियभिनार्थे)	१७०
अक्षत	१०६
अग्नि	७
अङ्कुर	२८९
अञ्जलि	११७
अतिथि	११७
अध्वर	४९
अन्न	१११
अपाङ्ग	१०७
अब्धि	४३
अमित्र	१५६
अर्घ	११५
अर्थ	७०, १३८
असु	१०६
असुर	४३
आत्मन्	४३
आधि	४१
आहव	१६०
[इ]	
इक्षु	५१
इन	७४
उदधि	४१
उपल	१४२
उष्ट्र	१५६
[ऋ]	
ऋत्विज्	१०८
ऋभुक्षिन्	११५
ऋषि	१०९
[ओ]	
ओदन	१३८
[क]	
कटाह	११६
कण्ठ	४३
कन्द	११४
कपि	१०९
कपोल	४९
कफ	११६
कम्बल	१४२
कर	३६
करण्ड	११२
कररुह	४३
करवाल	४३
कर्दम	४३
कल्क	६१
कवि	१०९
किरण	१००
कुक्षि	११७
कुच	४३
कुडव	१०३

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by S3 Foundation USA

शब्दः	सूत्र-संख्या	शब्दः	सूत्र-संख्या
कुन्त	१११	[च]	
कुन्द	११४	चय	३७
कुम्भ	८०	चूत	१११
कुंसूल	१४२	[छ]	
केश	४३	छात्र	१५६
कौलि	१०९	[ज]	
क्रतु	४९	जनपद	१०७
क्रिमि	१०९	जय	३७
क्षुप्	८९	[त]	
क्षेत्रज्ञ	४३	तक्ष	४८
[ख]		तप	३७
खड्ग	४३	तरङ्ग	११६
[ग]		तरत्	१०८
गज	११०	ताल	१४२
गण	६७	तुण्ड	११२
गण्ड	४९, ११२	तुरङ्ग	११६
गन्ध	११६	तूल	१४२
गर	३६	त्याग	३६
गरुत्	१०८	[द]	
गल	४३	दन्त	४३
गिरि	४३	दशनं	४३
गुण	६७	दारा,	१०६
गुल्फ	४९	दिवस	१००
गोचर	३७	दीप	७७
ग्रन्थि	१०९	दूत	१११
[घ]		दूति	१०९
घट	३७, ६४	देव	४३
घस्र	१००	देवल	१४२

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by S3 Foundation USA

शब्दः	सूत्र-संख्या
दोष्	४३
[ध]	
धनु	५१
धूर्त	१११
ध्वज	११०
ध्वनि	१०९
[न]	
नख	४३
नर	४९
नाक	४३
नाडीव्रण	१०७
नाभि (क्षत्रिय-राजार्थे)	१६
नितम्ब	११५
निधि	४१
निर्व्यूह	११६
नीरद	४९
[प]	
पङ्क	४३
पट	६४
पथिक	१२५
पर्वत	४३
पल्लव	११६
पल्वल	११६
पाक	३६
पाणि	११७
पाषण्ड	११२
पाषाण	६७
पुङ्ख	११६
पुञ्ज	११०
पुरुष	४९
पुरोडाश	११३
पूग	११५
प्रपद	४९
प्रभु	५१
[फ]	
फेन	७४
[ब]	
बलि	१०९
बस्ति	११७
बुद्बुद	११४
[भ]	
भरण्ड	११२
भीम	८३
भुज	४३
भृत्र	१५६
[म]	
मठ	११६
मथिन्	११५
मरुत्	१०८
महानस	९६
मार्गण	४३
मुञ्ज	११०
मुण्ड	११२
मुनि	१०९
मुहूर्त	१११
मृदङ्ग	११७

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by S3 Foundation USA

शब्दः	सूत्र-संख्या
मेघ	४९
मेरु	५७
मौलि	१०९
[य]	
यज्ञ	४९
यान	३९
यूप	७७
[र]	
रङ्ग	१८८
रथ	७७
रवि	१०९
रश्मि	१००
राग	१८८
राजन्	४८
राशि	१०१
रेफ	११६
[ल]	
लाज	१०६
[व]	
वत्स	९६
वरण्ड	११२
वह्नि	७
वंश	११३
वात	१११
वायस	९६
विस्तर	३७
वृक्ष	९३
वृष	९३

शब्दः	सूत्र-संख्या
वृषण	१४२
वृष्णि	७
व्रात	१११
[श]	
शङ्कु	१४७
शब्द	११४
शिखण्ड	११२
शिरोरुह	४३
[ष]	
षण्ड	११२
[स]	
सङ्ग	११६
समय	८६
समुद्ग	११६
समुद्र	४३
सारथि	११७
सीर	१३८
सुर	४३
सूत	११
सेतु	५७
सोम	८३
स्तन	४३
स्तम्ब	११५
स्तम्भ	८०
स्तवक (स्तबक)	६१
स्वर्ग	४३
[ह]	
हनु	५१
हय	८६
हस्त	१११

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by S3 Foundation USA

स्त्रीलिङ्ग-शब्दाः

शब्दः	सूत्र-संख्या
[अ]	
अङ्गुलि	२४
अटवी	१४०
अतिथी	१०
अप्	२९
अप्सरस्	१५३
अवनि	६
अशीति	१३
अश्रि/अश्री	१३
आजि	१६१
आपद्	२७
आशिष्	२८
[उ]	
उपानह्	२०
उषा/उषस्	२७
उष्णिह्	२०
[ओ]	
ओषधि	२४
[औ]	
औचिती	१०
[क]	
कटि	२४
कटी	१०
काष्ठा	७२
किकि	२५
कुटि	२६
कुटी	१०

शब्दः	सूत्र-संख्या
कुरू	११
कुहू	५२
कृति	९
कृषि	२४
कृषी	१०
केलि	२५
कोटि	१४६
क्षुध्	२७
[ख]	
खनि	२४
खनी	१०
खारी	३२
[ग]	
गिर्	२८
ग्रामता	१७
ग्लानि	६
[च]	
चत्वारिंशत्	१३
चमू	४
चातुरी	१०
चुल्लि	३२
[छ]	
छदि	१३६
छर्दि	१३६
छवि	२५
[ज]	
ज्योक्	३०
[त]	
तनु	५२

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by S3 Foundation USA

शब्दः	सूत्र-संख्या
तारा	३३
तिथि	२५
तृष्	२३
तृटि	३१
त्रिंशत्	१३
त्रुटि	२६
त्वच्	३०
त्विष्	२३
[द]	
दर्वि	२४
दर्वी	१०
दंष्ट्रा	११५
दिश्	२०
दीधिति	१०१
दुहितृ	३
दिव्	४५
द्यू	४
द्यो	४५
द्वार्	२८
[ध]	
धारा	३३
धुर्	२८
धूलि	२५
धेनु	५२
[न]	
ननान्दृ	३
नवति	१३
नाडि	२५

शब्दः	सूत्र-संख्या
नाभि	१५
नालि	२५
निम्नगा	१८
नौ	३०
[प]	
पङ्क्ति	२६
पञ्चाशत्	१३
पट्वी/पटु	१०, १७४
परिषद्	२७
पुर्	२८
पोतृ	३
प्रतिपद्	२७
प्रावृष्	२३
प्रियङ्गु	५२
[ब]	
ब्राह्मणता	१७
[भ]	
भस्त्रा	१५५
भास्	२०
भू	१२, १८
भूमि	६, १८
भ्रुकुटि	२६
[म]	
मातृ	३
मात्रा	१५५
मानिका	१०५
मुद्	२७
[य]	
यवागू	३०

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by S3 Foundation USA

शब्दः	सूत्र-संख्या	शब्दः	सूत्र-संख्या
याच्ञा	४०	वेणि	३२
यात्रा	१५५	वेदि	२४
युध्	२७	वेशि	२४
योषित्	१८	[श]	
[र]		शरद्	२७
रज्जु	५२	शलाका	३४
राजि	२६	शष्कुलि	२६
रात्रि	२५	शानि	२४
रुचि	२५	शुक्लता	१७
रुष्/रुह्	२३	श्री	१२
[ल]		[ष]	
लक्षा	१४६	षष्टि	१३
लता	१८	[स]	
[व]		सप्तति	१३
वनिता	१८	समिध्	२७
वस्त्रा	१५५	सम्पद्	३७
वर्ति	२६	सम्बध्या	३१
वर्षा	२९	सरयु	५२
वलि	२६	सरित्	१८
वाच्	३०	संविद्	२७
विट्/विष्	२३	संसद्	२७
विदि	२४	सामग्री	१०
विद्या	११	सामासिकता	२९
विद्युत्	१८	सीमा	३१
विपद्	२७	सुमनस्	२९
विप्रुष्	२३	सौदामनी	१८
विंशति	१३	स्फिच्	३०
वीचि	२५	स्रज्	२०, ३०

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by S3 Foundation USA

शब्दः	सूत्र-संख्या
स्रुच्	२०
स्वसृ	३

[ह]

हरीतकी	१६३

नपुंसकलिङ्ग-शब्दाः

शब्दः	सूत्र-संख्या

[अ]

अक्ष (इन्द्रियार्थे)	११२
अक्षि	१३७, १६६
अग्र	९०
अङ्क	१६६
अङ्ग	१६६
अङ्गुलित्र	९०
अच्छावाकीय	१२३ (क)
अजर	९०
अजस्र	९०
अजिन	७५
अजिर	९०
अधिस्त्रि	१२३ (ख)
अध्यात्म	८४
अनृत	१६५
अन्तरीप	७८
अन्न	१३७
अपत्य	१६८
अपथ	१३१
अभ्र	५०
अमृत	१६५
अम्बर	९०
अम्बरीष	९४
अवतान	१६५
अश्र	९०
अश्रु	५४
अहन्	१०२
अहोरात्रे (अभाषायाम्)	१२५
अंश	११३
अंशुक	६२

[आ]

आकाश	१६६
आज्य	१६८
आधिपत्य	१२३ (क)
आमलक	१६२
आम्र	१६२
आस्पद	१६६
आस्य	१६६

[इ]

इध्म	८४
इनसभ	१२८
इन्द्रिय	८७

[उ]

उक्थ	७१
उडुप	७८
उत्तरीय	८७
उदर	९०
उदश्वित्	१६४
उल्मुक	६२

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by S3 Foundation USA

शब्दः	सूत्र-संख्या
उष्ण	६८
ऊर्ण	२१
[ऋ]	
ऋजीष	९४
ऋण	६८
[औ]	
औचित्य	१२१
औष्ट्र	१२३ (क)
[क]	
कंस	९९
कण्व	१६६
कन्दर	९०
कराट	६५
कलत्र	९०
कल्माष	९४
कवच	१६९
कव्य	१६८
कशेरु	५८
कानन	७५, १३७
कापेय	१२३ (क)
कार्मुक	१३७
काव्य	१६८
काश्मीर	९०
काष्ठ	७१
किरीट	६५
किल्बिष	९४
किसलय	८७
कुङ्कुम	८४

शब्दः	सूत्र-संख्या
कुटीर	९०
कुटुम्ब	१६९
कुड्य	१६८
कुण्ड	१६६
कुल	१४१
कुलिश	१६६
कुलीर	९०
कुसुम	१५८
कुहर	९०
कूल	१४१
कृच्छ्र	९०
केदार	९०
केयूर	९०
क्रूर	९०
क्षत्र	९०
क्षिप्र	९०
क्षुद्र	९०
क्षेत्र	९०
[ग]	
गभीर	९०
गह्वर	९०
गीत	१२०
गुल्म	८४
गृहस्थूण	२२
गोत्र	९०
गोशाल	१३०
[च]	
चत्वर	९०

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by S3 Foundation USA

शब्दः	सूत्र-संख्या
चर्मन्	१४९
चामर	९०
चातुर्य	१२१
चित्त	१६५
चित्र	९०
चिबुक	६२
चिह्न	७५
[छ]	
छत्र	९०, १५४
[ज]	
जगत्	१६४
जघन	७५
जठर	९०
जतु	५४, ५८
जल	१३७
जानु	५४
[त]	
तक्र	९०
तनुष्	१३४
तन्त्र	९०
तपस्	१५२
तलभ	८१
तल्प	७८
तालु	५४
तीर	९०
तुहिन	७५
तूर्य	१६८
तोरण	६८

शब्दः	सूत्र-संख्या
त्रपु	५४
त्रिभुवन	४४
त्रिरात्र	१३२
त्रिविष्टप	४४
[द]	
दधि	१६६
दिन	१०२
दुःख	१६९
दूर	९०
दैव	१६६
द्वन्द्व	१६९
द्वार	९०
द्वैहायन	१२३ (क)
[ध]	
धन	१३७
धनुष्	१३४
धान्य	१६८
धृष्य	१६८
[न]	
नयन	१३७
नवनीत	१६५
नामन्	१५१
नार	९०
निमित्त	१६५
निम्न	७५
नीर	९०
[प]	
पञ्जर	९०

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by S3 Foundation USA

शब्दः	सूत्र-संख्या
पण्य	१६८
पत्तन	१५८
पद	३८
पनस	९७
पर्ण	६८
पलित	१६५
पाणिपाद	१२४
पाप	७८
पिच्छ	१६९
पितापुत्रक	१२३ (क)
पित्त	१६५
पीठ	१६६
पीयूष	९४
पुण्याह	१३१
पुरीष	९४
पुष्कर	९०
पुष्प	७८
पृषत्	१६४
पृष्ठ	७१
प्रातिपदिक	१२
[ब]	
बडिश	१६९
बर्ह	१६९
बल	१५८
बिम्ब	१६९
बिस	९७
बीज	१६६
बुस	९७

शब्दः	सूत्र-संख्या
ब्राह्मण्य	१२२
[भ]	
भग	३८
भय	३८
भलत्र	९०
भीर	९०
[म]	
मद्य	१६८
मनस्	१५२
मस्तु	५८
मित्र (सूर्यवाची नहि)	९०
मिथुन	७५
मुकुट	६५
मुख	१३७
मूत्र	९०
मूल्य	१६८
[य]	
यकृत्	१६४
यन्त्र	९०
यशस्	१५२
यादस्	१९
युग्म	८४
[र]	
रजत	१६५
रण	६८, १५८
रत्न	७५
रन्ध्र	९०
राट	६५

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by S3 Foundation USA

शब्दः	सूत्र-संख्या
रुक्म	८४
रुधिर	१३७
रूप	७८
रूप्य	१६८
रोमन्	१५१
[ल]	
ललाट	६५
लवण	६८
लिङ्ग	३८
लोष्ट	६५
लोह	१३७
[व]	
वट	६५
वन	७५
वप्र	९०
वर	१६९
वर्ण्य	१६८
वर्मन्	१४९
वसु	५५
वस्तु	५८
वस्त्र	९०
विचित्र	९०
वित्त	१६५
विपिन	७५
वियत्	१६४
विवर	१३७
वीट	६५
वृजिन	७५
वृत्त	१६५
वृन्दारक	१६९
वेतन	७५
वैर	९०
व्रत	१६५
[श]	
शकन्	१६४
शरच्छाय	१२७
शरीर	९०
शशोर्ण	२२
शष्प	७८
शस्त्र	९०
शालूक	६२
शासन	७५
शिक्य	१६८
शिरीष	९४
शिल्प	७८
शुक्र (अदेवतायाम्)	९१
शुक्लत्व	१२१
शुल्ब	१५८
शृङ्गाटक	६५
शौक्ल्य	१२१
श्मशान	७५
श्राद्ध	१६६
श्वभ्र	९०
[स]	
सकृत्	१६४
सक्थि	१६६

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by S3 Foundation USA

शब्दः	सूत्र-संख्या
सख्य	१२३ (क)
सत्य	१६८
समीप	७८
सस्य	१६८
सहस्र	१४४
सामग्र्य	१२१
साहस	९७
सिक्थ	७१
सिध्म	८४
सैन्य	१६८
सोपान	७५
स्तेय	१२३ (क)
स्थल	१४१
स्फार	९०
स्वादु	५४
[ह]	
हर्म्य	१६८
हल	१३७
हविष्	१३४
हव्य	१६८
हसन	११९
हसित	१२०
हृदय	८७
हेमन्त	१२५

पुँल्लिङ्ग-नपुंसकलिङ्ग-शब्दाः

शब्दः	सूत्र-संख्या
[अ]	
अङ्कुश	१८१
अनीक	६३
अन्त	१८०
अन्धकार	९२
अन्वय	८८
अभिधान	७६
अम्बुद	१८२
अयुत	१४५
अरण्य	१७९
अर्धर्च	१७९
अष्टापद	१८२
[आ]	
आकाश	१८१
आयुध	१८०
[उ]	
उत्पल	१५९
उद्यम	१७८
[ऐ]	
ऐरावत	१७७
[औ]	
औषध	१८०
[क]	
ककुद	१८२
कबन्ध	१८०
कमल	१४३, १५९
काश	१८१
कीट	६६
कुञ्ज	१७९
कुण्डल	१८३

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by S3 Foundation USA

शब्दः	सूत्र-संख्या
कुथ	१७९
कुलिश	१८१
कुश	१८१
कूर्च	१७९
क्ष्वेलित	१७७
[ख]	
खण्ड	१८१
खिल	१४३
[ग]	
गाण्डीव	१३९
गृह	१८२
[घ]	
घृत	१७७
[छ]	
छत्र	१५७
[त]	
तल	१४३
[द]	
दण्ड	१८१
दर्प	१७९
दर्भ	१७९
दृढ	१७८
देह	१८२
दैव	१६७
[न]	
निगल	१४३
निदाघ	१७८
[प]	
पटह	१८२

शब्दः	सूत्र-संख्या
पट्ट	१८२
पत्र	१५७
पद्म	१५१
पलक	१४३
पलाल	१४३
पवित्र	१५७
पात्र	१५७
पार्श्व	१८१
पुच्छ	१७९
प्रयुत	१४५
प्रस्थ	१७९
[ब]	
बिडाल	१४३
बुस्त	१७७
ब्रह्मन्	१५०
[भ]	
भूत	१७७
[म]	
मङ्गल	१४३
मण्ड	११२, १८१
मुसल	१४३
मूल	१४३
मृणाल	१४३
मेह	१८२
[ल]	
लोहित	१७७
[व]	
वाल	१४३
व्रज	१७९

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by S3 Foundation USA

शब्दः	सूत्र-संख्या
[श]	
शत	१४५
शल्य	१७८
शव	१८१
शील	१४३
शूल	१४३
शृङ्ग	१७८
[स]	
साल	१४३
सूत्र	९०, १५७
सैन्धव	१८१

नपुंसकलिङ्ग-पुँल्लिङ्ग-शब्दाः

शब्दः	सूत्र-संख्या
[अ]	
अवार	९२
अव्यय	८८
अंस	९८
[आ]	
आढक	१०४
आलान	७६
आश्रम	८५
आसन	७६
[उ]	
उद्दाम	८५
उद्यान	७६
उपवास	९८
उशीर	९२

शब्दः	सूत्र-संख्या
[क]	
कट	६६
कटक	६३
कण्टक	६३
कपट	६६
कमण्डलु	५६
करीष	९५
कर्पट	६६
कवाट	६६
कषाय	८८
कंस	९९
काण्ड	४७
कार्पास	९८
कार्षापण	६९
कास	९८
कांस	९८
कुट	६६
कुणव	७९
कुतप	७९
कुसुम	८५
कूट	६६
क्षीर	९२
क्षेम	८५
क्षोम	८५
[ग]	
गाथ	७३
गोमय	८८
[च]	
चक्र	९२

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by S3 Foundation USA

शब्दः	सूत्र-संख्या
चन्दन	७६
चमस	९८
चरण	६९
चषक	६३
चूर्ण	६९
[ज]	
जृम्भ	८२
[त]	
तडाक	६३
तप	१५२, ३७
तालक	६३
तिमिर	९२
तीर्थ	७३
तृण	६९
तोमर	९२
[द]	
दाडिम	८५
द्रोण	१०४
द्वीप	७९
[न]	
नट	६६
नलिन	७६
निकट	६६
निर्यास	९८
निष्क	६३
नेत्र	९०, १३९
[प]	
पार	९२

शब्दः	सूत्र-संख्या
पिटक	६२
पिण्डक	६३
पिनाक	६३
पुलाक	६३
पुलिन	७६
पुस्तक	६३
प्रोथ	७३
[फ]	
फलक	६३
[ब]	
बाण	४७
[भ]	
भवन	७६
भाण्डक	६३
भृङ्गार	९२
[म]	
मद्गु	५६
मधु	५६
मन्दार	९२
मलय	८८
मस्तक	६३
मान	७६
मास	९८
मांस	९८
मिष	९५
मोदक	६३
[य]	
यान	७६
यूथ	७३

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by S3 Foundation USA

शब्दः	सूत्र-संख्या
यूष	९५
[र]	
रस	९८
[व]	
वक्त्र	१३९
वज्र	९२
वर्चस्क	६३
वर्ष	९५
वसन	७६
वास	९८
विटप	७९
विभावन	७६
विमान	७६
विष	९५
विषाण	६९
वृषण	६९
व्रण	६९
[श]	
शण्डक	६३
शयन	७६
शर	१६९
शिशिर	९०, १२५
शीधु	५६
शुष्क	६३
शूर्प	७९
शृङ्गार	९२
[स]	
सक्तु	५९,
समान	७६
सरक	६३
सङ्ग्राम	८५, १६०
सानु	५६
सार	९२
सुवर्ण	६९
स्थान	७६
स्वर्ण	६९

स्त्रीलिङ्ग-पुँल्लिङ्ग-शब्दाः

शब्दः	सूत्र-संख्या
[इ]	
इषु	४६
इषुधि	४२
[औ]	
औपगव	१७५
[क]	
कण्डु	१७३
कर्कन्धु	१७३
किष्कु	१७३
[ग]	
गो	१७२
[त]	
त्रुटि	१७२
[द]	
दुन्दुभि (अक्षार्थे स्त्री. भेर्यर्थे पुं.)	१४, १६
[प]	
पाटलि	१७२

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by S3 Foundation USA

शब्दः	सूत्र-संख्या
[ब]	
बाहु	४६
[म]	
मरीचि	१७२
मसि	१७२
मुष्टि	१७२
मृत्यु	१७३
[य]	
यष्टि	१७२
रेणु	५२, १७३
वस्ति	११७, १७२
शाल्मलि	१७२

पुँल्लिङ्ग-स्त्रीलिङ्ग-शब्दाः

शब्दः	सूत्र-संख्या
[अ]	
अरणि	५
अशनि	५
[ऊ]	
ऊर्मि	८
[क]	
कर्कटरज्जु	५३
[भ]	
भरणि	५
[म]	
मणि	११६, १७२
[य]	
योनि	८
[श]	
श्रोणि	

स्त्रीलिङ्ग-नपुंसकलिङ्ग-शब्दाः

शब्दः	सूत्र-संख्या
[अ]	
अर्चिष्	१३५
[ग]	
गोशाला, गोशालम्	१२९
[प]	
पञ्चमूली	१३३
[ब]	
ब्राह्मणसेना, ब्राह्मणसेन	१२९
[य]	
यवसुरा, यवसुर	१२९
[श]	
श्वनिशा, श्वनिश	१२९

नपुंसकलिङ्ग-स्त्रीलिङ्ग-शब्दाः

शब्दः	सूत्र-संख्या
[ऊ]	
ऊर्ण, ऊर्णा	२१
[स]	
स्थूण, स्थूणा	२१

अविशिष्ट लिङ्ग-शब्दाः
(त्रिषु लिङ्गेषु शब्दाः)

शब्दः	सूत्र-संख्या
[अ]	
अव्ययशब्दाः	१८
अस्मद्	१८
[इ]	
[illegible]	१८

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by S3 Foundation USA

शब्दः	सूत्र-संख्या
[क]	
कति	१८४
[प]	
पक्तव्य	१८७
पञ्चन्	१८५
पटु	१७४
[य]	
युष्मद्	१८४
[श]	
शुक्ल	१८६
[ष]	
षप्	१८५
[स]	
सर्व	१८९,
सीधु	५६, १७३

।। इति आचार्य-डॉ० नारायणशास्त्रिकाङ्कर-विद्यालङ्कार-द्वारा
व्याख्यात-लिङ्गानुशासन-कोष-शब्दानां
वर्णमालाक्रमेण सूत्रसंख्या-सहितं
सङ्कलनं सम्पूर्णम्।।

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by S3 Foundation USA

लिङ्गानुशासन-कोषे

प्रयुक्त-ग्रन्थ / ग्रन्थकार-सङ्केताः

क्र.सं.	संक्षिप्त-नाम	सम्पूर्ण-नाम
१.	अजयः	अजयकोषः
२.	अथर्व०	अर्थवेद-संहिता
३.	अ० आ०	अदादिगणे आत्मनेपदी
४.	अ० उ०	अदादिगणे उभयपदी
५.	अ० प०	अदादिगणे परस्मैपदी
६.		अनेकार्थकैरवाकरकौमुदी
७.	अमरः	अमरकोषः
८.		अमरकोष- 'सुधा' व्याख्यायां भानुजिदीक्षितः
९.		अमरदत्तः
१०.		अमरमाला
११.		आपिशलिः
१२.	उ०	उणादौ
१३.		उत्पलिनी-कोषः
१४.	ऋ० सं०	ऋग्वेद-संहिता
१५.	ऐत० आ०	ऐतरेयारण्यकम्
१६.	ऐत० ब्रा०	ऐतरेय-ब्राह्मणम्
१७.	कपिष्ठल० सं०	कपिष्ठलकठ-संहिता
१८.		काठक-संकलम्
१९.	काठ० सं०	काठक-संहिता
२०.		कात्यकोषः
२१.		काशकृत्स्नधातुपाठः
२२.		केशवः
२३.	कौषी० ब्रा०	कौषीतकि-ब्राह्मणम्
२४.	क्र्या० आ०	क्र्यादि-गणे आत्मनेपदी
२५.	क्र्या० उ०	क्र्यादि-गणे उभयपदी
२६.	क्र्या० प०	क्र्यादि-गणे परस्मैपदी
२७.	गोपथ० पू०	गोपथ-ब्राह्मणम् पूर्वभागः

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by S3 Foundation USA

क्र.सं.	संक्षिप्त-नाम	सम्पूर्ण-नाम
२८.	गोपथ० उ०	गोपथ-ब्राह्मणम् उत्तरभागः
२९.	चन्द्रगोमिः	चन्द्रगोमि-कोषः
३०.	चु० आ०	चुरादि-गणे आत्मनेपदी
३१.	चु० उ०	चुरादि-गणे उभयपदी
३२.	चु० प०	चुरादि-गणे परस्मैपदी
३३.	छा० उ०	छान्दोग्योपनिषद्
३४.	छा० ब्रा०	छान्दोग्य-ब्राह्मणम्
३५.	जु० आ०	जुहोत्यादि-गणे आत्मनेपदी
३६.	जु० उ०	जुहोत्यादि-गणे उभयपदी
३७.	जु० प०	जुहोत्यादि-गणे परस्मैपदी
३८.	जैमि० ब्रा०	जैमिनीय-ब्राह्मणम्
३९.	जैमिनीयो०	जैमिनीयोपनिषद्
४०.	त० आ०	तनादि-गणे आत्मनेपदी
४१.	त० उ०	तनादि-गणे उभयपदी
४२.	त० प०	तनादि-गणे परस्मैपदी
४३.	तां० ब्रा०	ताण्ड्य-महाब्राह्मणम्
४४.	तु० आ०	तुदादि-गणे आत्मनेपदी
४५.	तु० उ०	तुदादि-गणे उभयपदी
४६.	तु० प०	तुदादि-गणे परस्मैपदी
४७.	तै० ब्रा०	तैत्तिरीय-ब्राह्मणम्
४८.	तै० आ०	तैत्तिरीयारण्यकम्
४९.	तैत्ति० उ०	तैत्तिरीयोपनिषद्
५०.	तैत्ति० सं०	तैत्तिरीय-संहिता
५१.		त्रिकाण्ड-शेषः
५२.	त्रि० लि०	त्रिषु लिङ्गेषु
५३.	दि० आ०	दिवादि-गणे आत्मनेपदी
५४.	दि० उ०	दिवादि-गणे उभयपदी
५५.	दि० प०	दिवादि-गणे परस्मैपदी
५६.		द्विरूप-कोषः
५७.	धनञ्जयः	धनञ्जय-कोषः

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by S3 Foundation USA

क्र.सं.	संक्षिप्त-नाम	सम्पूर्ण-नाम
५८.	धरणिः	धरणि-कोषः
५९.	न० लि०	नपुंसकलिङ्गे
६०.		नानार्थ-कोषः
६१.		नाममाला
६२.		निगमः
६३.	निघं०	निघण्टुः
६४.	निरु०	निरुक्तम्
६५.	पा० अ०	पाणिनीया अष्टाध्यायी
६६.	पुं०	पुँल्लिङ्गे
६७.	बोपालितः	बोपालित-कोषः
६८.	भ्वा० अ०	भ्वादि-गणे आत्मनेपदी
६९.	भ्वा० उ०	भ्वादि-गणे उभयपदी
७०.	भ्वा० प०	भ्वादि-गणे परस्मैपदी
७१.	मनु०	मनु-स्मृतिः
७२.		महाभाष्यम्
७३.		माघः
७४.	मेदिनी	मेदिनीकोषः
७५.	मैत्रा० सं०	मैत्रायणी-संहिता
७६.	यजुः सं०	यजुर्वेद-संहिता
७७.		रत्नकोषः
७८.		रत्नमाला
७९.	रभसः	रभस-कोषः
८०.	रुद्रः	रुद्र-कोषः
८१.	रु० आ०	रुधादि-गणे आत्मेनपदी
८२.	रु० उ०	रुधादि-गणे उभयपदी
८३.	रु० प०	रुधादि-गणे परस्मैपदी
८४.	वाचस्पतिः	वाचस्पति-कोषः
८५.	विक्रमः	विक्रमादित्य-कोषः
८६.	लि० सू०	लिङ्गानुशासन-सूत्रम्
८७.	विश्वः	विश्व-कोषः

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by S3 Foundation USA

क्र.सं.	संक्षिप्त-नाम	सम्पूर्ण-नाम
८८.	वि० प्र०	विश्व-प्रकाशः
८९.	वैजयन्ती	वैजयन्ती-कोषः
९०.	व्याडिः	व्याडि-कोषः
९१.	शत० ब्रा०	शतपथ-ब्राह्मणम्
९२.	शब्दतरङ्गिणी	शब्दतरङ्गिणी-कोषः
९३.	शब्दार्णवः	शब्दार्णव-कोषः
९४.		शाकपूणिः
९५.	शाता० स्मृ०	शातातपस्मृतिः
९६.	शाश्वतः	शाश्वत-कोषः
९७.	शां० आ०	शाङ्ख्यारण्यकम्
९८.		शिशुपालवध-महाकाव्यम्
९९.	श्रीहर्षः	श्रीहर्ष-कविः
१००.	षड्विं० ब्रा०	षड्विंश-ब्राह्मणम्
१०१.	संसारावर्त्तः	संसारावर्त्त-कोषः
१०२.	सारस्वतः	सारस्वत-कोषः
१०३.	सि० कौ०	सिद्धान्तकौमुदी
१०४.		सिद्धान्तकौमुद्याम् उणादौ तत्त्वबोधिनीकारः
१०५.		सिद्धान्तकौमुद्याम् उणादौ बालमनोरमाकारः
१०६.		सिद्धान्तकौमुद्यां भट्टोजिदीक्षितः
१०७.		सुबन्धुः
१०८.	स्त्री०	स्त्रीलिङ्गे
१०९.	स्वा० आ०	स्वादि-गणे आत्मनेपदी
११०.	स्वा० उ०	स्वादि-गणे उभयपदी
१११.	स्वा० प०	स्वादि-गणे परस्मैपदी
११२.		स्वामी
११३.		हट्टचन्द्रः
११४.	हलायुधः	हलायुध-कोषः
११५.	हारावलिः	हारावलि-कोषः
११६.	हैमः	हैम-कोषः

—x—x—x—

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by S3 Foundation USA

CC-0: Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by S3 Foundation USA

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by S3 Foundation USA

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by S3 Foundation USA

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by S3 Foundation USA

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by S3 Foundation USA

विश्वविद्यालयों/परीक्षा बोर्डों से स्वीकृत/उपयोगी पुस्तकें

राष्ट्रपति-सम्मानित डॉ. नारायणशास्त्रिकाङ्कर

विरचित/व्याख्यात/सम्पादित पुस्तकें

1.	संक्षिप्त-लघुकौमुदी (सम्पूर्ण)	30.00
2.	संक्षिप्त-लघुकौमुदी (संज्ञा-सन्धि कारक-समास-स्त्रीप्रत्यय-प्रकरण)	30.00
3.	सरल-शिवराज-विजयः	30.00
4.	एकाङ्कि-संस्कृत-नवरत्न-सुषमा	150.00
5.	एकाङ्कि-संस्कृत-नवरत्न-मञ्जूषा	160.00
6.	अभिनव-संस्कृत-सुभाषित-सप्तशती	160.00
7.	हितोपदेश (मित्रलाप-पद्यभागमात्र)	50.00
8.	हार्दिकोद्गार-पञ्चाशिका	10.00
9.	सुवर्ण-नक्षत्र-मालिका	10.00
10.	अभिनव-संस्कृत-कथाः	150.00
11.	अभिनव-संस्कृत-कथा (हिन्दी-रूपान्तरण में)	200.00
12.	श्रीशिक्षकस्तवराजः	10.00
13.	विनायकानामभिनन्दनम्	10.00
14.	संस्कृत-प्रचार-प्रसारोपयोगी 20 सूत्री कार्यक्रमः	10.00
15.	श्रीबाबुदेव-गीता (हिन्द्यङ्ग्रेजी-रूपान्तर-सहिता)	125.00
16.	सुबोध-शब्दधातु-रूपावलिः	15.00
17.	संस्कृत-निबन्ध-माधुरी	300.00
18.	रचनाभ्युदयं महाकाव्यम्	500.00
19.	उणादि-पदानुक्रम-कोषः	206.00
20.	103 संस्कृतकथाः	225.00
21.	राष्ट्रस्मृतिः	480.00
22.	अभिनव-संस्कृतकथा-पञ्चाशिका (हिन्दी-रूपान्तरण में)	500.00
23.	अभिनव-संस्कृतकथा-पञ्चाशिका	500.00
24.	सरल-शिवराज-विजयः (हिन्दी-रूपान्तरण में)	200.00
25.	ज्ञान-गङ्गा-तरङ्गिणी (हिन्दी-रूपान्तरण में)	250.00
26.	संस्कृत-नाट्य-रत्नावलिः	500.00
27.	मानस-महाकाव्यम्	600.00

राष्ट्रपति-सम्मानित म. म. पण्डित श्री नवलकिशोरकाङ्कर

विरचित पुस्तकें

1.	राष्ट्रवेदः	300.00
2.	शास्त्र-सर्वस्वम्	160.00
3.	यात्रा-विलासम्	150.00
4.	प्रबन्ध-मकरन्दः	160.00
5.	प्रबन्धामृतम्	150.00
6.	धर्म-कर्म-सर्वस्वम्	160.00
7.	पत्र-साहित्यम्	175.00
8.	द्विज-दशा-प्रकाशः	विप्र-कृपा
9.	नवल-सतसई	175.00
10.	स्वामि-श्रीमाधवानन्द-महाराजानां जीवन-दर्शनम्	10.00
11.	यात्रा के सुखद क्षण	40.00
12.	लाखीणा बोल	40.00
13.	सैल-सपाटा	40.00
14.	राजस्थानी कादम्बरी	150.00
15.	कळ्जुग सतसई	175.00
16.	कुमारसम्भवम्-पञ्चम सर्ग	30.00
17.	किरातार्जुनीयम्-प्रथम सर्ग	25.00

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by S3 Foundation USA